शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः

काशीज्ञानसिंहासनाधीश्वरश्री १००८ जगद्गुरु
डॉ० चन्द्रशेखरशिवाचार्यमहास्वामीना
विरचितः

प्रकाशकः
शैवभारती - शोधप्रतिष्ठानम्
जंगमवाड़ीमठ, वाराणसी-२२१००१

शोधप्रकाशन-ग्रन्थमाला-८

शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः

श्रीकाशीज्ञानसिंहासनाधीश्वरश्री १००८ जगद्गुरु-

डॉ० चन्द्रशेखरशिवाचार्यमहास्वामिना

विरचितः

प्रकाशकः

शैवभारती-शोधप्रतिष्ठानम्

जंगमवाड़ी मठ, वाराणसी-२२१००१

अनुसन्धानप्रबन्धोऽयं सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेन
विद्यावाचस्पति (डी. लिट्.) इत्युपाध्यर्थं स्वीकृतः ।

प्रकाशक:
शैवभारती-शोधप्रतिष्ठानम्
डी. ३५/७७, जंगमवाड़ी मठ
वाराणसी—२२१००१

© शैवभारती-शोधप्रतिष्ठानम्

प्रथमं संस्करणम्, सन् १९९६

मूल्यम् : रु० ३०० (सजिल्द)
रु० २०० (अजिल्द)

मुद्रक :
शिवम् प्रिन्टर्स
सी० २७/२७३, इण्डियन प्रेस कालोनी
मलदहिया, वाराणसी—२२१००२

Research Publications Series-8

ŚAKTIVIŚIṢṬĀDVAITA-TATTVATRAYA-VIMARŚAḤ

Shri Kashi Jnanasimhasanadhiswar

Shri 1008 Jagadguru

Dr. Chandrashekhar Shivacharya Mahaswamiji

SHAIVA BHARATI SHODHA PRATISHTHANAM

D. 35/77, Jangamawadimath, Varanasi-221001

Originally a D. Litt. Thesis, approved by the Sampurnanand Sanskrit University, Varanasi.

Published by :
SHAIVA BHARATI SHODHA PRATISHTHANAM
D. 35/77, Jangamawadimath
Varanasi-221 001

© Shaiva Bharati Shodha Pratishthanam

First Published 1996

Price : Rs. 300 (Hb)
Rs. 200 (Pb)

Printed at :
Shivam Printers
C. 27/273, Indian Press Colony
Maldahia, Varanasi-221 002

समर्पण



शैवभारती शोधप्रतिष्ठान की स्थापना के प्रेरणास्त्रोत महान् विभूति
काशी विश्वाराध्य ज्ञानसिंहासन के ८५ वें पीठाधिपति
लिंगैक्य श्री १००८ जगद्गुरु विश्वेश्वरशिवाचार्य
महास्वामीजी को यह वाङ्मय-सुमन समर्पित

निदेशकीयं वक्तव्यम्

२०५० वैक्रमे वत्सरे स्वकीये श्रावणमासीयशिवपूजानुष्ठानावसरे श्रीकाशीज्ञानसिंहासनाधीश्वरा जगद्गुरवः श्री १००८ डॉ० चन्द्रशेखरशिवाचार्यमहास्वामिनः स्वपरमगुरुभिः श्री १००८ जगद्गुरुवीरभद्रशिवाचार्यमहास्वामिभिः संकल्पितस्य, स्वगुरुभिः श्री १००८ जगद्गुरुविश्वेश्वरशिवाचार्यमहास्वामिभिः परिकल्पितस्य श्रीजगद्गुरुविश्वाराध्यजनकल्याणप्रतिष्ठानस्याङ्गत्वेन शैवभारतीशोधप्रतिष्ठानस्य उद्देश्यादिकं निर्धारितवन्तः। तदनु च पुरुषोत्तममासमुद्दिश्य समायोजिते शिवपूजानुष्ठानावसरे प्रयागे (२०-८-९३ दिनाङ्के) सविधि प्रतिष्ठानस्यास्य स्थापनां व्यदधुः। वीरशैवीयसिद्धान्तानां परिपोषकस्य शैवागमस्य पाशुपत-सिद्धान्तशैव-प्रत्यभिज्ञाशाखा-साहित्यस्य सामान्येन, वीरशैवागमानां शक्तिविशिष्टाद्वैतदर्शनस्य च ग्रन्थानां विशेषेण प्रकाशनम्, तत्र शोधप्रक्रियायाः परिचालनं परिवर्धनं च, अखिलभारतीयविद्वद्गोष्ठीनां समायोजनं चास्य प्रतिष्ठानस्य मुख्यमुद्देश्यं निर्धारितम्। तदनुसृत्य प्रतिष्ठानेनानेन १९९४ ई० वर्षे महाशिवरात्रिपर्वावसरे चन्द्रज्ञानादिग्रन्थचतुष्टयस्य, १९९५ ई० वर्षीय-महाशिवरात्रिपर्वणि ग्रन्थत्रयस्य प्रकाशनमकारि। ऐषमश्च महाशिवरात्रिपर्वशुभावसरे ग्रन्थषट्कं प्रकाश्यत इति जानन्त्येव विद्वांसः। समेषामेषां ग्रन्थानां नामानि ग्रन्थान्ते स्थापितायां ग्रन्थसूच्यां द्रष्टुं शक्यन्ते।

एष्वेव वर्तते "शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः" इत्याख्यो ग्रन्थः श्री १००८ डॉ० चन्द्रशेखरशिवाचार्यमहास्वामिभिश्छात्रावस्थायां 'विद्यावाचस्पति' (डी० लिट्०) इत्युपाधिलब्धये संदृब्धः। इतः पूर्वमेभिर्महानुभावैः 'विद्यावारिधि' (पीएच. डी.) इत्युपाधिप्राप्त्यर्थमपि "सिद्धान्तशिखामणिसमीक्षा" इत्याख्यो ग्रन्थः संदृब्ध आसीत्। काशीस्थैः पण्डितप्रकाण्डैरपि तस्य ग्रन्थस्य भूरिशः प्रशंसा कृतेति तद्ग्रन्थावलोकनत एव प्रतीयेत। अस्यापि ग्रन्थस्य तथैव समादरो भवेदित्याशास्महे। अधुना तु वाराणसीस्थेन सम्पूर्णानन्दसंस्कृतविश्वविद्यालयेनास्मै ग्रन्थरत्नाय स्वीयः सर्वोच्चो विद्यावाचस्पत्युपाधिर्वितीर्ण इत्येवास्य ग्रन्थस्य वैशिष्ट्यख्यापनायालम्।

शक्तिविशिष्टाद्वैतदर्शने शिवशक्तिजीवाख्यानि त्रीणि तत्त्वान्यङ्गीक्रियन्ते। तेषां परिचयाय सर्वप्रथमं ग्रन्थेऽस्मिन् वैष्णवागमानां शाक्तागमानां दशविधशैवागमानां च संक्षिप्तः परिचय उपस्थापितः, येन हि पाठका विशालेनागमवाङ्मयेन किञ्चिदिव परिचिताः स्युः। विशालेऽस्मिन्नागमवाङ्मये द्वैतवादिनो द्वैताद्वैतवादिनोऽद्वैतवादिन-

श्चागमा वर्तन्ते। तेषु स्थालीपुलाकन्यायेनात्र द्वैतवादिनं सिद्धान्तशैवमतम्, अद्वैतवादिनं प्रत्यभिज्ञादर्शनं चाश्रित्य द्वैताद्वैतवादिनः शक्तिविशिष्टाद्वैतदर्शनस्य तौलनिकमनुशीलनं समाचरितं द्वितीये परिच्छेदे। अत्र हि शक्तिविशिष्टस्य शिवस्य जीवस्य च स्वरूपं दर्शनत्रयदृष्ट्या विविच्य यो हि निष्कर्षः प्रस्तावितो महास्वामिभिः, स हि तेषां सूक्ष्मेक्षिकामनितरसाधारणीं द्योतयति। अत्र हि प्रत्येकं विषयं द्वैतवादिसिद्धान्तशैवदृष्ट्या अद्वैतवादिप्रत्यभिज्ञादर्शनदृष्ट्या च समुपस्थाप्य सर्वत्र द्वैताद्वैतवादिशक्तिविशिष्टाद्वैतदर्शने कथं कस्मिन्नंशे समन्वयः प्रवर्तत इति, कथं केन प्रकारेण कुत्र कस्य दर्शनस्य वैशिष्ट्यमिति च सुस्पष्टं सप्रमाणं प्रस्तूय केषां केषां दोषाणां परिहाराय सर्वश्रुतीनां समन्वयाय च शक्तिविशिष्टाद्वैतदर्शने कीदृग् रूपमङ्गीकृतमिति प्रसाधयतां वीरशैवाचार्यवर्याणां रागद्वेषादिदोषविरहितां प्रमाणैः परिपुष्टां सर्वत्र समां दृष्टिमभिव्यनक्ति प्रकरणमेतत्। अत्र शक्तिपातप्रक्रिया-मोक्षस्वरूप-ज्ञानकर्मसमुच्चयवादसदृशानां महनीयानां विषयाणामपि यथायथं समीक्षणं वर्तत इति द्वितीयोऽयं परिच्छेदो भारतीयदर्शनवाङ्मये निदर्शनभूतः सुरभारतीसमुपासकैरवश्यं निभालनीय इति प्रवर्तते गुणग्राहकान् प्रत्यस्माकं प्रस्तावः।

एतत्तत्त्वत्रयमतिरिच्य वीरशैवदर्शनेऽष्टावरण-पञ्चाचार-षट्स्थलाख्यं पदार्थत्रयमपि दर्शनान्तरेष्वनङ्गीकृतमत्र स्वीक्रियते। आगमिकदर्शने वर्तते तावदुपासनाया वैशिष्ट्यम्। तदेतस्या उपासनायास्त्रीण्येतानि भवन्ति मुख्यान्यङ्गानि। सेयमुपासना निर्विघ्नं यथा प्रसरेतेति तदर्थं वीरशैवागमेषु चन्द्रज्ञानादिष्वष्टावरणानां वर्तते रक्षाकवचरूपेणोपदेशः। तान्येतानि गुरु-लिङ्ग-जङ्गम-पादोदक-प्रसाद-भस्म-रुद्राक्ष-मन्त्राख्यानि ग्रन्थेऽस्मिन् तृतीये परिच्छेदे वैशद्येन विवृतानि। अत्र गुरु-लिङ्ग-जङ्गमाः पूजनीयाः, विभूति-रुद्राक्ष-मन्त्राः पूजासाधनानि, पादोदक-प्रसादौ च फलभूतौ—इति ध्येयम्।

आचारप्रवण एव जन उपासाफलभाग् भवेदिति तदर्थं चन्द्रज्ञानादिष्वागमेष्वेवोपदिष्टं पञ्चाचारस्वरूपमत्र चतुर्थे परिच्छेदे वर्ण्यते। लिङ्गाचार-सदाचार-शिवाचार-गणाचार-भृत्याचाराख्येषु पञ्चाचारेषु वर्तते किल चतुष्षष्टिशीलाढ्यस्य गणाचारस्य कोऽपि विशिष्टो महिमा। अत्र हि काय-वाङ्-मनसां त्रिकरणानां परिशुद्धये कायिकानि, वाचिकानि, मानसानि च शीलानि वर्ण्यन्ते। त्रिकरणपरिशुद्ध एव जनो निरहङ्कारः सन् भृत्यभावेन सर्वत्र सेवाप्रवणः प्रवर्तेतेति लोकेषु पञ्चाचाराणामेषां सर्वत्र समताभावनायाः प्रवर्धनाय वर्तते कीदृशी उपयोगितेति निभालयन्तु नाम सर्वत्र समदृष्टयो विद्वांसः।

एवमष्टावरणपरिरक्षित आचारसम्पन्नश्च साधकः षट्स्थलोपासाया अधिकारी भवति। दर्शनेऽस्मिन् उपासको जीवोऽङ्गशब्देन, उपास्यश्च शिवो लिङ्गशब्देन प्रोच्यते।

लिङ्गाङ्गयोः षाड्विध्यमत्र स्वीक्रियते । लिङ्गाङ्गयोः सामरस्यात्मको मोक्षः कथमधिगम्यत इति शास्त्रीया प्रक्रिया सैषा पञ्चमे परिच्छेदेऽत्र वैशद्येन विवृता । एवमनायासेन सोपानक्रमेण मुक्तिदशा साधकेन प्राप्यत इति शक्तिविशिष्टाद्वैतदर्शनस्यानितरसाधारणं वैशिष्ट्यमतीव सरलया पद्धत्याऽत्र प्रतिपाद्यते ।

ग्रन्थस्यान्तिमे उपसंहारभागे शोधप्रक्रियाप्रसङ्गे समुद्भावितानां नूतनानां तत्त्वानां समाहारः संक्षेपेण कृत इति संसूचितमेव भूमिकायाम् । ये सम्पूर्णं ग्रन्थमध्येतुमसमर्थाः, तेऽपि ग्रन्थभागमेनमधीत्य ग्रन्थेऽस्मिन् प्रतिपादितैः सर्वैस्तत्त्वैः परिचिताः स्युरिति वर्ततेऽस्माकं विश्वासः ।

अत्र शिवाचार्यवर्यैराचार्यपरम्परामनुसृत्य लोककल्याणाय साम्प्रतिकजागतिकसमस्यानामपि तत्र तत्र समुल्लेखपुरस्सरं समाधानमक्रियतेत्यभिनन्दनार्हास्ते नूतनया पद्धत्या सर्वानितान् पुरातनान् सिद्धान्तान् समुपस्थापयन्तः । विशिष्टस्यास्य ग्रन्थस्य संदृब्धिर्येषां निर्देशने समजायत, ते पण्डितप्रवराः श्रीमन्तो देवस्वरूपमिश्रमहोदयाः प्रसङ्गेऽस्मिन्नवश्यं स्मरणार्हाः । श्रीमन्तो जनार्दनशास्त्रिपाण्डेयमहोदया अपि सादरं स्मर्यन्ते, यैर्ग्रन्थानुरूपं सुपरिष्कृतं परिशुद्धं संस्करणं विदुषां पुरतः समुपस्थापितम् । डॉ० जी० सी० केण्डदमठ-श्रीविनोदरावपाठकप्रभृतिभिरन्यैरपि महानुभावैर्यथायथमत्र साहाय्यमाचरितम् । 'शिवम् प्रिंटर्स' इत्यस्य प्रबन्धकः श्रीहरिप्रसादनिगमोऽपि सुरुचिपूर्णं परिशुद्धं मुद्रणमस्य ग्रन्थस्य कृतवानिति सर्व एते धन्यवादार्हाः ।

महाशिवरात्रि, संवत् २०५२ — इति विनिवेदयति—
जंगमवाड़ी मठ, वाराणसी — **व्रजवल्लभद्विवेदः**
१७-२-१९९६ ई० — शैवभारतीशोधप्रतिष्ठाननिदेशकः ।

श्रीजगद्गुरुचन्द्रशेखरशिवाचार्यमहास्वामिनः

भूमिका

विश्वेशलिङ्गसम्भूतं विश्वविद्याविबोधकम् ।
विश्ववन्द्यं सदा वन्दे विश्वाराध्यं जगद्गुरुम् ॥

अथायं समुपस्थाप्यते तत्त्वचिन्तकानां विदुषां पुरतो नूतनया शैल्या सज्जीकृतः काश्मीर-सिद्धान्तशैवयोर्वीरशैवदर्शनस्य च साम्य-वैषम्य-वैशिष्टच-प्रतिपादको विशेषेण शक्तिविशिष्टाद्वैतापरपर्यायस्य वीरशैवदर्शनस्य तत्त्वत्रयविमर्शात्मकः "शक्तिविशिष्टाद्वैत-तत्त्वत्रयविमर्शः" इति नामको ग्रन्थः ।

आगमिकदर्शनेषु पदार्थास्तत्त्वशब्देनोच्यन्ते । तानि च तत्त्वानि तत्र षट्त्रिंशत्संख्याकानि भवन्ति । पति-पशु-पाशाख्यानि त्रीण्येव प्रधानतत्त्वानि । वीरशैवदर्शने तान्येव तत्त्वानि शिव-जीव-शक्तय इत्युच्यन्ते । अत्र जीवात्मनो बन्धमोक्षाख्यावस्थाभेदेन द्वैताद्वैतयोरुभयोरपि प्रामाण्यमङ्गीक्रियते । शैवशाखासु काश्मीरशैवदर्शनमद्वैतप्रतिपादकम्, सिद्धान्तशैवं च द्वैतप्रतिपादकमिति प्रसिद्धमेव । तत्त्वत्रयस्वरूपविषये वीरशैवदर्शनं क्वचित् काश्मीरशैवेन, क्वचित् सिद्धान्तशैवेन च साम्यमावहति । क्वचित्तूभयवैलक्षण्येन प्रतीयते । तस्माद् दर्शनत्रयेषु तत्त्वत्रयविषये कुत्र साम्यम् ? कुत्र वैषम्यम् ? कुत्र च वीरशैवमतस्य वैशिष्ट्यमिति प्रथमो विचारणीयः पक्षोऽत्र ।

केवलं वीरशैवदर्शनाभ्युपगतानाम् अष्टावरण-पञ्चाचार-षट्स्थलाख्यानां तत्त्वत्रयाणां स्वरूपं विमृश्य, एतेषामसाधारणतत्त्वत्रयाणामङ्गीकारेण किं वैशिष्ट्यं प्रतिष्ठापितं वीरशैवाचार्यैरिति तु द्वितीयो विचारणीयः पक्षः । एवं पक्षद्वयान्तःपातिविषयाणां शास्त्रीयपद्धत्या विचारणापरोऽयं ग्रन्थ इति विदाङ्कुर्वन्तु विद्वांसः ।

समाजे परस्परवैमत्येन यथा जनाः कलहायन्ते, तथा द्वैताद्वैतसिद्धान्तभेदेन दर्शनसमाजेऽपि कलहायन्ते खलु विद्वांसः । नहि कलहेन शान्तिः कदापि प्राप्यते । अत एव वीरशैवाचार्या दर्शनक्षेत्रीयकलहपरिहाराय समन्वयसिद्धान्तं प्रतिष्ठापयामासुः । तदुक्तं भाष्यकारेण—

श्रुत्यैकदेशप्रामाण्यं द्वैताद्वैतमतादिषु ॥
द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके ।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः[1] ॥ इति ।

---

१. ब्र. सू. श्री०, मङ्गलश्लो० १५

महाचार्याणामेतत्सिद्धान्तमनुसृत्यैव प्रकृतेऽस्मिन् प्रबन्धे तत्र तत्र समन्वयप्रकारो दर्शितः। किञ्च, वीरशैवसिद्धान्ते स्वीकृतान्यष्टावरणानि कथं साधकस्य परिरक्षकाणि भवन्ति, प्राणस्वरूपाणामाचाराणां परिपालनेन कथं व्यक्तेः समाजस्य च समुन्नतिः सम्भवतीति विचारिता विषयाः सामाजिकदृष्ट्या महत्त्वपूर्णाः सन्ति।

अस्मिन् ग्रन्थे पञ्च परिच्छेदाः सन्ति। तत्र प्रथमपरिच्छेदे वैष्णवागमानां शाक्तागमानां चातिसंक्षेपेण, दशविधशैवागमदर्शनानां च नातिविस्तरेण, येषु विद्यते वीरशैवसिद्धान्तोऽप्यन्यतमः, इतिहासो निरूपितः। ग्रन्थोऽयं तात्त्विकविषयसम्बद्ध इतीतिहासभागः संक्षेपेणैवात्र प्रस्तावितः।

वीरशैवदार्शनिकतत्त्वविमर्शाख्ये द्वितीयपरिच्छेदे वीरशैवाभ्युपगतानां शिव-जीव-जगदाख्यानां तत्त्वत्रयाणां स्वरूपं सम्यङ् निरूप्य काश्मीरशैव-सिद्धान्तशैवीयैस्तत्त्वत्रयैः सह साम्य-वैषम्य-वैशिष्ट्यादिरूपेण विमर्शः प्रदर्शितः।

अष्टावरणविज्ञानाख्ये तृतीयपरिच्छेदे वीरशैवसिद्धान्ते साधकस्य रक्षाकवच-रूपेणाभ्युपगतानां गुरु-लिङ्ग-जङ्गम-पादोदक-प्रसाद-भस्म-रुद्राक्ष-मन्त्राख्यानां शास्त्रीयं स्वरूपं विविच्य कथमेते साधकस्य रक्षका भवन्तीति प्रस्थापितम्।

पञ्चाचारमीमांसाख्ये चतुर्थपरिच्छेदे वीरशैवीयानां लिङ्गाचार-सदाचार-शिवा-चार-गणाचार-भृत्याचाराख्यानां पञ्चाचाराणां स्वरूपं विवेचितम्। प्रसङ्गानुसारमत्र पञ्चभिराचारैर्व्यक्तेः समाजस्य च समुन्नतिप्रकारः प्रदर्शितः।

षट्स्थलसोपानक्रमाख्ये पञ्चमपरिच्छेदे भक्त-माहेश्वर-प्रसादि-प्राणलिङ्गि-शरण-ऐक्याख्येषु षट्सु मुक्तिसोपानेषु षड्विधानां भक्तीनां साहाय्येन साधकस्य क्रमिको विकासः कथं भवतीति प्रतिपादितम्। परिच्छेदान्ते लिङ्गाङ्गापरपर्याययोः शिवजीवयोः सामरस्यप्रक्रिया शास्त्राधारेण सम्यङ् निरूपिता।

उपसंहाराध्यायोऽस्य ग्रन्थस्यान्तिमो भागः। अयं ग्रन्थस्य निष्कर्षरूपः। ग्रन्थेऽस्मिन् गवेषणापूर्णं यत्किञ्चिन्नावीन्यमस्ति, तदुपसंहारे बाहुल्येन वर्तत इति विदाङ्कुर्वन्तु विद्वांसः। अतः समग्रोऽयं भागोऽवलोकनार्हः।

तदेवं सान्नपूर्णस्य भगवतो विश्वनाथस्य परमकृपया ग्रन्थोऽयं निर्विघ्नं परि-पूर्णोऽभूत्, महाशिवरात्रिपावनपर्वणि प्रकाशितश्चाभूदिति प्रमोदस्यायमवसरोऽस्माकं कृते। तमेनं ग्रन्थं परिशुद्धस्वरूपेण प्रस्तुवन्तं पण्डितजनार्दनपाण्डेयमहोदयम्, 'शिवम् प्रिन्टर्स'-प्रबन्धकं श्रीहरिप्रसादनिगममहोदयं च शुभाशीर्वादशतैः सभाजयामः।

अन्ते च विदुषां पुरतो ग्रन्थमेनं "शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः" इति नामानं प्रस्तुवन्तो वयमिदमनुभवामः—

यदि भवति मदीये ग्रन्थमध्ये प्रमादः
क्वचिदपि स महिम्ना शोधनीयो महद्भिः।
स्खलति गगनचारी प्रायशो नात्र चित्रं
भवति च गुरुहस्तालम्बनोऽपि प्रकारः॥ इति,

'शुद्धं यदत्र तद् ग्राह्यं दुष्टं चास्तु ममैव हि' इति च।

महाशिवरात्रि, संवत् २०५२ — इति शिवं भूयात्

जंगमवाड़ी मठ, वाराणसी।

१७-२-१९९६ ई०

विषय-सूची

निदेशकीयं वक्तव्यम् ५–७

भूमिका ८–१०

प्रथमः परिच्छेदः

आगमिकदर्शनानां संक्षिप्त इतिहासः १-२१

आगमास्तत्प्रभेदाश्च १, शैवागमास्तत्कालस्तदीयविषयाश्च २, शैवमतं तत्प्रभेदाश्च ३, सिद्धान्तशैवदर्शनम् ४, सिद्धान्तशैवप्रतिपादकाचार्यास्तत्साहित्यं च ५, लकुलीशपाशुपतमतम् ७, लकुलीशपाशुपतग्रन्थाः ८, श्रीकण्ठीयविशिष्टाद्वैतम् ८, रसेश्वरदर्शनम् ८, नन्दिकेश्वरदर्शनम् ९, काश्मीरशैवदर्शनम् ९, काश्मीरशैवाचार्यास्तत्साहित्यं च १०, क्रमदर्शनम् ११, कुलदर्शनम् १२, वीरशैवमतम् १३, वीरशैवशब्दार्थनिर्वचनम् १४, वीरशैवानां पाशुपताभिधानम् १५, किं लिङ्गायतशब्दो वीरशैवपर्यायः? १५, वीरशैवप्रभेदाः १६, वीरशैवदर्शनस्य पर्यायनामानि १७, वीरशैवधर्मसंस्थापनाचार्याः २०, वीरशैवसाहित्यं तत्प्रणेतारश्च २० ।

द्वितीयः परिच्छेदः

वीरशैवदार्शनिकतत्त्वविमर्शः २२-९१

वीरशैवदर्शने परशिवः २३, काश्मीरशैवदर्शने परशिवस्वरूपम् २६, सिद्धान्तशैवदर्शने पतिस्वरूपम्, २७, वीरशैवाभ्युपगतशक्तिस्वरूपम् २९, काश्मीरशैवसिद्धान्तशैवयोः शक्तिस्वरूपम् २९, शक्तेः कार्यम् ३१, वीरशैवाभ्युपगतशक्तिसद्भावे मानम् ३१, वीरशैवदर्शने शिवशक्त्योः सम्बन्धः ३२, काश्मीरशैव-सिद्धान्तशैवाभ्युपगतः शिवशक्त्योः सम्बन्धः ३३, वीरशैवदर्शने शक्तेर्भेदाः ३५, शक्तिभेदविमर्शः ३८, जगत्स्वरूपविमर्शः ४०, अविकृतपरिणामवादः ४२, शक्तिविशिष्टशिवस्य जगदुभयकारणत्वम् ४४, प्रपञ्चस्य सत्यत्वम् ४५, काश्मीरशैवानामाभासवादः ४६, अविकृतपरिणामवादाऽऽभासवादयोः स्वरूपविमर्शः ४८, सिद्धान्तशैवानां सत्कार्यवादः ४८, अविकृतपरिणामवादसत्कार्यवादयोर्विमर्शः ५२, सृष्टेर्लीलारूपत्वविमर्शः ५२, भोगमोक्षयोः शिवानुग्रहत्वविमर्शः ५४, वैषम्यनैर्घृण्यदोषपरिहारविमर्शः ५६, जीवस्वरूपविमर्शः ५७, वीरशैवदर्शने जीवात्मनो लक्षणम् ५७, जीवपरमात्मनोर्भोगसाङ्कर्यनिरासः ६०, जीवात्मनोऽणुरूपत्वम् ६१, काश्मीरशैवदर्शने पशुलक्षणम् ६१, वीरशैवकाश्मीरशैवयोर्जीवस्वरूपविमर्शः ६३, सिद्धान्तशैवदर्शने पशुलक्षणम् ६३, पशोस्त्रैविध्यम् ६४, पशोरवस्थात्रयम् ६५, वीरशैवसिद्धान्तशैवयोर्जीवस्वरूपविमर्शः ६६, जीवस्याणुपरिमाणविमर्शः ६६,

पशोर्भेदविमर्शः ६८, पशोरवस्थात्रयविमर्शः ६८, वीरशैवसिद्धान्ते जीवात्मनो बन्धः ६९, मलत्रय(पाश)स्वरूपम् ७०, वीरशैवीयमलत्रयस्वरूपम् ७१, काश्मीरशैवसिद्धान्ते पाशस्वरूपम् ७२, सिद्धान्तशैवदर्शने पाशस्वरूपम् ७४, पाशस्वरूपविमर्शः ७७, मोक्षोपायेषु शक्तिपातो दीक्षा च ७८, शक्तिपात-प्रक्रियाविमर्शः ८२, मोक्षस्वरूपविमर्शः ८३, ज्ञानकर्मणोः समसमुच्चयः ८४, कर्मणो द्वैविध्यम् ८५, श्रुतिस्मृतिसम्मतः समुच्चयवादः ८७, शिवानुग्रहस्य मोक्षकारणत्वम् ९०, लोकसंग्रहार्थं नित्यनैमित्तिककर्मानुष्ठानम् ९० ।

तृतीयः परिच्छेदः

अष्टावरणविज्ञानम् ९२-२७०

आवरणशब्दार्थविचारः ९२, श्रीगुरुः ९४, प्रथमगुरुः शिवः ९४, वीरशैवीयो दिव्यौघः ९५, वीरशैवीयः सिद्धौघः ९७, वीरशैवीयो मानवौघः ९८, गुरुशब्दार्थः ९८, गुरुशिवयोरभिन्नत्वम् ९९, गुरोर्वैशिष्ट्यम् १००, गुरोर्लक्षणम् १०१, अनेकगुरुवादनिरासः १०३, दीक्षागुरुः १०४, शिक्षागुरुः १०५, ज्ञानगुरुः १०५, सुशिष्यलक्षणं सद्गुरुकृपा च १०५, गुरुसेवा तत्कारुण्यप्राप्तिश्च १०७, दीक्षाङ्गभूतो मलपरिपाकः ११०, शक्तिपातः ११२, शक्तिपातचिह्नानि ११२, भक्तानां वर्णाश्रमतानिरासः ११३, शिष्यपरीक्षा ११५, दीक्षास्वरूपं तत्प्रकाराश्च ११५, वेधदीक्षा ११६, वेधदीक्षान्तर्गताः सप्तविधोपदेशाः ११७, मन्त्रदीक्षा १२०, मन्त्र-दीक्षान्तर्गताः सप्तविधोपदेशाः १२०, क्रियादीक्षा १२३, क्रियादीक्षान्तर्गताः सप्तसंस्काराः १२४, गुरोरावरणशब्दवाच्यत्वम् १२८, लिङ्गम् १२८, लिङ्गशब्दार्थः १२८, इष्टलिङ्गम् १३०, इष्टलिङ्गशब्दार्थपरीक्षणम् १३१, स्थूलोपासनायाः प्राशस्त्यम् १३३, शिलास्था उत्कृष्टगुणाः १३३, शिवलिङ्गनिर्माणयोग्याः शिलाः १३४, इष्टलिङ्गपरिमाणम् १३५, पञ्चसूत्रलिङ्गम् १३६, इष्टलिङ्गसंस्कारविधिः १३७, इष्टलिङ्गे चैतन्या-भिव्यक्तेर्वैज्ञानिकत्वम् १३७ इष्टलिङ्गे शिष्यप्राणसम्बन्धस्य रहस्यम् १३८, इष्टलिङ्गवियोगे प्राणसन्त्यागः १३९, लिङ्गधारणेन पापप्रणाशनम् १४१, इष्टलिङ्गस्य धारणस्थानानि १४३, लिङ्गधारणविधानम् १४४, वीरशैवीयं नित्यं कर्म १४६, इष्टलिङ्गपूजाविधानम् १४७, इष्टलिङ्गपूजायां सूतक-प्रतिषेधः १४९, लिङ्गधारणस्य वेदसंमतत्वम् १५६, लिङ्गधारणे विधिविचारः १६३, आगमास्तत्सम्मतं लिङ्गधारणं च १६५, पुराणानि तत्प्रतिपादितं लिङ्गधारणं च १६६, लिङ्गधारिणो देवा दानवा महर्षयश्च १६७, प्राण-लिङ्गस्वरूपम् १६८, प्राणलिङ्गार्चनविधिः १७०, भावलिङ्गस्वरूपं तदर्चन-

पद्धतिश्च १७१, अन्तर्लिङ्गपूजकैरपि बाह्यलिङ्गपूजनमावश्यकम् १७२, इष्ट-प्राण-भावलिङ्गानामावरणशब्दवाच्यत्वम् १७३, जङ्गमः १७४, जङ्गमशब्दस्य तात्त्विकार्थः १७४, व्यावहारिको जङ्गमशब्दार्थः १७६, जङ्गमस्य लक्षणम् १७७, जङ्गमस्योत्कृष्टत्वम् १७८, स्वयजङ्गमः १७९, चरजङ्गमः १८०, परजङ्गमः १८१, जङ्गमस्यावरणशब्दवाच्यत्वम १८१, पादोदकम् १८२, पादोदकशब्दार्थः १८२, त्रिविधं तात्त्विकपादोदकम् १८२, त्रिविधं क्रियापादोदकम् १८६, क्रियापादोदकनिर्माणविधिः १८७, पादोदकसेवनविधिः १८७, पादोदकसेवने नोच्छिष्टसूतकम् १८८, क्रियापादोदकमाहात्म्यम् १८८, पादोदकस्यावरणशब्दवाच्यत्वम् १९१, प्रसादः १९१, प्रसादशब्दार्थः १९१, अन्नशुद्धया मनःशुद्धिः १९२, निर्माल्यस्वीकारे दोषाभावः १९६, प्रसादत्रैविध्यम् २००, प्रसादस्वीकारे नोच्छिष्टत्वदोषः २०१, प्रसादमाहात्म्यम् २०१, प्रसादस्यावरणशब्दवाच्यत्वम् २०२, भस्म २०३, भस्मशब्दार्थः २०३, सोपाधिकं भस्म तत्प्रकाराश्च २०४, विभूतिः २०५, विभूतेर्भूतिहेतुत्वम् २०६, नित्यकर्मणि विभूतेः प्रयोगः २०७, भसितम् २०८, भसितस्य तत्त्वावभासकत्वम् २०९, नैमित्तिककर्मणि भसितोपयोगः २१०, भस्म २११, भस्मनः पापभर्त्सनत्वम् २१२, प्रायश्चित्तकर्मणि भस्मप्रयोगः २१४, क्षारम् २१६, क्षारस्यापत्क्षारणत्वम् २१७, काम्यकर्मसु क्षारोपयोगः २१७, रक्षा २१८, रक्षायास्त्रिविधदुःखेभ्यः परिरक्षकत्वम् २१९, मोक्षकर्मणि रक्षाया उपयोगः २२२, भस्मनिर्माणस्य कल्पादिविधयः २२३, भस्मस्नानम् २२५, सप्तस्नानेषु भस्मस्नानस्य वैशिष्ट्यम् २२६, भस्मस्नानेन वैज्ञानिको लाभः २२७, भस्मोद्धूलनम् २२८, त्रिपुण्ड्रधारणं तत्स्थानानि च २२८, तिर्यक्त्रिपुण्ड्रस्य माहात्म्यम् २३०, त्रिपुण्ड्रधारणप्रकारः फलं च २३१, भस्मधारणव्रतावधिः २३२, भस्मन आवरणशब्दवाच्यत्वम् २३२, रुद्राक्षः २३२, रुद्राक्षशब्दार्थः २३२, रुद्राक्षोत्पत्तिः २३४, रुद्राक्षवैशिष्ट्यम् २३४, रुद्राक्षप्रभेदाः २३५, रुद्राक्षपरीक्षणम् २३६, रुद्राक्षमुखानि तत्फलानि च २३७, रुद्राक्षधारणे पथ्यम् २३८, वीरशैवीयरुद्राक्षधारणविधिः २३९, रुद्राक्षधारणेन षडध्वशुद्धिः २४०, रुद्राक्षधारणेन पातकनिवृत्तिः २४२, रुद्राक्षधारणेन वैज्ञानिको लाभः २४५, रुद्राक्षधारणे वर्णाश्रमभेदनिरासः २४६, रुद्राक्षस्यावरणशब्दवाच्यत्वम् २४६, ८. मन्त्रः २४६, मन्त्रशब्दार्थः २४६, पञ्चाक्षरमन्त्रस्वरूपम् २४७, मन्त्रान्तरादस्य श्रेष्ठत्वम् २४७, पञ्चाक्षरस्य पञ्च नामानि २५२, षडक्षरमन्त्रः २५४, मन्त्रजपाधिकारः २५६, जपस्तत्प्रकाराश्च २५७, जपविधिः २५९,

जपस्थानम् २६०, जपोपयुक्तान्यासनानि दिशश्च २६०, जपोपयुक्ता मालाः २६१, जपकाले पालनीया नियमाः २६१, मन्त्रसम्बन्धिनो दोषाः २६१, पुरश्चरणं नित्यजपश्च २६२, पञ्चाक्षरो न कस्यापि रिपुः २६४, विविलोपेऽपि न नैष्फल्यम् २६५, असकृज्जपेन मन्त्रपिण्डत्वप्राप्तिः २६६, पञ्चाक्षर-माहात्म्यम् २६७, मन्त्रस्यावरणशब्दवाच्यत्वम् २६७, अन्तरङ्गाष्टावर-णानि २६७ ।

चतुर्थः परिच्छेदः

पञ्चाचारमीमांसा २७१–२८९

आचारशब्दार्थः २७१, आचारमाहात्म्यम् २७१, लिङ्गाचारः २७३, सदाचारः २७४, सदाचारस्याष्टशीलानि २७५, शिवाचारः २७७, शिवाचारान्तर्गता षोडशपदार्थशुद्धिप्रक्रिया २७८, गणाचारः २८०, गणाचारान्तर्गतानि चतुःषष्टिशीलानि २८१, भृत्याचारः २८८ ।

पञ्चमः परिच्छेदः

षट्स्थलसोपानक्रमः २९०–३३८

स्थलस्वरूपम् २९०, स्थलशक्त्योर्लीलाविभागः २९१, कलाभक्त्योः स्वरूपविमर्शः २९२, विभिन्नसम्प्रदायेषु भक्तिः २९३, भक्तेः प्रभेदाः २९८, वीरशैवसिद्धान्ते भक्तिस्तत्प्रभेदाश्च २९९, भक्तस्थलं भक्तिश्च ३०१, भक्तस्य विधेयाविधेयनियमाः ३०३, माहेश्वरस्थलं माहेश्वरश्च ३०४, प्रसादिस्थलं प्रसादी च ३१२, प्राणलिङ्गस्थलं प्राणलिङ्गी च ३१६, शरणस्थलं शरणश्च ३२०, ऐक्यस्थलमैक्यश्च ३२४, लिङ्गाङ्ग-संयोगविधिः ३२८ ।

उपसंहारः ३३९–३७४

उपक्रमोपसंहारयोरेकलिङ्गत्वम् ३३९, शैवसम्प्रदायस्तत्प्रभेदाश्च ३४०, वीरशैवदर्शनम् ३४१, दार्शनिकतत्त्वविमर्शः ३४१, आवरणादितत्त्वविमर्शः ३५०, लिङ्गाङ्गसामरस्यस्वरूपम् ३५९, शक्तिविशिष्टाद्वैतीयः समन्वय-सिद्धान्तः ३६९, सर्वश्रुतिसमन्वयप्रकारः ३७०, इतरभेदाभेदवादिमतेभ्योऽस्य वैलक्षण्यम् ३७३ ।

सहायकग्रन्थसूची ३७५–३७९

संकेतसूची ३८०–३८३

शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः

श्रीजगद्गुरु-डॉ.चन्द्रशेखरशिवाचार्यमहास्वामिना विरचितः

मङ्गलाचरणम्

शिवस्तुतिः

त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये ।
सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः ॥

ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनो जगन्मूलं तं नमामि परं शिवम् ॥

यस्योर्मिबुद्बुदाभासः षट्त्रिंशत्तत्त्वसंचयः ।
निर्मलं शिवनामानं तं वन्दे चिन्महोदधिम् ॥

यद्भासा भासते विश्वं यत्सुखेनानुमोदते ।
नमस्तस्मै गुणातीतविभवाय परात्मने ॥

सदाशिवमुखाशेषतत्त्वोन्मेषविधायिने ।
निष्कलङ्कस्वभावाय नमः शान्ताय शम्भवे ॥

स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने ।
स्वेच्छाकृतत्रिलोकाय नमः साम्बाय शम्भवे ॥

यत्र विश्राम्यतीशत्वं स्वाभाविकमनुत्तमम् ।
नमस्तस्मै महेशाय महादेवाय शूलिने ॥

शक्तिस्तुतिः

यामाहुः सर्वलोकानां प्रकृतिं शास्त्रपारगाः ।
तां धर्मचारिणीं शम्भोः प्रणमामि परां शिवाम् ॥

यया महेश्वरः शम्भुर्नामरूपादिसंयुतः ।
तस्यै मायास्वरूपायै नमः परमशक्तये ॥

शिवाद्यादिसमुत्पन्नशान्त्यतीतपरोत्तराम् ।
मातरं तां समस्तानां वन्दे शिवकरीं शिवाम् ॥

इच्छाज्ञानादिरूपेण या शम्भोर्विश्वभाविनी ।
वन्दे तां परमानन्दप्रबोधलहरीं शिवाम् ॥

अमृतार्थं प्रपन्नानां या सुविद्याप्रदायिनी ।
अहर्निशमहं वन्दे तामीशानमनोरमाम् ॥

प्रथमः परिच्छेदः

आगमिकदर्शनानां संक्षिप्त इतिहासः

इह खलु मानवानां सर्वाः प्रवृत्तयः सुखसम्पादनमूला एव दृश्यन्ते। तस्मात् सुखमेव पुरुषार्थ इति वक्तुं शक्यते। शास्त्रेषु धर्म-अर्थ-काम-मोक्षाख्याश्चतुर्विधाः पुरुषार्थाः प्रतिपादिताः सन्ति। 'आयुर्वै घृतम्' इतिवत् सुखसाधनीभूतत्वात् तेषां पुरुषार्थशब्देन व्यवहारः। एतेषु धर्म-अर्थ-कामेभ्यस्त्रिवर्गेभ्यः प्राप्यस्य सुखस्य क्षणिकत्वाच्चतुर्थो हि मोक्षः परमपुरुषार्थत्वेन स्वीकृतः सर्वैरपि दार्शनिकैः। सर्वेषामपि भारतीयदर्शनानां मूलस्रोतांसि वेदागमा एवेति निश्चप्रचम्। परमकारुणिकः शिवो लोककल्याणाय तानाविश्चकार[1]। तत्र वेदाः शिवस्य निःश्वासभूताः[2], आगमास्तद्वाग्व्यवहाररूपाश्चेति[3] हि भारतीयदार्शनिकानामभिमतम्। "दृश्यते साक्षात्क्रियते परमतत्त्वं येन तद् दर्शनम्" इति व्युत्पत्त्या तत्त्वज्ञानसाधनं शास्त्रं दर्शनमित्युच्यते। सर्वदुःखनिवारकं परमानन्दप्रापकं चामोघं साधनं तत्त्वज्ञानमेवेत्यत्र न वैमत्यं दार्शनिकानाम्। तत्त्वज्ञानप्रतिपादनार्थमुपनिषन्मूलिकाऽऽगममूलिका चेति द्विधा विभक्ता खलु भारतीयदार्शनिकपरम्परा। तत्रोपनिषत्प्रतिपाद्या वेदान्तपरम्परा, आगमप्रतिपाद्या च शैवपरम्परेति बोध्यम्। वेदान्तपरम्परा यथा प्रक्रियाभेदेन बहुशाखासमन्विता तथाऽऽगमपरम्पराप्यनेकशाखान्विता वर्तते।

आगमास्तत्प्रभेदाश्च

शिवस्य वाग्व्यवहाररूपोऽयमागमो भारतीयवाङ्मयस्य शाखाविशेषः। कालान्तरेऽयमेव तन्त्रशब्देनाभिहित इति प्रो० व्रजवल्लभद्विवेदमहाभागाः

---

१. सद्योजातेन ऋग्वेदं वामदेवेन याजुषम्।
अघोरेण तथा साम पुरुषेण त्वथर्वणम्॥
ईशानेन मुखेनैव कामिकाद्यागमांस्तथा।
जनयामास विश्वेशः सर्वसिद्धिप्रदायकः॥ (ब्र. सू. श्री. १।१।३)

२. 'निःश्वसितमस्य वेदाः" (ब्र. सू. भाम. मङ्गलश्लो० २)

३. आगतं शिववक्त्रात्तु गतं च गिरिजामुखे।
मतं श्रीवासुदेवेन आगमस्तेन कीर्तितः॥ (भास्क. भा. २, पृ० ८५)

प्रतिपादयन्ति[१]। तस्मादागमतन्त्रशब्दौ पर्यायवाचकाविति निश्चीयते। आगमाश्च वैष्णव-शैव-शाक्तादिभेदेन बहुविधाः[२] सन्ति। तत्र वैष्णवागमा विशेषेण वैखानस-भागवत-पाञ्चरात्रभेदेन विभागत्रयवन्तो वर्तन्ते। वैखानसः सम्प्रदायः साम्प्रतमान्ध्रप्रदेशे, पाञ्चरात्रः सम्प्रदायश्च तमिलनाडु-प्रदेशे प्रवर्तते। एवमेव दशमहाविद्याप्रतिपादकाः शाक्तागमा अपि बहवः सन्ति। तेषु त्रिपुरा-क्रम-कुल-त्रिकागमानां चतुर्णां प्रामुख्यम्[३]।

शैवागमास्तत्कालस्तदीयविषयाश्च

शिवोपदिष्टा आगमाः शैवागमा इति कथ्यन्ते। शिवमहापुराणस्य वायुसंहितानुसारं शैवागमाः श्रौताः स्वतन्त्राश्चेति द्विधा विभक्ताः। तत्र कामिकादि-वातुलान्ताः[४]सिद्धान्तपदवाच्या अष्टाविंशत्यागमाः स्वतन्त्रागमा इत्युच्यन्ते। श्रौतस्तु शतकोटिप्रविस्तरः, यत्र पाशुपतं व्रतं ज्ञानं चोच्यते। क्रियातपोजप-ध्यानदानात्मकानि पञ्चपर्वाणि भवन्ति तत्र। तदिदं शास्त्रं चत्वार ऋषयः संक्षिप्योपदिशन्ति स्म रुरु-दधीचि-अगस्त्य-उपमन्युनामानः। धौम्याग्रजेनोपमन्युना श्रीकृष्णायोपदिष्टं पाशुपतं ज्ञानं महाभारते[५] वायुसंहिताया उत्तरे भागे

---

१. आ. मी., पृ० १

२. आगमा बहुधा प्रोक्ताः शिवेन परमात्मना।
शैवं पाशुपतं सोमं लाकुलं चेति भेदतः॥
तेषु शैवं चतुर्भेदं तन्त्रं सर्वविनिश्चितम्।
वामं च दक्षिणं चैव मिश्रं सिद्धान्तसंज्ञकम्॥
शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम्।
सप्तमातृपरं मिश्रं सिद्धान्तं वेदसम्मतम्॥ (सि. शि. ५।९-११)

३. वैष्णवागमानां शाक्तागमानां च स्वरूपं तद्दर्शनादिकं च विस्तारितमागम-मीमांसाख्ये ग्रन्थे प्रो. व्रजवल्लभद्विवेदमहाभागैः। विशेषजिज्ञासुभिरवलोकनीयोऽयं ग्रन्थः।

४. "सिद्धान्तशब्दश्च पङ्कजादिशब्दवद् योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशतन्त्रेषु प्रसिद्धः" (श्लो. १०) इति रत्नत्रयोल्लेखिन्यामघोरशिवाचार्यः। "सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते" (सि. शि. ५।१४) इति च शिवयोगिशिवाचार्यः।

५ म. भा. अनु., १४।६४-७७

च संगृहीतं विद्यते[1] इत्यागमशास्त्रविशेषज्ञैः प्रो० व्रजवल्लभद्विवेदमहाभागैः श्रौतागमपरम्परा संक्षेपेणोक्ता।

सिद्धान्तपदवाच्याः कामिकाद्यागमास्तु शिवेन रुद्रेण च निरूपिताः सन्ति। एते च सनातनाः। ऐतिहासिकदृष्ट्या त्वेतेषां कालोऽद्यतनकालात् पञ्चसहस्रवर्षप्राचीन इति विदुषामाशयः[1]। शैवागमेषु क्रिया, चर्या, योगः, ज्ञानं चेति चत्वारः पादा भवन्ति। तत्र क्रियापादे देवालयानां स्थापनम्, मूर्तिरचना, तत्प्रतिष्ठादयो विषयाः, चर्यापादे मानवप्रतिष्ठितानां मूर्तीनां पूजोत्सवादिप्रकारः, योगपादे योगाभ्यासप्रक्रिया, ज्ञानपादे च पति-पशु-पाशात्मकत्रिकसिद्धान्तो निरूपितोऽस्ति।

शैवमतं तत्प्रभेदाश्च

शैवागमानुयायिनां शैवमतमैतिहासिकदृष्ट्या दार्शनिकदृष्ट्या चातीव महत्त्वपूर्णम्। अष्टसहस्रवर्षपूर्वतः प्रचलिताद् जरोष्ट्रमतादपोदं प्राचीनतरमिति श्रीकान्तिचन्द्रपाण्डेयमहाभागानामाशयः। बहुशाखासमन्वितमिदं शैवमतम्। अद्यतनसमये विपुलस्य साहित्यस्य लुप्तत्वात् काश्चन शाखा नाममात्रज्ञाताः सन्ति। डॉ० के०सी० पाण्डेयमहाभागा दश शैवदर्शनानि परिशील्य तानि द्वैत-द्वैताद्वैत-अद्वैतभेदेन त्रिधा विभाजितवन्तः। तदनुसारं पाशुपत-सिद्धान्तशैवदर्शने द्वैतपरे, लकुलीशपाशुपत-श्रीकण्ठीयविशिष्टाद्वैत-वीरशैव-रसेश्वरदर्शनानि च द्वैताद्वैतपराणि, नन्दिकेश्वरदर्शन-प्रत्यभिज्ञा-क्रम-कुलदर्शनानि चाद्वैतपराणीति वेद्यानि। शैवद्वैतप्रतिपादकं दर्शनं द्विविधम्, पाशुपतदर्शनं सिद्धान्तशैवदर्शनं चेति। तत्र पाशुपतं सुप्रसिद्धेषु शैवागमेषु दशागमाऽऽश्रितम्, सिद्धान्तशैवदर्शनं चाष्टादशागमाऽऽश्रितमित्येवमनयोर्मुख्यो भेदः। तत्र कामज-योगज-चिन्त्य-मौकुट-अंशुमत्-दीप्त-कारण-अजित-सूक्ष्म-सहस्रा इत्येते पाशुपतसम्मता दश द्वैतागमाः। मुद्रितमृगेन्द्रागमभूमिकानुसारमेषु नामद्वयस्य व्यत्यासो दृश्यते। भूमिकायां 'कामज'-स्थाने 'कामिक' इत्युपलभ्यते। इदं तु कामजस्य नामान्तरमेव। परन्तु मौकुट-स्थाने भिन्नागमस्य सुप्रभेदाख्यस्य सन्निवेश उपलभ्यते तद्विचारार्हमिति कान्तिचन्द्रपाण्डेयमहाभागाः प्रतिपादयन्ति[3]। क्रियासाराख्ये[4] वीरशैवग्रन्थेऽपि

१. आ. मो., पृ० २९

२. आ. मो., पृ० २८; शै. द. बि., पृ० २; ब्र. सू. श्री. भू., पृ० ३४

३. शै. द. बि., पृ० ३-४

४. कामिकं योगजं चिन्त्यं कारणं त्वजितं तथा।
दीप्तं सूक्ष्मं सहस्रं च अंशुमान् सुप्रभेदकम्॥

मुकुटाऽऽगमस्थाने सुप्रभेदाऽऽगमस्यैव गणना दृश्यते। अवशिष्टा ये सिद्धान्तशैवदार्शनिकैर्द्वैतं प्रतिपादयद्भिः प्रमाणत्वेन स्वीक्रियन्ते, तेऽप्यभिनवगुप्त-जयरथानुसारं न द्वैतप्रतिपादकाः, किन्तु द्वैताद्वैतप्रतिपादकाः। समस्तानां सिद्धान्तागमानां प्रामाण्यं स्वीकुर्वद्भिर्वीरशैवाचार्यैर्द्वैताद्वैतपरं सिद्धान्तं प्रतिष्ठापितम्। यद्यप्यद्यतनसमये वीरशैवाचार्यैर्द्वैताद्वैतपरत्वेनाख्याता आगमा नोपलभ्यन्तेऽथापि तत्प्रतिष्ठापितसिद्धान्तानुसारं सर्वेऽपि सिद्धान्तागमा द्वैताद्वैतपरा इत्यभ्यूह्यन्ते। अत एव पाण्डेयमहोदयाः कथयन्ति—"अत इदं प्रतिभाति यद् यथा वेदवाक्यान्युपनिषद्वाक्यानि च भिन्नैर्वैदिकदार्शनिकैर्द्वैत-द्वैताद्वैत-विशिष्टाद्वैत-अद्वैतमतानि प्रतिपादयद्भिः स्वस्वमतानुसारं व्याख्यातानि, तथा शैवागमा अपि तैस्तैः शैवदार्शनिकैः स्वस्वमतपरिपोषकतया व्याख्याताः"[1] इति।

प्राचीनस्य पाशुपताख्यद्वैतदर्शनस्य सिद्धान्तप्रतिपादको नैकोऽपि स्वतन्त्रग्रन्थो नाप्यागमव्याख्यापरा ग्रन्थाः समुपलभ्यन्ते। किन्तु बादरायणीयब्रह्मसूत्रे तट्टीकासु च खण्डनरूपेण हरिभद्रसूरिराजशेखरकृतयोः षड्दर्शनसमुच्चयनाम्नोर्ग्रन्थयोः संक्षेपेण प्रतिपादितस्तत्सिद्धान्तस्तावत्समुपलभ्यते[2]। श्रौतस्य पाशुपतज्ञानस्य चर्चा पूर्वं संजातैव। श्रीकण्ठोऽस्य ज्ञानस्य प्रवर्तक आसीदिति महाभारते नारायणीयोपाख्याने दृश्यते[3]।

सिद्धान्तशैवदर्शनम्

शैवशाखासु सिद्धान्तशैवस्य विपुलं साहित्यमुपलभ्यते। ख्रि० नवमशतकादारभ्य द्वादशशतकपर्यन्तं चास्य प्रचारः काश्मीर-चोल-लाट-मध्यप्रदेश-कान्यकुब्जादिषु प्रदेशेष्वासीत्। अस्य परम्परा रौरवागमद्रष्टू रुरोः समयादारभ्य आत्रेयद्वारा मोक्षकारिकाकर्तृसद्योज्योतिःपर्यन्तमविच्छिन्नाऽऽसीत्।

विजयं चैव निश्वासं स्वायम्भुवमथानिलम्।
वीरं च रौरवं चैव मुकुटं विमलं तथा॥
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा।
सिद्धं सन्तानशर्वोक्तं पारमेश्वरमेव च।
किरणं वातुलं चैव अष्टाविंशतिसंख्यया॥ (क्रि. सा., भा. १, पृ० ९)

१. शै. द. बि., पृ० ४

२. शै. द. बि., पृ० ५-७

३. उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुतः।
उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवः॥ (म. भा. १२।३४९।६७)

सिद्धान्तशैवप्रतिपादकाचार्यास्तत्साहित्यं च

सिद्धान्तशैवदर्शनमनुसृत्य बहव आचार्याः स्वतन्त्ररूपेण टीकारूपेण च प्रकरणग्रन्थान् रचयामासुः। तेषु सद्योज्योतिः शिवाचार्यः प्राथम्येन परिगण्यते। खेटपाल-खेटकनन्दनेत्यपरनामद्वयेनाप्ययं प्रसिद्ध आसीत्। अभिनवगुप्तस्य तन्त्रालोके मलस्य द्रव्यत्वप्रतिपादकोऽस्य सिद्धान्तः खण्डित इत्ययमभिनवगुप्तात् प्राचीनः। अपि च, शिवदृष्टिकारेण सोमानन्देन खेटपालमतं सादरं स्मर्यते,[१] अतोऽस्य समयः ख्रि० नवमशतकमिति विदुषामाशयः[२]। अनेन रचिताः—रौरवागमटीका, स्वायम्भुवागमटीका, तत्त्वसंग्रहः, तत्त्वत्रयनिर्णयः, भोगकारिका, मोक्षकारिका, नरेश्वरपरीक्षा, परमोक्षनिरासकारिका इत्याद्या ग्रन्थाः प्रसिद्धाः सन्ति। उग्रज्योतिःशिष्यः सद्योज्योतिरयं सिद्धान्तशैवागमानां प्रथमो व्याख्याता पद्धतिकारश्चासीत्। अनेन सर्वतः प्रथमं रौरवागमप्रतिपादितशैवदर्शनार्थं सिद्धान्तशब्दः प्रयुक्तः। यथाह—

रुरुसिद्धान्तसंसिद्धौ भोगमोक्षौ ससाधनौ।
वच्मि साधकबोधाय लेशतो युक्तिसंस्कृतौ ॥[३] इति।

तदनन्तरं श्रीकण्ठकृतरत्नत्रयटीकाकारश्रीमदघोरशिवाचार्य-वचनानुसारं 'सिद्धान्त'शब्दः पङ्कजादिशब्दवद्योगरूढ्या शिवप्रणीतेषु दशाष्टादशसु तन्त्रेषु प्रसिद्धिं गतः"[४] इति श्रीकान्तिचन्द्रपाण्डेयमहाभागाः प्रतिपादयन्ति। किन्तु शिवयोगिशिवाचार्याख्येन (ख्रि० श० ८००) वीरशैवाचार्येण ततोऽपि प्राक्—

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥[५]

इत्यत्र कामिकादिवातुलान्ता अष्टाविंशतिः शैवागमाः सिद्धान्तशब्देन प्रतिपादिता इत्यप्यत्रावधेयम्।

सद्योज्योतिःसमकालीनोऽपर आचार्यो बृहस्पतिपादो नाम। सद्योज्योतिर्बृहस्पतिपादश्चेत्याचार्यौ सिद्धान्तशैवागमानामाद्यव्याख्यातृत्वपदवीं धारयतः। अतो भट्टरामकण्ठः—

---

१. शि. दृ. पृ० १३-१४
२. शै. द. बि., पृ० ८
३. भो. का., श्लो. २
४. शै. द. बि., पृ० ८
५. सि. शि. ५।१४

याभ्यां प्रकाशितं वर्त्म सिद्धान्ते सिद्धभावतः ।
गुरूणामपि तौ वन्द्यौ सद्योज्योतिर्बृहस्पती ॥[१]

इति तावुभावपि समानकोटिकत्वेन स्तुतवान् । बृहस्पतेः शिवतनुशास्त्रं रौरववार्त्तिकं चेति कृतिद्वयं तत्र तत्र विविधेषु ग्रन्थेषु समुद्धृतं वर्तते । अस्य मतस्य विद्याकण्ठ-नारायणकण्ठ-श्रीकण्ठ-रामकण्ठप्रभृतय आचार्या अपि कश्मीरेष्वभूवन् ।

द्वैतशैवसिद्धान्तस्य प्रचारो यथा काश्मीरदेशे आसीत् तथा मध्यप्रदेशेऽप्यासीत् । अत एव तत्रत्येन राज्ञा भोजदेवेन 'तत्त्वप्रकाश' इत्याख्यो ग्रन्थो विरचितः । तदद्यापि तस्य वैदुष्यं शिवभक्तिं च ख्यापयति । अस्य व्याख्यात्रयं विद्यते । तत्र कुमारेण विरचिता तात्पर्यदीपिका प्रथमा, अघोरशिवाचार्यविरचिता वृत्तिर्द्वितीया, पर्वतेश्वरस्वामिकृता [२]कर्णाटकभाषामयी टीका च तृतीया ।

दक्षिणभारतेऽप्यस्य दर्शनस्याधिकः प्रचार आसीद् वर्तते च । अत एव चोलदेशीयोऽघोरशिवाचार्यः— तत्त्वप्रकाश - तत्त्वसंग्रह - तत्त्वत्रयनिर्णय-रत्नत्रयभोगकारिका-नादकारिकादीनां बहूनां ग्रन्थानां व्याख्यां कृतवान् । एतदतिरिक्तमनेन आश्चर्यसारः, पाखण्डापजयः, भक्तप्रकाशश्चेत्यादिकाव्यानि, अभ्युदयाख्यं नाटकं च विरचितम्[३] ।

कान्यकुब्जदेशीयेनापरेण रामकण्ठेन भगवद्गीतायाः सर्वतोभद्राभिधा टीका विरचिता । एतेन कान्यकुब्जेऽपि सिद्धान्तशैवदर्शनप्रचार आसीदिति निश्चीयते । एवमेव श्रीकण्ठविरचितं रत्नत्रयम्, वैरोचनकृतप्रतिष्ठालक्षणसारसमुच्चयः, उमापतिशिवाचार्यकृतशतरत्नसंग्रहः, अप्पय्यदीक्षितकृता शिवार्चनचन्द्रिका, शिवाग्रयोगीन्द्रकृता शैवपरिभाषा, सूर्यभट्टकृता शैवसिद्धान्तपरिभाषा, शिवरहस्यं च, अघोरशिवकृता क्रियाक्रमद्योतिका, क्रियादीपिका, नित्यपूजालक्षणसंग्रहः, परार्थनित्यपूजाक्रमः, पवित्रोत्सवविधिः, प्रतिष्ठाष्टदशक्रियापादः, प्रायश्चित्तविधिः, वर्णाश्रमचन्द्रिका, शिवज्ञानबोधभाष्यम्, शिवयोगसारः, शिवागमशेखरः, शिवमात्रसारः, शिवधर्मविवेकः, शैवसंन्यासपद्धतिः, सकलागमसारसंग्रहः, सिद्धान्तशिखामणिश्च[४], त्रिलोचनशिवाचार्यकृता सिद्धान्तसारावलिः,

---

१. मो. का. टी., मङ्गलश्लो. ९

२. ग्रन्थोऽयं "वीरशैवग्रन्थप्रकाशिका, मैसूर" इत्यनया प्रकाशनसंस्थया १९०८ ई० तमेऽब्दे प्रकाशितः ।

३. ब्र. सू श्री. भू., पृ० ६४-६५; शै. द. बि., पृ० १२

४. अयं वीरशैवीयसिद्धान्तशिखामणितो भिन्नः ।

क्रियाक्रमदीपिका, क्रियाक्रमप्रकाशिका, क्रियानिर्णयः, क्रियासारः[१], क्रियासारसारसंग्रहः, ज्ञानरत्नावली, प्रायश्चित्तसमुच्चयश्च, देवज्ञानशिवाचार्यकृतो दीक्षादर्शः, शैवपरिभाषामञ्जरी, शैवसिद्धान्तसंग्रहः, साररत्नावली, सिद्धान्तप्रकाशिका च, अनन्तशिवकृता सिद्धान्तसारावलीव्याख्या, सोमशम्भुपद्धतिव्याख्या चेत्याद्या बहवो ग्रन्था समुपलभ्यन्ते। एतेषु बहवो ग्रन्था देवनागराक्षरेषु मुद्रिताः सन्ति। केचन ग्रन्थलिप्यां प्रकाशिताः, केचन च हस्तलिपिषूपलभ्यन्ते।

एतत्सिद्धान्तीयव्याख्याकारेषु रामकण्ठ-कुमारदेव-अघोरशिवादिषु रामकण्ठ एव प्राचीनः। सिद्धान्तशैवोयाचार्याणां तत्साहित्यविषयकं विस्तृतं विवेचनं प्रो० कान्तिचन्द्रपाण्डेय[२]-प्रो० व्रजवल्लभद्विवेद[३]-प्रो० एम्० जी० [४]मञ्जुण्डाराध्यमहाभागैर्बहु कृतमिति विरम्यते खलु विस्तरात्।

लकुलीशपाशुपतमतम्

महेश्वरस्यान्तिमावतारभूतेन लकुलीशेन स्थापितं द्वैताद्वैतपरं शास्त्रमेव लकुलीशपाशुपतम्। मथुरास्तम्भलेख-सोमनाथशिलालेख-वायुपुराण-लिङ्गपुराण-सूतसंहिता-राजशेखरकृतषड्दर्शनसमुच्चयेषु लकुलीशस्य तच्छिष्यपरम्परायाश्च निर्देशः कृतः। अतो लकुलीशः ख्रि० द्वितीये शतक आसीदिति विदुषामाशयः[५]। अस्य दर्शनस्य प्रचारो गुर्जरे, मथुरायाम्, दक्षिणभारते चाविच्छिन्न आसोत्। "द्वावाप्तौ तत्र च श्रीमच्छ्रीकण्ठलकुलेश्वरौ॥ द्विप्रवाहमिदं शास्त्रम्"[६] इति वदन्नभिनवगुप्तोऽपि पाशुपतं मतं लकुलीशपाशुपतं मतं च भिन्नं मनुते। एवं च पूर्वोक्तं पाशुपतं द्वैतपरमिदं च द्वैताद्वैतपरमिति स्पष्टमेवास्त्युभयोर्भेदः।

---

१. अयमपि वीरशैवीयक्रियासारग्रन्थतो भिन्नः।

२. शैवदर्शनबिन्दुः (सं. सं. वि. वि., १९६८ ई.) इति ग्रन्थे (पृ० २-१३) पर्यन्तमवलोकनीयम्।

३. आगममीमांसा (ला. शा. के. सं. वि. नई दिल्ली १९८२ ई.) इत्यस्य (पृ० ३४-३५) पर्यन्तम्; लुप्तागमसंग्रहः, भा० २ (सं. सं. वि. वि., १९८३ ई.) इत्यस्य उपोद्घाते (पृ० ८-८५) पर्यन्तमबलोकनीयम्।

४. श्रीकरभाष्यभूमिका(मै. वि. वि., १९७७ ई.)भागे (पृ० ५८-७६) पर्यन्तमवलोकनीयम्।

५. शै. द. बि., पृ० २७-३३; ब्र. सू. श्री. भू., पृ० ८६-८७

६. तन्त्रा. ३७।१४-१५

लकुलीशपाशुपतग्रन्थाः

पूर्वोक्ता द्वैताद्वैतपरा अष्टादश आगमा एवास्य मूलभूताः। एतदतिरिक्तं लकुलीशकृतं पाशुपतसूत्रम्, कौण्डिन्यविरचिता पञ्चार्थभाष्यनाम्नी पाशुपतसूत्रटीका, विशुद्धमुनिकृते यमप्रकरण-आत्मप्रकरणे, हरदत्ताचार्यलिखिता गणकारिका, भासर्वज्ञकृता गणकारिकाटीका, पुनस्तस्यैव सत्कार्यविचार-टीकान्तराख्यौ ग्रन्थौ, एवमेवाज्ञातकर्तृका संस्कारकारिका, कारणपदार्थः, पञ्चार्थभाष्यदीपिका, आदर्शश्चेति सन्ति ग्रन्थाः लकुलीश-पाशुपतदर्शनस्य। श्रीकान्तिचन्द्रपाण्डेयमहाभागा एतद्दर्शनग्रन्थनामनिरूपणावसरे 'आकरः' इत्यपि ग्रन्थविशेषस्य नाम इति निरूपितवन्तः[१]। किन्त्वाकरो न कस्यचिद् ग्रन्थस्य नाम, अपि तु समग्रस्य साहित्यस्य वाचक इति प्रो० व्रजवल्लभद्विवेदमहाभागानामाशयः। अस्माभिरपि तदेवानुमन्यते।

श्रीकण्ठीयविशिष्टाद्वैतम्

श्रीकण्ठीयविशिष्टाद्वैतमपि द्वैताद्वैतसिद्धान्तप्रतिपादकमेव। अस्य समयः खि. [२]दशमशताब्दी इति एकादशशताब्दी[३] वेति निरूपयन्ति। अस्य सिद्धान्तस्य प्रतिपादकं श्रीमदप्पय्यदीक्षितकृतशिवार्कमणिदीपिकासहितं ब्रह्मसूत्रश्रीकण्ठभाष्यमेव सुप्रसिद्धं वर्तते। श्रीकण्ठाचार्यश्च शैवविशिष्टाद्वैतं प्रतिष्ठापयामासुरिति दर्शनेतिहासविदामभिप्रायः[४]।

रसेश्वरदर्शनम्

शैवद्वैताद्वैतशाखासु रसेश्वरदर्शनस्यापि गणना क्रियते। रुग्णेन शरीरेण पुरुषार्थप्राप्तिर्न भवितुमर्हतीति विचारयन्त एतद्दर्शनानुयायिनः शरीरस्वास्थ्यलाभाय प्रयतितवन्तः। शुद्धेन पारदरसेन पिण्डस्थैर्यमेभिः साधितम्। पारदरसस्येश्वरस्वरूपत्वेनाभ्युपगतत्वादिदं दर्शनं रसेश्वरदर्शननाम्ना प्रसिद्धम्। एतत्सिद्धान्तप्रतिपादकाः सन्ति केचन ग्रन्थाः। तत्र नागार्जुनस्य रसरत्नाकरः, गोविन्दपादानां रसहृदयम्, विष्णुस्वामिनः साकारसिद्धिरित्यादयः प्रसिद्धाः[५]।

---

१. शै. द. बि., पृ० ३३
२. ब्र. सू. श्री. भू., पृ० ११०
३. शै. द. बि., पृ० ५९
४. ब्र. सू. श्री. भू., पृ० ११२
५. भा. द., पृ० ५७१-५७३

नन्दिकेश्वरदर्शनम्

अद्वैतशैवदर्शनेतिहासे नन्दिकेश्वरकृतं माहेश्वरसूत्रदार्शनिकव्याख्यारूपं नन्दिकेश्वरदर्शनं प्रथमं स्थानमलङ्करोति। नन्दिकेश्वरविषये परम्परागतमिदं वृत्तान्तमुपमन्युकृतायां नन्दिकेश्वरकाशिकाटीकायां समुपलभ्यते। नन्दिकेश्वर-व्याघ्रपादादीनुद्धर्तुकामः शिवो डमरुनिनादव्याजेन पाणिन्यष्टाध्यायिप्रारम्भोपलभ्यमानं चतुर्दशसूत्रात्मकं तत्त्वमुपदिदेश। सूत्रजातस्य तत्त्वार्थं बोद्धुमसमर्था व्याघ्रपादादयो नन्दिकेश्वरं तत्त्वार्थं विवरीतुं प्रार्थयामासुः। स च सूत्रनिक्षिप्तं रहस्यार्थं षड्विंशतिकारिकाभिरुपदिदेश। चतुर्दशसूत्राणां व्याख्यानं शैवाद्वैत-स्थापनार्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थं चेति प्रकारद्वयेन कृतं नन्दिकेश्वरेण। तत्र चैकैव कारिका पाणिन्यादिवैयाकरणानां कृते। यथाह—

अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम्।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये॥ इति।

शेषास्तु शैवाद्वैतप्रतिपादनपराः। पाणिनिसूत्राणां भाष्यकारेण पतञ्जलिना, व्याख्याकारेण कैयटेन, उद्योतकारेण नागेशभट्टेन च नन्दिकेश्वर-कारिकायाः प्रामाण्यं स्वीकृतम्। एतेन नन्दिकेश्वरः पाणिनिगुरुरासीदिति सिद्ध्यति। नन्दिकेश्वरस्य दर्शनं स्वातन्त्र्यवाद इत्युच्यते। प्रत्यभिज्ञादर्शन-वादिभिः काश्मीरशैवैरस्य स्वातन्त्र्यवादस्यानुकरणं कृतम्।

काश्मीरशैवदर्शनम्

अद्वैतशैवदर्शनस्य प्रधानं केन्द्रं काश्मीरदेश एवासीत्। अतोऽस्य नाम काश्मीरशैवदर्शनमिति ख्यातम्। प्रत्यभिज्ञा, स्पन्दः, त्रिकं चेत्यस्य सन्ति पर्यायनामानि। शैवागमा एवास्य दर्शनस्य मूलस्रोतोभूताः। वेदवच्छैवागमा अप्यैश्वर्यो वाचः, एवं चानादयः। एषां सत्ता पूर्वपूर्वतनयुगेष्वप्यासीत्। बलि-राम-लक्ष्मण-रावणादिराजभिः, बहुभिर्महर्षिभिश्चेमे सम्यगधीताः। गच्छता कालेन कलिप्रारम्भे समुच्छिन्ना खल्वागमपरम्परा। ततश्चैकदा भगवान् शिवो श्रीकण्ठरूपेण दुर्वाससे, स च स्वमानसपुत्राय त्र्यम्बकादित्याय, सोऽपि त्र्यम्बकाख्याय स्वमानसपुत्राय शैवागमानुपदिदेश। एवमेव परम्परया मनः-सृष्टैश्चतुर्दशभिः पुत्रैः समनुष्ठितम्, यतस्ते सर्वेऽप्यन्तर्मुखाः समभूवन्। परं पञ्चदशः पुत्रः सङ्गमादित्यनामकः कथञ्चन बहिर्मुखो जातः, सुलक्षणामेकां ब्राह्मणकन्यां ब्राह्मेण विवाहेन परिणीतवांश्च। तस्य सुतो वर्षादित्यः, तस्य चारुणादित्यः, तस्यापि चानन्दः, तस्य च पुत्रः सोमानन्दाख्यः शिवदृष्टिनामक-

प्रकरणग्रन्थकर्ता समभूदिति श्रीकान्तिचन्द्रपाण्डेयमहाभागाः सोमानन्दीयशिवदृष्टिग्रन्थाधारेण काश्मीरशैवीयगुरुपरम्परां निरूपितवन्तः[१]। अस्यां परम्परायां सोमानन्द एकोनविंश आसीत्। अयमभिनवगुप्तस्य परमेष्ठिगुरुरित्युच्यते। अस्य दर्शनस्य प्रथमः प्रचारकस्त्र्यम्बक इति कृत्वेदं त्रैयम्बकदर्शनम्, त्रिकदर्शनं वेत्यप्युच्यते। सोमानन्दः ख्रि॰ नवमशताब्दीमध्यभाग आसीदिति विदुषामाशयः। त्रिकदर्शनस्याविर्भावकालः ख्रि॰ पञ्चमशतक इत्यभ्युपगम्यते इतिहासवेदिभिः।

काश्मीरशैवाचार्याः, तत्साहित्यं च

काश्मीरशैवदर्शनस्याप्यस्ति विपुलं साहित्यम्, यत् काश्मीरसंस्कृतग्रन्थमालातः प्रकाशितम्। आगमशास्त्रानन्तरं शिवसूत्रमेवास्य दर्शनस्याद्यो ग्रन्थः। प्राचीनोपलोपरि लिखितान् शिवसूत्रान् भगवतः श्रीकण्ठस्यादेशानुसारमाचार्यो वसुगुप्तः (ख्रि॰ श॰ ८००) समुद्दधार। वसुगुप्तस्य द्वौ शिष्यौ कल्लटसोमानन्दाख्यौ क्रमशः स्पन्द-प्रत्यभिज्ञाख्यौ पन्थानौ प्रवर्तयामासतुः। कल्लटस्य श्रेष्ठा कृतिर्वसुगुप्तीयस्पन्दकारिकाया वृत्तिः, या च 'स्पन्दसर्वस्व' इति नाम्ना प्रख्याता। अनेन शिवसूत्रीयचतुर्थखण्डस्य तत्त्वार्थचिन्तामण्याख्या, आद्यखण्डत्रयस्य च मधुवाहिनीनाम्नी व्याख्या विरचिता। अनेन कश्चन प्राकृतभाषामयो ग्रन्थः, स्वस्वभावसंबोधनाख्यश्च ग्रन्थोऽपि रचित इति ज्ञायते[२]। सोमानन्दस्य शिवदृष्टि-परात्रिंशिकावृत्त्याख्यौ ग्रन्थौ श्रेष्ठकृतित्वेन प्रसिद्धौ। शाक्तविज्ञाननामा कश्चन ग्रन्थोऽस्य प्रकाशितः। अनेन शिवदृष्टिविवृतिरपि रचितेति सूचयन्ति विद्वांसः[३]। उत्पलाचार्यस्य (ख्रि॰ श॰ ९००) ईश्वरप्रत्यभिज्ञाकारिका तु त्रिकसिद्धान्तस्य मौलिको ग्रन्थः। अस्य ईश्वरप्रत्यभिज्ञावृत्ति-ईश्वरप्रत्यभिज्ञाविवृति - स्तोत्रावली - अजडप्रमातृसिद्धि-ईश्वरसिद्धि-ईश्वरसिद्धिवृत्ति-सम्बन्धसिद्धि - सम्बन्धसिद्धिवृत्ति - शिवदृष्टिवृत्त्याख्या महनीया ग्रन्थाः प्रसिद्धाः सन्ति। अयं प्रत्यभिज्ञामतस्य प्रतिष्ठापक आसीत्[४]। उत्पलः सोमानन्दस्य शिष्य आसीत्।

---

१. शै. द. बि, पृ॰ २-३

२. लु. सं., भा. २, उपो. पृ॰ २५

३. अभि., पृ॰ १६२

४. अभि., पृ॰ १६३-१६४

काश्मीरशैवसाहित्येतिहासेऽभिनवगुप्तस्य (ख्रि० श० ९५०–१०००) नामाधिकं प्रसिद्धम्। अयमुत्पलाचार्यस्य प्रशिष्यः, लक्ष्मणगुप्तस्य च शिष्य आसीत्। अभिनवगुप्तः श्रेष्ठसाहित्यशास्त्रज्ञो दार्शनिकश्चासीत्। अभिनव-भारती-लोचनाख्यौ ग्रन्थावस्य साहित्यप्रज्ञां द्योतयतः। तन्त्रालोक-तन्त्रसार-मालिनीविजयवार्त्तिक-परमार्थसार-परात्रिंशिकावृत्त्याख्या ग्रन्थास्तस्य दार्शनिकीं प्रज्ञां प्रख्यापयन्ति। अभिनवगुप्तरचिताः प्रायश्चतुश्चत्वारिंशद्ग्रन्था विविध-विषयका अद्यावध्युपलब्धा इति सूचयन्ति विद्वांसः[1]। क्षेमराजः (ख्रि० श० ९७५–१०२५) अभिनवगुप्तस्य सुयोग्यः शिष्य आसीत्। शिवसूत्रविमर्शिनी, प्रत्यभिज्ञाहृदयम्, स्पन्दसन्दोहः, शिवस्तोत्रावलीटीका, स्वच्छन्दतन्त्र-नेत्रतन्त्र-विज्ञानभैरवाणामुद्योताख्या व्याख्याग्रन्था अस्य प्रमुखाः सन्ति। भैरवानुकरण-स्तोत्रमप्यस्य मुद्रितमुपलभ्यते। एतदतिरिक्तमुत्पलवैष्णवस्य स्पन्दप्रदीपिका, भास्करस्य वरदराजस्य च शिवसूत्रवार्त्तिकम्, रामकण्ठस्य स्पन्दकारिकावृत्तिः, योगराजस्य परमार्थसारवृत्तिः, जयरथस्य तन्त्रालोकीया विवेकाभिख्या टीका, गोरक्षस्य (महेश्वरानन्दस्य) परिमलसहिता महार्थमञ्जरी चेत्याद्या ग्रन्थाः सुप्रसिद्धा एव[2]।

क्रमदर्शनम्

इदमपि दर्शनं काश्मीरे तावज्जन्म लेभे। महार्थमञ्जरीकर्ता महेश्वरानन्दो धार्मिकदृष्ट्या भैरवः क्रमदर्शनस्य प्रवर्तक इत्यङ्गीकृत्य शिवानन्दं भूलोकेऽस्य प्रथमप्रवर्तयितारं स्वीकरोति। जयरथस्तु धार्मिकं कथानकमुपेक्ष्यैति-हासिकदृष्ट्या शिवानन्द एव क्रमदर्शनप्रवर्तयितेत्युल्लिखति। शिवानन्दस्य तिस्रः शिष्याः केयूरवती-मदनिका-कल्याणिकेतिनाम्न्योऽभूवन्। तासां बहवः शिष्या आसन्, येषु गोविन्दराज-भानुक-एरकाख्या महतीं प्रसिद्धिं प्राप्नुवन्। गोविन्दराजः शिवदृष्टिकर्तुः सोमानन्दस्य गुरुरभवत्। सोमानन्द ईशवीयनवम-शतकमध्यभव उररीक्रियते। सोमानन्दशिवानन्दयोर्मध्ये परम्परागतौ द्वौ गुरू अभूताम्। अतः क्रमदर्शनमीशवीयाष्टमशतके समभूदिति निश्चप्रचम्।

क्रमदर्शनसाहित्यं द्विप्रकारकम्—आगमाः, आगमाश्रिता ग्रन्थाश्च। तत्र क्रमसद्भावः, क्रमसिद्धिः, ब्रह्मयामलम्, तन्त्रराजभट्टारकश्चेतीमे आगमाः क्रमदर्शनविचारे प्रदत्तेभ्य उद्धरणेभ्य ज्ञायन्ते। आगमाश्रिता बहवो ग्रन्थाः

---

१. क्रम., पृ० १५९

२. भा. द., पृ० ५६१-५६४

शिवानन्दादिभिर्लिखिता उपलब्धग्रन्थेषु नामकीर्तनमात्रेणापि न दृष्टिपथमायाता अद्यावधि, परं तत्कृतयोऽप्यासन्निति तन्मतोल्लेखेभ्यो ज्ञायन्त इति खेदमुपस्थापयन्ति श्रीमन्तो डॉ० कान्तिचन्द्रपाण्डेयमहाभागाः[1]। क्रमदर्शनमाश्रित्य रचितानां बहूनां ग्रन्थानां तत्रत्यानामाचार्याणां च विस्तृतः परिचयो डॉ० नवजीवनरस्तोगीरचिते "क्रम तान्त्रिसिज्म आफ काश्मीर" (पृ० ८२–२४८) इत्याख्ये ग्रन्थे द्रष्टुं शक्यते ।

प्रो० व्रजवल्लभद्विवेदमहाभागाः—कालिकाक्रमः, क्रमकेलिः, क्रमरहस्यम्, क्रमवासना, क्रमसद्भावादित्रिंशदधिकानां क्रमदर्शनग्रन्थानां नामान्युल्लिख्य, शिवानन्दः, आजराजः, कल्लटः, जयरथपरमगुरुः, जयरथगुरुः, तपस्विराजः, दामोदरः, नाथपादाः, निष्क्रियानन्दनाथः, भूतिराजः, महावनमुनिः, महेश्वरानन्दः, रत्नदेवः, वामननाथः, सोमराज इत्येते च सन्ति क्रमदर्शनस्याचार्या इति निरूपयन्ति[2] ।

कुलदर्शनम्

परमतत्त्वं कुलमित्यङ्गीकृतवद् दर्शनमेव कुलदर्शनम् । कौल इत्यप्यस्य नामान्तरम् । ईशवीये पञ्चमे शतके प्रादुरासीदिदं दर्शनम् । कुलदर्शनस्य साहित्येतिहासः पञ्चमादीशशतकादष्टादश-ईशशतकपर्यन्तं विस्तीर्ण इति प्रतिपादयन्ति श्रीकान्तिचन्द्रपाण्डेयमहाभागाः[3] । कालीकुलम्, त्रिककुलम्, त्रिकरत्नकुलम्, निशाकुलम्, भैरवकुलम्, माधवकुलमित्याद्या कुलशब्दान्ता ग्रन्थाः, ऊर्मिकौलम्, प्रभाकौलम्, योगिनीकौलमित्याद्या कौलशब्दान्ता ग्रन्थास्तथा चान्ये बहवो ग्रन्थाः सन्ति कुलदर्शनस्य । पद्महस्तभट्टारकः, वासुदेवः, सिद्धनाथपादश्चेत्याचार्याश्च कुलं कौलं च सम्प्रदायमनुवर्तन्त इति प्रो० व्रजवल्लभद्विवेदमहाभागाः प्रतिपादयन्ति[4] । अस्य सम्प्रदायस्य ग्रन्थग्रन्थकाराणां च विशिष्टः परिचयो डॉ० पाण्डेयमहोदयरचिते "अभिनवगुप्त०" (पृ० ३४२-७३२) इत्याख्ये ग्रन्थे द्रष्टुं शक्यते ।

---

१. शै. द. बि.. पृ० १२२-१२३

२. लु. सं., भा. २, उपो. पृ० १०-११

३. शै. द. बि., पृ० १२२-१२३

४. लु. सं., भा. २, उपो. पृ० १२-१३

वीरशैवमतम्

वीरशैवमतं बह्वीषु शैवशाखासु प्रधानभूतम्। अस्य मूलस्रोतोभूताः सिद्धान्तशब्दवाच्या अष्टाविंशत्यागमा एव। तदुक्तं श्रीरेणुकाचार्यैः—

सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम् ॥[1] इति।

वीरशैवीयानामिष्टलिङ्गधारणषट्स्थलोपासनादीनां केषाञ्चन विशिष्टाचाराणां निरूपणं वेदेषु,[2] महाभारते,[3] पुराणादिषु[4] च समुपलभ्यत इति तेषामपि प्रामाण्यमभ्युपगम्यते। उक्तं चाचार्यैः—

वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात् ॥[5] इति।

तस्माद् वीरशैवमतमत्यन्तं प्राचीनं वेदागमोपनिषत्प्रसिद्धं चेति ज्ञायते। अथाप्यत्रागमानां प्रामाण्यं प्राथमिकम्, तदानुकूल्येन च वेदानां प्रामाण्यमङ्गीक्रियते। अत इदं मतं तान्त्रिकवैदिकमिति कथ्यते।

---

१. सि. शि. ५.१४

२. "पवित्रं ते विततं ब्रह्मणस्पते" (ऋ. ९।८३।१), "अयं मे हस्तो भगवान्" (ऋ. १०।६०।१२), "या ते रुद्र शिवा तनूरघोरा" (तै. सं. ४।५।१।१), "पाणिमन्त्रं पवित्रम्" (तै. आ. १०।१६) इत्यादिवैदिकमन्त्राणां सिद्धान्तशिखामणि(६।५८-५९, ६१)-लिङ्गधारणचन्द्रिका(पृ० ३५-१८०)प्रभृतिग्रन्थेषु बाह्यलिङ्गधारणपरत्वं प्रतिपाद्येष्टलिङ्गधारणस्य वैदिकत्वं समर्थितम्।

३. किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनाः।
ब्राह्मणं लिङ्गिनं चैव ब्राह्मणं वाऽप्यलिङ्गिनम् ॥
स्ववृत्तिमभिपन्नाय लिङ्गिने चेतराय च।
देयमाहुर्महाराज उभावेतौ तपस्विनौ ॥ (म. भा., अनु. २२।१-२)

४. आचारलिङ्गं प्रथमं गुरुलिङ्गं द्वितीयकम्।
शिवलिङ्गं तृतीयं स्याच्चरलिङ्गं चतुर्थकम् ॥
प्रसादं पञ्चमं लिङ्गं महालिङ्गं तु षष्ठकम्।
भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः ॥
शरणैक्यस्थलैः षड्भिः क्रमाल्लिङ्गमुदाहृतम्। (लि. पु. २।२१।१२२-१२४)

५. सि. शि. ६.५७

वीरशैवशब्दार्थनिर्वचनम्

वीरशैवशब्दे विद्यमानं वीरविशेषणमेवान्यशैवेभ्य एनं व्यावर्तयति। अत्र प्रयुक्तेन 'वीर'शब्देनास्य दार्शनिकसिद्धान्तः सम्प्रदायाचारश्च प्रस्फुटितो भवति। तदुक्तम्—

वीशब्देनोच्यते विद्या शिवजीवैक्यबोधिका।
तस्यां रमन्ते ये शैवा वीरशैवास्तु ते मताः॥[1]
इष्टलिङ्गवियोगे वा व्रतानां वा परिच्युतौ।
तृणवत् प्राणसन्त्याग इति वीरव्रतं मतम्॥
भक्त्युत्साहविशेषोऽपि वीरत्वमिति कथ्यते।
वीरव्रतसमायोगाद् वीरशैवं प्रकीर्तितम्॥[2] इति।

अत्रेदमैदम्पर्यम्—वीरशैवसिद्धान्ते दीक्षासम्पन्नस्यैव साधकस्य ब्रह्मजिज्ञासाधिकारित्वं प्रतिपाद्यते। दीक्षायामिष्टलिङ्गसंस्कारं विधाय तद्यावज्जीवं शरीरे सावधानेन धारणीयमित्युपदिशत्यत्र गुरुः, कदाचित् प्रमादेन तद्वियोगे प्राणत्यागात्मकं वीरव्रतं चोपदिशति। एवं गुरूपदिष्टमार्गेण भक्त्युत्साहेन चेष्टलिङ्गं शरीरे सदा धारयन्, नियमेन तत्पूजादिकं कुर्वन्, शिवजीवैक्यबोधिकायां विद्यायां यो रममाणस्तिष्ठति, स एव वीरशैव इति शास्त्ररहस्यम्। वीरशब्दस्य व्युत्पत्त्यन्तरं योगिनीहृदयदीपिकायां दृश्यते। तथाहि—"इदन्तारिपोरहमि समराङ्गणे प्रलयप्रतिपादनपरा वीराः" (पृ० ८२) इति। अत्र च परापञ्चाशिकायाः श्लोकः प्रमाणत्वेन स्मर्यते—"अहमि प्रलयं कुर्वन्निदमः प्रतियोगिनः। पराक्रमपरो भुङ्क्ते स्वभावमशिवापहम्॥"[3] इति। लिङ्गाङ्गसामरस्यमुखेन तदिदमाचरन्तो वीरशैवाः सत्यं वीरा इत्यत्र को नाम विवदेत। स्थूलशरीरे सदा स्वेष्टलिङ्गधारणं वीरशैवस्य बाह्यं चिह्नम्, शिवजीवैक्यबोधश्च तदान्तरं चिह्नम्। एवमुभयलक्षणविशिष्ट एव वीरशैव इति शास्त्रनिश्चयः।

किञ्च, श्रीमन्तो नीलकण्ठशिवाचार्याः—"विरोधरहितं शैवं वीरशैवम्" इति वीरशैवपदं विरोधरहितार्थकं व्युत्पाद्य वीरशैवानां समन्वयवादित्वं समर्थितवन्तः। उक्तं च तैः—

---

१. सि. शि., ५।१५
२. च. ज्ञा. क्रि., १०।३३-३४
३. यो. हृ. दी., पृ० ८२

विरोधार्थो विशब्दः स्याद् रशब्दो रहितार्थकः।
विरोधरहितं शैवं वीरशैवं विदुर्बुधाः॥[१] इति।

वीरशैवानां समन्वयवादित्वं प्रबन्धस्योपसंहारे प्रस्थापयिष्यते।

वीरशैवानां महापाशुपताभिधानम्

सर्वलोकविलक्षणशिवलिङ्गनिष्ठायुक्तानां वीरशैवानां महापाशुपताख्याभिधानान्तरमपि प्रसिद्धं वर्तते। तथाहि—

द्विधा पाशुपतं ज्ञेयं पूर्वापरविभेदतः।
शिवागमानुसारेण भस्मरुद्राक्षधारणम्॥
लब्ध्वा शिवं महादेवं लिङ्गरूपमुमापतिम्।
अर्चयेत् तु त्रिकालं वै पूर्वं पाशुपतं हि तत्॥
शिवागमानुसन्धानशैवदीक्षासमन्वितः।
शिवलिङ्गं करे कण्ठे धृत्वा वक्षःस्थलेऽपि वा।
त्रिकालं योऽर्चयेद् भक्त्या महापाशुपतो हि सः॥[२] इति।

अत्र पूर्वापरभेदेन पाशुपतस्य द्वैविध्यं प्रतिपाद्य, ये भस्मरुद्राक्षधारिणो भूत्वा शिवलिङ्गरूपेण महादेवं पूजयन्ति ते पूर्वपाशुपताः, ये तु शिवदीक्षासंस्कारपूर्वकं शिवलिङ्गं सद्गुरुणा प्राप्य सदा शरीरस्य कर-कण्ठ-वक्षःस्थलादिष्वन्यतमे स्थाने सावधानेन धारयन्तो नियमेन त्रिकालं तल्लिङ्गपूजां कुर्वन्ति तेऽपरपाशुपताः, त एव महापाशुपता इति चेत्युक्तम्। निट्टूरनञ्जनाचार्याः—"अथ वीरशैवानां महापाशुपतानां कथमन्त्येष्टिक्रमः"[३] इति वीरशैवानां कृते महापाशुपतशब्दं प्रयुक्तवन्तः। तस्माद् वीरशैवा महापाशुपतशब्देनापि व्यवह्रियन्ते।

किं लिङ्गायतशब्दो वीरशैवपर्यायः ?

कर्णाटकप्रदेशे वीरशैवानुयायिनो बहुसंख्यया निवसन्ति। तद्देशीयभाषायां लिङ्गायतशब्देन व्यवह्रियन्ते। शरीरे सदा स्वेष्टलिङ्गं धारयन्तीत्ययं शब्दो व्यवहारे रूढः सञ्जातः। तस्मादयं शब्दो रूढिगत एव न तु शास्त्रीयः। प्राचीने वीरशैवसाहित्ये कुत्रापि लिङ्गायतशब्दप्रयोगो न दृश्यते। सर्वत्र वीरशैवशब्द एव दृष्टिपथमायाति। वीरशैवशब्दे यदर्थगाम्भीर्यं वर्तते, तल्लिङ्गायतशब्दे

१. क्रि. सा., भा. १, पृ० ११
२. सा. सु., व. १५, अं. १-४, पृ० २२६
३. वे. सा. वी. चि, उत्तरखण्डे, पृ० ३९८

नास्ति। एतद्विषयका बहवो बहुभाषामयाश्च लेखाः काशीज्ञानसिंहासनाधीश्वरैर्बहुशास्त्रविशारदैरिदानीं त्यक्तकलेवरैः पूज्यपादैर्वीरभद्रशिवाचार्यैर्विलिख्य प्रचारिताः। अथापि "शास्त्राद् रूढिर्बलीयसी" इति न्यायेन लिङ्गायतशब्दस्य व्याप्तिरधुनाऽऽधुनिकसाहित्यमाध्यमेन प्रदेशान्तरेष्वपि सञ्जाता। अधुना साहित्ये प्रयुज्यमानोऽयं लिङ्गायतशब्दोऽशुद्ध एव। तस्य शुद्धं रूपं तु 'लिङ्गायत्त' इति। वीरशैवीयक्रियादीक्षायां क्रियमाणेषु सप्तस्वान्तरसंस्कारेष्वन्यतमोऽयमायत्तसंस्कारः। क्रियादीक्षायां सद्गुरुर्यदा संस्कृतं शिवलिङ्गं शिष्यस्य वामहस्तपीठे निधाय त्वमद्यप्रभृति लिङ्गायत्तो भव, अर्थाद् लिङ्गाधीनो भवेत्युपदिशति। स एव लिङ्गायत्तसंस्कारः। तस्माद् लिङ्गायत्तशब्द एव कर्णाटकदेशीयभाषायां लिङ्गायत इति प्रयुज्यते। तस्माल्लिङ्गायत्तशब्दो दीक्षाङ्गभूतान्यतमसंस्कारवाचक एव, न तु धर्मवाचकः। अतो धर्मदृष्ट्या दर्शनदृष्ट्या च वीरशैवशब्द एव योग्यो न लिङ्गायतशब्दः। तस्माल्लिङ्गायतशब्दः कथमपि वीरशैवशब्दस्य पर्यायो भवितुं नार्हतीति विदाङ्कुर्वन्तु विद्वांसः।

वीरशैवप्रभेदाः

तदयं वीरशैवः सामान्य-विशेष-निराभारित्वेन त्रिधा विभज्यते। तदुक्तमागमे—

> वीतरागादिदोषत्वादात्मतत्त्वविचारणात्।
> विकल्पाकल्पशून्यत्वाद् वीरशैवमिति स्मृतम्॥
> सामान्यं प्रथमं प्रोक्तं विशेषं च द्वितीयकम्।
> निराभारं तृतीयं स्यात् क्रमाल्लक्षणमुच्यते॥[1]

तत्र गुरुप्रदत्तेष्टलिङ्गे निष्ठावान् भूत्वा गुरु-लिङ्ग-जङ्गम-सेवारूपवीरशैवीयसामान्यनियमान् यः परिपालयति, स 'सामान्यवीरशैवः'[2] इत्युच्यते।

वीरशैवागमोक्तेष्टलिङ्गपूजादिरूपकर्मानुष्ठानेन परिपक्वान्तःकरणो भूत्वा "विशिष्टधर्मानुष्ठानाद् विशेष इति कथ्यते" इत्यागमोक्त्यनुसारं लिङ्गाङ्गानुसन्धानात्मकैकोत्तरशतस्थलप्रभेदभिन्नषट्स्थलरहस्यं गुरुमुखाद् यो विशेषेण जानाति, स 'विशेषवीरशैवः'[3] इत्याख्यायते।

---

१. सू. आ. क्रि., ७।२९-३०

२. सू. आ. क्रि., ७।३१-३८

३. सू. आ. क्रि., ७।३९-६३

अयं विशेषवीरशैव एव यदा "निवृत्तकर्मभारत्वान्निराभार इति स्मृतः" इत्यागमोक्त्या कृतकृत्यः सन् सर्वाभिमानपरित्यागेन निस्पृहवृत्त्या च जीवन्मुक्तवज्जीवनं यापयति यदा, तदा 'निराभारवीरशैवः'[१] इत्यभिधीयते।

वीरशैवदर्शनस्य पर्यायनामानि

वीरशैवदर्शनग्रन्थेष्वस्य दर्शनस्य शिवाद्वैत-विशेषाद्वैत-शक्तिविशिष्टाद्वैताख्यानि पर्यायनामानि प्रतिपादितानि सन्ति। तत्र तावत् सिद्धान्तशिखामणौ भगवान् शिवो वीरशैवधर्मप्रतिष्ठापनाय गणेश्वरं श्रीरेणुकं भूलोकं प्रेषयन्—

मदद्वैतपरं शास्त्रं वेदवेदान्तसम्मतम्।
स्थापयिष्यसि भूलोके सर्वेषां हितकारकम्॥[२]

इत्यादिदेश। अत्र मदद्वैतपरं शास्त्रमित्यस्य शिवाद्वैतशास्त्रमित्यर्थो भवति। तस्मात् सिद्धान्तशिखामण्यनुसारमस्य दर्शनस्य नाम शिवाद्वैतमिति ज्ञायते। "शिवश्च शिवश्च शिवौ, तयोरद्वैतम् = शिवाद्वैतम्" इति ह्यस्य व्युत्पत्तिः। अत्र प्रथमशिवशब्दस्य सूक्ष्मचिदचिच्छक्तिविशिष्टः परशिवोऽर्थः, द्वितीयशिवशब्दस्य स्थूलचिदचिच्छक्तिविशिष्टो जीवोऽर्थः। एवं संसारदशायां परस्परभिन्नयोरुपासनामुखेन मुक्तावद्वैतप्रतिपादकमेव शास्त्रं शिवाद्वैतमित्यर्थः।

तत्रभवता भाष्यकारेण श्रीपतिपण्डिताराध्येन—

द्वैताद्वैतमते शुद्धे विशेषाद्वैतसंज्ञके।
वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः॥[३]

इत्यस्मिन् मङ्गलश्लोके वीरशैवदर्शनस्य नाम विशेषाद्वैतमिति, तदेव सर्वश्रुतिसमन्वयात्मकमिति च निरूपितम्। "विश्च शेषश्च विशेषौ = ईशजीवौ, तयोरद्वैतं = विशेषाद्वैतम्" इत्यस्य व्युत्पत्तिः प्रदर्शिता। अत्रायं भावः—"विश्चक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि"[४] इति नैघण्टुकेषु विशब्दस्य परमात्म-

१. सू. आ., क्रि. ७।६४-९१

२. सि. शि. ३।७

३. ब्र. सू. श्री., मङ्गलश्लो. १५.

४. एका. को., पृ. १८.

वाचकत्वं सूचितम्, वात्युत्पादयतीति व्युत्पत्त्या च विशब्देन जगत्कारणत्वेनेश्वरस्यैव सिद्धिर्भवति। किञ्च, "द्वा सुपर्णा सयुजा सखाया[1]" इति श्रुतिरपि परमात्मानं पक्षिरूपेण वर्णितवती। तस्माद् 'विः' इत्यस्य प्रकृते परमात्मा इत्यर्थो गृह्यते। शेषशब्देन च तस्यांशो जीवोऽभिप्रेतः, "यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा"[2] इति सदृष्टान्तं जीवस्य शिवांशत्वश्रवणात्। एवम्भूतयोः शिवजीवयोः "यथा नद्यः स्यन्दमानाः"[3] इति श्रुत्याऽद्वैतमुपदिष्टम्। तदेवं संसार्यवस्थायां परस्परभिन्नयोरंशांशिनोः शिवजीवयोर्मुक्तावभेदप्रतिपादकमिदं दर्शनं विशेषाद्वैतशब्देन व्यवह्रियते।

श्रीमन्तो नीलकण्ठशिवाचार्याः—

न जीवब्रह्मणोरैक्यं सूत्रस्वरसतः स्फुरेत्।
इति व्याचक्षते शक्तिविशिष्टं विषयस्त्विति॥

यथा घट इति ज्ञाते घटत्वं स्याद्विशेषणम्।
तथा ब्रह्मणि वैशिष्ट्यं शक्तेरित्यवधार्यताम्॥

तस्माच्छक्तिविशिष्टस्य जिज्ञासा ब्रह्मणः स्फुटम्।

इत्यत्रास्य दर्शनस्य नाम "शक्तिविशिष्टाद्वैतम्" इति निरूपितवन्तः। अस्य व्युत्पत्तिस्तु—"शक्तिश्च शक्तिश्च शक्ती, ताभ्यां विशिष्टौ जीवेशौ, तयोरद्वैतं शक्तिविशिष्टाद्वैतम्" इति। जीवः स्थूलचिदचिद्रूपशक्तिविशिष्टः, शिवस्तु सूक्ष्मचिदचिद्रूपशक्तिविशिष्टः। अत्र स्थूला चित् किञ्चिज्ज्ञत्वरूपा, स्थूला अचित् किञ्चित्कर्तृत्वरूपा। एवमेव सूक्ष्मा चित् सर्वज्ञत्वरूपा, सूक्ष्मा अचित् सर्वकर्तृत्वरूपा, अर्थाज्जीवः किञ्चिज्ज्ञत्व-किञ्चित्कर्तृत्वरूपशक्तिविशिष्टः, शिवः सर्वज्ञत्वसर्वकर्तृत्वरूपशक्तिविशिष्ट इति सिद्धम्। एवम्भूतयोर्जीवशिवयोः "जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्"[4] इति श्रीरेणुकोक्त्याऽद्वैतं प्रतिपाद्यत इतीदं दर्शनं शक्तिविशिष्टाद्वैतदर्शनमित्युच्यते।

इदमत्रैदम्पर्यम्—परशिवस्येच्छा-ज्ञान-क्रियाशक्तयः सङ्कुचिताः सत्य आणव-मायीय-कार्माख्यमलरूपा भवन्ति। एते च त्रिमला अनादिरूपाः। एत-

१. मुण्ड. उ. ३।१।१
२. बृ. उ. २।१।२०
३. मुण्ड. उ. ३।२।८
४. सि. शि. २०।६१

न्मलत्रयावृतः शिवस्यांश एव जीव इत्युच्यते। एवं मलत्रयावृतोऽयं जीवोऽनादिकालात् परशिवाद् भिन्न एव भवति। जन्मजन्मार्जितसुकृतवशाद् यदाऽस्य शिवानुग्रहाख्यः शक्तिपातः संजायते, तदा सद्गुरुरस्य दीक्षासंस्कारं करोति। एवं दीक्षासंस्कारेण स्वकीयोपासनाबलेन चास्य मलत्रयाख्याः सङ्कुचितशक्तिरूपाः पुनर्विकसिता भवन्ति, तदा जीवोऽपि परशिववत् सर्वज्ञत्वादिशक्तिविशिष्टो भवति। तदानीमुभयोः समानशक्तिविशिष्टत्वात् समानस्वरूपत्वाच्च जीवः शिवः संजायते। एवं समानशक्तिस्वरूपयुक्तत्वादेवानयोरैक्यं "जले जलमिव" इत्युपदिष्टम्। एवं पूर्वमल्पज्ञत्वादिशक्तिविशिष्टः, पश्चादुपासनया प्राप्तसर्वज्ञत्वादिशक्तिविशिष्टो जीवः स्वाभाविकसर्वज्ञत्वादिशक्तिविशिष्टेन परशिवेन साकं मुक्तावस्थायां समरसो भवति। एवं विकसितशक्तिविशिष्टस्य जीवस्य स्वाभाविकशक्तिविशिष्टस्य शिवस्य चाद्वैतप्रतिपादकं शास्त्रमेव शक्तिविशिष्टाद्वैतदर्शनम्, शक्तिविशिष्टाद्वैतवेदान्तो वा। अत्रापि बद्धावस्थायां सङ्कुचितशक्तित्वात् परशिवाद् भिन्न एव जीवः पुनर्मुक्तावस्थायां विकसितशक्तिकः सन् परशिवेन समरसो भवतीति स्पष्टमेव प्रतीयते।

अत्रोक्तानामस्य दर्शनस्य पर्यायनाम्नां पर्यालोचनेन त्रयाणां समानार्थकत्वेऽपि शिवाद्वैत-विशेषाद्वैतशब्दाभ्यामस्य दर्शनस्य स्वरूपं शीघ्रं नाभिव्यज्यते। शक्तिविशिष्टाद्वैतशब्देन तु तच्छीघ्रमभिव्यज्यत इति प्रसादगुणयुक्तत्वादिदमेव नामास्य दर्शनस्य सुचारु प्रतिभाति। अत एव वर्तते चास्यैव नाम्नः प्रचारः। अस्य दर्शनस्य विशिष्टा विद्वांसः श्री टि० जो० सिद्धप्पाराध्यमहाभागा अप्येवमेवाभिप्रयन्ति[1]। पदवाक्यप्रमाणपारावारीणाः श्रीमन्तो मरितोण्टदार्या अपि—"वीरशैवसिद्धान्तस्य लिङ्गाङ्गसामरस्यात्मकपरिणाम्युपादानरूपशक्तिविशिष्टाद्वैतस्य सकलाद्वैतविलक्षणतया साधनीयतया"[2] इत्यत्रास्य दर्शनस्य नाम शक्तिविशिष्टाद्वैतमित्येव प्रतिपादितवन्तः।

यद्यपि श्रीकण्ठशिवाचार्यस्थापितमप्पय्यदीक्षितैः परिपोषितं च शैवमतं शक्तिविशिष्टाद्वैतमतमित्येवोच्यते, अथापि तद् रामानुजवद् मुक्तावस्थायां जीवशिवयोर्भेदप्रतिपादकमेव। तस्मान्नामसाम्येऽपि सिद्धान्तभेदो वर्तत एव। अतो वीरशैवीयं शक्तिविशिष्टाद्वैतं भेदाभेदपरमिति नास्य तत्रान्तर्भावः।

---

१. श. वि. द. (कन्नडानुवादिता कृतिः), पृ. २१

वीरशैवधर्मसंस्थापकाचार्याः

सिद्धान्ताऽऽगमोक्तोऽयं वीरशैवसिद्धान्तोपदेशः परशिवाद् दिव्यौघ-सिद्धौघादिरूपेण निरन्तरं प्रवहमान इति सनातन इत्यभ्युपगम्यते। अस्य सनातनत्वस्य संरक्षणायैव शिवस्य निकटवर्तिनो रेणुक-दारुक-घण्टाकर्ण-धेनुकर्ण-विश्वकर्णाख्याः पञ्च गणाः शिवादेशानुसारं प्रतियुगं सदाशिवस्य सद्योजातादिपञ्चवक्त्रेभ्यो दिव्यदेहधारिणो भूत्वाऽवतीर्य भुवि एतद्धर्मतत्त्वं समुपदिशन्तीत्यागमप्रामाण्येनाभ्युपगम्यते[1]। तस्मादेते पञ्चाचार्या धर्मस्यास्य संस्थापका इत्युच्यन्ते। एतैराचार्यैः संस्थापितानि धर्मपीठानि बालेहोन्नूर-(कर्नाटक)-उज्जैन (कर्णाटक)-केदार (उ० प्र०)-श्रीशैल (आन्ध्र)-काशी-(उ० प्र०) क्षेत्रेष्वद्यापि प्रख्यातानि सन्ति। सर्वेष्वपि धर्मपीठेषु दान-शासनानि शिलालेखादयश्च विद्यन्ते। विद्यमानानां दानशासनाद्यैतिहासिक-सामाग्रीणामाधारेण एतेषां पञ्चपीठानां स्थापनकालः ख्रि० षष्ठशतकात् प्राचीन इत्यवश्यमभ्युपगम्यते[2]।

किञ्च, प्रवादोऽयं श्रूयते यत् ख्रि० द्वादशशताब्दीये चालुक्यवंशस्य विज्जलाख्यमहाराजस्य प्रधानमन्त्रिणा श्रीबसवेश्वरेण वीरशैवमतं स्थापित-मिति। वादोऽयं निराधारः। बसवेश्वरस्तदानीन्तनेन जातवेदमुनिशिवाचार्या-ख्येन वीरशैवाचार्येण वीरशैवोचितां लिङ्गदीक्षां गृहीतवानिति तच्चारित्र्याद् विज्ञायते। अत एतद्धर्मे दीक्षितेनानेनैषो धर्मोऽधिकः प्रचारित इत्येव वक्तुं शक्यते।

वीरशैवसाहित्यं तत्प्रणेतारश्च

कामिकादिवातुलान्ता अष्टाविंशत्यागमा एव वीरशैवानामाधारभूताः। एतदतिरिक्तम्—अगस्त्यस्य लघुसूत्रवृत्तिः, शिवयोगिशिवाचार्यस्य (ख्रि० श० ८००) सिद्धान्तशिखामणिः, श्रीपतिपण्डिताराध्यस्य (ख्रि० श० ११००) श्रीकरभाष्यम्, मायिदेवस्य (ख्रि० श० १५००) अनुभवसूत्रम्, नन्दिकेश्वर-शिवाचार्यस्य (ख्रि० श० १५००) लिङ्गधारणचन्द्रिका, स्वप्रभानन्दशिवा-चार्यस्य (ख्रि० श० १७००) शिवाद्वैतमञ्जरी, मरितोण्टदार्यस्य (ख्रि० श० १७००) वीरशैवानन्दचन्द्रिकेत्यादिकाः परःशता ग्रन्थाः संस्कृतभाषामया

---

१. वी. स. सं. १।४४-५४; हिन्दु., पृ. ६९५-६९६

२. विषयोऽयमस्माभिः 'वीरशैवपञ्चपीठपरम्परे' इत्याख्ये कन्नड़भाषामये ग्रन्थे विस्तरेण निरूपितः।

उपलभ्यन्ते । एतदतिरिक्तं कन्नड-मराठी-तेलुगु-आङ्ग्ल-तमिलभाषासु च सुविपुलं वीरशैव-साहित्यं वर्तते।

वीरशैवदर्शनेतिहासः, तदाचार्यपरम्परा, तदीयं समग्रं संस्कृतभाषामयं साहित्यमित्यादिकं 'सिद्धान्तशिखामणिसमीक्षा' इत्याख्येऽस्मदीये शोधप्रबन्धे प्रथमपरिच्छेदे विस्तरेण निरूपितम् । पुनस्तस्यैवात्र प्रतिपादने पुनरुक्तिदोषो मा भूदिति मनागेवात्र वीरशैवदर्शनेतिहासः सूचितः ।

प्रकृतेऽस्मिन् प्रबन्धे वीरशैवदर्शनाभिमततत्त्वत्रयेण सह काश्मीरशैव-सिद्धान्तशैवाभ्युपगतैस्तैरेव तत्त्वैः साम्य-वैषम्य-वैशिष्ट्यादिरूपेण विमर्शस्य क्रियमाणत्वात् प्रकृते परिच्छेदे तयोरपि दर्शनयोरितिहासादिकं किञ्चिद् वितानितम् । अन्यशैवदर्शनानां तु केवलं संक्षिप्ततमः परिचय एव समुपस्थापित इति जानन्तु विज्ञाः ।

द्वितीयः परिच्छेदः

शक्तिविशिष्टाद्वैतविमर्शः

अतः परं शक्तिविशिष्टाद्वैतापरपर्यायस्य वीरशैवदर्शनस्य दार्शनिकतत्त्वानि तावद् विमृश्यन्ते। तत्त्वशब्दोऽत्र पदार्थपर्यायः। "रुचीनां वैचित्र्यात्"[1] इति पुष्पदन्तोक्त्या दार्शनिकपदार्थस्वरूपविषये तत्संख्याविषये च भारतीयदार्शनिकानां प्रायो नैकमत्यम्। कदाचित् पदार्थसंख्याविषये आपाततो मतैक्ये प्रतीयमानेऽपि तेषां स्वरूपनिरूपणविषये वैलक्षण्यमनुभूयत एव विद्वद्भिः। अत एवात्र सन्ति तावद् बहवो दार्शनिकपन्थानः। मार्गभेदेऽपि मृग्यं त्वेकमेव। इदमेव भारतीयदार्शनानां वैशिष्ट्यम्। स्वलक्ष्यप्राप्तये प्रवृत्तेष्वनेकेषु मार्गेषु वीरशैवदर्शनस्याप्यस्ति प्रामुख्यम्। तत्प्रामुख्यस्य कारणं तदीया समन्वयदृष्टिरेव। द्वैताद्वैतयोः, ज्ञानकर्मणोश्चात्रापादितः समन्वय इति प्रसङ्गानुसारेण तत्र तत्र प्रदर्श्यते।

समन्वयवादिनि वीरशैवसिद्धान्ते परशिवब्रह्मशब्देनाभिधीयमानमेकमेव[2] मुख्यं तत्त्वम्। तदेव गुणत्रयात्मकमायाशक्त्युपाधिना प्रेरयिता, भोक्ता, भोज्यं चेति त्रिधा परिणमत इत्यभ्युपगम्यते वीरशैवाचार्यैः।[3] अत्र शिवः प्रेरयिता, जीवो भोक्ता, जगच्च भोग्यमिति विज्ञेयम्। तदुक्तं श्रीरेणुकाचार्यैः—

---

१. म. स्तो., श्लो. ७

२. अस्ति सच्चित्सुखाकारमलक्षणपदास्पदम्।
निर्विकल्पं निराकारं निरस्ताशेषविप्लवम्॥
परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवम्।
प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितम्॥
शिवरुद्रमहादेवभवादिपदसंज्ञितम्।
अद्वितीयमनिर्देश्यं परं ब्रह्म सनातनम्॥ (सि. शि. २।३-४,६)
एक एव शिवः साक्षाच्चिदानन्दमयो विभुः।
निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः॥ (सि. शि. ५।३२)

३. गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी।
तद्वैषम्यात् समुत्पन्ना तस्मिन् वस्तुत्रयाभिधा॥
भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम्। (सि. शि. ५।३५, ३७)

अत्र प्रेरयिया शम्भुः शुद्धोपाधिर्महेश्वरः ।
समिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः ॥
भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम् ।
अत्यन्तगूढचैतन्यं जडमव्यक्तमुच्यते ॥[१] इति ।

तस्मादत्र शिवो जीवो जगच्चेति पदार्थत्रयं विचारणीयं भवति । अत एव दार्शनिकपदार्थनिरूपणावसरे—"शिव-जीव-शक्तय इति त्रयः पदार्थाः"[२] इत्युक्तं श्रीमता नीलकण्ठशिवाचार्येण । अत्र शक्तिशब्देन जगदिति ज्ञेयम्, जगतः शक्तेरेव परिणामभूतत्वात् । तदुक्तं तैरेव—"सूक्ष्मस्थूलात्मकविश्वमेव शक्तिः"[३] इति ।

वीरशैवदर्शनवत् काश्मीरशैवदर्शने सिद्धान्तशैवदर्शने च त्रीणि तत्त्वान्यभ्युगतानि । तान्यत्र [४]पति-पशु-पाश-शब्दैरभिधीयन्ते । पदार्थसंख्यागणनाविषये वीरशैव-काश्मीरशैव-सिद्धान्तशैवानामैक्यमत्ये सत्यपि तत्स्वरूपविचारणाविषये क्वचिद्वैलक्षण्यं क्वचिच्च साम्यमनुभूयते खलु विद्वद्भिः । तस्मात् प्रस्तुते परिच्छेदे वीरशैवाभ्युपगतपदार्थत्रयस्वरूपस्य काश्मीरशैव - सिद्धान्तशैवाभ्युपगतपदार्थत्रयेण साकं साम्य-वैशिष्ट्यादिरूपो विमर्शः संक्षेपेण प्रदर्श्यते ।

परशिवः

परशिवो हि वीरशैवानां परमं तत्त्वम् । स च लिङ्ग-स्थल-ब्रह्मादिशब्दैरभिधीयते ।[५] स खल्वेक एव, "एकमेवाऽद्वितीयम्"[६], "एको रुद्रो न द्वितीयाय

---

१. सि. शि. ५।३८-३९

२. शि. प., पृ. १

३. शि. प., पृ. २

४. शैवागमेषु मुख्यं पतिपशुपाशा इति क्रमात् त्रितयम् ।
तत्र पतिः शिव उक्तः पशवो ह्यणवोऽर्थपञ्चकं पाशः ॥ (त. प्र., श्लो. ५)

५. लयगत्यर्थयोर्हेतुभूतत्वात् सर्वदेहिनाम् ।
लिङ्गमित्युच्यते साक्षाच्छिवः सकलनिष्कलः ॥ (अ. सू. ३।४)
यत्रादौ स्थीयते विश्वं प्राकृतं पौरुषं यतः ।
लीयते पुनरन्ते च स्थलं तत्प्रोच्यते ततः ॥ (अ. सू. २।४)
ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनो जगन्मूलं तन्नमामि परं शिवम् ॥ (सि. शि. १।२)

६. छा. उ. ६।२।१

तस्थे"[१] इत्यादिश्रुतिभिस्तस्यैकत्वावगमात् । परशिवोऽयमत्र दर्शने सगुण-निर्गुणोभयरूपः । सगुण-निर्गुणशब्दयोरत्र सकल–निष्कलशब्दाभ्यामपि व्यवहारः क्रियते । स्वशक्तिसङ्कोचेन स निर्गुण इति, तद्विकासेन च सगुण इति प्रतिपाद्यते । तदुक्तं भाष्यकारेण श्रीपतिपण्डिताराध्येन—

सृष्टेः पूर्वं महादेवः शक्तिसङ्कोचहेतुना ।
निर्गुणत्वेन शास्त्रेषु गीयते तत्त्ववेदिभिः ॥

सृष्ट्यादौ परमेशस्य शक्तेः प्राचुर्यवैभवात् ।
सर्वज्ञत्वादिकल्याणगुणवानिति कीर्त्यते ॥ [२]इति ।

तस्माद् वीरशैवसिद्धान्ते "अशब्दमस्पर्शमरूपमव्ययम्"[३], "अस्थूलमनण्वह्रस्वमदीर्घमलोहितम्"[४] इत्यादिनिर्गुणश्रुतयस्तस्य शक्तिसङ्कोचपरत्वेन, "स ईक्षांचक्रे"[५], "तदैक्षत बहु स्यां प्रजायेय"[६] इत्यादिनिर्गुणश्रुतयश्च सृष्ट्युन्मुखस्य तस्य शक्तिविकासपरत्वेन व्यवस्थाप्यन्ते । अत्रेदमवधेयम्—अद्वैतवेदान्ताभिमतं यन्निर्गुणं ब्रह्म तन्निर्विशेषमपि । न चैवमत्र निर्गुणः परशिवो निर्विशेष एव, किन्तु शक्तेरिच्छा-ज्ञान-क्रियादिरूपेण विकासाभावेन स निर्गुण इत्युच्यमानोऽपि चिच्छक्तिविशिष्टत्वात् सविशेषोऽपि । अत एव श्रीरेणुकाचार्याः–

परिच्छेदकथाशून्यं प्रपञ्चातीतवैभवम् ।
प्रत्यक्षादिप्रमाणानामगोचरपदे स्थितम् ॥

स्वप्रकाशं पराकाशमनौपम्यमनामयम् ।
सर्वज्ञं सर्वगं शान्तं सर्वशक्ति निरङ्कुशम्[७] ॥

इति निर्गुणपरशिवस्वरूपनिरूपणावसरे तस्य शक्तिमत्त्वं सूचितवन्तः । तस्माच्चिच्छिक्तविशिष्टः परशिवो निर्गुण इति, चिच्छक्तिपरिणामभूतेच्छाज्ञानादिशक्तिविशिष्टश्च सगुण इति वेदितव्यम् ।

---

१. श्वे. उ. ३।२
२. ब्र. सू. श्री. १।३।७
३. कठ. उ. १।३
४. बृ. उ. ३।८।८
५. प्रश्नो. ६।३
६. छा. उ. ६।२।३
७. सि. शि. २।४-५

अद्वैतवादिनः काश्मीरशैवा अपि परशिवस्य विश्वोत्तीर्णं विश्वमयं चेति रूपद्वयमङ्गीकुर्वन्ति। तत्र विश्वोत्तीर्णो यः परशिवः, सोऽपि तैर्विमर्शशक्तिविशिष्ट इत्येवाभ्युपगम्यते। एतद्विषये काश्मीरशैव-वीरशैवयोर्विचारसाम्यं दरीदृश्यते। उभयदर्शनेऽपि विश्वोत्तीर्णः परशिवः षट्त्रिंशत्तत्त्वातीतः। सिद्धान्तशैवाभ्युपगतेषु तत्त्वत्रयेषु यत् प्रथमं तत्त्वं पतिरूपं तत् षट्त्रिंशत्तत्त्वेष्वाद्यं शिवतत्त्वमेव[1]। तस्यापि तैर्विश्वोत्तीर्णत्वमभ्युपगम्यते।

"लक्षणप्रमाणाभ्यां वस्तुसिद्धिः" इति न्यायाल्लक्षणमुखेनैव वस्तुस्वरूपं निरूपणीयं भवति। तदत्र प्रतिपाद्यस्य परशिवस्य निर्दुष्टं लक्षणं किमिति जिज्ञासायामुक्तं श्रीमता नीलकण्ठशिवाचार्येण—"तत्र सूक्ष्मचिदचिद्रूपशक्ति-विशिष्टत्वं परशिवस्य लक्षणम्। जीवात्मन्यतिव्याप्तिवारणाय सूक्ष्मेति शक्ते-र्विशेषणम्। सूक्ष्मत्वं च निर्मलत्वम्, त्रिकालाबाधितमलात्यन्ताभाववत्त्वमिति यावत्। तेन मुक्तेः प्राक्काले मलविशिष्टेषु मुक्तावस्थायां मलात्यन्ताभाववत्सु मुक्तात्मसु नातिव्याप्तिः। तेषामपि शिवस्वरूपत्वेन ब्रह्मलक्षणलक्ष्यत्वाङ्गीकारे ब्रह्मानन्त्यप्रसङ्गः। इष्टापत्तौ—"एकमेवाद्वितीयम्"[2] इत्यादिश्रुतिशतविरोधा-पत्तिरद्वैतहानिश्च। लक्षणेऽस्मिन् शक्तिवैशिष्ट्यमपृथग्भावसम्बन्धेन बोध्यम्। तेन शक्तिशक्तिमतोर्नाद्वैतहानिः, धर्मधर्मिणोरभेदात्। सच्चिदानन्दानां परशिव-धर्माणां पृथग्लक्षणत्वकथनं तु नोपयुज्यते, तेषामपि शक्तिस्वरूपत्वावगमात्"[3] इति। इदं परशिवस्य स्वरूपलक्षणम्। तस्य तटस्थलक्षणं तु जगज्जन्मादि-कारणत्वमिति मन्तव्यम्। तच्च—"यतो वा इमानि भूतानि जायन्ते"[4], "जन्माद्यस्य यतः"[5] इत्यादिश्रुतिसूत्रादिभिः प्रतिपादितमेव। एतेन परशिवस्य जगत्कर्तृत्वं सिद्ध्यति। तस्य च शक्तिविशिष्टत्वात् तत्र शक्त्यंशे उपादान-कारणत्वम्, परशिवांशे निमित्तकारणत्वमिति बोध्यम्। तदेवं परशिवो जगदुत्प-त्तावभिन्ननिमित्तोपादानकारणमिति पर्यवस्यति।

अपि च, परिदृश्यमानेऽस्मिन् प्रपञ्चे—पृथिव्यां गुरुत्वाकर्षणशक्तिः, जले आप्यायनशक्तिः, अग्नौ ज्वलनशक्तिः, वायौ स्पन्दनशक्तिः, आकाशे व्यापन-

१. "तत्र पतिः शिव उक्तः" (त. प्र. ५)
२. छा. उ. ६।२।१
३. शि. प., पृ. ४
४. तैत्ति. उ. ३।१
५. ब्र. सू. १।१।२

शक्तिः, वृक्षलतादिषु जलाद्याकर्षणशक्तिः, वनस्पतिषु रोगनिवारणशक्तिरित्येवंरूपेण सर्वमपि वस्तुजातं यत्किञ्चिच्छक्तिविशिष्टमेवानुभूयते। एतदनुभवान्यथाऽनुपपत्त्या प्रपञ्चकारणीभूतस्य परशिवस्यापि विलक्षणशक्तिविशिष्टत्वमभ्युपगम्यते। तदुक्तं महार्थमञ्जर्याः परिमलाख्यायां व्याख्यायां संविदुल्लासीये श्लोके—

औष्ण्यं हुताश इव शीतलिमानमिन्दौ
शय्यासु मार्दवमिवाश्ममु कर्कशत्वम्।
बाह्येषु मोह इव योगिषु च प्रबोधः
स्वातन्त्र्यमस्ति हि नियन्त्रयितुर्महन्मे॥ इति।

तस्माच्छक्तिविशिष्टस्य जगतः कर्ता परशिवोऽपि शक्तिविशिष्ट इत्यत्र न कोऽपि सन्देहः।

वीरशैवदर्शनाभ्युपगतं परशिवतत्त्वं यथैकं शक्तिविशिष्टं च तथा काश्मीरशैवदर्शनाभ्युपगतं परशिवतत्त्वं सिद्धान्तशैवाङ्गीकृतं पतिपर्यायं शिवतत्त्वं चैकं शक्तिविशिष्टं चेत्युररीक्रियते। काश्मीरशैवैरियं शक्तिर्विमर्शरूपेति, सिद्धान्तशैवैश्च सा चिद्रूपेति[1] प्रतिपाद्यते।

काश्मीरशैवदर्शने परशिवस्वरूपम्

काश्मीरशैवदर्शने शिवः प्रकाशरूपः, शक्तिश्च स्वातन्त्र्यापरपर्याया विमर्शरूपिणी। विमर्शशक्तिरनन्यापेक्षेति[2] तस्याः स्वातन्त्र्यशक्तिरित्यपरं प्रसिद्धं नाम। विमर्शस्य स्फुरत्ता, महासत्ता, स्पन्दः, परा वागित्यादीनि सन्ति पर्यायनामानि[3]। "प्रकाशश्च विमर्शशून्यो न भवति"[4], "प्रकाशस्य हि विमर्श एव

---

१. शक्तो यया स शम्भुर्भुक्तौ मुक्तौ च पशुगणस्यास्य।
तामेकां चिद्रूपामाद्यां सर्वात्मनाऽस्मि नतः॥ (त. प्र. ३)

२. "अनन्यापेक्षता हि विमर्शः सैव च स्वतन्त्रता" (ई. प्र. वि. वि., भा. २, पृ.४३६) "प्रकाशस्य च परदशायां चमत्कारमात्रात्मा यो विमर्शस्तदेव स्वातन्त्र्यम्" (ई. प्र. वि. वि., भा. ३, पृ. २५१)

३. ई. प्र. वि., भा. १, पृ. २५०-२८०

४. ई. प्र. वि. वि., भा. १, पृ. १५

जीवितम्"[१], "विमर्शमयोऽपि प्रकाशः"[२], "विमर्शशरीर एव प्रकाशो युक्तः"[३] इत्याद्यभिनवगुप्तोक्तिभिः प्रकाश-विमर्शापरपर्याययोः शिव-शक्त्योरैक्यमभ्युपगम्यते। अतोऽत्र प्रकाशविमर्शात्मकः शिव एव परं तत्त्वमिति वेद्यम्। एवमत्र वागर्थात्मकं शिवशक्तिसामरस्यात्मकं परतत्त्वमेव प्रकाशविमर्शात्मना व्याख्यातमिति प्रकाशविमर्शयोर्नात्यन्तं भेदप्रथा। अत एव—"यथैव विश्वप्रकाशात्मा परमेश्वरः, तथा विश्वविमर्शात्मा"[४] इत्यभिनवगुप्तस्तयोरद्वैतं वक्ति[५]। अत्र प्रकाशता ज्ञानं विमर्शश्च क्रियेति बोध्यम्[६]।

सिद्धान्तशैवदर्शने पतिस्वरूपम्

सिद्धान्तशैवदर्शने परमतत्त्वं पतिशब्देनोच्यते। तच्च षट्त्रिंशत्तत्त्वेषु यदाद्यं शिवतत्त्वं तदेवेति बोध्यम्। "सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः"[७], "अनादिमलमुक्तत्वात् सर्वज्ञोऽसौ ततः शिवः"[८], "शुद्धानि पञ्चतत्त्वान्याद्यं तेषु स्मरन्ति शिवतत्त्वम्"[९], "सर्वानुग्राहकं प्राहुः"[१०], "व्यापकमेकं नित्यं कारणमखिलस्य तत्त्वजातस्य। ज्ञानक्रियास्वभावं शिवतत्त्वं जगदुराचार्याः॥"[११] "तत्त्वं वस्तुत एकं शिवसंज्ञं चित्रशक्तिशतखचितम्"[१२] "एकः शिवोऽविकारी"[१३] इत्यादिरूपेण तल्लक्षणं निरूपितम्। एतत्प्रमाणानुसारेण सिद्धान्तेऽस्मिन् शिवोऽनादिमलसंश्लेषरहितः। अत एवानादिमुक्तः। मुक्तात्मानोऽप्यत्र शिव-

---

१. ई. प्र. वि. वि., भा. १, पृ. ७३
२. ई. प्र. वि. वि., भा. २, पृ. २१
३. ई. प्र. वि. वि., भा. २, पृ. २०७
४. ई. प्र. वि. वि., भा. ३, पृ. ९४
५. विषयोऽयं लुप्तागमसंग्रहस्य द्वितीयभागस्य प. व्रजवल्लभद्विवेदमहोदयानामुपोद्घातात् संगृहीतः, सं. सं. वि. वि., १९८३ ई.।
६. "प्रकाशरूपं ज्ञानम्, विमर्शरूपा च क्रिया" (ई. प्र. वि. वि., भा. १, पृ. ९८)।
७. त. प्र. ६
८. लु. सं., भा. २. उपो., पृ. १२४
९. त. प्र. २१
१०. त. प्र. २६
११. त. प्र. २५
१२. त. प्र. ३३
१३. त. सं. ४४

शब्देनोच्यन्ते, किन्तु ते पूर्वं बद्धाः पश्चात् शिवानुग्रहेण मुक्ता इति शिवस्यानादिमुक्तत्वम्, अनादिमलरहितत्त्वं चोक्तम् । तदुक्तं वायवीयसंहितायाम्—

अनादिमलसंश्लेषप्रागभावात् स्वभावतः ।
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ॥[1] इति ।

पञ्चसु शुद्धतत्त्वेष्विदमेवादिमं तत्त्वम् । अत एवेदं व्यापकं नित्यं सर्वसत्त्वानां कारणभूतं ज्ञानक्रियाशक्तियुक्तं च । "एक एव रुद्रो न द्वितीयाय तस्थे"[2], "शिवतत्त्वं परं ह्येकम्"[3] इत्यादिश्रुत्यागमप्रमाणैस्तस्यैकत्वमभ्युपगम्यते । अन्यथा—

बहवो यत्र नेतारः सर्वे पण्डितमानिनः ।
सर्वे महत्त्वमिच्छन्ति तद्व्यक्तमवसीदति ॥[4]

इत्युक्त्यनुसारेण जगत्कार्यसिद्धिर्न स्यात् । अयं च शिवोऽत्र सिद्धान्ते सद्योजातादिपञ्चमन्त्रतनुरित्युच्यते । जगज्जन्मादिपञ्चकृत्यनिर्वहणार्थं तदङ्गीकारः ।

शिवस्य स्वभावतो निष्क्रियत्वात्, शक्त्यभावे जगत्सृष्ट्यादिकं न संभवतीति तदर्थमत्र शक्तिरङ्गीकृता । सा च तस्याद्योन्मेषरूपा[5] । अनया युक्त एव शम्भुः पशूनां भुक्तौ मुक्तौ च शक्तो भवति[6] । इयमपि शिववच्चिद्रूपा—

तदेवं परशिव एकः, अनादिमुक्तः, अनादिमलसंश्लेषरहितः, जगत्कारणीभूतश्चेति वीरशैव-काश्मीरशैव-सिद्धान्तशैवेषु समानता वर्तते । शिवस्य विश्वोत्तीर्णत्वं प्रतिपादयद्भिरपि सिद्धान्तशैवैः सः षट्त्रिंशत्तत्त्वेष्वाद्यतत्त्वरूपेण परिगृहीतः, वीरशैवैः काश्मीरशैवैश्च स षट्त्रिंशत्तत्त्वातीतः स्वीक्रियत इत्ययं विशेषः ।

---

१. शि. पु. वा. १।३२।२९
२. अथ. उ. २।७
३. रौ. वि. २।४
४. अ. प्र., पृ. १३२
५. चिदचिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः ।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव ॥ (त. प्र. २७)
६. शक्तो यया स शम्भुर्भुक्तौ मुक्तौ च पशुगणस्यास्य ।
तामेकां चिद्रूपामाद्यां सर्वात्मनाऽस्मि नतः ॥ (त. प्र. ३)

वीरशैवभ्युपगतशक्तिस्वरूपम्

परशिवस्येयं शक्तिः किंस्वरूपा ? इति जिज्ञासायां श्रीमन्तः शिवयोगिशिवाचार्याः—"तदीया परमा शक्तिः सच्चिदानन्दलक्षणा"[1], "गुणत्रयात्मिका शक्तिर्ब्रह्मनिष्ठा सनातनी"[2] इति शक्तेः स्वरूपद्वयमुपवर्णितवन्तः। यद्यपि शक्तिरेकैव, अथाप्यस्या द्वे अवस्थे वर्तेते, तत्रैकाऽविभागपरामर्शाख्या, द्वितीया च विभागपरामर्शाख्या। अविभागपरामर्शदशायामियं शक्तिः परशिववत् सच्चिदानन्दस्वरूपा, अर्थात् तद्बोधरूपा भवति। परशिवस्य अस्मि, प्रकाशे, नन्दामीति स्वकीयसच्चिदानन्दानां योऽनुभवः स एवास्य शक्तिः। इयमेव विमर्शशक्तिः, चिच्छक्तिश्चेत्युच्यते।

अत्रेदं विज्ञेयम्—"सत्यं ज्ञानमनन्तं ब्रह्म"[3] इत्यादिश्रुतिप्रामाण्येन सच्चिदानन्दरूपत्वं ब्रह्मणः स्वरूपलक्षणमित्यद्वैतवेदान्तिनः प्रतिपादयन्ति। तत्र सच्चिदानन्दानां गुणत्वे द्वैतापत्तिः स्यादित्यसद्भिन्नत्वात् सत्, जडभिन्नत्वात् चित्, दुःखभिन्नत्वाच्चानन्दमिति ब्रह्मणोऽसज्जडदुःखभिन्नत्वप्रतिपादनार्थमेव तस्य सच्चिदानन्दत्वकथनम्, वस्तुतस्त्वत्र कस्यापि विधानाभाव इत्यद्वैतिभिरङ्गीक्रियते।

शक्तिविशिष्टाद्वैतवेदान्ते तु सच्चिदानन्दानां परशिवस्यानुभवाभावे स्वप्रकाशस्यापि तस्य स्फटिकादिवज्जडत्वापत्तिः स्यादिति परशिवे अस्मि, प्रकाशे, नन्दामीति बोधरूपा विमर्शशक्तिरुररीक्रियते। अन्यथाऽन्धस्य सौन्दर्यमिव परशिवस्य सच्चिदानन्दरूपत्वं व्यर्थमापद्येत। अतोऽस्य विमर्शशक्तिरवश्यमङ्गीकरणीया। अत एव श्रीशिवयोगिशिवाचार्याः—"वन्दे तां परमानन्दप्रबोधलहरीं शिवाम्"[4] इति परमानन्दप्रबोधरूपत्वेन तां स्तुतवन्तः।

काश्मीरशैव-सिद्धान्तशैवयोः शक्तिस्वरूपम्

काश्मीरशैवदर्शनेऽपि परशिवः प्रकाशरूप इति, शक्तिर्विमर्शरूपा चेति निरूप्यते। सा च परशिवप्रकाशस्य बोधरूपैव। अत्र—"प्रकाशमानं न पृथक्

१. सि. शि. २।१२
२. सि. शि. ५।३५
३. तै. उ. २।१
४. सि. शि. १।११

प्रकाशात् स च प्रकाशो न पृथग् विमर्शात्"[१] इत्युक्त्यनुसारं प्रकाश-विमर्शयोर्न भेदः। परशिवस्य विमर्शशक्तिराहित्ये स जडोऽनीश्वरश्च स्यादित्यभिदधाति क्षेमराजः[२]। सौन्दर्यलहर्यामप्युच्यते—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
न चेदेवं देवो भवति कुशलः स्पन्दितुमपि॥ इति।

नित्याषोडशिकार्णवेऽपि—

परो हि शक्तिरहितः शक्तः कर्तुं न किञ्चन।
शक्तस्तु परमेशानि शक्त्या युक्तो यदा भवेत्[३]॥ इति।

शिवशब्दे वर्तमान इकार एव विमर्शशक्तिः। यथा शिवशब्दाद् इकारस्यापसारणे शिवः शवत्वमापद्यते, तथैव विमर्शाभावेऽपि शिवो जडः स्यादिति तयोरभेदः स्वीक्रियते। तदुक्तम्—

न शिवः शक्तिरहितो न शक्तिः शिववर्जिता।
तादात्म्यमनयोर्नित्यं वह्निदाहिकयोरिव[४]॥ इति।

लोकेऽग्नेर्विना यथा दाहकतायाः, विनैव दाहकतामग्नेश्चास्तित्वबोधो न भवति, तथा शक्तिरहितस्य शिवस्य, शिवरहितायाश्च शक्तेर्बोधो न संभवत्येव।

शिवस्य विमर्शशक्तियुक्तत्वात् स स्वयं प्रकाशमानः सन् विश्वमपि प्रकाशयति[५]। विमर्शशक्तेर्बहुविधेषु पर्यायनामसु स्पन्दशक्तिरित्यपि नामान्तरं वर्तते। स्पन्दशक्तियुक्तत्वादेव शिवः स्वभावतः स्पन्दनशीलः।

सिद्धान्तशैवैः पतिरूपे परशिवतत्त्वे चिद्रूपा शक्तिरङ्गीकृता। तैरप्यनयैव शक्त्या तस्य बोधरूपत्वमुच्यते। परशिवस्य बोधरूपत्वे तदीया चिच्छक्तिरेव कारणमिति विषये वीरशैव-काश्मीरशैव-सिद्धान्तशैवानां विचारसाम्ये प्रतीयमानेऽपि काश्मीरशैवैः शिव-शक्त्योरभेदः, सिद्धान्तशैवैर्वीरशैवैश्च भेदाभेदोऽङ्गीक्रियत इत्ययं विशेषः। शिवशक्त्योः सम्बन्धोऽग्रे प्रतिपादयिष्यते।

---

१. वि. भै. वि., पृ. १२२

२. "यदि निर्विमर्शः स्याद् अनीश्वरो जडश्च प्रसज्येत"

३. नि. षो. ४।६

४. शि. दृ. ३।२-३; शै. द. बि., पृ. ८६

५. प्र. हृ., पृ. ७

वीरशैवाभ्युपगतशक्तेः कार्यम्

वीरशैवसिद्धान्ताभ्युपगतेयं विमर्शशक्तिर्जगदुत्पत्तिसमये इच्छाज्ञानादिरूपेण विभागपरामर्शदशामापन्ना सती सत्त्वादित्रिगुणात्मिका माया भवति। अत्र सच्चिदानन्दरूपविमर्शशक्तिविशिष्टः परशिवो निर्गुण इति, गुणत्रयात्मकमायाशक्तिविशिष्टश्च सगुण इति कथ्यते।

एवं च शक्तिर्वस्तुतः सच्चिदानन्दरूपिणी, माया तु तत्परिणामभूता। चन्द्रे चन्द्रिकावत् परशिवनिष्ठेयं विमर्शशक्तिर्विश्ववैचित्र्ये कारणं भवतीति तन्निमित्तेन परशिवब्रह्म विश्वभाजनमित्याख्यायते। तदुक्तम्—

विमर्शाख्या पराशक्तिर्विश्ववैचित्र्यकारिणी ।
यस्मिन् प्रतिष्ठिता ब्रह्म तदिदं विश्वभाजनम् ॥
यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा[1] ॥ इति।

तदेवं परशिवनिष्ठेयं शक्तिर्जगदुपादानकारणमित्यवगम्यते। अत एव शिवाद्वैतपरिभाषाकारेण श्रीनीलकण्ठशिवाचार्येण—"उपादानत्वम्, अपृथक्सिद्धधर्मवत्त्वं वा शक्तेर्लक्षणम्"[2] इत्युक्तम्। षट्त्रिंशत्तत्त्वेषु सदाशिवादिभूम्यन्तानां[3] सर्वतत्त्वानां शक्तिरूपत्वादुत्तरोत्तरतत्त्वं प्रति पूर्वपूर्वतत्त्वस्योपादानत्वस्वीकाराद् उपादानत्वरूपलक्षणस्य सर्वत्र समन्वयः। अत्र सूक्ष्मचिदचिद्रूपशक्तेः परशिवापृथक्सिद्धधर्मत्वात्, स्थूलचिदचिद्रूपशक्तेर्जीवापृथक्सिद्धधर्मत्वाद् लक्षणसमन्वयः। तस्मात् सविशेषब्रह्मप्रतिपादकेऽस्मिन् शक्तिविशिष्टाद्वैतसिद्धान्ते कार्यकारणभावापन्नस्य निखिलचराचरप्रपञ्चस्य शक्तिवैशिष्ट्यविशेषेण सर्वं शिवशक्तिमयमेव विभाति।

शक्तिसद्भावे मानम्

ननु परशिवातिरिक्ता केयं शक्तिर्नाम ? किं वात्र मानम् ? इति जिज्ञासायां लोकानुभवेन श्रुतिप्रामाण्याच्च तदङ्गीक्रियते। लोके हि अग्निः कदाचिद् दह्यमानः, कदाचिन्मणिमन्त्रादिना प्रतिबन्धे सत्यदह्यमानश्चानुभूयते। एवमेव

---

१. सि. शि. २०।३१-३२

२. शि. प., पृ. ६

३. सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकाम् ।
वन्दे माहेश्वरीं शक्तिं महामायादिरूपिणीम् ।। (सि. शि. २।२)

मूषिकाघ्रातं बीजं बीजान्तरसदृशमपि भूमावुप्तं सन्नाङ्कुरं जनयति। एतेन अग्निस्वरूपातिरिक्ता दहनशक्तिः, बीजस्वरूपातिरिक्ताऽङ्कुरजननशक्तिश्चास्तीति युक्तितः सिद्ध्यति। एतादृशायाः शक्तेः शक्तिमतो नात्यन्तं भेदो नाप्यभेदः, किन्तु भेदाभेद एव। एवं सर्ववस्तुषु शक्तिसिद्धौ—"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"[१], "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"[२], "न शिवेन विना शक्तिर्न शक्तिरहितः शिवः"[३] इत्याद्याः श्रुतिस्मृतयः परशिवस्य शक्तिसद्भावे मानम्।

वीरशैवदर्शने शिवशक्त्योः सम्बन्धः

वीरशैवसिद्धान्ते शक्तिः शिवस्य सहधर्मचारिणीति[४] प्रतिपाद्यते। अत एवानयोः सम्बन्धोऽविनाभावाख्यः। पूज्यपादाः श्रीरेणुकाचार्याः—

यथा चन्द्रे स्थिरा ज्योत्स्ना विश्ववस्तुप्रकाशिनी।
तथा शक्तिर्विमर्शाख्या प्रकाशे ब्रह्मणि स्थिरा॥[५]

इत्यत्र चन्द्रचन्द्रिकादृष्टान्तेन शिवशक्त्योरविनाभावं सूचयामासुः। श्रीमता मरितोण्टदार्येण—

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
पुष्पगन्धवदन्योन्यं मारुताम्बरयोरिव॥[६]

इति पुष्पगन्धदृष्टान्तेन स एव सम्बन्धो निरूपितः। यथा पुष्पगन्धयोः, चन्द्रचन्द्रिकयोश्च परस्परं नात्यन्तं भेदो नाप्यभेदः, किन्तु भेदाभेदस्तथैव परशिवस्य केवलावस्थायां स्वस्था या शक्तिर्विमर्शनाम्ना तदभिन्नापि लीलावस्थायां सैव क्षुभिता सती विश्वाकारतां भजत इति शिवशक्त्योरवस्थाभेदेन कालभेदेन च भेदाभेदौ सम्भवत इति पूर्वोक्ताऽविनाभावसम्बन्धो भेदाऽभेदे पर्यवस्यति। तदुक्तं कूर्मपुराणे—

---

१. श्वे. उ. ६।८
२. श्वे. उ. ४।१०
३. वी. च., पृ. ७
४. यामाहुः सर्वलोकानां प्रकृतिं शास्त्रपारगाः।
तां धर्मचारिणीं शम्भोः प्रणमामि परां शिवाम्॥ (सि. शि. १।८)
५. सि. शि. २०।३२
६. वी. च., पृ. ७

एषा शक्तिः शिवा ह्येतत् शक्तिमानुच्यते शिवः ।
शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः ॥
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥ इति ।

कविकुलगुरुः कालिदासोऽपि—

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥[1]

इति शब्दार्थयोरिव शिवशक्त्योरपि भेदाभेदरूपं सम्बन्धं प्रतिपादयामास । श्रीशिवानुभवशिवाचार्याः सच्चिदानन्दानां ब्रह्मधर्माणां शक्तिरूपत्वमङ्गीकृत्य शिवशक्त्योर्धर्मिधर्मभावरूपं सम्बन्धं निरूपयन्ति । तथाहि—"ननु सच्चिदानन्दत्वमेव तत्स्वरूपलक्षणमस्तु किमनेनानागतलक्षणेनेति चेन्न, शक्तिशक्तिमतोर्धर्मधर्मिभावविवक्षणेन सच्चिदानन्दानां ब्रह्मधर्माणामनुगतैकशक्तिस्वरूपत्वाभ्युपगमेनैव तन्निर्वाहात् । आनन्दमयाधिकरणभाष्येऽपि प्रचुरानन्दरूपानन्दमयस्य परब्रह्मधर्मस्य परब्रह्माश्रितपरमाकाशरूपपरमशक्तिस्वरूपत्वस्य भगवत्पादैरेव[2] स्वीकृतत्वात्"[3] इति । तस्माद् वीरशैवसिद्धान्ताभ्युपगतोऽविनाभावापरपर्यायो भेदाभेदाख्यः सम्बन्धो धर्मिधर्मरूप इति विज्ञेयम् ।

काश्मीरशैव-सिद्धान्तशैवाभ्युपगतः शिवशक्त्योः सम्बन्धः

काश्मीरशैवदर्शने प्रकाशरूपस्य शिवस्य विमर्शरूपायाश्च शक्तेरभेदः प्रतिपादितः । अतोऽत्र विमर्शो नाम पराऽहन्तारूपः । "विमर्शो न कदाचिदि-

---

१. रघु. १।१

२. अत्र भगवत्पादशब्देन श्रीनीलकण्ठशिवाचार्या अभिप्रेताः । एभिर्वीरशैवसिद्धान्तपरं नीलकण्ठभाष्यं विरचितमासीत् । तच्च श्रीकरभाष्यात् प्राचीनम् । श्रीनीलकण्ठशिवाचार्या आद्यशङ्कराचार्याणां समकालीना इति, "इति युक्तिशतैः स नीलकण्ठः कविरक्षोभयदद्वितीयपक्षम् । निगमान्तवचः प्रकाश्यमानं कलभः पद्मवनं यथा प्रफुल्लम् ॥" (श० दि० १४।४९) इत्यनेन शङ्करदिग्विजयवचनेन विज्ञायते । तदीयं नीलकण्ठभाष्यमधुना नोपलभ्यते । किन्तु कारिकारूपेण तद्व्याख्यानभूतः क्रियासाराख्यो ग्रन्थः समुपलभ्यते । अयं च खि० श० १७ तमाब्दीयेन द्वितीयनीलकण्ठशिवाचार्येण विरचितोऽस्ति ।

३. शि. द., पृ. ६-७

दन्ताभूमिमास्कन्दति"[१] इत्यभिनवगुप्तोक्त्या तत्रेदन्ताभावस्यानुदयादनयोरद्वैतमेव ।

सिद्धान्तशैवदर्शने—"शक्तिर्नाऽचेतना चितः"[२] इति मृगेन्द्रागमवचनानुसारेण चिद्रूपस्य शिवस्य शक्तिर्न जडस्वरूपा, किन्तु सापि चिद्रूपेत्युभयोरनन्यत्वं प्रतिपाद्यापि शक्तिः शिवे समवायापरपर्यायेण तादात्म्यसम्बन्धेनाश्रितेत्यङ्गीक्रियते । तदुक्तम्—

अनन्याऽपि विभिन्नाऽतः शम्भोः सा समवायिनी ।
स्वाभाविकी च तन्मूला प्रभा भानोरिवामला[३] ॥ इति ।

भानुप्रभयोर्यथा धर्मिधर्मतया भेदः, तथा शिवशक्त्योर्वस्त्वन्तरत्वाभावेऽपि धर्मधर्मितया भेदोऽत्राभ्युपगम्यते । इत्थं शिवशक्त्योर्धर्मधर्मितया भेदेऽपि तादात्म्यसम्बन्धान्नात्मान्तरवद् भेद इत्यघोरशिवाचार्येण स्पष्टीकृतम्[४] ।

शक्तिर्यदि शिवादत्यन्तभिन्ना स्यात् तदा स न किञ्चित् ज्ञातुं न वा किञ्चित् कर्तुं[५] समर्थो भवति[५] । तस्मात् चिच्छक्तियुक्तकुम्भकारवत् स्वसमवायिन्या चिद्रूपया शक्त्या युक्त एव शिवो बिन्द्वादिवस्तु विषयीकर्तुं तत्क्षोभादि चोत्पादयितुं शक्नोति । नन्वेवं शक्तेर्विना शिवस्याकिञ्चित्करत्वे सैव जगत्कारणमस्तु, किं पुनः शिवेन ? इति चेन्न, शक्तेर्धर्मत्वेनाश्रयं विनाऽवस्थानासम्भवात् तदाश्रयत्वेन शिवोऽपेक्ष्यते । तस्मात् शक्त्याश्रयभूतः शिवः स्वसङ्कल्पमात्रेण जगत्सृजत्यवते संहरति च ।

एवं सिद्धान्तशैवदर्शने शिवशक्त्योर्धर्मधर्मिभावः स्वीकृतः । अयं च भेदाभेदाख्ये सम्बन्धे पर्यवस्यति । तदेवं शिवशक्त्योः सम्बन्धविषये सिद्धान्तशैववीरशैवयोर्विचारसाम्यं दरीदृश्यते ।

---

१. ई. प्र. वि. वि., भा. १, पृ. ८३
२. मृ. वि. ३।४
३. र. त्र. ३०४-३०५
४. अनन्यापि तथा शम्भोर्विभिन्ना शक्तिरिष्यते ।
यथा मसूरात्व(रस्त्व)ङ्गुष्ठान्नापि भिन्नोक्तहेतुभिः ॥ (र. त्र. ३०३-३०४)
५. नह्येष भगवान् शक्त्या स्वात्मनोऽत्यन्तभिन्नया ।
कदाचित् कुरुते किञ्चिन्नापि जानाति किञ्चन ॥ (र. त्र. ३०५-३०६)

वीरशैवदर्शने शक्तेर्भेदाः

परशिवनिष्ठायाः शक्तेश्चिच्छक्ति-पराशक्ति-आदिशक्ति-इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्तिरित्येवं वीरशैवैः षड्विधत्वमङ्गीक्रियते। एतासु चिच्छक्तिः परशिवस्य सच्चिदानन्दधर्मरूपेति सा परशिवेन साकं समरसीभूता वर्तते। सृष्टिसमये चिच्छक्तिविशिष्टपरशिवात् पञ्च शक्तयः क्रमेणैकैकस्य सहस्रांशेन प्रादुर्भवन्ति। तदुक्तं वातुलशुद्धाख्यतन्त्रे—

योगिनामुपकाराय स्वेच्छया चिन्त्यते शिवः॥
तच्छिवे तु पराशक्तिः सहस्रांशेन जायते।
तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः॥
आदिशक्तिसहस्रांशाद् इच्छाशक्तिसमुद्भवः।
इच्छाशक्तिसहस्रांशाद् ज्ञानशक्तिसमुद्भवः॥
ज्ञानशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः।
एता वै शक्तयः पञ्च निष्कलाश्चेति कीर्तिताः[1]॥

उपर्युक्तपञ्चशक्त्याख्यपञ्चाङ्गविशिष्टा सच्चिदानन्दरूपेण परशिवेन साकं समरसीभूता विमर्शशक्त्यपरपर्याया चिच्छक्तिर्विभागपरामर्शदशायाम्, अर्थात् शिवस्य सृष्ट्युन्मुखावस्थायां सत्त्वादिगुणत्रयात्मिका भवति, सैवात्र सिद्धान्ते महामाया, परामाया, ऊर्ध्वमायेत्यादिभिर्नामभिर्व्यवह्रियते। एतादृश-महामायया युक्तः परशिव एव 'महेश्वरः' इत्यभिधीयते। तदुक्तमुपनिषदि—

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्[2]॥ इति।

यथा मायासम्बन्धेन परशिवस्य महेश्वर इत्यभिधानमागतम्, तथा परशिवसम्बन्धेन शक्तिरपि मायाशब्देनोच्यत इत्युक्तं सिद्धान्तागमे। तथाहि—

मं शिवं परमं ब्रह्म प्राप्नोतीति स्वभावतः।
मायेति प्रोच्यते लोके ब्रह्मनिष्ठा सनातनी[3]॥ इति।

---

१. वा. शु. त. १।२४-२७

२. श्वे. उ. ४।१०

३. श. वि. सि., पृ. ३

अत्र "मं=शिवम्, अयति=स्वभावतः प्राप्नोतीति माया" इत्युपनिषत्प्रतिपादितया व्युत्पत्त्या मायाशक्तेर्नित्यशिवसम्बन्धित्वं सूचितम्। तदेवं शक्तेः शिवेन नित्यसम्बन्धात् तस्या मायेति, मायया युक्तत्वेन च शिवस्य महेश्वर इत्युभे अपि नामधेये अन्वर्थके संजाते। एतेनोभयोरनादित्वं नित्यत्वं च सूचितम्। इयं च परा माया शुद्धा, अत एवेयं स्वाश्रयभूतं महेश्वरं न मोहयति, प्रत्युत तस्य सर्वज्ञत्वाद्युत्कृष्टगुणान् सम्पादयति। तदुक्तं श्रीरेणुकाचार्यैः—

उपाधिः पुनराख्यातः शुद्धाशुद्धविभेदतः।
शुद्धोपाधिः परा माया स्वाश्रयाऽमोहकारिणी॥
मायाशक्तिवशादीशो नानामूर्तिधरः प्रभुः।
सर्वज्ञः सर्वकर्ता च नित्यमुक्तो महेश्वरः[१]॥ इति।

एतन्मायाविशिष्टोऽयं महेश्वरो लीलावस्थामापन्नः सन् जगद्व्यापारमनुवर्तयति भक्ताननुगृह्णाति च। अद्वैतवेदान्तिनः—"या मा (नास्ति) सा माया" इति व्युत्पत्त्या मायाया मिथ्यात्वम्, ब्रह्मणा च तस्याः सम्बन्ध आध्यासिक इति प्रतिपाद्य, ब्रह्मणः सगुणं स्वरूपं न पारमार्थिकम्, किन्तु निर्गुणस्वरूपमेव पारमार्थिकमिति व्यवस्थापयन्ति। यदि निर्गुणस्यैव सत्यत्वं सगुणस्य च मिथ्यात्वं स्यात्, तदा "स ऐक्षत बहु स्यां प्रजायेयेति"[२], "स ईक्षां चक्रे"[३] इत्यादीनामीश्वरस्य सगुणत्वप्रतिपादकश्रुतिशतानां निर्विषयत्वापत्तिः।

अपरं च, उपासकानामनुग्रहार्थं तस्य सगुणरूपत्वाङ्गीकाराद् उपास्यस्य मिथ्यात्व उपासकानां श्रद्धाऽनुदयाद् भक्तिसिद्धान्तस्य वैयर्थ्यापत्तिः। अतः सगुणरूपस्यापि सत्यत्वमेवाङ्गीकर्तव्यम्। एतद्विषयेऽद्वैतवेदान्तापेक्षया शक्तिविशिष्टाद्वैतपक्ष एव भक्तैर्मुमुक्षुभिः समाद्रियत इति निश्चप्रचम्।

काश्मीरशैव-सिद्धान्तशैवयोः शक्तेर्भेदाः

काश्मीरशैवसिद्धान्ते—"न शिवः शक्तिरहितो न शक्तिः शिववर्जिता"[४] इत्युक्त्यनुसारेण वह्निदाहिकयोरिव तयोर्नित्यं तादात्म्यमभ्युपगतम्। एवं परशिवतादात्म्यापन्ना सा शक्तिः प्रकाशानन्दरूपा। तादृशशक्तिविशिष्टश्च स

१. सि. शि. ५।४०,४२
२. बृ. उ. १।२।५
३. प्रश्नो. ६।३
४. शै. द. बि., पृ. ८६

पानकरसन्यायेन समरसरूप एक एव। एवं शिवस्यैकत्वादत्र सिद्धान्ते शक्तिरप्येकैव। अथाप्यस्याश्चिच्छक्ति-आनन्दशक्ति-इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-भेदेन पञ्च अवस्थाः स्वीकृताः[१]। अत्राद्ये द्वे परशिवस्वरूपभूते, अन्याश्च तिस्रः प्रपञ्चोत्पत्त्यादौ कारणीभूताः। चिच्छक्त्या युक्तः शिवः स्वयं प्रकाशमानः सर्वानपि तत्त्वान् प्रकाशयति। तस्य स्वयं प्रकाशत्वाभावे जगदान्ध्यप्रसङ्गः[२]। एवमेवानन्दशक्तियुक्तत्वात् स आनन्दमय इत्युच्यते। लोके यथाऽऽनन्दप्राप्तये भोग्यस्य वस्त्वन्तरस्यापेक्षा वर्तते, तथाऽत्र शिव आनन्दप्राप्तये वस्त्वन्तरं नापेक्षत इत्ययं परमस्वतन्त्रः परिपूर्णश्च।

चिदानन्दरूपस्य परशिवस्य विश्वात्मना बहिरुल्लिलासयिषा हि इच्छाशक्तिः। "तच्चमत्कार इच्छाशक्तिः"[३] इत्यभिनवगुप्त इच्छाशक्तिर्नामाऽऽनन्दशक्तेश्चमत्कार इत्युक्तवान्। "परतस्तस्मिन् विश्वलक्षणे कार्ये यज्ज्ञानं तत्प्रकाशनशक्तिरूपता ... सा ज्ञानशक्तिः"[४] इत्युत्पलदेववचनानुसारमिच्छाशक्तिरेव यदा विकसिता सती विश्वकार्यं प्रकाशयति, तदा सैव ज्ञानशक्तिरित्युच्यते। परशिवस्येच्छानुसारं नानारूपाणि धारयित्वा विश्वात्मनाऽऽभासमाना शक्तिरेव क्रियाशक्तिः[५]।

तदेवं काश्मीरशैवदर्शने शक्तेः पञ्चविधत्वं[६] प्रतिपादितम्। अत्र चिच्छक्तिरानन्दशक्तिश्च परशिवस्य स्वरूपभूते। स्वातन्त्र्यशक्त्यपरपर्याया इच्छाशक्तिरेव जगदाभाससमये स्वयमेव ज्ञानरूपेण क्रियारूपेण च परिणमत इति विज्ञायते।

सिद्धान्तशैवदर्शने शक्तिः शिववच्चिद्रूपा, शिवस्य धर्मरूपा च। अस्याः क्वचिद् ज्ञान-क्रियारूपेण, क्वचिदिच्छा-ज्ञान-क्रियारूपेण, क्वचिच्च सृष्टि-स्थिति-प्रध्वंस-पिधान-अनुग्रहरूपेण विभागो निरूपितः[७]।

---

१. त. सा., पृ. ७३

२. "प्रकाशमानता स्वात्मन्यपि न स्यादित्यन्धता जगतः"
(ई. प्र. वि., भा. १, पृ. ११५)

३. त. सा., पृ. ६

४. शि. दृ. वृ., पृ. १८

५. "सर्वाकारयोगित्वं क्रियाशक्तिः" (त. सा., पृ. ६)।

६. "परमेश्वरः पञ्चभिः शक्तिभिर्निर्भरः" (त. सा., पृ. ७३)।
अत्र निर्भरो नाम परिपूर्ण इत्यर्थः।

७. शै. द. बि., पृ. १७-१८

शक्तिभेदविमर्शः

तदेतत्पर्यालोचनेन ज्ञायते यद् वीरशैवदर्शने शक्तेः षड् भेदाः, काश्मीरशैवदर्शने पञ्चभेदाः, सिद्धान्तशैवदर्शनेऽपि पञ्चभेदाः स्वीकृता इति। अत्र शक्तेरिच्छाज्ञानक्रियास्वरूपविषये त्रिविधदर्शनानामैक्यमत्यं प्रतीयते। चिच्छक्तिस्वरूपविषये विचारसाम्यस्य विद्यमानत्वेऽपि काश्मीरशैवैः शिव-शक्त्योरभेदः सम्बन्धः, वीरशैव-सिद्धान्तशैवैस्तयोर्धर्म-धर्मिभावसम्बन्धश्च स्वीकृतः। एतादृशसम्बन्धविषये वीरशैव-सिद्धान्तशैवयोरैकमत्यमिति विज्ञेयम्।

षट्स्थलोपासनया परशिवतत्त्वप्राप्तिप्रतिपादके वीरशैवसिद्धान्ते स्थल-तत्त्वमेवोपासनार्थं महालिङ्ग-प्रसादलिङ्ग-जङ्गमलिङ्ग-शिवलिङ्ग-गुरुलिङ्ग-आचारलिङ्गभेदेन षड्विधं भवतीत्यङ्गीकृतत्वात् तेषां सर्वेषां शक्तियुक्तत्व-स्वीकाराच्चात्र शक्तेः षड्विधत्वं प्रतिपादितमित्ययं विशेषोऽस्य दर्शनस्य। एतेषां षट्शक्तियुक्तानां षड्लिङ्गानां स्वरूपविवरणं पञ्चमपरिच्छेदेऽवलोकनीयम्।

तदेवं वीरशैव-काश्मीरशैव-सिद्धान्तशैवदर्शनेषु परशिवतत्त्वं शक्तियुक्तमेव प्रतिपाद्यते। सा शक्तिः परमार्थत एकैव, अथापि विभिन्नव्यवहारव्यवस्थार्थं तस्या भेदा अभ्युपगता इति विज्ञायते। विमर्शशक्तिः परशिवस्वरूपभूतेत्यत्र विषये वीरशैव-काश्मीरशैवयोः साम्यमेव। किन्तु तयोः सम्बन्धविषये नास्ति मतैक्यम्। तयोः सम्बन्धो भेदाभेदात्मक इति वीरशैवाः, अभेदात्मकश्चेति काश्मीरशैवा अभिप्रयन्ति। परशिवस्य स्वस्थावस्थायां तत्समरसीभूता विमर्श-शक्तिरेव तदीयलीलावस्थायां सत्त्वादित्रिगुणात्मिका सती मायेत्युच्यते। इयमेव प्रपञ्चोपादानभूता। मायाशक्तियोगेन महेश्वर इत्यभिधानवान् परशिवः प्रपञ्चोत्पत्तौ निमित्तकारणं भवति। मायामहेश्वरयोर्नात्यन्तं भेदो नाप्यभेद इति मायाविशिष्टो महेश्वरो जगदुत्पत्तावभिन्ननिमित्तोपादानकारणमिति वीरशैवाः प्रतिपादयन्ति। सर्वज्ञत्वादिदिव्यगुणगणयुक्तोऽयं महेश्वरः परशिवस्य सगुणं स्वरूपम्। अतोऽयं मुमुक्षूपास्यो भवति। एतेनात्र भक्तिसिद्धान्तस्य सार्थकता वर्तते। तदेवमत्र विमर्शशक्तियुक्तः परशिवो विश्वोत्तीर्ण इति, मायाशक्तिविशिष्टश्च विश्वमय इति वेद्यम्। विश्वोत्तीर्णश्च परशिवोऽत्र सिद्धान्ते षट्त्रिंशत्तत्त्वातीतो घनलिङ्गपर्यायो मुक्तात्मप्राप्यः।

काश्मीरशैवसिद्धान्ते परशिवः प्रकाशरूपः, तदीया शक्तिश्च विमर्श-रूपिणी। "विमर्शशरीर एव प्रकाशो युक्तः"[1] इत्यभिनवगुप्तोक्त्याऽत्र प्रकाश-

---

१. ई. प्र. वि. वि., भा. २, पृ. २०७

विमर्शाख्ययोः शिवशक्त्योरैक्यमभ्युपगम्यते। अयमप्यत्र सिद्धान्ते विश्वोत्तीर्णः षट्त्रिंशत्तत्त्वातीतश्च। अयं विश्वोत्तीर्ण एव स्वस्वातन्त्र्यबलेन षट्त्रिंशत्तत्त्वरूपेणावभासते। शिवशक्त्योरभिन्नत्वादत्रापि प्रपञ्चोत्पत्तौ परशिवोऽभिन्ननिमित्तोपादानकारणम्। अयमेव विश्वमयः। अत्र विश्वोत्तीर्ण-विश्वमययोः सागरतरङ्गन्यायेनाभेद एव स्वीक्रियते। वीरशैवसिद्धान्ते परशिवः कदाचिद्विश्वलीलाव्यापारं विना स्वस्थावस्थायां वर्तत इति स्वीक्रियते, किन्तु काश्मीरशैवसिद्धान्ते परशिवः स्वस्वातन्त्र्यबलेन सदा लीलामभिनयन्नेव तिष्ठतीति स्वीकारान्नात्र परशिवस्य स्वस्थावस्था। अतो जगज्जन्मादिकारणत्वमस्य न तटस्थलक्षणम्, किन्तु स्वरूपलक्षणमेव।

सिद्धान्तशैवदर्शने परशिवः पतिशब्देनोच्यते। विश्वोत्तीर्ण[1] इत्युच्यमानोऽप्ययं न षट्त्रिंशत्तत्त्वातीतः, किन्तु षट्त्रिंशत्तत्त्वेष्वाद्यं तत्त्वमेव। स शिवः स्वाद्योन्मेषरूपया[2] चिच्छक्त्या युक्तो भवति। शिवचिच्छक्त्योरत्र भेदाभेदरूपः समवायसम्बन्धोऽङ्गीकृतः। चिच्छक्तियुक्तत्वादेवाऽयं सदा स्वरूपज्ञानसम्पन्नो भवति। अयं शिवः स्वशक्त्या मायाख्यं बिन्दुतत्त्वं विक्षोभ्य सृष्ट्यादिपञ्चकृत्यानि निर्वहति। पञ्चकृत्येषु चिच्छक्तियुक्तः शिवो निमित्तकारणं बिन्दुश्चोपादानकारणम्। शिवस्याभिन्ननिमित्तोपादानकारणत्वमेभिर्नाङ्गीक्रियते। पञ्चमन्त्रतनुरित्युच्यमानोऽप्ययमशरीर[3] एवेत्येभिः प्रतिपाद्यते। अथाप्युपासनार्थमत्र तस्य सगुणरूपत्वमङ्गीकृतम्[4]। शिवस्य सगुणं रूपं सत्यं मुमुक्षूपास्यं चेत्यस्मिन् विषये वीरशैवसिद्धान्तशैवयोर्मतैक्यं प्रतिभाति।

एवमत्र शक्तिविशिष्टाद्वैततत्त्वविमर्शः कृतः। परशिवतच्छक्तिस्वरूपनिरूपणानन्तरं क्रमप्राप्तं जीवस्वरूपं निरूपणीयं भवति। यतो हि तृतीयचतुर्थपञ्चमपरिच्छेदेषु जीवात्मनो मुक्तेः सहकारिसाधनभूतयोरष्टावरण-पञ्चाचारयोः, तथोपासनायाः सोपानभूतानां षट्स्थलानां स्वरूपं विवेचयिष्यते।

---

१. "पतिः विश्वोत्तीर्णः शिवः" (शै. द. बि., पृ. १७)।

२ चिदनुग्रहहेतोरस्य सिसृक्षोर्य आद्य उन्मेषः।
तच्छक्तितत्त्वमभिहितमविभागापन्नमस्यैव ॥ (त. प्र., २७)

३. "अतः पञ्चमन्त्रात्मिकाः पञ्चकृत्योपयोगिन्य ईशानाद्याः शक्तय एव शरीरकार्यं कुर्वाणास्तनुरित्युपचारादुच्यन्ते" (त. प्र. वृ., ६)।

४. "ध्यानार्थमेवेश्वरस्य पञ्चवक्त्राद्याकारः श्रूयते, निराकारे ध्यानपूजाद्ययोगात्।"
(त. प्र. वृ., ६)

एते च विषया जीवात्मसम्बन्धिनः । परिच्छेदस्यान्ते जीवात्मस्वरूपनिरूपणेनाग्रिमपरिच्छेदेषु प्रस्तूयमानानामेषां विषयाणां सुगमतया सम्बन्धस्तेन स्थापितो भवति, अतोऽधुना जीवात्मस्वरूपं विहाय प्रथमं तावत् तत्क्रमसंगतये जगत्स्वरूपं समाख्यायते ।

जगत्स्वरूपविमर्शः

इह खलु दार्शनिकसमाजे जगत्सृष्टिस्वरूपव्यवस्थार्थं बहवो वादा अभ्युपगताः । स्वाभिमतार्थकथनमत्र वादशब्दार्थः । तत्र तावद् वीरशैवसिद्धान्तेऽविकृतपरिणामवादेन, काश्मीरशैवदर्शने आभासवादेन, सिद्धान्तशैवदर्शने सत्कार्यवादेन च सृष्टिर्व्यवस्थाप्यते । प्रकृते वीरशैवाभ्युपगताविकृतपरिणामवादरीत्या सृष्टिस्वरूपं निरूप्यते, अन्ते चाभासवाद-सत्कार्यवादयोः स्वरूपं विमृश्यते ।

तत्र तावद् वीरशैवसिद्धान्ते तत्त्वात्मिका सृष्टिरङ्गीकृता । अनारोपितं हि रूपं तत्त्वं भवति । अतोऽत्र तत्त्वात्मकोऽयं प्रपञ्चः शिवशक्त्योर्विलासरूपः । अयं विलासः—१. शिवः, २. शक्तिः, ३ सदाशिवः, ४. ईश्वरः, ५. शुद्धविद्या, ६. माया, ७. कला, ८. विद्या, ९. रागः, १०. कालः, ११. नियतिः, १२. पुरुषः, १३. प्रकृतिः, १४. महान्, १५. अहङ्कारः, १६. मनः, १७. श्रोत्रम्, १८. त्वक्, १९. चक्षुः, २०. जिह्वा, २१. घ्राणम्, २२. वाक्, २३. पाणिः, २४. पादः, २५. पायुः, २६. उपस्थः, २७. शब्दः, २८. स्पर्शः, २९. रूपम्, ३०. रसः, ३१. गन्धः, ३२. आकाशः, ३३. वायुः, ३४. अग्निः, ३५. जलम्, ३६. पृथिवी चेति षट्त्रिंशत्तत्त्वात्मको भवति ।

अत्र द्वितीयं यच्छक्तितत्त्वं वर्तते, तदेव सदाशिवादिभूम्यन्तचतुस्त्रिंशत्तत्त्वात्मना परिणमते । तदुक्तं शक्तिस्तुतिव्याजेन शिवयोगिशिवाचार्येण—

सदाशिवमुखाशेषतत्त्वमौक्तिकशुक्तिकाम् ।
वन्दे माहेश्वरीं शक्तिं महामायादिरूपिणीम् ॥[1] इति ।

तस्मादिदं जगत् शक्तेरेव विलासः । अत एवोक्तम्—"शक्तिरेतज्जगत्सर्वम्[2]", "सूक्ष्मस्थूलात्मकविश्वमेव शक्तिः" इति । अत्र शिवशक्त्योरविनाभावरूपत्वाद् विश्वस्य शिवशक्त्योर्विलासरूपत्वमुच्यते ।

---

१. सि. शि. २।२
२. शि. प., पृ. २

अत्रेदं बोध्यम्—परशिवस्य निर्गुणावस्थायां (स्वस्थावस्थायां) तत्समरसीभूता विमर्शशक्तिरेव तदीयलीलावस्थायां सत्त्वादित्रिगुणात्मिका भवति यदा, तदेयं मायेत्युच्यते। तन्मायाशक्तिसम्बन्धेनासौ परशिवो घृतकाठिन्य-न्यायेन, अर्थाद् द्रवीभूतस्यापरिमितस्य घृतस्यैकदेशे यथा घनीभावो भवति, तथाऽपरिमितसुखस्वरूपः स्वेच्छया सुखबाहुल्योच्छूनं किञ्चित् स्वरूपमाधत्ते[1]। तदेव तस्य सगुणं स्वरूपं महेश्वराख्यम्। अयमेव मायाशक्तियुक्तः सन् सदाशिवादितत्त्वात्मना परिणमते।

उपर्युक्तेषु षट्त्रिंशत्तत्त्वेषु शिवादिशुद्धविद्यान्तानि तत्त्वानि शुद्धानीति, मायादिपुरुषतत्त्वान्तानि शुद्धाशुद्धानीति, प्रकृत्यादिपृथिवीतत्त्वपर्यन्तानि चाशुद्धतत्त्वानीति निरूप्यन्ते[2]।

काश्मीरशैवैः सिद्धान्तशैवैश्चोपर्युक्तानि षट्त्रिंशत्तत्त्वान्यङ्गीकृतान्येव। तत्त्वानां स्वरूपविमर्शोऽस्माभिः "सिद्धान्तशिखामणिसमीक्षा" इत्याख्ये शोधप्रबन्धे विस्तरेण निरूपितः। इयांस्तु विशेषः—काश्मीरशैववीरशैवयोस्तत्त्वानां क्रमे स्वरूपे चैकरूपत्वे सत्यपि सिद्धान्तशैवदर्शनीयः शुद्धाशुद्धतत्त्वानां क्रमो भिन्नः। तत्र—माया, कालः, कला, विद्या, नियतिः, रागश्चेत्ययं क्रमः सिद्धान्तशैवानामभिमतः। अत्र शुद्धाशुद्धतत्त्वक्रमविषये बहूनि मतमतान्तराणि सन्ति। तानि च तन्त्रालोके नवमाह्निके द्रष्टव्यानि।

अहङ्कारसृष्टिक्रमेऽपि तत्र वैलक्षण्यं दृश्यते। तथाहि—"तैजसाख्यादहङ्काराद राजसाच्चलस्वभावं मन उत्पद्यते, वैकारिकात् सात्त्विकात् प्रकाशलाघवोपेतमिन्द्रियदशकम्। भूतादेस्तामसात् तमोबहुलानां तन्मात्राणामुद्भव इति। तैजसात् सात्त्विकात् स्वच्छं लघूत्पद्यते मन इत्यन्ये। सात्त्विकसहकृताद् वैकारिकाद् राजसाद् बुद्धीन्द्रियाणामुत्पत्तिः, ज्ञानसाधनत्वात्। तामससहकृताद् वैकारिकात् कर्मेन्द्रियाणामिति। सांख्याः सात्त्विकादेवाहङ्कारादेकादशेन्द्रि-

---

१. शिवाभिधं परं ब्रह्म जगन्निर्मातुमिच्छया।
स्वरूपमादधे किञ्चित्सुखस्फूर्तिविजृम्भितम्॥
विशुद्धज्ञानकरणं विषयं सर्वयोगिनाम्।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसमप्रभम्॥
अप्राकृतगुणाधारमनन्तमहिमास्पदम्। (सि. शि. २।८,११)

२. शि. प., पृ. २

याणाम्, तामसात् तन्मात्राणामुत्पत्तिं मन्यन्ते''[१] इति कुमारो विवृणोति। अघोरशिवस्तु—''तैजसादहङ्कारान्मनोबुद्धीन्द्रियाणि जायन्ते, वैकारिकात् कर्मेन्द्रियाणि, भूतादेरपि तन्मात्राणीत्यर्थः। न च तैजसतो मन एव वैकारिकादुभयरूपाणीन्द्रियाणीति व्याख्येयम्''[२] इत्याह। ''उत्पत्तिरहङ्काराच्चित्तबहिष्करणभूतयोनीनाम्'' इति वचनं विवृण्वंश्च स एवमेवाह—''तत्र मनसो बुद्धीन्द्रियाणां च सात्त्विकात् तैजसाख्यादहङ्कारस्कन्धादुत्पत्तिः, कर्मेन्द्रियाणां तु राजसाद् वैकारिकाख्यात्, भूतयोनीनां च तन्मात्राणां च तामसाद् भूतादिसंज्ञात्। एवं त्रिविधादहङ्कारादेषामुत्पत्तिः'' इति। अस्य विस्तृतं विवेचनं शैवशाक्ततन्त्रविशेषज्ञैः प्रो० व्रजवल्लभद्विवेदमहाभागैरष्टप्रकरणस्योपोद्घाते कृतं[३] वर्तते।

अत्रेदं विचारणीयम्—तैजसाद् राजसात्, तैजसात् सात्त्विकादिति पक्षद्वयमाह कुमारः। तत्र प्रथमः पक्षः सांख्यानामपि संमतः। अपरश्च पक्ष आगममूलक इत्यघोरशिवव्याख्यानेन ज्ञायते। चिरप्ररूढा उभावपि पक्षाविति यथाशास्त्रं व्यवस्था विधेया।

अन्यत् सर्वं तत्त्वानां स्वरूपलक्षणक्रमादिकं सर्वत्र समानमेव। तच्चोपर्युक्ते स्थलेऽस्माभिर्निरूपितमेवेत्यधुना तत्त्वसृष्टावभ्युपगतानां वादानां स्वरूपविमर्शोऽत्र विधीयते।

अविकृतपरिणामवादः

स्वरूपे किञ्चिद्विकारं विनैवान्यथारूपेण परिणामोऽविकृतपरिणाम इत्युच्यते। वीरशैवसिद्धान्ते शक्तेर्विकासेन सृष्टिरिति, तत्सङ्कोचेन च प्रलय इति सङ्कोचविकासाभ्यां सृष्टिप्रलयौ व्यवस्थाप्येते। यथा कूर्मः कदाचित् स्वावयवानि सङ्कोच्य तूष्णींभावेन तिष्ठति, कदाचिच्च तेषां विस्तारेण जले भूमौ वा विहरति, तथा परशिवोऽपि प्रलयकाले स्वशक्तिसङ्कोचेन प्रपञ्चं विलापयति, सृष्टिकाले च स्वलीलार्थं स्वशक्तिविकासद्वारा जगदुत्पादयति। तस्माद्यथा स्वाङ्गसङ्कोचविकासाभ्यां कूर्मे न कश्चिद्विकार आरोप्यते, तथा स्वशक्तिसङ्कोचविकासाभ्यां परशिवेऽपि विकृतिर्नायातीत्यविकृतपरिणामवाद इत्युच्यते। अयमेवाविकृतपरिणामवादः श्रीरेणुकाचार्यैः—

---

१. त. प्र. ता., श्लो. ५५

२. त. प्र. वृ., श्लो. ५५

३. अ. प्र. उपो., पृ. ३७-३८

आत्मशक्तिविकासेन शिवो विश्वात्मना स्थितः।
कुटीभावाद्यथा भाति पटः स्वस्य प्रसारणात्[१]॥

इति पटदृष्टान्तेन प्रसाधितः।

अस्यायमर्थः—यथा पटो विलक्षणप्रसारणेन कुटीभावमापद्यते, तत्सङ्कोचे च पटरूपेणावतिष्ठते, न चाभ्यां सङ्कोचविकासाभ्यां पटस्य स्वरूपे विक्रिया जायते, तथा शिवोऽपि स्वात्मशक्तिविकासेन विश्वात्मना तिष्ठन् न विक्रियत इति। एतदतिरिक्तं श्रीपूज्यपादाः—

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते[२]॥

इति वृक्षदृष्टान्तेनाप्यविकृतपरिणामवादं साधितवन्तः।

अस्यार्थः श्रीमरितोण्टदार्येणैवमुक्तः—"वृक्षो यथा कालशक्त्या विकाररराहित्येन स्वान्तर्लीनस्वविजातीयपत्रपुष्पादिभेदविशिष्टत्वेन भाति, तथा शिव एव स्वसमवेतशक्तितादात्म्यक्रोडीकृतभूम्यादिरूपेण प्रतिस्फुरणगत्या भातीत्यर्थः। तत्र धृत्या धरणिः, करुणया जलम्, उज्ज्वलतया तेजः, परमानन्दस्पन्देन वायुः, चिद्व्याप्त्या व्योम, चितिसङ्कोचचित्तविशिष्टो जीव इति विवेकः"[३] इति।

ननु वृक्षस्य सावयवत्वात् तस्य पत्रशाखादिरूपेण परिणामसम्भवेऽपि परशिवस्य निरवयवत्वात् कथं तस्य विश्वात्मना परिणामः? इति चेन्मैवम्, अत्र सिद्धान्ते परशिवनिष्ठशक्तेरेव विश्वात्मना तत्त्वान्न परशिवब्रह्मणः परिणामित्वम्। अतः शक्त्यादिपृथिवीपर्यन्तस्य सकलतत्त्वसमुदायस्य "शक्तिरस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः"[४] इति शक्तिरूपत्वमेव प्रतिपादितम्।

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्[५]॥

इति भगवती श्रुतिरपि विश्वस्य शक्तिरूपत्वमुक्तवती।

---

१. सि. शि. १०।६५
२. सि. शि. १०।६६
३. सि. शि. १०।९, तत्त्वप्रदीपिकाव्याख्या, पृ. १८९
४. ब्र. सू. श्री. १।४।१०
५. श्वे. उ. ४।१०

शक्तिविशिष्टपरशिवस्य जगदुभयकारणत्वम्

पूर्वोक्तप्रमाणैः शक्त्यविनाभावमापन्ने परशिवे जगतो निमित्तोपादानकारणत्वं समन्वितमित्यत्र न कोऽपि विवादः। ननु सर्वैरपि चिद्रूपस्येश्वरस्य निमित्तकारणत्वमेवाङ्गीक्रियते, नहि घटं निर्मिमाणः कुलालः स्वयमेव मृत्पिण्डीभूय घटं करोति, तस्मान्निमित्तभूतस्य परशिवस्य कथमुपादानत्वमपि सङ्गच्छते ? इति चेन्मैवम्, "विश्वाधिपो रुद्रो महर्षिः"[1] इत्यादिना यथा विश्वाधिपत्वेन परमात्मनो निमित्तत्वमवगम्यते, तथा "सर्वं खल्विदं ब्रह्म"[2], "सर्वो वै रुद्रः"[3] इत्यादिना तत्र प्रकृतित्वविश्वरूपत्वस्यापि श्रवणात्। अत एव श्रीरेणुकाचार्याः—

यस्मादेतत् समुत्पन्नं महादेवाच्चराचरम्।
तस्मादेतन्न भिद्येत यथा कुम्भादिकं मृदः॥
यथा तन्तुभिरुत्पन्नः पटस्तन्तुमयः स्मृतः।
तथा शिवात् समुत्पन्नं शिव एव चराचरम्[4]॥

इति मृत्तन्त्वोरुपमानेन परशिवस्य जगदुपादानत्वम्, तथा—

जगत् सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम्।
कर्तारं सर्वलोकानां विदधे विश्वनायकः[5]॥

इत्यत्र तस्यैव निमित्तकारणत्वं च प्रतिपादयामासुः। किञ्च, "यथोर्णनाभिः सृजते गृह्णते च"[6] इति श्रुतिरपि। यथा ऊर्णनाभिः स्वयं निमित्तोपादानत्वमापन्नः स्वशरीरात् तन्तुजालमुद्वमते गृह्णाति च, तथा परशिवोऽपि निमित्तोपादानतामापन्नः स्वस्मादविनाभूतपराशक्त्या सर्वप्रपञ्चं सृजति संहरति चेत्यभिन्ननिमित्तोपादानत्वं समर्थयति।

---

१. श्वे. उ. ३।४
२. छा. उ. ३।१४।१
३. महाना. उ. १०।११
४. सि. शि. १०।६२, ६४
५. सि. शि. २।१३
६ मुण्ड. उ. १।१।७

अपरं च, छान्दोग्ये एकविज्ञानेन सर्वविज्ञानमिति प्रतिज्ञातम्—'यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्''[१] इति। तदुपपादकमृत्पिण्डदृष्टान्तानुरोधेन ब्रह्मणो निमित्तमात्रत्वे तद्विज्ञानेन सकलप्रपञ्चविज्ञानं न सम्भवति। कुलालज्ञानेन हि घटादिकार्यं न ज्ञायते, किन्तु तदुपादानमृत्पिण्डज्ञानेन। अतो निमित्तभूतस्य परशिवस्य स्वापृथक्सिद्धशक्तिपरिणामभूतसर्वप्रपञ्चोपादानत्वं निष्प्रत्यूहम्।

तदेवं सूक्ष्मचिदचिद्रूपशक्तिविशिष्टस्य परशिवस्य कारणत्वं स्थूलचिदचिद्रूपशक्तिविशिष्टस्य प्रपञ्चस्य च कार्यत्वमिति कार्यकारणभावो विज्ञेयः। अयं शक्तिविशिष्टः परशिवः शिवादिभूम्यन्तषट्त्रिंशत्तत्त्वात्मना परिणामं प्राप्य लीलाविनोदमनुभवति। लीलाव्यापारान्ते च स्वशक्तिसङ्कोचेन समस्तं चराचरं विश्वं स्वात्मनि विलाप्य केवलावस्थामास्थाय तिष्ठति।

अत्रेदं विज्ञेयम्—शक्तिविशिष्टाद्वैतापरपर्याये वीरशैवसिद्धान्ते प्रपञ्चोत्पत्तौ शक्तिरुपादानकारणम्, शिवश्च निमित्तकारणम्। अत्र चन्द्रचन्द्रिकयोरिव शिवशक्त्योर्नात्यन्तभेद इति स्वीकारात् शक्तिविशिष्टस्य शिवस्याभिन्ननिमित्तोपादानकारणत्वं प्रतिपादितमिति।

प्रपञ्चस्य सत्यत्वम्

शिवशक्तिविलासरूपमिदं जगत् शिवशक्तिमयम्[२]। अतः शिवशक्त्योरिव विश्वस्यापि सत्यत्वमेवाङ्गीक्रियते। अत एव श्रीरेणुकाचार्याः—"शिवतत्त्वात् समुत्पन्नं जगदस्मान्न भिद्यते"[३], "तथा शिवात् समुत्पन्नं शिव एव चराचरम्"[४] इत्यादिवचनैः शिवस्य जगन्मयत्वं निरूप्य जगतः सत्यत्वमुद्घोषितवन्तः।

शक्तिविशिष्टः शिवो मायाशक्तेः सत्त्वादिगुणभेदेन भोक्ता, भोज्यम्, प्रेरयिता चेति त्रिविधरूपेण परिणमते। तदुक्तं श्रीरेणुकाचार्यैः—

---

१. छा. उ. ६।१।४

२ शक्तिरस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः।
शक्तिस्तु शक्तिमद्रूपाद् व्यतिरिक्ता हि न क्वचित्॥ (ब्र. सू. श्री. १।४।१०)

३. सि. शि. १०।६३

४. सि. शि. १०।६४

भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम् ।
अत्र प्रेरयिता शम्भुः शुद्धोपाधिर्महेश्वरः ॥
सम्मिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः ।
भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम्[१] ॥ इति ।

तदेवं शुद्धसत्त्वगुणोपाधिना शिवः प्रेरयितेति, मलिनसत्त्वगुणोपाधिना भोक्ता पशुरिति, तमोगुणोपाधिना च भोज्यमिति च कथ्यमानत्वाद् एकस्यैव त्रिविधरूपत्वाच्च वीरशैवदर्शने शिववज्जीवजगतोश्च सत्यत्वमङ्गीक्रियते । भाष्यकाराः श्रीपतिपण्डिताराध्यभगवत्पादा अपि—

जीवः सत्यं जगत् सत्यं शिवः सत्यं स्वभावतः ।
तयोरभेदः सत्यं वा क्रिमिभ्रमरयोरिव[२] ॥

इत्यागमवचनोदाहरणेनापि शिव-जीव-जगतां सत्यत्वं व्यवस्थापितवन्तः । तस्मादत्र दर्शने "सर्वं खल्विदं ब्रह्म"[३], "सर्वो वै रुद्रः"[४] इत्यादिश्रुतिशतप्रमाणेन मुख्यसामानाधिकरण्यसम्बन्धेन प्रपञ्चस्य शिवशक्तिस्वरूपत्वमङ्गीक्रियते ।

काश्मीरशैवानामाभासवादः

काश्मीरशैवा आभासवादेन सृष्टिप्रक्रियां व्यवस्थापयन्ति । अत्र सागरतरङ्गन्यायेन विश्वोत्तीर्णः परशिव एव स्वस्वातन्त्र्यबलेन विश्वरूपेणावभासत इति स्वीक्रियते । अतोऽयमाभासवादो नाद्वैतवेदान्तवन्मिथ्यापर्यायः । यथा समुद्रस्वरूपभूतं जलं वायुना क्षोभितं सत् तरङ्गादिरूपेण भासते, तथाऽऽनन्दघनः परशिवः स्पन्दरूपयेच्छाशक्त्या विश्वरूपेणावभासते । अतो विश्वोत्तीर्णविश्वमययोर्व्यवहारभेदेऽपि वस्तुतस्तयोरेकरूपत्वमेव[५] ।

"शिवः परमकारणम्"[६] इति तन्त्रालोकोक्त्यनुसारं सिद्धान्तेऽस्मिन् जगदुत्पत्तौ शिवः स्वेच्छातिरिक्तं किञ्चिदपि नापेक्षते । अहं बहु स्यामित्येवं-

---

१. सि. शि. ५।३७-३८

२. ब्र. सू. श्री. २।३।४

३. छा उ. ३।१४।१

४. महाना. उ. १०।११

५. "यथाम्बुधेस्तरङ्गाणां चैक्येऽपि व्यवहारभेदस्तथा शिवस्य विश्वस्य च" (शि. दृ. वृ., पृ. ११३)।

६. तन्त्रा. १।८८

विधा तदीयेच्छैव घटपटाद्याकारजगदात्मनाऽवभासते[१]। इच्छामात्रेण जगन्निर्माणमिति—

योगिनामपि मृद्बीजे विनैवेच्छावशेन यत्।
घटादि जायते तत्तत् स्थिरभावक्रियाकरम्[२] ॥

इति योगिनां दृष्टान्तेन तत्र समर्थितम्। अस्यायं भावः—यथा सङ्कल्पसिद्धा योगिनः स्वेच्छामात्रेण विनैव मृत्तिकां स्वप्रयोजनीभूतजलाहरणादिक्रियाकरणसमर्थं घटमुत्पादयन्ति, बीजं विनैव वृक्षं चोत्पादयन्तीति पुराणादिषु श्रूयते; तथा शिवोऽपि प्रधानपरमाण्वादीननपेक्ष्यैव स्वेच्छामात्रेण जगन्निर्मातीति सिद्ध्यति। तदुक्तं वसुगुप्ताचार्यैः—

निरुपादानसंभारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने[3] ॥ इति।

सिद्धान्तेऽस्मिन् "नर्तक आत्मा"[४] इति शिवसूत्रानुसारं शिवो नर्तक इत्यप्युच्यते। "अन्तर्विगूहितस्वस्वरूपावष्टम्भमूलं तत्तज्जागरादिनानाभूमिकाप्रपञ्चं स्वपरिस्पन्दलीलयैव स्वभित्तौ प्रकटयतीति नर्तक आत्मा"[५] इति क्षेमराजः सूत्रममुं व्याख्याय शिवस्य नर्तकत्वं समर्थयामास। तस्मात् स्वचिद्भित्तावेव स्वातन्त्र्यशक्त्या शिव एव विश्वरूपेणावभासते। अतः प्रपञ्चेऽस्माभिर्यद् दृश्यते, तत्सर्वं शिवस्यैव स्वातन्त्र्यशक्तेर्विलासः। "शक्तयोऽस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वरः"[६] इत्युक्त्यनुसारमत्रापि वीरशैवदर्शनवच्छक्तिविकासेन सृष्टिस्तत्सङ्कोचेनैव प्रलयः। एषामयं शक्तिसङ्कोचविकासवादोऽभिन्ननिमित्तोपादानत्वमेव समर्थयति, शिवशक्त्योरभिन्नत्वात्। क्रीडाव्यापारो बालानां यथा स्वभावस्तथा

---

१. एष चानन्दशक्तित्वादेवमाभासयत्यमून्।
भावानिच्छावशादेषां क्रिया निर्मातृतास्य सा ॥
इत्थं तथा घटपटाद्याकारजगदात्मना।
तिष्ठासोरेवमिच्छैव हेतुकर्तृकृता क्रिया ॥ (स. द. सं., पृ. १९६-१९७)

२. स. द. सं., पृ. १९७

३. स. द. सं., पृ. १९९

४. शि. सू. ३।९

५ शि. सू. वि. ३।९

६. शि. सू. वि. ३।९, पृ. ८९

पञ्चकृत्यमपि शिवस्य स्वभावः। स सदा कृत्यपञ्चकैः क्रीडन्नेव तिष्ठति। तस्मात् काश्मीरशैवसिद्धान्तानुसारं कृत्यपञ्चकं शिवस्य स्वरूपलक्षणमिति वक्तुं शक्यते। वीरशैवैरिदं तटस्थलक्षणमित्युच्यते।

अविकृतपरिणामवाद-आभासवादयोः स्वरूपविमर्शः

शिवशक्त्योर्विलासरूपस्यास्य विश्वस्य वीरशैवैर्यथा सत्यत्वमङ्गीक्रियते, तथा काश्मीरशैवैरप्यभ्युपगम्यते। शक्तेर्विकासरूपस्य जगच्चित्रस्याधारभित्तिः शिव इति यथा काश्मीरशैवैः प्रतिपाद्यते, तथा वीरशैवाचार्यैरप्युक्तम्। तथाहि—

त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये।
सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः[1] ॥ इति।

तदेतदवलोकनेन वीरशैवानामविकृतपरिणामवादे काश्मीरशैवानामाभासवादे च जगतः शक्तेर्विकासत्वम्, शक्तिविशिष्टस्य शिवस्याभिन्ननिमित्तोपादानत्वम्, प्रपञ्चस्य सत्यत्वम्, प्रपञ्चचित्रस्य शिवस्य भित्तिरूपत्वमित्यादिविषया विचारसाम्यमावहन्ति। जगज्जन्मादिकारणत्वं वीरशैवैस्तटस्थलक्षणमुच्यते, काश्मीरशैवैस्तु तत्स्वरूपलक्षणमित्युच्यत इत्ययं विशेषः।

सिद्धान्तशैवानां सत्कार्यवादः

सिद्धान्तशैवाः सृष्टिव्यवस्थायां सत्कार्यवादमभ्युपगच्छन्ति। असत उत्पत्त्यसम्भवाल्लोके यथा सदेव दधि क्षीरादभिव्यज्यते, सदेव तक्रं दध्नोऽभिव्यज्यते; तथा महाप्रलये कलादिकार्याणि सूक्ष्मरूपेण मायायामवस्थितान्येव सर्गादावभिव्यक्तानि भवन्तीति तेषामाशयः। "एष च सत्कार्यवादोऽस्माभिः मृगेन्द्रवृत्तिदीपिकायां विस्तरेण साधितः"[2] इत्यघोरशिवाचार्यैः प्रतिपादितत्वाद् विस्तरस्तत्रैवावलोकनीयो जिज्ञासुभिः। सत्कार्यवाददृष्ट्या कलाद्यवस्थाभेदेनोत्पत्तिविनाशव्यपदेशं भजन्तो मायैव कलादिकार्यद्वारेण परिणमत इत्ययं सत्कार्यवादः परिणामवाद इत्यप्युच्यते। क्षीरस्य दधिभाववत् पूर्वावस्थां विहायावस्था-

---

१. सि. शि. १।१

२. त. सं. टी., श्लो. २६

न्तरप्राप्तिरेवात्र परिणामशब्दार्थः[1]। अत्रोच्यमाने मायापरिणामस्तु न क्षीरवत् सर्वात्मना, किन्तु घृतकीटन्यायेनैकदेशेनैवेति वेद्यम्। तदुक्तमघोरशिवाचार्येण— "यद्येवं क्षीरवत् सर्वात्मना परिणामादनित्यत्वं मायायाः, तन्न, सर्वथा दृष्टान्तासंभवात्, परिणामित्वमात्र एवास्य दृष्टान्तत्वम्। ततश्च घृतकीटन्यायेनैकदेशेनैव माया परिणमत इत्यदोषः"[2] इति।

एवं सत्कार्यवादिभिरेभिर्वीरशैवकाश्मीरशैवाभ्युपगतोऽभिन्ननिमित्तोपादानकारणवादोऽनभ्युपगतः। तैः कथ्यते यद् ईश्वरस्योपादानत्वे तस्य परिणामित्वमचिद्रूपत्वं च प्रसज्येत, तदुपादेयस्य सर्वस्य प्रपञ्चस्यापि चिद्रूपतापत्तिश्च। अत एव तत्समवायिशक्तेरपि नोपादानत्वम्। चिद्विवर्ताङ्गीकारे जगदसत्यतापत्तिः। न चेष्टापत्तिः, सर्वप्रमाणसिद्धस्य जगतोऽपह्नोतुमशक्यत्वादिति[3]। तस्माल्लोके यथा घटकार्यं प्रति दण्डचक्रादिकं च सहकारिकारणम्, तथा प्रपञ्चकार्यं प्रति कारणत्रयमावश्यकमिति वदद्भिस्तैरीश्वरो निमित्तकारणम्, बिन्दुर्माया[4] वोपादानकारणम्, सृज्यप्राणिनामदृष्टं च सहकारिकारणमित्युच्यते। तदुक्तं पौष्करे—

---

१. परिणामो हि वस्तूनां पूर्वावस्थापरिच्युतेः।
अवस्थान्तरसम्प्राप्तिः क्षीरस्य दधिभाववत्॥

दध्नश्च तक्रवत् तत्र तक्रावस्था निरूप्यते।
न दध्नो नापि दुग्धस्य पूर्वावस्थे हि ते मते॥

सदवस्थं हि वस्त्वेकं पूर्वं क्षीरं ततो दधि।
पश्चात् तक्रं तथा माया विचित्रपरिणामतः।
तत्त्वतात्त्विकभावानामुपादानमनश्वरम् ॥ (र. त्र., श्लो. ३५-३८)

२. र. त्र. टी., श्लो. ३८

३. नास्ति शक्तिरुपादानं चिद्रूपत्वाद् यथा शिवः।
परिणामोऽचितः प्रोक्तश्चेतनस्य न युज्यते॥

चितो विवर्त एवोक्तस्तथात्वे कार्यशून्यता।
सर्वप्रमाणसंसिद्धं चिद्विवर्तः कथं जगत्॥

४. "शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः" (वि. ३।२७) इति किरणागमवचनमनुसृत्य भगवान् शिवो बिन्दुमुपादाय शुद्धसृष्टिमातनुते, अनन्तश्च मायामुपादायाऽशुद्धसृष्टिम्। (लु. स., भा. २, उपो. पृ. १२९-१३०)

निमित्तमीश्वरस्तेषामुपादानं च बिन्दुराट्।
नृकर्म सहकारि स्यात् कार्यमेतत् त्रिहेतुकम्[१] ॥ इति।

सिद्धान्तेऽस्मिन् निमित्तकारणभूतस्येश्वरस्य "करणं च न शक्त्यन्यच्छक्तिर्नाचेतना चितः"[२] इत्यागमोक्त्यनुसारेण शक्तिरेव करणमित्यभ्युपगम्यते। न चेन्द्रियादिकरणाभावे कर्तृत्वासिद्धिरिति वाच्यम्, अक्षहीनस्याप्ययस्कान्तस्य लोहाकर्षणकर्तृत्ववत् तदुपपत्तेः। तदुक्तं किरणागमे—"शल्याकृष्टिकरो दृष्टो ह्यक्षहीनोऽपि कर्षकः"[३] इति। तस्मात् शिवस्य योगिन इव सर्वासु क्रियासु इच्छैव करणम्। तत्र तावत् तत्त्वप्रकाशे—"सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनु"[४] इति तस्य सद्योजातादिमन्त्रशरीरत्वमुक्तम्। वस्तुतस्त्वीश्वरोऽशरीर एव। अत्रापीशानाद्याः पञ्चशक्तयः शरीरवत् पञ्चकृत्योपयोगिन्यो भवन्तीत्यौपचारिकोऽयं व्यवहारः। तदुक्तमघोरशिवाचार्यैः—अतः पञ्चमन्त्रात्मिकाः पञ्चकृत्योपयोगिन्य ईशानाद्याः शक्तय एव शरीरकार्यं कुर्वाणास्तनुरित्युपचारादुच्यन्ते"[५] इति।

उक्तं च माधवाचार्यैरपि—"परमेश्वरस्य हि मलकर्मादिपाशजालासंभवेन प्राकृतं शरीरं न भवति, किन्तु शाक्तम्। शक्तिरूपैरीशानादिभिः पञ्चभिर्मन्त्रैर्मस्तकादिकल्पनायामीशानमस्तकस्तत्पुरुषवक्त्रोऽघोरहृदयो वामदेवगुह्यः सद्योजातपाद ईश्वर इति प्रसिद्ध्या यथाक्रममनुग्रहतिरोभावादानलक्षणस्थितिलक्षणोद्भवलक्षणकृत्यपञ्चककारणं स्वेच्छानिर्मितं तच्छरीरं न चास्मच्छरीरसदृशम्"[६] इति।

यत्र पुनः पञ्चवक्त्रस्त्रिपञ्चदृगित्यादिना तस्य मुख्यतया शरीरेन्द्रियादियोगः श्रूयते, स ध्यानपूजाद्यर्थमिति विज्ञेयम्। तदुक्तमघोरशिवाचार्यैः—"ध्यानार्थमेवेश्वरस्य पञ्चवक्त्राद्याकारः श्रूयते, निराकारे ध्यानपूजाद्ययोगात्"[७]

---

१. लु. स., भा. २, उपो० पृ० १२९-१३०
२. मृ. वि. ३।४
३. लु. स., भा. २, उपो० पृ० १२६
४. त. प्र., श्लो. ६
५. त. प्र. वृ., श्लो. ६
६. स. द. सं., पृ. १७८-१७९
७. त. प्र. वृ., श्लो. ६

इति। अस्यायं भावः—उपासना हि सेवाविशेषः। सेवा च कायिक-वाचिक-मानसिकभेदेन त्रिविधा। बुद्धिर्निराकारं वस्तु नोपैति। बुद्ध्या वस्तुनो विषयीकरणं च वस्त्वाकारसदृशाकारग्रहणम्। तथा च निराकारस्य ध्यानादिरूपा मानसिकी सेवा न संभवति। बुद्ध्या विषयीकरणाभावादेव च तत्स्तोत्रपठनादिरूपा वाचिक्यपि सेवा न सम्भवति। कायिकी पाद्यार्घ्यादिरूपा सेवा च निराकारस्य न सम्भवतीति स्पष्टमेव।

तदेतदवलोकनेन ज्ञायते यत् शिवः पञ्चमन्त्रतनुः सन् जगज्जन्म-स्थिति-ध्वंस-तिरोभाव-विमुक्त्याख्यं पञ्चकृत्यं निर्वहति, दिव्यसाकारदेहेनोपास्यः सन् भक्ताननुगृह्णाति चेति। एतादृशोऽयं शिवः पञ्चकृत्येषु निमित्तकारणम्, बिन्दुरूपा शक्तिरुपादानकारणम्, सृज्यप्राणिनां कर्म च सहकारिकारणं भवति।

अत्रेदं विज्ञेयम्—सिद्धान्तशैवदर्शने शिवस्य शक्तिद्वयमङ्गीकृतम्। तत्रैका समवायिनी, द्वितीया च परिग्रहरूपा। शक्तितत्त्वमेव तदीया समवायिनी चिच्छक्तिः। इयं च परशिवे नित्यसमवेता स्वरूपशक्तिरेव। इयं शिववद् निर्विकारा भवति। द्वितीया परिग्रहरूपा शक्तिरचेतना परिणामशालिनी च। सैव बिन्दुरित्युच्यते। बिन्दोरपि शुद्धाशुद्धभेदेन द्वैविध्यमत्राङ्गीकृतम्। तत्र शुद्धबिन्दुर्महामायेति, अशुद्धबिन्दुश्च मायेत्युच्यते। तत्र महामाया शुद्धाध्वनामुपादानम्[1], माया चाशुद्धाध्वनामुपादानमिति। अयस्कान्तशक्त्याऽयसि क्रियोत्पत्तिवत् चिच्छक्तिविशिष्टस्य शिवस्य सान्निध्येन बिन्दौ क्रियावेशो भवतीत्यघोरशिवाचार्यो निरूपयति[2]। चिच्छक्तियुक्तः शिवो मायाख्यं बिन्दुं विक्षोभ्य सृष्टिं विधास्यतीति सद्योज्योतिःशिवाचार्येणापि प्रतिपादितम्। तथाहि—

निर्मुक्तातिशयैश्वर्यो मायां विक्षोभ्य शक्तिभिः।
भोगिनां भुक्तये विश्वं विचित्रं कुरुते शिवः॥[3] इति।

श्रीकण्ठसूरिणाप्युक्तोऽयं विषयः। तथाहि—

बिन्दुः प्रलीनकार्योऽसौ शिवशक्तिसमीरितः॥

---

१. जायतेऽध्वा यतः शुद्धो वर्तते यत्र लीयते।
स बिन्दुः परनादाख्यः नादबिन्द्वर्णकारणम्॥ (र. त्र., श्लो. २२)

२. "ततश्चायमस्कान्तशक्तेरिवायसि शिवशक्तेः सन्निधिमात्रेण बिन्दावेव क्रियावेशः"।
(र. त्र. टी., श्लो. २२)

३. मो. का., श्लो. २

सर्गाय स्थितये सृष्टप्रपञ्चविलयाय च।
चिरस्थापितविश्वो हि बिन्दुरेव प्रवर्तते ॥'[1] इति।

एवं जगदुत्पत्त्यादौ शिवो निमित्तभूतो बिन्दुश्चोपादानभूत इति निश्चप्रचम्।

अविकृतपरिणामवाद-सत्कार्यवादयोर्विमर्शः

अविकृतपरिणामवादिनो वीरशैवाः प्रपञ्चोत्पत्तौ घृतकाठिन्यन्यायम्, सत्कार्यवादिनः सिद्धान्तशैवाश्च घृतकीटन्यायमुपस्थापितवन्तः। एतेनोभयोर्वादयोर्वैलक्षण्यं स्पष्टमेव प्रतिभाति। घृतकाठिन्यं नामापरिमितस्य द्रवीभूतस्य घृतस्यैकदेशे घनीभावरूपावस्थान्तरप्राप्तिः। घृतकीटन्यायं नामापरिमितस्य घृतस्यैकदेशे कीटरूपेण विजातीयपरिणामः। तदेतेन वीरशैवसिद्धान्ते सृष्टिर्नाम शक्तिविशिष्टस्य परशिवस्य विकारमन्तरेणावस्थान्तरप्राप्तिरिति, सिद्धान्तशैवदर्शने च बिन्द्वाख्यशक्तेरेकदेशे विजातीयपरिणाम इति विज्ञायते।

प्रपञ्चोत्पत्तौ सृज्यप्राणिनामदृष्टं सहकारिकारणत्वेन सिद्धान्तशैवैर्यथाऽभ्युपगम्यते, तथा वीरशैवैरप्यभ्युपगतत्वादत्र[2] विषये उभयोः साम्यं प्रतीयते। एवं सृष्टिव्यवस्थार्थमङ्गीकृतेष्वविकृतपरिणामवाद-आभासवाद-सत्कार्यवादेषु सर्वत्र प्रपञ्चस्य सत्यत्वमेवाङ्गीक्रियते।

सृष्टेर्लीलारूपत्वविमर्शः

सृष्टिरचनायामीश्वरस्य प्रयोजनसत्त्वे तस्य नित्यतृप्तत्वहानिः, प्रयोजनाभावे च मूढप्रवृत्तिप्रसङ्गः स्यादित्याक्षेपस्य परिहारः शक्तिविशिष्टाद्वैतवेदान्ते लीलावादेन परिह्रियते। अत्र परशिवस्य लीलावस्था, कैवल्यावस्था चेत्यवस्थाद्वयमङ्गीक्रियते। तत्र सर्वव्यापारशून्या कैवल्यावस्था, सृष्ट्यादिपञ्चकृत्यकर्तृत्वं लीलावस्था। तदुक्तं भाष्यकारैः श्रीपतिपण्डिताराध्यैः—"शिवस्य परब्रह्मणः कदाचिल्लीलाविलासः, कदाचित्कैवल्यं स्वयमेवावस्थानं च निर्णीयते। यथा लोके सर्वैश्वर्यधैर्यवीर्यपराक्रमधुर्यस्य सप्तद्वीपपरिवृतसर्वमण्डलाधीश्वरस्य महाराजस्य कदाचिद्विलासेन कार्यारम्भकत्वं कदाचित्तूष्णीमवस्थानं च दृश्यते। किञ्च, सर्वेषां चेतनानां यथा स्वाभाविकत्वेन प्राणापानादिवायुसञ्चारः, तथा

१. र. त्र., श्लो. ३०७-३०८

२. चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम् ॥ (सि. शि. ५।४५)

परमानन्दकन्दस्य परमशिवस्य स्वभावेन जगज्जन्मादिकार्यानुसरणं वा स्यात्। सम्प्राप्तसर्वकामस्य परमानन्दस्वभावस्य शिवस्य स्वलीलया जगज्जन्मादिकार्यारम्भव्यापारवत्त्वम्, प्रलयादूर्ध्वं पुनः सृष्टिपर्यन्तं स्वयमेवावस्थानं च"[1] इति।

अल्पायाससाध्या विधेयनिष्पत्तिमात्रफला कर्तुरुद्देश्यस्याऽपाधिका हि क्रिया लीलापदार्थः। प्रकृते च पञ्चकृत्यानां परशिवस्येच्छामात्रेण सम्भवात् तेष्वल्पायाससाध्यत्वम्, तत्सम्पादने च परशिवस्य किमपि प्रयोजनं न सिद्ध्यतीति तेषु विधेयनिष्पत्तिमात्रफलकत्वं कर्तुरुद्देश्यस्याभावश्च वर्तत इति तेषां लीलावाचकत्वं सम्भवत्येव। तत्रभवान् शिवयोगिशिवाचार्यः—

स्वेच्छाविग्रहयुक्ताय स्वेच्छावर्तनवर्तिने।
स्वेच्छाकृतत्रिलोकाय नमः साम्बाय शम्भवे॥[2]

इत्यत्रेच्छामात्रेण जगत्कर्तृत्वं प्रतिपाद्य तस्याल्पायाससाध्यत्वम्, अत एव लीलारूपत्वं च सूचितवान्। अत्रेदमाकूतम्—लीलाभिन्ना याः प्रवृत्तयस्तदर्थमेव प्रयोजनविशेषप्रतिसन्धानस्यावश्यकता, याश्च पुनर्लीलारूपास्ताः प्रयोजनं नापेक्षन्त एव। यथा लोके आप्तकामस्य कस्यचिद् राज्ञः, तदमात्यादेर्वा क्रीडादिषु प्रवृत्तिः प्रयोजनमनुद्दिश्यैव भवति, तद्वदीश्वरस्यापि।

ननु महतीयं विश्वरचना कथं लीलेत्युच्यते? इति चेत्, सत्यम्, अल्पज्ञानामल्पशक्तियुक्तानामस्माकं कृते विश्वरचना महतीव प्रतिभाति। अथापि सर्वज्ञस्य सर्वशक्तिसमन्वितस्येश्वरस्य कृते तु लीलैव केवलम्। यद्यपि लौकिकलीलासु यत्किञ्चिदपि प्रयोजनमुत्प्रेक्षितुं शक्यते, अथापि नेश्वरलीलायाम्, "आप्तकामस्य का स्पृहा"[3] इति तस्य नित्यतृप्तत्वप्रतिपादनात्। न चैवं सत्यप्रवृत्तिः, "यतो वा इमानि भूतानि जायन्ते"[4] इत्यादिश्रुत्या विश्वरचनायामीश्वरप्रवृत्तिश्रवणात्। नाप्युन्मत्तप्रवृत्तिः, "यः सर्वज्ञः सर्ववित्"[5] इत्यादिना तस्य सर्वज्ञत्वप्रतिपादनात्। अत एव विश्वरचना लीलामात्रमित्येव प्रस्फुटम्। भगवान्

---

१. ब्र. सू. श्री. २।१।३३
२. सि. शि. १।६
३. मा. का. आगम. ९
४. तैत्ति. उ. ३।१
५. मुण्ड. १।१।९

बादरायणोऽपि "लोकवत्तु लीलाकैवल्यम्"[१] इति विश्वरचनाया लीलारूपत्वमेव समर्थितवान्।

काश्मीरशैवदर्शनेऽपि लीलावादोऽभ्युपगतः। परमानन्दघनस्य परशिवस्य स्वकीयं प्रयोजनं तैरपि न स्वीकृतम्। विश्वरचनायां स्वीयप्रयोजनाभावेऽपि नूनमानन्दातिरेकाख्यया परमस्वातन्त्र्यरूपया स्वेच्छाशक्त्या सदा पञ्चकृत्याख्यां लीलां कुर्वन्नेव परशिवस्तिष्ठतीति सोऽत्र सिद्धान्ते नर्तक[२] इत्युक्तः। अस्य नृत्यरूपा लीला कदापि न समाप्यते। लीलावादिभिरेभिः परशिवस्य कैवल्यावस्था नाभ्युपगता, वीरशैवैस्तु साऽभ्युपगतेत्युभयोर्वैलक्षण्यम्।

सिद्धान्तशैवदर्शनेऽपि सृष्टिरचना शिवस्य लीलैव। अस्यां लीलायां शिवस्य स्वप्रयोजनाऽभावेऽपि पश्वनुग्रहोऽत्र प्रयोजनत्वेन निरूपितः। अनुग्रह-शब्देनात्र भोगमोक्षावभिप्रेतौ। सुखदुःखानुभवो भोगः, निरतिशयानन्दश्च मोक्षः। शिवो भोगमोक्षप्रदानेन पशूननुगृह्णाति। तदुक्तं भोजदेवेन—

भुक्तिं मुक्तिमणूनां स्वव्यापारे समर्थताधानम्।
जडवर्गस्य विधत्ते सर्वानुग्राहकः शम्भुः॥[३] इति।

ननु मोक्षप्रदानस्यानुग्राहकत्वसम्भवेऽपि सांसारिकसुखदुःखानुभवस्य कथमनुग्राहकत्वमिति शङ्कां निवार्य श्रीकुमारदेवस्तयोरप्यनुग्रहत्वं तत्प्रदातुश्चानुग्राहकत्वं समर्थयामास। तथाहि—"ननु सुखदुःखानुभवप्रदानस्य कथमनुग्रहरूपत्वम्, नित्यनिरतिशयानन्दे विद्यमाने विषदूषितमध्वन्नकल्पसुखलेशप्रदानस्यानुग्रहरूपत्वासम्भवात्। दुःखानुभवप्रदानस्याननुग्रहरूपत्वं सर्वेषां सम्मतमेवेति चेत्? उच्यते, सुखानुभवस्य तथाभूतस्यापि नित्यसुखरागोत्पादद्वारेणापवर्गहेतुतयाऽनुग्रहरूपत्वम्, दुःखानुभवस्यापि संसारवैराग्योद्वेगजननद्वारेणापवर्गहेतुतयाऽनुग्रहरूपत्वमिति तत्प्रदातुरनुग्राहकत्वम्"[४] इति।

भोगमोक्षयोः शिवानुग्रहत्वविमर्शः

ननु भुक्तिमुक्त्योरनुग्रहयोर्मुख्यतमं निःश्रेयसमेव। तदेवासौ विदध्याद् नामुख्यं भोगात्मकमिति जिज्ञासायामुक्तं तेनैव श्रीकुमारदेवेन—"सत्यं संसार-

---

१. ब्र. सू. २।१।३३
२. "नर्तक आत्मा" (शि. सू. ३।९)।
३. त. प्र., श्लो. ३५
४. त. प्र. ता., श्लो. ३५

निवृत्त्यात्मकापवर्गप्रदानमेव मुख्यानुग्रहो न भोगप्रदानम्, तथापि जात्यायुर्भोगफलानां कर्मणामनादिभूतानां फलभोगं विना नाशासंभवात् तन्नाशं विना निःश्रेयसानुपपत्तेस्तदर्थमेव भोगप्रदानमाश्रयणीयम्''[१] इति।

तस्मादनादिमलरहितः, अत एव रागद्वेषविवर्जितः शिव आत्मनां योग्यतानुसारं बन्धमोक्षौ वितरति। "लोके यथैकाकार एवार्कः स्वसन्निधानेन द्रवत्वयोग्यस्य मधूच्छिष्टस्य द्रवतां शोषत्वयोग्यायाश्च मृदः शुष्कतां करोति, तथा शिवोऽपि पक्वमलानां मोक्षयोग्यानां मोक्षं करोति, अपक्वमलानां बन्धयोग्यानां तत्पाकार्थं बन्धं करोतीत्यविरोधः''[२] इत्यघोरशिवाचार्याः श्रीकण्ठोक्तिं[3] विवृत्य भोगमोक्षयोरुभयोरप्यनुग्रहशब्दवाच्यत्वं समर्थितवन्तः।

लीलावादेन साकमभ्युपगतः सिद्धान्तशैवीयोऽयमनुग्रहवादो वीरशैवानामप्यभिमत एव। अत एव श्रीरेणुकाचार्याः—

जात्यायुर्भोगवैषम्यकारणं कर्म केवलम्॥

देहिनां प्रेरकः शम्भुर्हितमार्गोपदेशकः।
पुनरावृत्तिरहितो मोक्षमार्गोपदेशकः[४]॥

शम्भोरेव प्रसादेन संसारच्छेदकारिणा।
मोहग्रन्थिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः[५]॥

इति प्राणिनां भोगवैषम्ये कर्मणां कारणत्वमुक्त्वा शिवानुग्रहेण तेषां मुक्तिं प्रतिपाद्यानुग्रहवादं सूचितवन्तः। तदेतद्विषये वीरशैवसिद्धान्तशैवयोर्मतैक्यं प्रतिभाति।

---

१. त. प्र. ता., श्लो. ३६

२. र. त्र. टी., श्लो. ३१३-३१४

३. यथा मधूच्छिष्टमृदोरनपेक्षः क्षणेन च।
द्रवताशुष्कताहेतुरविकारोऽपि भास्करः॥
तथा समासमात्मीयपुण्यापुण्याख्यकर्मणाम्।
अणूनामविकारोऽपि बन्धमोक्षकरः शिवः॥ (र. त्र., श्लो. ३१३-३१४)

४. सि. शि. ५।४५,४७

५. सि. शि. १८।५९

वैषम्यनैर्घृण्यदोषपरिहारविमर्शः

सृष्टेः शिवकर्तृत्वे जगद्वैचित्र्येण शिवस्य वैषम्यनैर्घृण्यदोषापत्तिः स्यादित्याक्षेपस्य परिहारो वीरशैवसिद्धान्ते सृज्यप्राणिकर्मसापेक्षेण परिहार्यते। तदुक्तं श्रीरेणुकाचार्यैः—"जात्यायुर्भोगवैषम्यकारणं कर्म केवलम्"[1] इति। अत्रायं भावः—"पुण्यः पुण्येन कर्मणा भवति पापः पापेन"[2] इति श्रुतौ सृष्टिवैषम्यस्यासाधारणानि कारणानि सृज्यमानजीवकर्माणीति व्यवस्थापितम्। तस्माद् यथा वीजनपेषणादियन्त्रगताया विद्युतस्तत्तत्कर्मणि प्रेरकत्वेन सहायिकाया अपि वीजनादिकार्यवैचित्र्ये तत्तद्यन्त्राण्येवासाधारणकारणानि भवन्ति, तथा सृष्ट्युत्पत्तावीश्वरस्य साधारणकारणत्वेऽपि सृष्टिवैचित्र्ये तत्तत्प्राणिनामदृष्टान्येवासाधारणकारणानीति मन्तव्यम्। तस्मात् सृष्टिवैषम्ये न शिवस्य पक्षपातः, तस्यानादिमलसंश्लेषरहितत्वात्, रागद्वेषशून्यत्वाच्च।

शिवस्य परमस्वातन्त्र्यमभ्युपगच्छन्तः काश्मीरशैवाः सृष्टिवैचित्र्ये कारणान्तरापेक्षत्वे तस्य स्वातन्त्र्यस्य पूर्णतायाश्च हानिः स्यादिति वदन्तः—

एष देवोऽनया देव्या नित्यं क्रीडारसोत्सुकः।
विचित्रान् सृष्टिसंहारान् विधत्ते युगपद् विभुः[3] ॥

इति तत्स्वातन्त्र्यवादेन वैषम्यनैर्घृण्यदोषपरिहारं कुर्वन्ति। सर्वमपि परशिवस्वरूपमिति प्रतिपादयतां तेषां मतेन वैषम्यनैर्घृण्यदोषप्रसक्तिरेव नास्तीति प्रतिभाति।

सिद्धान्तशैवैः सृष्ट्युत्पत्तौ सृज्यप्राणिनां कर्माणि सहकारिकारणानीत्यङ्गीक्रियते। अतस्तान्येव सृष्टिवैचित्र्येऽसाधारणानि कारणानीति न शिवो वैषम्यनैर्घृण्यदोषभाग् भवति। विचारेऽस्मिन् वीरशैवसिद्धान्तशैवयोर्मतैक्यमेव। सरणिरियमन्यैरप्यनुमता[4]।

तदेवं जगत्स्वरूपनिरूपणानन्तरमथ जीवस्वरूपं प्रस्तूयते।

---

१. सि. शि. ५।४५

२. बृ. उ. ४।४।५

३. बो. प., श्लो. ६.

४. "न च स्वातन्त्र्यभङ्गः शङ्कनीयः, स्वाङ्गं स्वव्याघातकं न भवतीति न्यायेन प्रत्युत तन्निर्वाहात्" (स. द. सं., पृ. ५१०) इति नैयायिक-वैशेषिकाः, "पुण्यापुण्यसहायः सुखदुःखे भावयन्नपि नाकारुणिकः" (यो. सू. तत्त्ववै. १।२५)

जीवस्वरूपविमर्शः

दार्शनिकप्रपञ्चे जीवात्मनो हि प्रामुख्यम् । अस्यैव बन्धमोक्षादिव्यवस्थार्थं सर्वाणि शास्त्राणि प्रवृत्तानि। तदत्र क्रमशो वीरशैव-काश्मीरशैव-सिद्धान्त-शैवरीत्या जीवात्मस्वरूपं निरूप्यते, विमृश्यते च ।

वीरशैवदर्शने जीवात्मनो लक्षणम्

पूज्यपादाः श्रीरेणुकाचार्याः—

नेन्द्रियाणां न देहस्य न बुद्धेरात्मता भवेत् ।
अहं प्रत्ययवेद्यत्वादनुभूतस्मृतेरपि ॥
शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तः सनातनः ।[1]

इत्यत्र शरीरादिबुद्धिपर्यन्तानां चार्वाकादिभिरात्मत्वेनाङ्गीकृतानामनात्मनां निरसनपूर्वकं तद्व्यतिरिक्तस्यात्मनः स्वरूपं सामान्यतो निरूप्य, तदसाधारणस्वरूपजिज्ञासायाम्—

एक एव शिवः साक्षाच्चिदानन्दमयो विभुः ।
निर्विकल्पो निराकारो निर्गुणो निष्प्रपञ्चकः ॥
अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः ।[2]

इति तल्लक्षणमुक्तवन्तः । अस्यायं भावः—अकुण्ठितेच्छाद्यनेककल्याणगुणगणपूर्णः परशिव एव स्वविमर्शशक्त्यंशभूतानाद्यविद्यासम्बन्धात् 'जीव' इत्यभिधानवान् भवति। तस्मात् परशिवस्यांश एव जीव इति विज्ञायते। अंशत्वं नाम अनाविष्कृताखिलशक्तिमत्त्वम् । अत एवायं जीवः सर्वकर्तृत्व-

---

इति वाचस्पतिमिश्रमहाभागाः, "अतः सृज्यमानप्राणिधर्माधर्मापेक्षा विषमा सृष्टिरिति नायमीश्वरस्यापराधः । ईश्वरस्तु पर्जन्यवद् द्रष्टव्यः" (ब्र. सू. शा. भा. २।१।३४) इति भगवत्पादशङ्कराचार्याः, "न च कर्मापेक्षायामीश्वरस्य ऐश्वर्यव्याघातः । नहि सेवादिकर्मभेदापेक्षः फलप्रदः प्रभुरप्रभुर्भवति" (ब्र. सू. भामती. २।१।३४) इति वाचस्पतिमिश्रमहाभागाः कर्मसापेक्षेण वैषम्य-नैर्घृण्य-दोषं परिहृतवन्तः । एतद्विषये सर्वैरेभिर्दार्शनिकैः साकं वीरशैवदर्शनस्य विचारसाम्यं दृष्टिपथमायाति ।

१. सि. शि. ५।५२-५३
२. सि. शि. ५।३२-३३

सर्वज्ञत्व-परिपूर्णत्व-नित्यत्व-व्यापकत्वरूपपरशिवशक्तिस्वरूपसङ्कोचकैः कला-अविद्या-राग-काल-नियतिरूपपञ्चकञ्चुकैरावृतः किञ्चित्कर्तृत्व-किचिज्ज्ञत्व-अपूर्णत्व-अनित्यत्व-अव्यापकत्वधर्मकः सन् संसारे परिभ्रमति। तदुक्तं तैरेव—

किञ्चित्कर्ता च किञ्चिज्ज्ञो बद्धोऽनादिशरीरवान्।
अविद्यामोहिता जीवा ब्रह्मैक्यज्ञानवर्जिताः॥
परिभ्रमन्ति संसारे निजकर्मानुसारतः।
देवतिर्यङ्मनुष्यादिनानायोनिविभेदतः ॥[१] इति।

अत एवात्र दर्शने जीवस्यांशत्वापादकेऽज्ञाने नञो न ज्ञानविरोधिभावरूपाज्ञानमित्यर्थः, किन्तु 'ईषज्ज्ञानमज्ञानम्', सङ्कुचितज्ञानमित्यर्थः। तस्मादत्र न प्रतिषेधार्थको नञ्। अपि तु पर्युदासार्थकः। मुक्तौ तु ज्ञानादेः सङ्कोचकारणीभूतानामाणवादिमलत्रयाणां निवृत्तौ सत्यां तस्य ज्ञानादिशक्तीनां पुनर्विकासो भवति। तदुक्तमाचार्यैः—

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्।
निरस्यते गुरोर्बोधाद् ज्ञानशक्तिः प्रकाशते॥[२] इति।

तस्मादत्र ज्ञानादिशक्तीनां सङ्कोचविकासेन जीवात्मनो बन्धमोक्षौ व्यवस्थाप्येते। अत एव वृत्तिकारैः शङ्करशास्त्रिमहाभागैः—"अस्मन्मते शिवजीवयोर्भेदस्य मिथ्याज्ञानकृतत्वाभावात् शिवशक्तिस्वातन्त्र्यपरिकल्पितसङ्कोचकृतत्वात् तयोरभेदस्य विकसितस्वशक्तिदशायामुपपन्नत्वात् कूर्माङ्गभङ्गि-अहिकुण्डल-स्वर्णकुण्डलन्यायादिभिः स्वरूपस्यैव स्वेच्छया सङ्कोचः, स्वरूपस्यैवाविर्भावः"[३] इति सङ्कुचितशक्तिकस्य शिवस्यैव जीवत्वमिति, पुनः शक्तिविकासे च शिवत्वमिति समर्थितम्।

श्रीमता नीलकण्ठशिवाचार्येणापि—"तत्र स्थूलचिदचिद्रूपशक्तिविशिष्टत्वं जीवात्मनो लक्षणम्। परमात्मन्यतिव्याप्तिवारणाय स्थूलेति शक्तेर्विशेषणम्। स्थूलत्वं च मलत्रयविशिष्टत्वम्। अतस्तस्य शुद्धाशुद्धतत्त्वान्तर्भूतत्वम्। वैशिष्ट्यं चापृथग्भावसम्बन्धेन। एतन्मलत्रयशक्तिविशिष्टो जीवः संसारीति निगद्यते।

१. सि. शि. ५।४३–४४
२. सि. शि. १८।१७
३. ब्र. सू. शा. वृ. १।३।१९

ज्ञानादीनां जीवधर्माणां पृथग्लक्षणत्वकथनं तु नोपयुज्यते। चिच्छक्तेर्ज्ञानशक्तिस्वरूपत्वमचिच्छक्तेश्च क्रियाशक्तिस्वरूपत्वमित्यवगमाद् ज्ञानादीनामपि शक्तिस्वरूपत्वे बाधकाभावात्। अस्मि, प्रकाशे, नन्दामीति सच्चिदानन्दधर्माणामपि तदन्तर्भूतत्वमव्याहतमेव। वह्नितद्गतविस्फुलिङ्गवद् जीवशिवयोरंशांशिभावविलक्षणेन सच्चिदानन्दस्वरूपस्य परशिवस्य सूक्ष्मावस्थां प्रपन्ना ये ये धर्मास्ते सर्वे शिवांशीभूतजीवात्मनि स्थूलावस्थां प्रपन्नास्तन्निष्ठशक्तिस्वरूपत्वेन प्रकाशन्त इति सर्वमवदातम्। तच्चेदं लक्षणं जीवस्य स्वरूपलक्षणमित्युच्यते। तटस्थलक्षणं तु सुखदुःखादिमत्त्वम्, अयं सुखी, अयं दुःखीति व्यवहारदर्शनात्। सुखदुःखादीनां 'शाखाग्रे चन्द्रः' इत्यादितटस्थलक्षणवत् ताटस्थ्येन जीवलक्षणत्वम्। सुखदुःखादयो हि जीवस्य तत्तत्सामग्रीसमवधानदशायां तत्तच्छरीरादिसम्बन्धेन पर्यवस्यन्ति, सुखदुःखादिनिष्ठोपभोग्यतानिरूपितोपभोक्तृत्वस्य तत्तत्सामग्रीसमवधानदशायां शरीरादिसम्बन्धेन जीव एव पर्यवसानात्। अतः सुखदुःखादिविषयेषु भोज्यत्वं जीवस्य भोक्तृत्वं च सार्वजनीनम्"[1] इति विस्तरेण जीवात्मनः स्वरूपतटस्थलक्षणप्रतिपादनमुखेन सङ्कुचितशक्तिविशिष्टत्वमेव जीवत्वमिति समर्थितम्। "चितिसङ्कोचचित्तविशिष्टो जीवः"[2] इति श्रीमता मरितोण्टदार्येणापि पूर्वोक्तमेव जीवलक्षणमनुमोदितम्। एवं सङ्कुचितशक्तित्वादेवायं शिवस्यांश इत्युच्यते। तस्यांशत्वे—"यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्ति[3]॥", "अंशो नानाव्यपदेशात्"[4], "ममैवांशो जीवलोके जीवभूतः सनातनः"[5] इत्यादिश्रुतिसूत्रस्मृतयोऽपि प्रमाणानीत्यवगन्तव्यम्।

एवं शिवांशत्वादेवायमत्र सिद्धान्ते 'अङ्गम्'[6] इत्युच्यते। "अङ्गपदस्य रूढिशक्त्या शरीरवाचित्वेऽपि "यस्य चात्मा शरीरम्", "यस्य चाव्यक्तं शरीरम्" इत्याद्यन्तर्यामिब्राह्मणेन पृथिव्यादिजीवात्मपर्यन्तस्य सकलस्य वस्तुजातस्य

---

१. शि. प., पृ. ५

२. सि. शि. १०।९, तत्त्व. पृ. १८९

३. मुण्ड. २।१।१

४. ब्र. सू. २।३।१५

५. भ. गी. १५।७

६. "अनाद्यन्तमजं लिङ्गं तत्परं परमं प्रति। यद्गच्छति महाभक्त्या तदङ्गमिति निश्चितम् ॥" (अ० सू० ४।२)।

ब्रह्मशरीरत्वबोधनाद् जीवात्मनोऽप्यङ्गपदवाच्यत्वे न काप्यनुपपत्तिः"[१] इति श्रीमता नीलकण्ठशिवाचार्येण जीवस्याङ्गपदवाच्यत्वं समर्थितम्। अत एव—

मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत्॥[२]

इति श्रुतिं प्रमाणयद्भिः श्रीपतिपण्डिताराध्यैरपि—"तस्मान्मायिनः परमशिवावयवलेशः पुरुषो जीवः" इति जीवस्य परशिवावयवत्वं निरूपितम्। तस्माज्जीवपरमात्मनोरवयवावयविरूपोऽयमंशांशिभावः।

ननु परशिवस्य निरवयवत्वात् कथं जीवपरमात्मनोरवयवावयविभावरूपोंऽशांशिभाव इति चेन्न, तस्याऽस्मदादेरिव प्राकृतावयवाभावेऽपि—

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।
अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य॥[३]

इत्यादिप्रमाणेन विलक्षणनित्याङ्गसद्भावेन दोषाभावात्।

जीवपरमात्मनोर्भोगसाङ्कर्यनिरासः

नन्वेवं जीवस्येश्वराङ्गत्वे स्वीकृते "भक्षितेऽपि लशुने न शान्तो व्याधिः" इत्याभाणकानुसारं यथा हस्ताद्यवयवगतव्रणादिजन्यदुःखेन देवदत्तस्य दुःखित्वं दृश्यते, तथा परशिवाङ्गस्य जीवस्य सुखित्वे दुःखित्वे च तदङ्गिनः परशिवस्य सुखित्वदुःखित्वप्रसङ्ग इति चेत्, मैवम्, दुःखमोहादीनामाणवादिमलकार्यत्वात्। शिवस्य चानादिमलसंश्लेषरहितत्वान्न तस्य दुःखभागित्वं सम्भवति। पूज्यपादैः श्रीरेणुकाचार्यैः—"एतेषां देहिनां साक्षी प्रेरकः परमेश्वरः"[४] इति तस्य प्रेरकत्वमुक्तम्, न तु तत्सुखदुःखभोक्तृत्वम्। ईश्वरस्याभोक्तृत्वं च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥[५]

---

१. शि. द., पृ. ४०, टिप्पणी १
२. श्वे. उ. ४।१०
३. वा. पु. १२।३१
४. सि. शि. ५।४६
५. मुण्ड. ३।१।१

इति श्रुत्यापि प्रतिपादितम् । अस्य विस्तरः श्रीकरभाष्ये[1] द्रष्टव्यः । तस्माज्जीवस्येश्वराङ्गत्वेऽपि जीवनिष्ठसुखदुःखैर्नेश्वरस्य भोगसम्भवः । श्रीविद्यारण्यस्वामिनोऽपि—

ईशकार्यं जीवभोग्यं जगद् द्वाभ्यां समन्वितम् ।
पितृजन्या भर्तृभोग्या यथा योषित् तथेष्यताम् ॥[2]

इतीशनिर्मितेऽस्मिन् प्रपञ्चे जीवस्यैव भोक्तृत्वमिति योषिद्दृष्टान्तेन निरूपितवन्तः । अत एव भाष्यकारैः श्रीपतिपण्डिताराध्यैः—"अनादिस्वाभाविकमायापाशबद्धघोरापारनिःसारसंसारव्यापारतापत्रयानलदन्दह्यमाननानाशरीर-प्रवेशनिर्गमनवर्णाश्रमाभिमानविशिष्टकामक्रोधाद्यनुस्यूतसुखदुःखाश्रयत्वं जीवत्वम्"[3] इति जीवात्मलक्षणनिरूपणमुखेन तस्यैव सुखदुःखभोक्तृत्वं व्यवस्थापितम् ।

जीवात्मनोऽणुरूपत्वम्

जीवात्मनः परिमाणविषयेऽणु-मध्यम-विभुभेदेन सन्ति वादा भारतीयदार्शनिकसमाजे । वीरशैवाचार्यास्त्वणुवादमभ्युपगच्छन्ति । उक्तं चाचार्यैः—

वालाग्रशतभागेन सदृशो हृदये स्थितः ।
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत् ॥[4] इति ।

जीवात्मनामणुत्वादेव तेषां नानात्वमपि सुचारु प्रतिभाति । तदेवं वीरशैवसिद्धान्ते जीवो नाम शरीरेन्द्रियादिभ्यो व्यतिरिक्तः, परशिवस्यांशः, अनादिमलावृतः, अणुरूपः, सङ्कुचितशक्तिकः, सुखदुःखभोक्ता चेति विज्ञेयम् ।

काश्मीरशैवदर्शने पशुलक्षणम्

काश्मीरशैवदर्शने जीवः पशुः, पुदगलः, अणुः, क्षेत्रवित्, भोक्ता चेत्यादिशब्दैर्व्यवह्रियते । तत्राणवादिमलत्रयरूपपाशबद्धत्वात् पशुरिति, "पुथा हिंसया परताबुद्ध्या क्लेशेन च गलतीति पुद्गलः"[5] इति व्युत्पत्त्या क्लेशादिभिः

---

१. ब्र. सू. श्री. २।३।२४

२. पञ्च. ४।१८

३. ब्र. सू. श्री. १।१।१, पृ० ४

४ सि. शि. १८।६

५. तन्त्रा. टी. ९।१४४, पृ. ११३

पीड्यमानत्वात् पुद्गल इति, परिपूर्णोऽप्याणवमलावृतत्वात् स्वपूर्णस्वरूपं विस्मृत्याणुत्वेनाभिमन्यत इत्यणुरिति, कर्मबीजप्ररोहावहं क्षेत्रं शरीरमेवात्मत्वेन जानातीति क्षेत्रविदिति, स्वकर्मफलभूतानां सुखदुःखादीनां भोक्तृत्वाद् भोक्तेति चोच्यते।

अत्र सिद्धान्ते परशिवव्यतिरिक्तं न किञ्चिदपि परमार्थरूपं पदार्थजातमभ्युपगम्यते। अतः स एव स्वस्वातन्त्र्यबलेन भोक्तृरूपेण भोग्यरूपेण च लीलाविनोदं[1] करोति। तदुक्तमभिनवगुप्ताचार्येण—

भोक्ता च तत्र देही शिव एव गृहीतपशुभावः ॥[2] इति,

अणवो नाम नैवान्यत् प्रकाशात्मा महेश्वरः।
चिदचिद्रूपताभासी पुद्गलः क्षेत्रवित् पशुः ॥[3] इति च।

एतल्लीलावसरे तत्स्वरूपे किञ्चिदपि विकृतिर्नायाति। तस्मादेतदेव परमेश्वरस्य निरतिशयं स्वातन्त्र्यम्। अत्र स्फटिकदृष्टान्तेन तत् समर्थितमभिनवगुप्ताचार्येण—

नानाविधवर्णानां रूपं धत्ते यथाऽमलः स्फटिकः।
सुरमानुषपशुपादपरूपत्वं तद्वद् ईशोऽपि ॥[4] इति।

अस्यायं भावः—यथा स्फटिकमणिर्लाक्षानीलाद्युपाधिवैचित्र्यसहस्रेण तत्तदाकारतया प्रतीयमानोऽपि न स्फटिकत्वं जहाति, तथा चिदानन्दैकघनः शिवः स्वच्छे स्वात्मदर्पणे देव-मनुष्य-पशु-पक्षि-स्थावरान्तानां रुद्रक्षेत्रज्ञादिपदार्थरूपाणां विशेषाणां स्वयं निर्मितानां च वर्णवैचित्र्यं स्फटिकमणिवत् स्वात्माभेदेन धारयन् ततोऽपि समुत्तीर्णत्वाद् अखण्डचमत्कारोपबृंहितं नानारूपमप्येकं स्वात्मानं 'अहम्' इति प्रत्यवमृशति। तस्मादत्र शिवस्यायं जीवभाव औपाधिकः। यथा जले प्रतिबिम्बितश्चन्द्रो जलगतकर्दमादिना लिप्तो न भवति, तथोपाधिभूतानां तनुकरणादीनां धर्मैरयं जीवो न संश्लिष्यते।

---

१. "परमेश्वरः स्वरूपाच्छादनक्रीडया पशुः पुद्गलोऽणुः सम्पन्नः" (त. सा., पृ. ११८)।

२. प. सा, श्लो. ५

३. तन्त्रा. ९।१४४, पृ. १३३

४. प. सा., श्लो. ६

वीरशैव-काश्मीरशैवयोर्जीवस्वरूपविमर्शः

परशिव एव स्वस्वरूपे किञ्चिद्विकारमन्तरा जीवजगदात्मना भासते, इत्येतद्विषये वीरशैव-काश्मीरशैवयोर्विचारसाम्यं वर्तते। किन्त्वयं विशेषो यत् परशिवस्याऽयं जीवभावस्तदीयाणुभावश्चौपाधिकः, अत एवावास्तविक इति तस्य ज्ञानमात्रेण निवृत्तिरिति काश्मीरशैवाः प्रतिपादयन्ति[1]। वीरशैव-सिद्धान्तेऽनाद्याऽऽणवमलसम्बन्धेन प्राप्तोऽयं जीवभावस्तदीयाणुभावश्च सत्य इति स्वीक्रियते। अतः सत्यस्य बन्धस्य निवृत्तिर्न ज्ञानमात्रेण सम्भवतीति तदर्थं ज्ञानेन साकं कर्मणः भक्तेश्चाङ्गीकारः कृतः।

सिद्धान्तशैवदर्शने पशुलक्षणम्

सिद्धान्तशैवदर्शने—"पशुः पशुत्वसंयोगात्"[2], "ते पाशबद्धाः पशवः"[3] इत्यादिश्रुति-सिद्धान्तहृदयवचनानुसारं जीवः पशुरित्युच्यते। तस्मादत्र पशुशब्देन न केवलं चतुष्पदा एव, किन्तु संसारवशवर्तिनो द्विपदा अपि गृह्यन्ते। "एतावन्तो वै पशवो द्विपादश्चतुष्पादश्च"[4] इति श्रुतौ द्विपदामपि पशुत्वं प्रतिपादितमेव। भगवान् कृष्णद्वैपायनव्यासस्तु—

ब्रह्माद्याः स्थावरान्ताश्च देवदेवस्य धीमतः।
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः॥
तेषां पतित्वाद् भगवान् रुद्रः पशुपतिः स्मृतः।[5]

इति शिवव्यतिरिक्तान् सर्वानपि पशुकोटौ परिगणितवान्। तस्मात् सिद्धान्तशैवैरुच्यमानो जीवात्मपर्यायः पशुशब्दः प्रामाणिक एव।

देहान्योऽनश्वरो व्यापी विभिन्नः समलोऽजडः।
स्वकर्मफलभुक् कर्ता किञ्चिज्ज्ञः सेश्वरः पशुः॥[6]

---

१. "देहाद्यभिमानकृतसङ्कोचसङ्कुचितं चैतन्यं बद्धमिवेत्युच्यते, तदेव पुनः स्वस्वरूप-ज्ञानाभिव्यक्तेर्देहादिप्रमातृताबन्धसंक्षयात् स्वशक्तिविवेकविकस्वरं मुक्तमिव, इत्यभिमानमात्रसारौ परिमितप्रमात्रपेक्षया बन्धमोक्षौ" (प. सा. वि., श्लो. ६०) इति।

२. त. प्र. वृ., श्लो. ६, पृ. २४

३. त. प्र. ता. श्लो. ५, पृ. १७

४. तै. सं, २।३।१३।१

५. लि. पु. २।९।११-१२

६. लु. सं., भा. २, उपो. पृ. १३१

इति पराख्यसंहितायां पशुलक्षणमुक्तम्। अत्र—"देहान्य इत्यनेन चार्वाकपक्षनिरासः। अनश्वर इत्यनेन सौगतक्षणभङ्गवादनिरासः। व्यापीत्यनेन क्षपणकमतनिरासः। विभिन्न इत्यनेन वेदान्तवादनिरासः। समल इत्यत्र मलशब्देन ज्ञानावारकं कर्मभिन्नं रागकारणमज्ञानमुच्यते। अजड इति ज्ञानक्रियास्वभावः। स्वकर्मफलभुगिति स्वस्य कर्म स्वकर्म धर्माधर्मात्मकम्, तस्य फलं भुङ्क्त इति स्वकर्मफलभुक्। युगपत् सेवाकृष्यादिप्रवृत्तयोर्द्वयोः पुरुषयोरेकस्य फलसिद्धेरितरस्यादर्शनाच्चैतन्मन्तव्यम्। तदुक्तं पौष्करे—

उभयोः कृषिसाम्येऽपि कश्चिद् धान्यानि गच्छति।
न किञ्चिदपरस्तस्य कर्म कारणकं द्विजाः॥ इति।

कर्ता पूर्वोक्तस्य कर्मणः सम्पादयिता। किञ्चिज्ज्ञः किञ्चिदल्पं जानातीति किञ्चिज्ज्ञः। सेश्वरः, ईश्वरेण प्रेरकेण सहितः। न सांख्यानामिव स्वतन्त्रः, "ईश्वराधिष्ठितात्माऽसावस्वतन्त्रो यतस्तु सः" इति पराख्यवचनान्तरात्। "ततः कलासमायुक्तो भोगेऽणुः कर्तृकारकः" इति पराख्यवचनेऽणोराणवमलयुक्तस्य जीवस्य कर्तृत्वं प्रतिपाद्यते"[1] इति शैवशाक्ततन्त्रागमविशेषज्ञैः प. व्रजवल्लभद्विवेदगुरुमहोदयैः सपदकृत्यं संहितावचनं व्याख्याय पशोर्लक्षणं निरुक्तम्। तैरेव निर्दशितरीत्या पशोर्विस्तृतं विवेचनमन्यत्रापि द्रष्टव्यम्[2]। एतेनायं पशुर्देहेन्द्रियादिव्यतिरिक्तः, व्यापकः, अनेकः, स्वाभाविकमलयुक्तः, ज्ञानक्रियास्वभाववान्, कर्मणां कर्ता, कर्मफलभोक्ता, किञ्चिज्ज्ञः, ईश्वरप्रेरितश्चेति विज्ञायते।

पशोस्त्रैविध्यम्

अत्र सिद्धान्ते पशुर्विज्ञानाकल-प्रलयाकल-सकलभेदेन त्रिविधो[3] भवति। तत्र मलमात्रयुक्तो विज्ञानाकलः, मलकर्मयुक्तः प्रलयाकलः, मल-माया-कर्मात्मकबन्धत्रयसहितश्च सकलः। विज्ञानाकलः समाप्तकलुषासमाप्तकलुषभेदेन पुनर्द्विविधो भवति। समाप्तकलुषान् पुरुषधौरेयान् शिवः स्वानुग्रहेणानन्त-सूक्ष्म-शिवोत्तम-एकनेत्र-एकरुद्र - त्रिमूर्ति - श्रीकण्ठ - शिखण्ड्याख्याष्टविद्येश्वरपदं

---

१. लु. सं., भा. २, उपो. पृ. १३१

२. त. सं., श्लो. २७-४३; शै. द. बि., पृ. २५; मत. वि. ६।४-६; नेत्र. त. १९।१५१-१५३ श्लो.।

३. "पशवस्त्रिविधा ज्ञेया विज्ञानप्रलयकेवलौ सकलः" (त. प्र., श्लो. ८)।

प्रापयति। एते पञ्चकृत्याधिकारिणो भवन्ति, ईश्वरतत्त्वे निवसन्ति च। असमाप्तकलुषान् तान् सप्तकोटिसंख्याकान् मन्त्राननुग्रहकरणान् विधत्ते[1]। एते च विद्यातत्त्वे निवसन्ति।

एवमेव प्रलयाकलोऽपि पक्वपाशद्वयोऽपक्वपाशद्वय इति भेदेन द्विविधः। तत्र प्रथमः शिवानुग्रहेण मोक्षं प्राप्नोति। द्वितीयः[2] पुर्यष्टकाख्यसूक्ष्मशरीरयुतः स्वकर्मवशान्नानायोनिषु परिभ्रमति। पुर्यष्टकयुतेषु ये विशिष्टपुण्यभाजो भवन्ति, ते महेश्वरानुग्रहेण भुवनपतित्वं प्राप्नुवन्ति[3]।

सकलोऽपि पक्वकलुष-अपक्वकलुषभेदेन द्विविधो भवति। तत्र पक्वकलुषान् सकलान् परमेश्वरस्तत्परिपाकानुगुणशक्तिपातेन मण्डल्याद्यष्टादशोत्तरशतं मन्त्रेश्वरपदं प्रापयति। तत्परिपाकाधिक्यनिरोधेन शक्त्युपसंहारेण दीक्षाकरणेन मोक्षप्रदो भवत्याचार्यमूर्तिमास्थाय परमेश्वरः। अपक्वकलुषाः सकलाः स्वकर्मवशात् सांसारिकभोगभाजो भूत्वा परमेश्वरशासनानुसारेण परिभ्रमन्ति[4]।

पशोरवस्थात्रयम्

अत्र सिद्धान्ते प्रकारान्तरेण पशोः केवल-सकल-अमलभेदेनावस्थात्रयमभ्युपगम्यते[5]। तत्र मायाभोगेषु रञ्जितो मोहग्रस्तः कर्मवशेन संसाराटवीं पर्यटन्

---

१. त. प्र. वृ., श्लो. ९-१०; र. त्र., श्लो. २३-२९

२. "तत्र पुर्यष्टकं नाम प्रतिपुरुषं नियतः सर्गादारभ्य कल्पान्तं मोक्षान्तं वाऽवस्थितः पृथिव्यादिकलान्तत्रिंशत्तत्त्वात्मकोऽसाधारणरूपः सूक्ष्मदेहः" (त. प्र. वृ., श्लो. १२) इत्यघोरशिवाचार्यवचनम्। पुर्यष्टकस्य पक्षान्तरविवेचनार्थं लुप्तागमसंग्रह-द्वितीयभागस्यथोपोद्घात(पृ० १३२-१३३)स्थिता प. व्रजवल्लभद्विवेद्विमहाभागानां टिप्पण्यवलोकनीया।

३. त. प्र., श्लो. ११-१२

४. त. प्र., श्लो. १३-१६

५. त्र्यवस्थः पुरुषः प्रोक्तः शुद्धः सकलः केवलः।
शुद्धावस्थानमात्मानं शिवरूपमिति स्मृतम्॥ (सुप्रभेदागमे)
(लु. स., भा. २, उपो. पृ. १३४)

न कथमपि चेतत इति केवल[१] इत्युच्यते। कलादिबन्धेन बद्धः सकलः[२]। एष सकलावस्थ आत्मा बद्धोऽहमिति जानाति, बन्धमोक्षाय चेष्टते च। दीक्षया कलादिबन्धान्मुक्तोऽमल[३] इत्युच्यते। शुद्धोऽयं शिवसाम्यरूपां मुक्तिमधिगच्छति।

वीरशैव-सिद्धान्तशैवयोर्जीवस्वरूपविमर्शः

सिद्धान्तशैवाभ्युपगतपशुलक्षणे—देहेन्द्रियादिव्यतिरिक्तत्वम्, अनेकत्वम्, स्वाभाविकमलकर्मयुक्तत्वम्, कर्मणां कर्तृत्वम्, तत्फलभोक्तृत्वम्, किञ्चिज्ज्ञत्वम्, ईश्वरप्रेरितत्वं चेत्यादिधर्मा वीरशैवैरप्यभ्युपगता इत्येतद्विषये उभयदर्शनयोः साम्ये विद्यमानेऽपि तत्परिमाणविषये वैमत्यं दरीदृश्यते। सिद्धान्तशैवैस्तस्य व्यापकत्वम्, वीरशैवैश्चाणुपरिमाणत्वमङ्गीक्रियते। जीवात्मनो विभुत्वानेकत्वप्रतिपादनापेक्षया तस्याणुत्वानेकत्वप्रतिपादनपक्ष एवोचित इति प्रतिभाति।

जीवस्याणुपरिमाणविमर्शः

ननु परमात्मनोंऽशस्य जीवस्याणुपरिमाणत्वे कथं शिरःपादाद्यवच्छिन्नसुखदुःखज्ञानसम्भवः? इति चेत्, न, यथा गृहैककोणस्थितेन प्रदीपेन गृहान्तर्वर्तिसर्ववस्तुप्रकाशो भवति, तथाऽणुनापि जीवेन स्वकीयज्ञानप्रभया सर्वशरीरव्याप्त्युपपत्त्या तदवयवावच्छिन्नसुखदुःखादीनां ज्ञानं सम्भवत्येव। अत एवोक्तम्—

वालाग्रशतभागेन सदृशो हृदयस्थितः।
अश्नन् कर्मफलं सर्वमात्मा स्फुरति दीपवत्॥[४] इति।

---

१. "कलानां निलयो यस्मात् तेनासौ केवलः स्मृतः" (सर्वज्ञानोत्तरे)
(लु. सं., भा. २, उपो. पृ. १३५)

२. त्रिमलैर्बध्यते चात्मा सकलः परिवारितः।
सकलश्चेति बद्धात्मा संसारी विषयी तथा॥ (सुप्रभेदागमे)
(लु. सं , भा. २, उपो. पृ. १३५)

३. स देशिकमनुप्राप्य दीक्षाविच्छिन्नबन्धनः।
प्रयाति शिवसायुज्यं निर्मलो निरुपप्लवः॥
(लु. सं., भा. २, उपो. पृ. १३५)

४. सि. शि. १८।६, पृ. १२९

किञ्च, भगवता बादरायणेनापि—"अविरोधश्चन्दनवत्"[१], "गुणाद् वाऽऽलोकवत्"[२] इति सूत्राभ्यां चन्दनालोकदृष्टान्ताभ्यामात्मनोऽणुत्वेऽपि स्वज्ञानप्रभया शरीरव्यापित्वं तस्य समर्थितम् ।

ननु कथं गुणो गुणिव्यतिरेकेणान्यत्र वर्तेत, नहि पटस्य शुक्लो गुणः पटव्यतिरेकेणान्यत्र वर्तमानो दृश्यत इति चेत्, मैवम्; शुक्लादिगुणानां स्वद्रव्यव्यतिरेकेणानुपलभ्यमानत्वेऽपि गन्धप्रकाशयोस्तत्सम्भवात् । नहि रसो गुणो जिह्वयोपलभ्यत इति रूपादयोऽपि गुणा जिह्वयैवोपलभ्येरन्निति नियन्तुं शक्यते । फलबलकल्प्यस्य स्वभाव एव शरणमिति लोकानुभवेन प्रदीपप्रभावद् ज्ञानप्रभायाः शरीरव्यापकत्वस्वीकारे न कोऽपि दोषः । अत एव—"आ लोमभ्य आ नखेभ्यः"[३], "प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति"[४] इत्यादिश्रुतयो जीवात्मनश्चैतन्यगुणेन समस्तं शरीरं व्याप्तमिति दर्शयन्ति ।

अपि च, जीवात्मनो विभुत्वे तस्य सर्वदा सर्वत्र स्थित्या तदुत्क्रान्तिगत्यागतिप्रतिपादिकानां श्रुतीनामानर्थक्यप्रसङ्गः । तत्र हि श्रुतिषु—"तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः"[५] इत्युत्क्रान्तिः, "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति"[६] इति गतिः, "तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मणे"[७] इत्यागतिश्चेति जीवात्मनः परलोकगमनागमनादिकं श्रूयते । तस्य विभुत्वे शरीरवियोगासम्भवः । न च पुर्यष्टकापरपर्यायस्य लिङ्गशरीरस्य गमनागमनेन आत्मनि तदुपचार इति वक्तुं शक्यते । "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति"[८] इति श्रुत्या हि आत्मनः प्रथमतो गमनम्, पश्चात् तत्प्राणोपलक्षितलिङ्गशरीरस्य गमनमुच्यते । अत एव—

> द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
> परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥[९]

इत्यात्मन एव सूर्यमण्डलभेत्तृत्वं स्मर्यते । तस्मात्—"एषोऽणुरात्मा चेतसा वेदितव्यः"[१०], "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा"[११] इत्यादिश्रुतिसम्मतमणुत्वमेव

---

१. ब्र. सू. २।३।२२ २. ब्र. सू. २।३।२४
३. छा. उ ८।८।१ ४. कौषी. उ. ३।६
५. बृ. उ. ४।४।२ ६. कौषी. उ. १।२
७. बृ. उ. ४।४।६ ८. बृ. उ. ४।४।२
९. पारा. स्मृ. २।३२ १०. मुण्ड. ३।१।९
११. कठ. २।६।१७

जीवात्मनोऽङ्गीकर्तव्यम्। "स वा एष महानज आत्मा"[१], "आकाशवत् सर्वगतं सुसूक्ष्मम्"[२] इत्यादिविभुत्ववाचकश्रुतीनां परमात्मपरत्वं वेदितव्यम्[३]। एवं जीवात्मनोऽणुत्व एव तस्य नित्यत्वं प्रतिशरीरं भिन्नत्वं च सम्भवति। अत एव शक्तिविशिष्टाद्वैतवेदान्ताख्ये वीरशैवसिद्धान्ते जीवस्याणुत्वमभ्युपगम्य शरीरान्तरव्याप्तया तदीयज्ञानप्रभया शारीरकसुखदुःखसाक्षात्कार इति व्यवस्थापितम्। अतो भोगसाङ्कर्यनिवारणार्थम्, जगद्वैचित्र्यव्यवस्थार्थम्, उत्क्रान्तिगत्यागतीनां च व्यवस्थार्थमात्मनोऽणुत्वप्रतिपादकः शक्तिविशिष्टाद्वैतसिद्धान्त एव तत्त्वचिन्तकैर्बहु मन्यत इत्यत्र न कोऽपि विवादः।

पशोर्भेदविमर्शः

काश्मीरशैवसिद्धान्ते सिद्धान्तशैवदर्शने च विज्ञानाकल-प्रलयाकल-सकलभेदेन पशोस्त्रैविध्यं निरूप्यते। तत्राऽऽणवमलमात्रयुक्तो विज्ञानाकलः, आणव-कार्ममलद्वययुक्तः प्रलयाकलः, मल-माया-कर्मात्मकबन्धत्रयसहितः सकलः। तत्र मलानां पक्वापक्वभेदेन विज्ञानाकलादयो पुनर्द्विविधा इति प्रतिपाद्यते। एवं स्थूलतः पशोस्त्रैविध्यम्, सूक्ष्मतस्तस्य षाड्विध्यमवगम्यते।

वीरशैवसिद्धान्तेऽप्यङ्गपदवाच्यस्य जीवात्मनो योगाङ्ग-भोगाङ्ग-त्यागाङ्ग इति प्रथमतस्तस्य त्रैविध्यम्, पुनर्योगाङ्गे—ऐक्यः शरण इति, भोगाङ्गे—प्राणलिङ्गी प्रसादीति, त्यागाङ्गे—माहेश्वरः, भक्त इति च द्विधा द्विधा विभागं कृत्वाऽङ्गस्य षाड्विध्यं प्रतिपादितं श्रीमता मायिदेवेन[४]।

काश्मीरशैवदर्शने सिद्धान्तशैवदर्शने च मलानां तारतम्येन तत्पक्वतातारतम्येन च पशूनां विभागः कृतः। वीरशैवदर्शने तु भक्तिवैलक्षण्येन, उपासनायास्तारतम्येन च विभागः कृतोऽस्ति। एतेषामङ्गषट्स्थलानां स्वरूपं तदुपासनापद्धतिश्च षट्स्थलसोपानाख्ये पञ्चमपरिच्छेदे विस्तरेण निरूपिष्यते।

पशोरवस्थात्रयविमर्शः

सिद्धान्तशैवदर्शने प्रकारान्तरेण पशोः केवल-सकल-अमलभेदेनावस्थात्रयमुच्यते। तत्र बन्धनबोधरहितः स्वकीयचेतनभावशून्यः केवलः, बन्धनज्ञान-

---

१. बृ. उ. ४।४।२२

२. शाण्डि. उ २।१।३

३. ब्र. सू. श्री. २।३।१८-१९

४. अ. सू. ४।३-१९

सहितः कलादिवन्धेन बद्धः सकलः, दीक्षया कलादिबन्धान्मुक्तोऽमल इति तदवस्थात्रैविध्यमुपवर्णितम्[1]।

वीरशैवसिद्धान्तेऽपि बद्धः शुद्धो मुक्त इति जीवात्मन अवस्थात्रयमभ्युपगम्यते। तत्र दीक्षाविहीनः शिवभक्तिवर्जितः कर्तृत्वाभिमानी च जीवो बद्धः, दीक्षासंस्कारयुक्तो गुरु-लिङ्ग-जङ्गमेषु कैङ्कर्यभक्तियुक्तः सद्गुणोपेतो रागवर्जितो मुमुक्षुश्च शुद्धो जीवः, शिवाकारे पराकाशे विलीनचित्तवृत्तिस्तु मुक्तो जीव इति[2]।

अत्र सिद्धान्तशैवीययोः केवल-सकलयोः, वीरशैवीयबद्धजीवस्य च बद्धत्वे साम्ये विद्यमानेऽपि बन्धस्वरूपविषये वर्तते वैलक्षण्यम्। एवमेवामलपशोः मुक्तजीवस्य च मुक्तत्वे मतैक्ये सत्यपि मुक्तिस्वरूपविषये महद् वैलक्षण्यं प्रतीयते। काश्मीरशैववीरशैवयोर्बन्धमोक्षस्वरूपविषये यद्यपि नितान्तं साम्यं वर्तते, अथाप्यद्वैतवादिनः शैवा ज्ञानमात्रान्मोक्ष इति, द्वैताद्वैतवादिनो वीरशैवाश्च ज्ञानकर्मणोः समुच्चयादिति स्वस्वपक्षमुपस्थापयन्ति। एवं मोक्षसाधनविषयेऽपि वैमत्यं वर्तते। तदग्रे स्पष्टीकरिष्यते।

वीरशैवसिद्धान्ते जीवात्मनो बन्धः

शक्तिविशिष्टाद्वैतापरपर्याये वीरशैवसिद्धान्ते जीवात्मनो बन्धमोक्षौ शक्तीनां सङ्कोचविकासवादेन व्यवस्थाप्येते, अर्थाद् इच्छा-ज्ञान-क्रियाशक्तीनां सङ्कोचरूपमलत्रयावृतत्वेन बन्धः, दीक्षादिना पुनस्तासामेव विकासे सति मोक्ष इत्यर्थः। तदुक्तं पूज्यपादैः श्रीरेणुकाचार्यैः—

---

१. "विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः" इति स्वायम्भुवागमे
(लु. सं., भा. २, उपो. पृ. १३४)

२. बद्धशुद्धादिभेदेन जीवत्रयमिदं स्मृतम्।
गुरुदीक्षाविहीनश्च शिवभक्तिविवर्जितः॥
स्वकर्तृत्वाभिमानी तु बद्धः स पशुरुच्यते।
गुरुदीक्षां परां लब्ध्वा कैङ्कर्यत्रयसंयुतः॥
शक्त्यादिसद्गुणोपेतो मुमुक्षू रागवर्जितः।
शिवाधीनः सुधीर्भक्तः शुद्धजीव इति स्मृतः॥
शिवाकारे पराकाशे कोटिसूर्यप्रकाशके।
विलीनचित्तवृत्तिस्तु मुक्तजीव इति स्मृतः॥ (ब्र. सू. श्री. २।३।४६)

जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम् ।
निरस्यते गुरोर्बोधाद् ज्ञानशक्तिः प्रकाशते ॥[1] इति ।

उक्तं च शङ्करशास्त्रिमहाभागैः—"सङ्कुचितशक्तित्रयरूपमलत्रयनिवृत्तिः शक्तिविकासरूपशिवत्वप्राप्तिर्मोक्षः"[2] इति । तस्मादत्र बन्धनकारकमलत्रयाणां स्वरूपं तन्निवारणोपायश्च विचार्यते ।

मलत्रय(पाश)स्वरूपम्

जीवात्मनो बन्धनकारणीभूता आणवादयो मला आगमशास्त्रे पाशशब्देनाप्युच्यन्ते । तदावृतत्वादेव जीवः पशुरिति कथ्यते । वीरशैवसिद्धान्ते आणवमायीय-कार्मभेदेन त्रिविधो हि पाशोऽङ्गीकृतः । अत एव श्रीशिवानुभवशिवाचार्याः—"स्थूलचिदचिद्रूपशक्तिविशिष्टो जीवः । ... स्थूलत्वं च मलत्रयविशिष्टत्वम्"[3] इति जीवात्मनो लक्षणनिरूपणावसरे तस्य मलत्रययुक्तत्वं प्रतिपाद्य पाशानां त्रैविध्यं सूचितवन्तः ।

१. आणवमलः—परशिवस्येच्छाशक्तिसङ्कोच एवाऽऽणवमलः । अस्यावरणेन हि जीवः स्वकीयं विभुत्वं विस्मृत्य 'अपूर्णोऽस्मि' इति स्वात्मानमणुत्वेन व्यवहरति । उक्तं च—"अस्याप्रतिहतस्वातन्त्र्यरूपेच्छाशक्तिः सङ्कुचिता सती अपूर्णम्मन्यतारूपमाणवमलमित्युच्यते"[4] इति ।

२. मायीयमलः—परशिवस्य सङ्कुचिता ज्ञानशक्तिरेव मायीयो मलः । परशिवस्यापरिमितं ज्ञानं सङ्कुचितं सद् बन्धनकारकं भवति । अत एव जीवः किञ्चिज्ज्ञ इत्युच्यते । अनेन मायीयमलाऽऽवरणेन जीवः स्वात्मानं परशिवाद् भिन्नं मत्वा शरीरेन्द्रियबुद्ध्यादिष्वहमिति, सती-पुत्र-गृहादिषु च ममेति व्यवहरति । उक्तं च तल्लक्षणम्—"ज्ञानशक्तिः सङ्कुचिता सती सर्वज्ञत्वस्य किञ्चिज्ज्ञत्वाप्तेरन्तःकरणबुद्धीन्द्रियसम्बन्धवशाद् भेदवेद्यप्रथारूपं मायीयमलमित्युच्यते"[5] इति ।

३. कार्ममलः—परशिवस्य संकुचिता क्रियाशक्तिरेव कार्ममलः । अयं च शुभाशुभवासनारूपः । अनयैव वासनया शुभाशुभकर्माणि कुर्वन् तत्तत्फलानि

१. सि. शि. १८।१७
२. ई. उ. शा. व्या., पृ. २४
३. शि. द., पृ. २२
४. शि. द., पृ. ३५
५. शि. द, पृ. ३५

सुखदुःखानि चानुभवन् स्वकर्मानुसारेणैव देवतिर्यङ्मनुष्यादियोनिषु जीवः परिभ्रमति[1]। उक्तं च तल्लक्षणम्—"क्रियाशक्तिः संकुचिता सती सर्वकर्तृत्वस्य किञ्चित्कर्तृत्वाप्तेः कर्मेन्द्रियसम्बन्धवशात् शुभाशुभानुष्ठानमयकार्ममलमित्युच्यते"[2] इति।

तदेवमाणवो मलोऽणुत्वापादकत्वेन, मायीयमलोऽखण्डाद्विच्छिद्याणुभूतस्यांशस्य देहसम्बन्धापादकत्वेन, शुभाशुभकर्मप्रवर्तकत्वेन च कार्ममलो जीवस्य बन्धनकारणानि भवन्ति। एतानि च मलत्रयाण्यनादीनि। तस्माद् यथा शिवः स्वाभाविकपरिपूर्णेच्छा-ज्ञानक्रियाशक्तिविशिष्टस्तथा जीवोऽपि तत्सङ्कोचभूतैराणव-मायीय-कार्ममलैः सहजतयाऽऽवृतः। अतो जीवः स्वभावतः परमात्मनो भिन्नः। तस्माद्यथा शिवः सत्यस्तथा जीवोऽपि सत्य इति संसारदशायां तयोर्भेदो न मिथ्याभूतः, किन्तु वास्तविकः। मुक्तौ तयोरभेदोऽपि सत्य इत्येवाङ्गीक्रियते। तथाहि स्मर्यते—

शिवः सत्यं जगत् सत्यं जीवः सत्यं स्वभावतः।
तेषामभेदः सत्यो वा क्रिमिभ्रमरयोरिव॥[3] इति।

तदेवं जीवोपाधिभूतमलत्रयविशिष्टस्थूलचिदचिद्रूपशक्तेरावरणमहिम्ना किञ्चित्कर्तृत्व-किञ्चिज्ज्ञत्व-अपूर्णत्व-अनित्यत्व-अव्यापकत्वरूपकला-विद्या-राग-काल-नियत्याख्यपञ्चकञ्चुकैरावृतोऽयं जीवः पुरुष इत्याख्यायते। एवमेव परशिवोपाधिभूतसूक्ष्मचिच्छक्तेः परिणामरूपशक्तेरौन्मुख्य[4]महिम्ना सत्त्वादित्रिगुणैः, बुद्ध्या, अहङ्कारेण, मनसा, पञ्चज्ञानेन्द्रियैः, पञ्चकर्मेन्द्रियैः पञ्चतन्मात्रैः, पञ्चमहाभूतैश्च संयुक्तो भूत्वा संसारीति निगद्यते। तथा चोक्तं शिवादित्यचरणैः—

मलोपहतचैतन्यं कलाविद्यासमाश्रयम्।
रागेण रञ्जितात्मानं कालेन कलितं तथा॥
नियत्या यमितं भूयः पुंभावेनोपबृंहितम्।
प्रधानाशयसम्पन्नं गुणत्रयसमन्वितम्॥

---

१. चक्रनेमिक्रमेणैव भ्रमन्ति हि शरीरिणः।
जात्यायुर्भोगवैषम्यकारणं कर्म केवलम्॥ (सि. शि. ५।४५)

२. शि. द., पृ० ३५

३. ब्र. सू. श्री. २।३।४०

४. औन्मुख्यशक्तिर्नाम विक्षेपशक्तिरिति वेद्यम्।

बुद्धितत्त्वसमासीनमहङ्कारसमावृतम् ।
मनसा बुद्धिकर्माक्षैस्तन्मात्रैः स्थूलभूतकैः ॥
संयुतं जीवमित्याहुः संसारावृतलक्षणम् ॥[1] इति ।

एवं मलत्रयावृतत्वादेवायं जीवः कलादिभूम्यन्तत्रिंशत्तत्त्वसंयुक्तो भूत्वा तापत्रयेण सन्तप्यमानो दरीदृश्यते ।

काश्मीरशैवसिद्धान्ते पाशस्वरूपम्

काश्मीरशैवसिद्धान्तेऽप्याणवादिमलत्रयाण्येव पाशशब्देनोच्यन्ते । एतत्पाशभाजनत्वादेव जीवः पशुर्भवति । तदुक्तमभिनवगुप्ताचार्येण—"पशुराणव-मायीय-कार्ममलस्वभावानां पाशानां भाजनम्"[2] इति । तदत्र पाशत्रयस्य स्वरूपं निरूप्यते ।

१. **मलः**—मलशब्दोऽत्राऽऽणवमलपर्यायः । "मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्"[3], "अख्यातिरूपमाणवं मलम्"[4], "अपूर्णम्मन्यता चेयं तथारूपावभासनम्"[5], "स्वात्मप्रच्छादनेच्छैव वस्तुभूतस्तथा मलः"[6] इत्यादिरूपेणाऽऽणवमलस्य लक्षणमुक्तम् । एतेन ज्ञायते यत् पारमेश्वरस्वातन्त्र्यमात्रसमुल्लसितस्वरूपगोपनासतत्त्वम् आत्मानात्मनोरन्यथाभिमानस्वभावम् अपूर्णं ज्ञानमाणवं मलमिति[7] । "ज्ञानं बन्धः"[8] इत्यनेन शिवसूत्रेणापि तत्स्वरूपं बोध्यते । सूत्रस्यास्य व्याख्याने—"स एव शिवाभेदाख्यात्यात्मकाज्ञानस्वभावोऽपूर्णम्मन्यतात्मकाणवमलसतत्त्वसंकुचितज्ञानात्मा बन्धः"[9] इति क्षेमराजेन संकुचितमेव ज्ञानं बन्ध इत्युक्तम् ।

कृष्णद्वैपायनव्यासेनापि—

ज्ञानं बन्ध इतीदं तु द्वितीयं सूत्रमीशितुः ।
ज्ञानमित्यात्मनस्तस्य किञ्चिज्ज्ञानक्रियात्मकम् ॥[10]

इति सूत्रोक्तस्य 'ज्ञानम्' इत्यस्य किञ्चिज्ज्ञानमिति तस्य सङ्कुचितत्वमेवोपस्थापितम् । जयरथोऽपि—"इह खलु परमेश्वरः पूर्णज्ञानक्रियात्मकं स्वं

१. शि. द., पृ. ३५
२. प. सा., पृ. ४६
३. तन्त्रा. ९।१२०
४. प. सा. वि., पृ. ४५
५. तन्त्रा. ९।६५
६. तन्त्रा. ९।६६
७. शि. सू. वि. टि., पृ. ११
८. शि. सू. १।२
९. शि. सू. वि. १।२
१०. शि. पु., ६।१६।४६-४७

स्वरूपं स्वेच्छया प्रच्छाद्य सङ्कुचितात्मतामवभासयेत्, अतश्च सङ्कुचितमेव ज्ञानमस्य रूपमिति सर्वत्रोद्घोष्यते"[1] इति तदेव समर्थितवान्। स्वेच्छया स्वस्वरूपं प्रच्छादयतीत्युक्त्या मलं नाम तदीयससंकुचितेच्छैव, सङ्कुचितेच्छया स्वस्य प्रच्छादनेन ज्ञानमपि सङ्कुचितं भवतीति विज्ञायते। तस्मादत्राज्ञानं नाम संकुचितज्ञानमित्यर्थः। "प्रधानं कारणं प्रोक्तमज्ञानात्माणवो मलः"[2] इत्यभिनवगुप्तोक्त्यनुसारमयमाणवमल एव मायीयमलस्य कार्ममलस्य च कारणं भवतीत्ययं प्रधानः पाशः। तादात्म्यापन्नत्वादिदं परमावरण-मित्युच्यते[3]।

२. **मायीयमलः**—कलादिधरण्यन्तानां तत्त्वानामुपादानभूता परशिवस्य स्वातन्त्र्यशक्तिरेव माया। अत एव "मीयते परिच्छिद्यते धरान्तः प्रमातृप्रमेय-प्रपञ्चो यया सा माया", "विश्वमोहकतया वा माया" इत्याद्या व्युत्पत्तयः सम्भवन्ति। एषैव माया स्वेच्छया पशुभावमापन्नस्य शिवस्य स्वरूपगो-पनाख्यमावरणम्। इयं मायैव मायीयमलमित्युच्यते। "भिन्नवेद्यप्रथारूपं मायीयं मलम्"[4] इत्युक्त्यनुसारं मायीयमलं भेदज्ञानकारणं भवति। एवं भेदज्ञानोत्पादनद्वारा माया पशुं हिनस्ति। "अपूर्णताप्रथनेन मीनाति हिनस्तीति माया"[5] इति मायाशब्दस्य व्युत्पत्त्यापि स एवार्थो निरूप्यते। मायापरिग्रहवशान्मलिनबोधोऽयं पशुः काल-कला-नियति-राग-विद्याख्यपञ्च-कञ्चुकैर्दृढं बद्धो भवति। तदेवं मायादिविद्यान्तं कञ्चुकषट्कं तण्डुलस्य कम्बुकमिव पशोः सूक्ष्ममन्तरङ्गमावरणं[6] भवति। अनेन मायीयमलावरणेन 'अहं मम' इत्यभिमन्यते खलु जीवः। अत एव "शरीरभुवनाकारं मायीयं परिकीर्तितम्" इत्युक्तम्।

३. **कार्ममलः**—"धर्माधर्मात्मकं कर्म सुखदुःखादिलक्षणम्"[7] इत्यभि-नवगुप्तोक्त्या सुखदुःखादिकारणीभूतं धर्माधर्मात्मकं कर्म एव कार्ममलः।

---

१. तन्त्रा. वि. ९।६, पृ. ६०

२. तन्त्रा. ९।१४२

३. "परमावरणं शिवस्यैतत्" (प. सा., श्लो. २४)।

४. प्रत्यभि. वि. ९ सू.।

५. त. सा., पृ. ७७, टिप्प. ३८

६. "मायासहितं कञ्चुकषट्कमणोरन्तरङ्गमिदमुक्तम्" (प. सा., श्लो. १७)

७. तन्त्रा भा. ६, पृ० ७५.

अयं शुभाशुभवासनारूपः। वासनया प्रेरितः पशुः शुभाशुभानि कर्माणि कुरुते, तद्भोगाय तदनुरूपं शरीरं च प्राप्नोति। शरीरेण च पुनः कर्म कुरुते। कार्ममलकार्यभूतमिदं स्थूलशरीरमपि कार्ममलशब्देनैव व्यवह्रियते। तदुक्तं योगराजाचार्येण—"बाह्यं तुषस्थानीयं प्राधानिकं शरीरसत्तालक्षणमावरणं स्थूलम्, त्वङ्मांसादिरूपत्वात्। एष तृतीयः कार्मो मलः, येन प्रमाता शुभाशुभकर्मसंचयभाजनं भवति"[२] इति।

तदेवं काश्मीरशैवदर्शने परशिव एव लीलाविनोदाय मल-माया-कार्माख्यपाशत्रयेणावृतस्वरूपः सन् पशुरित्युच्यते।

सिद्धान्तशैवदर्शने पाशस्वरूपम्

"पशूनां बन्धकाः पाशाः"[१] इति कुमारदेवोक्त्या पशोर्बन्धनकारिणः पाशा इति कथ्यन्ते। "अर्थपञ्चकं पाशः"[२] इत्युक्त्यनुसारेण सिद्धान्तशैवदर्शने तस्य पञ्च भेदाः प्रतिपादिताः। तेषां नामानि सन्ति—मलः, तिरोधानशक्तिः, महामाया, माया, कर्म चेति।

१. मलः—मलशब्देनात्र 'आणवमलः' निर्दिश्यते। अयं प्रथमः पाशः। 'मलिनीकरोति दृक्क्रियात्मकं तेजः प्रच्छादयतीति मलः' इति व्युत्पत्त्या ज्ञानशक्तेः क्रियाशक्तेश्च तिरोधायकमज्ञानमेवाणवमलः। अत एव "मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्"[३] इत्युक्तम्। अयं मायाबन्धनवद् नागन्तुकः, किन्त्वनादिकालात् प्रवर्तते। मलश्चायं चक्षुःपटलवद् द्रव्यस्वरूपः। निवृत्तिश्चास्य पत्याख्यवैद्यव्यापारसाध्या। यथा वैद्यव्यापारश्चक्षुःपटलपरिपाकमपेक्षते, तथेश्वरव्यापारोऽपि मलपरिपाकमपेक्षते। अयं च परिपाकः शैवागमोपदिष्टक्रियाचर्यायोगानुष्ठानसाध्यः।

२. तिरोधानशक्तिः—अयं द्वितीयः पाशः। तिरोधानशक्तिर्न केवलं पाशेषु परिगणिता, किन्तु पारमेश्वरशक्तिष्वपि। मुख्यतया त्वियं पारमेश्वरशक्तिरेवेत्यस्याः पाशत्वमौपचारिकमेव। यतो हि सा सर्वानुग्राहिका सकलजगदनुग्रहस्वभावा शिवा, ततो न मुख्यं पाशत्वं तस्याः। रोधशक्तेर्हि मलपरिपाकान्तमेव तिरोधानस्वभावत्वम्, तदनन्तरं चाणुवर्गाणामाशयविकासनहेतुत्वादनुग्राहकत्वमप्यस्याः। तथा चेयमेव पतिशक्तिर्यावन्मलपरिपाकमचिद्रूपाणि

---

१. त. प्र. ता., श्लो. १७.

२. मा. वि. १।२३.

३. शै. द. बि., पृ. १९-२०; लु. सं., भा. २, उपो. पृ. १३६-१३७

मल-कर्म-माया-तत्कार्याणि प्रवर्त्य चिद्रूपतामात्मनस्तिरोदधाति, पाकानन्तरं चात्मनोऽनुगृह्णाति, पाशं तिरोदधातीति चिदचितां सर्वेषामनुग्रहकारणत्वात् सर्वानुग्राहिकाऽपि भवति[1]। तदुक्तं भोजदेवेन—

पाशानुग्राहित्वात् पुरुषतिरोधायिका विभोः शक्तिः।
पाशत्वेनाभिहिता पाशाश्च चतुर्विधास्त्वेवम् ॥[2] इति।

एतेन मुख्यपाशास्तु चतुर्विधा एवेत्यपि विज्ञायते।

३. **महायाया**—महामायाया बिन्दुरित्यपरं नामधेयम्। अयं तृतीयः पाशः। बिन्दुर्न केवलं पाशरूपः, किन्तु शुद्धसृष्टेरुपादानमपि। अस्य पाशरूपत्वप्रतिपादने सिद्धान्तशैवानामाशयः श्रीमद्भिः कान्तिचन्द्रपाण्डेयमहोदयैरेवं निरूप्यते—"मलस्वरूपस्य बिन्दोर्मोक्षविचारधारयातीव घनिष्ठः सम्बन्धः। मोक्षो द्विविधः—परोऽपरश्च। मायाकर्मरूपपाशद्वयमुक्तः पशुर्न सर्वथा मुक्तः, आणवापरपर्यायपशुत्वमलस्य सद्भावात्, अतः सोऽपरमोक्षभाक्। सिद्धान्तशैवानामिमेऽभ्युपगमाः—(क) अस्माल्लोकादूर्ध्वं बहवो लोकाः सन्ति, यत्र कर्मादिपाशबद्धा जीवाः कर्मभोगान् भुञ्जते। (ख) मायोर्ध्वभाविनः पञ्च पदार्थाः, येषु सदाशिव-ईश्वर-विद्याख्यं त्रयं गण्यते। (ग) मायाकर्मोभयपाशविमुक्ता ध्वस्यमानाद्यवस्थावशिष्टाणवमलाः क्रमशोऽनुभूतविद्या-ईश्वर-सदाशिवतत्त्वाः पशवो मायीयलोकोर्ध्वोर्ध्ववर्तिषु त्रिषु लोकेषु क्रमशो निवसन्ति। ते च क्रमशो मन्त्र-मन्त्रेश-मन्त्रमहेशशब्दैरभिधीयन्ते। एषां शरीराद्युपादानकारणं बिन्दुः। एवं चैतादृशप्रकरणेषु बिन्दुरुपादानस्वरूपत्वेन सृष्टिकारणत्वेन व्याख्यायते, परन्तु यावद्बिन्दुकारणकाच्छरीरान्मुक्तिर्न भवति, न तावत् परमोक्षः, अतो बिन्दुर्मलत्वेनाप्युच्यते"[3] इति। तदेवं बैन्दवशरीरं परमोक्षे प्रतिबन्धकमिति बिन्दुरत्र पाशत्वेन परिगणितः।

४. **माया**—अयं चतुर्थः पाशः। मायाऽशुद्धसृष्टिगतस्य सर्वस्य कला-भुवन-सूक्ष्म-स्थूलशरीरतदुपभोग्यविषयजातादेरुपादानकारणम्। "मयत्यस्माज्जगत् सर्वं तेन माया प्रकीर्तिता"[4], "तद्भावभाविनो भावाः सर्वे

---

१. शै. द. बि., पृ. २०-२१; लु. सं., भा. २, उपो. पृ. १३८-१३९

२. त. प्र., श्लो. २०

३. शै. द. बि., पृ. २१

४. लु. सं., भा. २, उपो. पृ. १४४

मायात्मकाः पशोः"[१] इत्यादिषु पौष्कर-स्वायम्भुवादिवचनेषु तस्योपादानत्वं प्रतिपादितम्। अत्र सिद्धान्ते परमाण्वादोनामुपादानत्वं निरस्य मायातत्त्वस्यैवोपादानत्वं[२] प्रतिपाद्यते। यथैकस्मात् कार्पासादिद्रव्यादनेकाकारपटाद्युत्पत्तिः, तथा परमकारणात् सर्गस्थितिलयाधारादेकस्माद् मायातत्त्वात् सर्गादौ नानाभेदभिन्नस्य जगत उत्पत्तिरिति निरूप्यते। मायाया ग्रन्थि-गहनादिशब्दैरपि व्यवहारो भवति। बन्धनस्वरूपेयं 'मायीयमलः' इत्युच्यते। मायीयो मल आत्मनो बुद्ध्यादिभिस्तादात्म्यं जनयति, अनिदं चेदन्तया भासयति।

५. कर्म—धर्माधर्मात्मकं कर्म पञ्चमः पाशः। पशूनां जात्यायुर्भोगभेदस्येदमेव कारणम्। तदुक्तम्—

धर्माधर्मात्मकं कर्म तच्च त्रिविधमर्थतः।
जात्यायुर्भोगदं येन नामिश्रं पच्यते क्वचित्॥[3] इति।

"सति मूले तद्विपाको जात्यायुर्भोगाः"[४] इति महर्षिणा पतञ्जलिनाप्युक्तम्। अत्र जातिर्देवत्वादिः, आयुः शतवर्षेष्वपि जीवनादिः, भोगः सुखदुःखाद्यनुभवः। एते जात्यादयोऽप्युत्तमादिक्रमेण त्रिविधा भवन्ति। तत्र जातेर्वैचित्र्यं लोकप्रसिद्धमेव। इन्द्रियवैचित्र्यं यथा—परावृत्तजिह्वत्वं गजादीनाम्, चक्षुःश्रवत्वं भुजङ्गानाम्, अनालोकालोकितत्वमुलूकानाम्। विषयवैचित्र्यं च यथा—जलधरपतितजलकणोपजीवित्वं चातकानाम्, मयूराणां कुक्कुटादीनां चावकराहारत्वम्, कमलकिञ्जल्करसास्वादनं मधुकरसारसानामित्याद्यूहनीयम्[५]।

उभयोः कृषिसाम्येऽपि कश्चिद् धान्यानि गच्छति।
न किञ्चिदपरस्तस्य कर्म कारणकं द्विजाः॥[६]

इति पौष्करवचनानुसारं युगपत् सेवाकृष्यादिषु प्रवृत्तयोर्द्वयोः पुरुषयोरेकस्य फलसिद्धेरपरस्यादर्शनाच्च तत्र धर्माधर्मात्मकस्य स्वोपार्जितस्य कर्मणः कारणत्वमङ्गीक्रियते। तच्चेदं कर्म प्रारब्ध-आगामि-सञ्चितभेदेन त्रिविधं

१. तत्रैव, पृ. १४४
२. भो. का., श्लो. ११४-१२०.
३. लु. सं, भा. २, उपो. पृ. १४७
४. यो. सू. २।१३
५. मृ. वृ. वि. ८।२; लु. सं., भा. २, उपो. पृ. १४७-१४८
६. लु. सं, भा. २, उपो. पृ. १४८

भवति। तेषु सञ्चितं कर्म दीक्षया, पुरश्चरणादिना साधितैर्मन्त्रैश्च दग्धं सद् भर्जितबीजवत् फलदानाय न क्षमते। आगामि कर्मापि मन्त्रशक्त्या प्रतिबद्धं भवति। प्रारब्धकर्म तु भोगत उपशमं याति। तदुक्तं पौष्करे "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि"[१] इति। एतेन प्रारब्धकर्मातिरिक्तानामेव कर्मणां दीक्षादिना निरोध इति विज्ञायते।

एवं क्रमेणोक्ता मल-तिरोधानशक्ति-महामाया-माया-कर्माख्याः पञ्चापि पाशाः पुरुषबन्धकतयाऽस्मिन् शास्त्रे पाशपञ्चकत्वेन प्रसिद्धाः। तदुक्तम्—

मलः कर्म महामाया मायोत्थमखिलं जगत्।
तिरोधानकरी शक्तिः पाशत्वेनार्थपञ्चकम्॥[२] इति।

अत्र महामायायाः शुद्धसृष्टेरुपादानरूपत्वात्, तिरोधानशक्तेरपि पाशत्वस्यौपचारिकत्वान्मुख्यरूपेण मल-कर्म-मायारूपास्त्रिविधा एव पाशाः। तदुक्तं स्वायम्भुवागमे—"मायेयमाणवं कर्म चैतावदणुबन्धनम्"[३] इति।

पाशस्वरूपविमर्शः

तदेवं दर्शनत्रयोक्तानां पाशानां स्वरूपविचारेण ज्ञायते यद् आणव-मायीय-कार्माख्यास्त्रय एव पाशा मुख्याः। एभिः पाशैर्बद्धः शिव एव पशुरित्युच्यते। अयमंशस्तु दर्शनत्रये समान एव। आणवमलावरणेन प्राप्तमणुत्वं वास्तविकमिति मत्वा जीवात्मनोऽणुपरिमाणत्वमभ्युपगम्यते वीरशैवैः। काश्मीरशैव-सिद्धान्तशैवमते तु नात्माऽणुरूपः, किन्तु स विभुरेव। अथाप्याणव-मलावरणेन तस्याणुभावः समायातीत्युच्यते। अत एवैतद्दर्शनद्वयेऽप्याणवमलः स्वस्वरूपाज्ञानरूपः। स च ज्ञानमात्रेण निवर्तते। वीरशैवदर्शने परशिवस्य संकुचितेच्छाशक्तिरेवाणवमल इत्युच्यते। इच्छाशक्तिसङ्कोच-रूपोऽयं मलो न शिवज्ञानमात्रेण निवर्तत इति तच्छक्तिविकासार्थं विकसित-शक्तिमता परशिवेन सहाभेदचिन्तनानुरूपा उपासनात्र विहिता। मायीयमला-वरणेन जीवोऽहं ममेत्यभिमन्यते, कार्ममले शुभाशुभकर्मसु प्रवर्तत इत्ययमंशस्तु दर्शनत्रये समान एव।

त्रिविधमलस्वरूपविषये वीरशैव-काश्मीरशैवयोः प्रतिपादनप्रक्रिया समानैव। तथाहि—परशिवः स्वयमेव यदा पूज्यपूजकरूपेण लीलामभिनेतु-

---

१. लु. सं., भा. २, उपो. पृ. १४८

२. तत्रैव, पृ. १५०

३. तत्रैव, पृ. १५०

मिच्छति, तदा तदीया इच्छा-ज्ञान-क्रियाख्याः शक्तयः संकुचिता भवन्ति। ताः संकुचिताः शक्तय एव क्रमेण आणव-मायीय-कार्माख्या मला इत्युच्यन्ते। तैरावृतत्वादेव तदंशो जीव इत्यभिधीयते। एवमेव कला-विद्या-राग-काल-नियति-रूपपञ्चकञ्चुका अपि परशिवस्य सर्वकर्तृत्व-सर्वज्ञत्व-पूर्णत्व-नित्यत्व-व्यापकत्वरूपाणां शक्तीनां सङ्कोचरूपा इति वीरशैवाचार्याः प्रतिपादयन्ति[1]।

काश्मीरशैवदर्शनेऽपि—"चिद्वत्तच्छक्तिसंकोचाद् मलावृतः संसारी"[2] इत्यस्य सूत्रस्य व्याख्याने श्रीक्षेमराज इच्छा-ज्ञान-क्रियाशक्तीनां सङ्कोचभूता एवाऽऽणवादयो मला इति निरूप्य, पुनः—"तथा सर्वकर्तृत्व-सर्वज्ञत्व-पूर्णत्व-नित्यत्व-व्यापकत्वशक्तयः सङ्कोचं गृह्णाना यथाक्रमं कला-विद्या-राग-काल-नियतिरूपतया भान्ति। तथाविधश्चायं शक्तिदरिद्रः संसारी उच्यते, स्वशक्ति-विकासे तु शिव एव"[3] इति पञ्चकञ्चुकादयोऽपि सर्वकर्तृत्वादीनां सङ्कुचित-रूपा इति स्पष्टं प्रतिपाद्यते। एतेन मलानां स्वरूपनिरूपणप्रक्रिया वीरशैव-काश्मीरशैवानां समानैव प्रतिभाति। अथाप्ययं विशेषो यद् वीरशैवा इच्छादि-शक्तीनां सङ्कोचं वास्तवं मन्यन्ते, काश्मीरशैवास्तु वस्तुतोऽसङ्कुचिता अपि सङ्कुचिता इव भान्तीति प्रतिपादयन्ति। तदुक्तं क्षेमराजेन—"तदीया इच्छादि-शक्तयोऽसङ्कुचिता अपि सङ्कोचवत्यो भान्ति"[4] इति।

मोक्षोपायेषु शक्तिपातो दीक्षा च

वीरशैवसिद्धान्ते परशिवब्रह्मजिज्ञासायां साधकस्य दीक्षासंस्कार उपदिष्टः। वेदान्ताभिमतविवेकादिसाधनचतुष्टयसम्पत्तिमात्रेण मलत्रयस्य निवृत्त्यभावात्, मलत्रयनिवृत्तिं विना ब्रह्मजिज्ञासायामधिकाराभावात् तन्नि-वृत्त्यर्थं दीक्षासंस्कारो विहितः। भाष्यकारैः श्रीपतिपण्डिताराध्यैः—"अथाऽतो ब्रह्मजिज्ञासा"[5] इत्यस्य सूत्रस्य "भाष्येऽथशब्दार्थं निरूपयद्भिः"—अदीक्षितस्य मलत्रयविध्वंसाभावान्न साधनचतुष्टयानन्तर्यम्....सद्गुरुकरुणाकटाक्षलब्धशक्ति-

१. "अस्मन्मते शिवजीवयोर्भेदस्य मिथ्याऽज्ञानकृतत्वाभावात्, शिवशक्तिस्वातन्त्र्य-परिकल्पितसङ्कोचकृतत्वात् तयोरभेदस्य विकसितस्वशक्तिदशायामुपपन्नत्वात्..." (ब्र. सू. शा. वृ. १।३।१९)।

२. प्र. हृ. भा. ३, पृ. २१

३. प्र. हृ. भा. ३, पृ. २२

४. प्र. हृ. भा. ३, पृ. २१

५. ब्र. सू. १।१।१

पाताद्यवच्छिन्नपरशिवेष्टलिङ्गधारणात्मकपाशुपतदीक्षाऽऽनन्तर्यमित्यथशब्दार्थो निर्णीयते"[1] इत्येवं स एवार्थः प्रकटीकृतः। दीक्षासंस्कारेण पाशबन्धनस्य क्षयः शिवज्ञानस्य प्राप्तिश्च संजायते। तदुक्तं पूज्यपादैः श्रीरेणुकाचार्यैः—

दीयते च शिवज्ञानं क्षीयते पाशबन्धनम्।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः॥[2] इति।

इयं दीक्षा न सर्वेषां सुलभा, किन्तु—"शक्तिपातं समालोक्य दीक्षया योजयेदमुम्"[3] इत्याचार्योक्त्या शक्तिपातविशिष्टानामेव। शक्तिपातो नाम शिवानुग्रहः। तच्छक्तिपातवशादेव साधके क्षणे क्षणे रोमाञ्चोऽङ्गकम्पनमश्रुपातादिकं च संभवति। इदमेव शक्तिपातलक्षणम्।

शिवानुग्रहरूपोऽयं शक्तिपातो जीवस्य मलपरिपाकसापेक्ष इति वीरशैवीयः सिद्धान्तः। तदुक्तमाचार्यैः—

स्वकर्मपरिपाकेन प्रक्षीणमलवासनः।
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः॥[4] इति।

अत्रेदमैदम्पर्यम्—जीवस्याऽऽणवादिको मल आमः पक्वश्चेति द्विप्रकारो भवति। तत्र तपसा प्रक्षीणः पक्वस्तद्विपरीतश्चामः। जन्मजन्मान्तरानुष्ठितपुण्यकर्मवशाद् यदा जीवः शुद्धान्तःकरणो जायते, तदायं परिपक्वमलो भवति। अयमेव शिवानुग्रहपात्रं संजायते। शिवानुग्रहेणैव तन्मनसि शिवभक्तिः प्रस्फुटिता भवति। एवं प्रस्फुटितभक्तिक एव साधको वीरशैवसिद्धान्ते दीक्षाधिकारीति निगद्यते। दीक्षादिनाऽयमस्मिन्नेव जन्मनि मुच्यत इत्यस्येदं शरीरमन्तिममित्यभिधीयते। तदुक्तम्—

शुद्धान्तःकरणे जीवे शुद्धकर्मविपाकतः।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी॥
जन्तुरन्त्यशरीरोऽसौ पिण्डशब्दाभिधेयकः।[5] इति।

---

१. ब्र. सू. श्री. १।१।१
२. सि. शि. ६।११
३. सि. शि. ६।१०
४. सि. शि. ५।४८
५. सि. शि. ५।४९

वीरशैवसिद्धान्ते त्रिविधमलनिवारणाय वेधा-मान्त्री-क्रियाभेदेन दीक्षा-त्रैविध्यमङ्गीकृतम् । तत्र वेधादीक्षयाऽऽणवमलनिवृत्तिः, मान्त्रीदीक्षया मायीयमल-निवृत्तिः, क्रियादीक्षया कार्ममलनिवृत्तिश्चेति विज्ञेयम् । अत्रोक्तासु दीक्षासु भाव-प्राण-इष्टाख्यानां लिङ्गत्रयाणां स्वरूपोपदेशः तदुपासनापद्धतिश्च प्रतिपाद्यत इति वर्तते वीरशैवानां वैशिष्ट्यम् । गुरूपदिष्टमार्गेण साधकः शरीरेण स्वेष्टलिङ्गपूजाम्, मनसा प्राणलिङ्गार्चनाम्, बुद्ध्या भावलिङ्गानुसन्धानं च कुर्वन् शिवानुग्रहबलेन शिवस्वरूपो भवति ।

वीरशैवसिद्धान्ताभिमतमलपरिपाकप्रक्रिया, शक्तिपातस्वरूपम्, दीक्षा-त्रैविध्यम्, लिङ्गत्रयस्वरूपम्, तदुपासनापद्धतिश्चेत्यादिकमस्यैव प्रबन्धस्य तृतीय-परिच्छेदे विस्तरेण निरूपयिष्यते । अधुना काश्मीरशैवसिद्धान्तशैवयोरभिमतं शक्तिपातस्वरूपं मनागिव विचार्यते ।

काश्मीरशैवसिद्धान्तेऽपि पशोः पाशनिवारणार्थं दीक्षासंस्कारोऽङ्गीकृतः । सद्गुरुणा क्रियमाणोऽयं दीक्षासंस्कारः शिवानुग्रहरूपशक्तिपातसापेक्षः, अथाप्ययं शक्तिपातो न कर्मसाम्यसापेक्षो न वा मलपरिपाकसापेक्षः । अत एव श्रीमताऽ-भिनवगुप्तेन—"वक्ष्यमाणदीक्षायां कोऽधिकारीति निरूपणार्थं शक्तिपातो विचार्यते" इत्युपक्रम्य "कर्मसाम्यं ततः शक्तिपात इति चेन्न, क्रमिकत्वे विरोधायोगात् । अथ मलपरिपाके शक्तिपातः, सोऽपि किंस्वरूपः ? किं तस्य निमित्तम् ? भेदवादिनां सर्वमसमञ्जसम्" इत्यन्तं कर्मसाम्यस्य मलपरिपाकस्य च शक्तिपातहेतुत्वं खण्डयित्वा—"परमेश्वरः स्वरूपाच्छादनक्रीडया पशुः पुद्गलोऽणुः सम्पन्नः, न च तस्य देशकालस्वरूपभेदविरोधस्तद्वत् स्वरूपस्थगन-निवृत्त्या स्वरूपप्रत्यापत्तिं झटिति वा क्रमेण वा समाश्रयन् शक्तिपातपात्रमणुरुच्यते, स्वातन्त्र्यमात्रसारश्चासौ परमशिवः शक्तेः पातयितेति निरपेक्ष एव शक्तिपातो यः स्वरूपप्रथाफलः"[1] इति कर्मसाम्यमलपरिपाकनिरपेक्षः शक्तिपातः समर्थितः । नन्वेवं निरपेक्षे शक्तिपाते कस्मात् कस्मिंश्चिदेव पुंसि शक्तिपात इति शङ्काप्यत्र कर्तुं न शक्यते, यतो हि सर्वस्यापि परशिवस्वरूपत्वाद् वैषम्यदोष एव नायातीति तेषां सिद्धान्तः । सिद्धान्तेऽस्मिन् तीव्र-मध्य-मन्दभेदेन, पुनश्च प्रत्येकं तीव्र-मध्य-मन्दभेदेन शक्तिपातस्य नवधात्वं प्रतिपाद्यते[2] । प्रसङ्गेऽस्मिन् महर्षिणा पतञ्जलिना प्रतिपादिता मृदु-मध्य-तीव्रादिभेदेन नवप्रकाराः समाधिसाधकयोगिनामवस्था अपि स्मर्तव्याः[3] ।

---

१. त. सा., पृ. ११५-११८　　　　२. त. सा., पृ. ११९-१२५

३. यो. सू. भा. १।२१-२२

सिद्धान्तशैवदर्शने पूर्वोक्तेषु केवल-सकल-अमलाख्येषु त्रिविधेषु पशुषु केवलो नितान्तमोहग्रस्तो न कथमपि चेतते, अमलस्तु मुक्त एव। अतोऽवशिष्टः सकल एव मोक्षाधिकारी भवति। अयं बद्धोऽहमिति जानाति बन्धमोक्षाय चेष्टते च। एवं चेष्टमानं पशुं शिवोऽनुगृह्णाति। शिवानुग्रह एवात्र शक्तिपातशब्देनोच्यते। सिद्धान्तशैवदर्शने स्वतन्त्रः शक्तिपातो नाङ्गीकृतः। तदर्थं मलपरिपाकोऽभ्युपगतः। भोगमोक्षव्यवस्थार्थं जीवानां कर्मानपेक्षितत्वे सर्वमसमञ्जसं स्यादिति भट्ट-रामकण्ठाऽभिप्रैति। तथाहि—"स्वातन्त्र्ये हि कर्माद्यनपेक्षणादकस्मात् सदैव जगतः सृष्टिसंहारौ, कर्महीनस्यापि भोगम्, दुष्कृतेरपि मोक्षम्, मुक्तस्यापि संहारमीश्वरः कुर्यादित्युन्मत्तचेष्टावदसमञ्जसं जगद् भवेत्। तस्मादसमञ्जसता-परिहाराय कर्मादिपाकसापेक्षः सर्वकर्ताऽभ्युपगन्तव्यः। न च तदपेक्षित्व-मस्वातन्त्र्यम्, अपि त्वीश्वरान्तरायत्तता। सा च तस्य परमेश्वरत्वान्नास्तीति स एव स्वतन्त्रः। सत्यां स्थितौ न संहाराद्यकस्माद् भोगादिकं च कर्महीनादेर्न कदाचित् करोतीति सापेक्ष एव शक्तिपातः"[1] इति।

शास्त्रविहितकर्मानुष्ठानजन्यपुण्यविशेषेणैव मलानां परिपाको भवति। पक्वमलानामेव शिवानुग्रहाख्यः शक्तिपातो जायते। एवं शक्तिपातपूत आत्मा सद्गुरुं समासाद्य दीक्षार्थं प्रार्थयते। स च तं परीक्ष्य दीक्षयति। किञ्च, शक्तिपाते यथा मलपरिपाको हेतुस्तथा कर्मसाम्यमपि हेतुरित्यपरोऽपि पक्षो वर्तते सिद्धान्तशैवदर्शने। अत्रेदं विज्ञेयम्—उपकारात्मकमपकारात्मकं चेति कर्म तावद् द्विविधम्। तत्रोपकारेण यो न हृष्यति, अपकारेण च यो न कुप्यति, स एव कर्मसाम्यवान् भवति। तदुक्तम्—

न हृष्यत्युपकारेण नापकारेण कुप्यति।
यः समः सर्वभूतेषु जीवन्मुक्तः स उच्यते॥[2] इति।

एवं मलपरिपाकवशात् कर्मसाम्यरूपबुद्ध्युत्पत्तौ शक्तिपातो जायते। कर्मसाम्यवशेन सम्प्राप्तशक्तिपातो दीक्षाधिकारी भवति। अत्र मलपरिपाक-सापेक्षपक्षः खेटपालस्य, कर्मसाम्यसापेक्षपक्षश्च कस्यचन किरणागम-व्याख्यातुराचार्यस्येति मतमुपस्थापितवन्तः प्रो. व्रजवल्लभद्विवेदमहाभागाः[3]।

एवं मलपरिपाकेन कर्मसाम्येन वा शिवानुग्रहं प्राप्तः साधकः सद्गुरुणा मलक्षयकरीं दीक्षां प्राप्नोति। अत्रापि दीक्षाशब्दस्य—"दीयते ज्ञानसद्भावः

१. मो. का. टी., श्लो. ६९
२. र. त्र. टी., श्लो. ३१४
३. लु. सं., भा. २, उपो. पृ. १५७

क्षीयते च मलत्रयम्" इत्युक्त्या दानक्षपणात्मकार्थद्वययुक्तत्वं निरूप्यते। यथा सूर्यप्रकाशो दाहयति प्रकाशयति च, तथाऽयं दीक्षासंस्कारो मलक्षयं कृत्वा शिवज्ञानं प्रकाशयति। अत्र मलक्षयो नाम—"मलस्य विभागो वा विनाशो वा तिरोभावो वा नाभ्युपगम्यते, अपि तु यथाऽग्नेरुष्णस्पर्शस्य दाहिका शक्तिर्मन्त्रेण निरुध्यते, तथा मलस्यापि व्यापारिका शक्तिरुपायैर्निरुध्यते"[1] इत्युमापतिशिवाचार्येण संसारोत्पादकशक्तिप्रतिबन्धकत्वमेव मलक्षयशब्दार्थो व्यवस्थापितः। एवं दीक्षासंस्कारेण मलक्षये सति जीवात्मनः संचितं कर्म वह्निदग्धबीजवत् पुनर्जन्मकारणं न भवति। प्रारब्धकर्मणश्च भोगेन क्षये जीवो मुक्तो भवति।

काश्मीरशैवदर्शने सिद्धान्तशैवदर्शने च संक्षेपतश्चतुःसप्ततिसंख्याकाः, विस्तरतस्तु सहस्रसंख्याका दीक्षाभेदा निरूपिताः सन्तीति प्रो० व्रजवल्लभद्विवेदमहाभागाः प्रस्तावितवन्तः[2]। जिज्ञासुभिस्तैर्निर्दिष्टानि स्थलान्यवलोकनीयानि।

शक्तिपातप्रक्रियाविमर्शः

अत्र परशिवब्रह्मजिज्ञासोः साधकस्य दीक्षासंस्कार आवश्यकः, स च संस्कारः परशिवानुग्रहरूपशक्तिपातसापेक्षः। अस्मिन् विषये वीरशैव-काश्मीरशैव-सिद्धान्तशैवानां मतैक्यमेव प्रतिभाति। स शक्तिपातः परशिवस्वातन्त्र्यप्रयुक्त इति प्रतिपादयन्तः काश्मीरशैवा मलपरिपाकं कर्मसाम्यं च नापेक्षन्ते। प्राणिनां भोगमोक्षार्थं प्राणिकर्मनिरपेक्षत्वे शिवस्य सर्वोऽपि व्यवहार उन्मत्तव्यवहारवत् स्यात्, स वैषम्यनैर्घृण्यदोषभाग् वा स्यादित्यभिप्रयन्तो वीरशैवाः सिद्धान्तशैवाश्च यथा भोगार्थं कर्मसापेक्षता तथेश्वरानुग्रहरूपशक्तिपातार्थं मलपरिपाकापेक्षा आवश्यकीत्यङ्गीकुर्वते। एतद्विषये वीरशैव-सिद्धान्तशैवयोर्विचारसाम्यं दरीदृश्यते। सिद्धान्तशैवदर्शनेऽपि कैश्चित् कर्मसाम्यं शक्तिपातहेतुरिति निरूप्यते, किन्त्वयं विषयो वीरशैवैर्नाभ्युपगतः। दीक्षासंस्कारेण मलस्य क्षयः, संचितकर्मणो दाहश्च सम्भवतीति प्रारब्धमात्रमवशिष्यते। तस्य भोगेन कालान्तरे क्षये जाते पशोः शरीरपातो भवति। तदा स विदेहमुक्त इत्युच्यते। यावत् प्रारब्धकर्मावशिष्यते, स जीवन्मुक्त इत्यभिधीयते। प्रारब्धकर्मणो भोगेनैव क्षय इत्येतस्मिन् विषये त्रिविधानामपि

१. श. र. सं., पृ. ९०

२. लु. सं., भा. २, उपो. पृ. १६१-१६२

दार्शनिकानां मतैक्यमेव। वीरशैवसिद्धान्ते मुख्यरूपेण त्रिविधा हि दीक्षाऽङ्गीकृता। तदवान्तरसंस्कारा एकविंशतिसंख्याकाः प्रतिपादिताः। काश्मीरशैवाः सिद्धान्तशैवाश्च बहुसंख्याकान् दीक्षासंस्कारान् निरूपितवन्तः। एतेन तेषां दृष्टौ किञ्चित् सूक्ष्मत्वं प्रतिभाति। दीक्षितो वीरशैवसाधकः स्थूलशरीरे यावज्जीवं स्वेष्टलिङ्गं धारयित्वा तदर्चनामुखेनैवान्तर्लिङ्गानुसन्धानं साधयतीतीदं सर्वेभ्यः शैवेभ्यो वैशिष्ट्यं वीरशैवदर्शनस्येबि ज्ञेयम्।

मोक्षस्वरूपविमर्शः

वीरशैवसिद्धान्ते शक्तिसङ्कोचेन बन्धः, तद्विकासेन च मोक्ष इति निरूप्यते। संकुचिता इच्छादिशक्तय एवाऽऽणवादिमलत्वेन व्यवहृता भवन्ति। दीक्षासंस्कारेण मलानां क्षये संजाते क्षीणमलोऽयं जीवः कीटभ्रमर-न्यायेनात्रोक्तषट्स्थलोपासनामार्गेण क्रमशः स्वशक्तीनां बिकासं विधाय परशिववत् सर्वकर्तृत्व-सर्वज्ञतब-परिपूर्णत्व-नित्यत्व-व्यापकत्वरूपशक्तिविशिष्टः सन् तादृशशक्तिविशिष्टे परशिवे—

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते॥[१]

इत्याचार्योक्त्यनुसारं समरसो भवति। इदं सामरस्यमेव वीरशैवानां मुक्तिः।

काश्मीरशैवसिद्धान्तेऽपि इच्छादिशक्तीनां सङ्कोचेन मलावृतः सन् संसारीत्युच्यमानः पशुर्दीक्षया मलक्षये सति सद्गुरुणोपदिष्टज्ञानेन स्ब-स्वरूप-ज्ञानसम्पन्नः सन् द्वैतभावं परित्यज्य—

इत्थं द्वैतविकल्पे गलिते प्रविलङ्घ्य मोहिनीं मायाम्।[२]
सलिले सलिलं क्षीरे क्षीरमिव ब्रह्मणि लयी स्यात्॥

इति परमार्थसारोक्त्यनुसारं परशिवे विलीनो भवति।

सिद्धान्तशैवदर्शने दोक्षाक्षपितकल्मषो निर्मलो जोवः "परेह शिवसमता"[३] इति सद्योज्योतिःशिवाचार्योक्त्यनुसारं शिवसाम्याख्यां परां मुक्तिं लभते।

१. सि. शि. २०।६१
२. प. सा., श्लो. ५१
३. त. सं., श्लो. ५१

सिद्धान्तेऽस्मिन् जीवोऽपि शिववत् सर्वज्ञत्वादिगुणविशिष्ट एव। अथापि संसारदशायां मलावरणेनाप्रकाशमाना गुणा मुक्तौ मलविगमनेनाभिव्यज्यन्ते। तस्मात् स्वीयगुणाभिव्यक्त्या शिवसाम्यमिति सिद्धान्तशैवा अभिव्यक्त्या शिवसाम्यमङ्गीकुर्वते[1]। एतत्सिद्धान्तानुसारं मोक्षेऽपि पशोः शिवात् पृथक् सत्ता स्वीक्रियते। एषा च स्थितिस्तत्त्वप्रकाशे व्यक्तीकृता। तद्यथा—

मुक्तात्मानोऽपि शिवाः किन्त्वेते यत्प्रसादतो मुक्ताः।
सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः ॥[2] इति।

अवधूतसिद्धोऽपि—"परमशिवः सिद्धान् प्रत्युपरताधिकारोऽप्यन्येष्वनुपरताधिकारः। सिद्धः पुनरेकान्तेन सर्वत एवोपरताधिकार इति भेदः"[3] इत्येवं परमशिवमुक्तशिवयोः शाश्वतिकं भेदमाह। अत एवेदं द्वैतदर्शनमित्युच्यते।

तदेवं मुक्तिस्वरूपपर्यालोचनायां क्रियमाणायां वीरशैवाः काश्मीरशैवाश्च शक्तीनां विकासेन मुक्तिरिति, सिद्धान्तशैवा गुणानामभिव्यक्त्या मुक्तिरिति विकासवादेनाभिव्यक्तिवादेन च मोक्षस्वरूपं व्यवस्थापयन्तो दृश्यन्ते। वीरशैवकाश्मीरशैवयोर्मुक्तिस्वरूपविषये साम्ये विद्यमानेऽपि काश्मीरशैवाः—"असंकुचिता अपि संकोचवत्यो भान्ति" इतीच्छादशक्तीनां सङ्कोचविकासौ, अर्थाद् बन्धमोक्षौ अवास्तवाविति मन्यन्ते, वीरशैवास्तूभयोरपि सत्यत्वमङ्गीकुर्वन्ति। अत एवात्र तद्वास्तविकभेदनिवृत्तिपूर्वकं वास्तविकाद्वैतप्राप्तये विशिष्टा षट्स्थलोपासनापद्धतिरङ्गीकृता। एवमेव सत्यस्य बन्धस्य निवृत्तिर्न ज्ञानमात्रेण संभवतीति ज्ञानकर्मणोः समसमुच्चयवादोऽप्यभ्युपगतः।

ज्ञानकर्मणोः समसमुच्चयः

अत्र शक्तिविशिष्टाद्वैतवेदान्ते न केवलं कर्मणो न वा केवलं ज्ञानस्य मोक्षहेतुत्वमङ्गीक्रियते, किन्तु "भावकर्मसमायुक्तं ज्ञानमेव विमुक्तिदम्"[4] इत्याचार्योक्त्या भावकर्मसमुच्चितं ज्ञानं मोक्षकारणमित्युररीक्रियते। अत्र भावना तूभयान्वयिनी, अर्थात् कर्माचरणे ज्ञानप्राप्तौ च भावनाया आवश्यकता वर्तते। तत्र कर्मान्विता भावना भक्तिरिति, ज्ञानान्विता च भावना निदिध्यासनमिति

१. आ. मी., पृ. ५१-५२
२. त. प्र. श्लो. ६
३. प. मो. नि. का., श्लो. ३
४. सि. शि. १६।२५

कथ्यते। अत एव पूज्यपादैः श्रीरेणुकाचार्यैः—अर्थहीना वाणी, पतिहीना सती, श्रुतिहीना च बुद्धिर्यथा निष्फला, तथा भावहीनमपि कर्म निष्फलमित्युक्त्वा भावनासहितस्यैव कर्मणः प्राशस्त्यमुक्त्वा[1],

चक्षुर्हीनो यथा रूपं न किञ्चिद्वीक्षितुं क्षमः।
भावहीनस्तथा योगी न विश्वं द्रष्टुमीश्वरः॥[2]

इति निषेधविधया भावनाविशिष्टस्यैव ज्ञानस्योत्कृष्टत्वमुक्तम्। तस्माद् भावकर्मसमन्वितं ज्ञानं मोक्षसाधनमिति निश्चीयते।

कर्मणो द्वैविध्यम्

ननु यदि ज्ञान-कर्म-भावानां त्रयाणामपि मोक्षसाधनत्वं चेत्, "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[3] इति ज्ञानातिरिक्तस्य मोक्षसाधनत्वं निरस्य ज्ञानस्यैकस्यैव मोक्षसाधनत्वप्रतिपादकश्रुतिविरोधः? इति चेन्न, ज्ञानकर्मणोः समसमुच्चयेन, ज्ञानकर्मणोरङ्गाङ्गिभावसमुच्चयेन चेति द्वेधाऽत्र समाधातुं शक्यत्वात्। तथाहि—पूज्यपादा रेणुकाचार्या महर्षिमगस्त्यं प्रति 'अन्धपङ्गुन्यायेन' ज्ञानकर्मणोः समसमुच्चयवादमुपदिश्य[4],

---

१. अर्थहीना यथा वाणी पतिहीना यथा सती।
श्रुतिहीना यथा बुद्धिर्भावहीना तथा क्रिया॥
भावनाविहितं कर्म पावनादपि पावनम्।
तस्माद् भावनया युक्तं परधर्मं समाचरेत्॥
भावेन हि मनःशुद्धिर्भावशुद्धिश्च कर्मणा।
इति संचिन्त्य मनसा योगी भावं न सन्त्यजेत्॥
शिवभावनया सर्वं नित्यनैमित्तिकादिकम्।
कुर्वन्नपि महायोगी गुणदोषैर्न बाध्यते॥ (सि. शि. १६।१९, ६८-६९)

२. सि. शि. १६।२०

३. श्वे. उ. ३।८

४. अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्॥
ज्ञाने सिद्धेऽपि विदुषां कर्मापि विनियुज्यते।
फलाभिसन्धिरहितं तस्मात् कर्म न संत्यजेत्॥

ज्ञानहीनं सदा कर्म पुंसां संसारकारणम् ।
तदेव ज्ञानयोगेन संसारविनिवर्तकम् ॥[1]

इति केवलस्य कर्मणो बन्धनहेतुत्वेऽपि ज्ञानसहितस्य तस्यैव मोक्षसाधनत्वमिति समर्थितवन्तः ।

इदमत्र रहस्यम्–कर्म तावद् द्विविधम्, पतिकर्म पशुकर्म चेति। तत्राग्निष्टोमाद्यश्वमेधान्ता यज्ञा स्वर्गादिसाधनानीति नहि तैर्निःश्रेयसप्राप्तिरिति पाशाश्रयत्वात्तेषां पशुकर्मता। इष्टलिङ्गधारण-लिङ्गार्चन-स्वेष्टलिङ्गार्पितप्रसादग्रहण गुरुजङ्गमपूजन - तत्पादोदकप्रसादसेवन - पञ्चाक्षरमन्त्रजप - भस्मधारण-रुद्राक्षधारणाद्यष्टावरणानाम्, लिङ्गाचार-सदाचार-शिवाचार-गणाचार-भृत्याचाराख्यानां पञ्चाचाराणां च वीरशैवीयविशेषधर्माणां पाशविमोचकत्वात् तेषां पतिकर्मता। एतेषां पतिकर्माभिधेयानां वीरशैवीयविशेषधर्माणां विस्तृतं विवेचनं तृतीयपरिच्छेदे चतुर्थपरिच्छेदे च द्रष्टव्यम् ।

पूज्यपादैर्नीलकण्ठशिवाचार्यैः—"अथाऽतो ब्रह्मजिज्ञासा"[2] इत्यस्य शारीरिकसूत्रस्य व्याख्यानावसरेऽथशब्दस्य धर्मानन्तर्यमुक्त्वा,

धर्मानन्तर्यमेवातो वाच्यं धर्मो द्विधा मतः ।
पशुधर्मः प्राथमिकः पतिधर्मो द्वितीयकः ॥
पशुधर्म इति प्राहुर्यस्तु काम्यफलप्रदः ।
निष्कामेन स्वपापस्य विच्छित्यै समनुष्ठितः ॥
यो धर्मस्तं तु शास्त्रेषु पतिधर्मं प्रचक्षते ।[3]

इति पशुपतिकर्मणोर्विभागं वैशिष्ट्यं चोक्त्वा, भस्मरुद्राक्षाणां धारणम्, त्रिकाले स्वेष्टलिङ्गस्य पूजा, श्रुतिशिरोरत्नस्य पञ्चाक्षरमहामनोर्जपः, गुरुलिङ्ग-

---

आचार एव सर्वेषामलङ्काराय कल्प्यते ।
आचारहीन; पुरुषो लोके भवति निन्दितः ॥
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ॥ (सि. शि. १६।११-१४)

१. सि. शि. १६।२७

२. ब्र. सू १।१।१

३. क्रि. सा., भा. १, पृ. १६-१७

जङ्गमानां च पादोदक-प्रसादसेवनमित्यादिकं पाशविमोचकमिति तेषां पतिधर्मत्वमुपदिष्टम्[1]।

किञ्च, तैरेवाचार्यचरणैः—

अनुतिष्ठन् पशोर्धर्मान् पतिधर्मान् स चार्हति।
यथा पिपीलिका वृक्षमूलमाघ्राय तत्फलम्॥
आरुह्य लभते तद्वत् पतिधर्मैकतत्परः।
यथा विहङ्गः पक्षाभ्यां फलितं वृक्षमागतः॥
पश्यन् फलमवाप्नोति तद्वच्छीघ्रं तदर्हति।[2]

इत्यादिना निष्कामस्य पशुधर्मानुष्ठानपरस्य पिपीलिकासादृश्यम्, पतिधर्मानुष्ठानपरस्य विहङ्गमसादृश्यमुक्तम्। एतेन पशुधर्माणां निष्कामबुद्ध्या समनुष्ठितानामपि पतिधर्मसमर्पकत्वेन परम्परया मुक्तिसाधनत्वम्, पतिधर्माणां तु ज्ञानेन सह साक्षान्मुक्तिसाधनत्वमिति पर्यवस्यति। तस्मात् पशुकर्मभिर्यज्ञादिभिः साकं ज्ञानस्य समसमुच्चये विरोधेऽपि पतिकर्मभिरष्टावरण-पञ्चाचाराख्यैर्विशेषाचरणैर्ज्ञानेन समसमुच्चये न कोऽपि विरोधः।

श्रुतिस्मृतिसम्मतः समुच्चयवादः

विद्यां चाऽविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते॥[3]

---

१. भस्मधारणमुख्यं हि कालाग्न्युपनिषन्मुखैः।
बृहज्जाबालमुख्यैश्च विहितं तत् पदे पदे॥
रुद्राक्षधारणं चैव दहरोपासनादिकम्।
कालयोः शिवपूजा च त्रिषु कालेषु वा सदा॥
विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
तत्र पञ्चाक्षरो मन्त्रः शिव इत्यक्षरद्वयम्॥
इति श्रुतिशिरोरत्नशिरोरत्नमनोर्जपः।
आचार्यदेव इत्युक्तं मन्त्रदेशिकपूजनम्॥
प्रसादग्रहणं तस्येत्याद्याः पाशविमोचकाः।
पतिधर्मा इमे ज्ञेयास्तदानन्तर्यमत्र च॥
(क्रि. सा., भा. १, पृ. १७)

२. क्रि. सा., भा. १, पृ. १७

३. ई. उ. ११

इति श्रुत्यापि ज्ञानकर्मणोः समसमुच्चयः प्रतिपादितः। अस्याः श्रुतेर्व्याख्यानावसरे पण्डितप्रवरा उमचिगिशङ्करशास्त्रिमहाभागा वीरशैवदर्शनस्य वैशिष्ट्यमेवं प्रतिपादितवन्तः। तथाहि—"विद्यां च ब्रह्मात्मैक्यज्ञानं च, अविद्यां च विद्याभिन्नां क्रियां च शिवलिङ्गयजनभजनादिरूपाम्, तदुभयं सह मिलितं परस्परं सामानाधिकरण्यापन्नम्, यः परमपुरुषार्थसाक्षात्साधनत्वेन वेद जानाति, स अविद्यया शिवलिङ्गार्पितपतिकर्मणा, मृत्युं मरणजननादिप्रवाहमूलं मलत्रयम्, तीर्त्वा अतिक्रम्य, विद्यया स्वस्वरूपशिवज्ञानेन, अमृतं शक्तिविकासरूपममृतत्वम्, अश्नुते प्राप्नोति"[१] इति।

ननूत्पत्त्याप्तिविकृतिसंस्कृतीनां कर्मफलत्वाद् अविद्यानिवृत्तिफलत्वाच्च विद्यायाः कथमनयोः सामानाधिकरण्यम्? नहि शुक्तिकाशकलं साकल्येनाकलयतः कलधौतविभ्रमनिवृत्तिः स्नानाचमनकर्मापेक्षया विलम्बते। तस्माद् ब्रह्मसाक्षात्कारस्यैव तदविद्यानिवृत्तिफलकत्वमित्यभ्युपेयम्। श्रूयते च—"तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[२] इति। स्मर्यते च—

ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्यते।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः॥

इति चेन्न, तेषां वचनानां केवलानामेव स्थूलकर्मणां कैवल्यसाधनत्वनिराकरणपरत्वात्, समुच्चितानामुपपन्नत्वात् तत्साधनभावस्य, अन्यथा "अन्धं तमः प्रविशन्ति"[३] इत्याद्युक्तेरेकैकनिन्दापुरस्सरम् "विद्यां चाविद्यां च"[४] इत्यादिना ज्ञानकर्मणोः समुच्चितयोर्मोक्षसाधनत्वप्रतिपादनं न स्यात्। तथा च सङ्कुचितशक्तित्रयरूपमलत्रयनिवृत्तिः शक्तिविकासरूपशिवत्वप्राप्तिर्मोक्षः। तत्र मृत्युशब्दितकार्मादिमलनाशफलकत्वमविद्याशब्दितकर्मणां हार्दाकाशमध्यलिङ्गधारणादीनां सूक्ष्माणाम्, विद्यायास्तु तिरोहितस्वशक्तेराच्छादनविगलनफलकत्वम्, वायोः सूर्याच्छादनमेघनिःसरणफलकत्ववत्।

अपि च, "तेनैति ब्रह्मवित् पुण्यकृत् तैजसश्च"[५], "सत्येन लभ्यस्तपसा ह्येष आत्मा सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्"[६], "तत्प्राप्तिहेतुर्ज्ञानं च कर्म चोक्तं

१. ई. उ. ११, शाङ्करीव्याख्या।
२. श्वे. उ. ३।८
३. ई. उ. १२
४. ई. उ. ११
५. बृ. उ. ४।४।९
६. मुण्ड. ३।५

महामुने"[1], "यथान्नं मधुसंयुक्तं मधु चान्नेन संयुतम्। एवं तपश्च विद्या च संयुक्तं भेषजं महत्" इत्याद्याः श्रुतिस्मृतयोऽपि ज्ञानकर्मणोः समसमुच्चयं प्रतिपादयन्ति। तस्मात् कर्मनिन्दाप्रतिपादकवाक्यानां केवलं ज्योतिष्टोमादि-स्थूलकर्मविषयत्वमेवेति निश्चीयते। नहि ज्ञानसहकृतलिङ्गधारणादिपतिकर्म-जन्यमोक्षस्योत्पाद्याप्यविकार्यसंस्कार्यत्वं सम्भवति। उत्पत्त्याप्तिविकृति-संस्कृतयस्तु ज्ञानासहकृतपशुकर्मणां फलानि सन्तु। ज्ञानविशिष्टपतिकर्मणां तु पुनरावृत्तिरहितसर्वज्ञत्वादिषडङ्गशिवत्वप्राप्तिरेव फलमिति निर्णीयते।

टी० जो० सिद्धप्पाराध्यमहोदयास्तु पक्षान्तरेणापि समादधति। तथाहि—"अत्र केचित् पुरुषार्थाधिकरणे विहितत्वाधिकरणे च कर्मणां ज्ञानाङ्गत्वं भाष्ये स्पष्टं प्रतिपादितम्। तत्र यद्यपि ज्ञानकर्मोभयानुष्ठानं सर्वेषामाश्रमिणां विधेयमिति भाष्ये ज्ञानकर्मसमुच्चयशब्दः प्रयुक्तः, अथापि पूर्वमुत्तरत्र च कर्मणामङ्गत्वस्य ज्ञानाङ्गत्वस्य च स्पष्टं प्रतिपादनात् समुच्चयोऽयं न समसमुच्चयः, अपि त्वङ्गाङ्गिभावसमुच्चय एव। कर्मज्ञानयोरङ्गाङ्गिभावेऽ-प्यङ्गिनोर्यत्फलं तदेवाङ्गस्यापि फलमिति न्यायेन कर्मणोऽपि मोक्षसाधनत्वं न विरुध्यते। सिद्धान्तशिखामणौ—"अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी"[2] इति कथनेऽप्युपसंहारे "ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः"[3] इत्यत्राचार-युक्तेन ज्ञानेनेति निर्देशाद् ज्ञानस्य प्राधान्यं प्रतीयत एव। ज्ञानस्य प्राधान्ये कर्मणोऽङ्गत्वं स्वतः प्राप्नोत्येव। यदि "अन्धपङ्गुवत्" इत्यादिश्लोकमात्रेण ज्ञानकर्मणोरुभयोरपि मोक्षसाधनत्वं वक्तव्यमित्याग्रहः, तर्हि "शिवोऽहमिति भावो हि शिवतापत्तिकारणम्। न ज्ञानमात्रं नाचारो भावयुक्तः शिवो भवेत्॥"[4] इत्यत्र भावस्यापि मोक्षसाधनत्वकथनेन ज्ञान-कर्म-भावानां त्रयाणामेव समुच्चयो वक्तव्यो भवेत्। अतो ज्ञानमेव साक्षान्मोक्षसाधनम्, भावः कर्म च तदङ्गम्, "अङ्गिफलमङ्गस्यापि" इति न्यायेन कर्मज्ञानयोरपि मोक्षसाधनत्वात् तथा व्यपदेशः। अतः कर्मज्ञानयोरङ्गाङ्गिभावसमुच्चयो विवक्षितः, न समसमुच्चयः। तथा च कर्मणोऽप्राधान्येन स्वातन्त्र्येण च तस्य मोक्षसाधनत्वाभावात् "नान्यः पन्था विद्यतेऽयनाय" इत्यत्र ज्ञानातिरिक्तस्य मोक्षसाधनत्वनिषेधो न विरुध्यत इति श्रुतिसूत्रागमानां सामरस्यमिति वदन्ति।

---

१. भ. सं. उ. १।३२

२. सि. शि. १६।११

३. सि. शि. १६।१४

४. सि. शि. १६।१६

नान्यः पन्थेति वाक्येन मार्गान्तरनिषेधतः ।
तेषां विद्याङ्गता प्रोक्ता नान्यथेति विनिश्चयः ॥

इति क्रियासारेऽपि कर्मणां विद्याङ्गत्वमुक्तम्"[१] इति ।

शिवानुग्रहस्य मोक्षकारणत्वम्

वस्तुतस्तु शक्तिविशिष्टाद्वैतवेदान्ते परशिवानुग्रहादेव मोक्ष इति स्वीक्रियते । तदुक्तं पूज्यपादैः श्रीमद्भी रेणुकाचार्यैः—

शम्भोः शिवप्रसादेन संसारच्छेदकारिणा ।
मोहग्रन्थिं विनिर्भिद्य मुक्तिं यान्ति विवेकिनः ॥

विना प्रसादमीशस्य संसारो न निवर्तते ।
विना सूर्योदयं लोके कुतः स्यात्तमसो लयः ॥

सर्वानुग्राहकः शम्भुः केवलं कृपया प्रभुः ।
मोचयेत् सकलान् जन्तून्न किञ्चिदिह कारणम्[२] ॥ इति ।

स चायं शिवानुग्रहो न केवलं परशिवज्ञानादेव, अपि तु तदर्थं तदर्थनरूपं कर्माप्यपेक्ष्यते । अतः पूज्यपादाः—"शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते"[३] इति कर्मणः, "शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते । शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम् ॥"[४] इति ज्ञानस्य च लक्षणमुक्तवन्तः । तस्मात् शिवज्ञानसम्पन्नः शिवार्चनेन शिवानुग्रहं प्राप्य मुक्तो भवतीति शिवानुग्रहार्थमपेक्षितयोर्ज्ञानकर्मणोरपि मोक्षहेतुत्वं स्वीकृत्य ज्ञानकर्मणोः समसमुच्चयोऽत्र प्रतिपाद्यते ।

लोकसंग्रहार्थं नित्यनैमित्तिककर्मानुष्ठानम्

इह जगति—"कश्चिद्धीरः प्रत्यगात्मानमैक्षत्"[५] इति श्रुतिप्रमाणेन ज्ञानिनां संख्या स्वल्पीयसी एव । शिवोऽहमिति शिवात्मैक्यज्ञानसम्पन्नो यदि

---

१. श. वि. द., पृ. १२८-१२९.
२. सि. शि. १८।५९-६१
३. सि. शि. ९।२२
४. सि. शि. १६।३१
५. कठो. ४।१

कश्चित् स्वैराचारी स्याच्चेत्, तदा सामान्या लौकिका अपि जनास्तं दृष्ट्वा स्वैराचारिणो भूत्वा सामाजिकव्यवस्थां दूषयेयुरिति तद्दोषदूरीकरणार्थं वीरशैव-सिद्धान्ते ज्ञानामृतेन तृप्तस्यापि शिवयोगिनो यावज्जीवं नित्यादिविहित-कर्मानुष्ठानमादिशन्त्याचार्याः। तथाहि—

अधर्मं न स्पृशेत् किञ्चिद्विहितं धर्ममाचरेत्।
तं च कामविनिर्मुक्तं तमपि ज्ञानपूर्वकम्॥

धर्म एव समस्तानां यतः संसिद्धिकारणम्।
निःस्पृहोऽपि महायोगी धर्ममार्गं च न त्यजेत्॥

ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न सन्त्यजेत्।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः॥

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते।
सदाचारं विना तस्य प्रसादो नैव जायते[1]॥ इति।

तस्माच्छिवानुग्रहार्थं लोकसंग्रहार्थं च ज्ञानिभिरपि नित्यं कर्मावश्यं कर्तव्यमिति ज्ञानकर्मणोः समसमुच्चय आवश्यक एव।

एवं ज्ञानकर्मसमसमुच्चयवादेन मोक्षप्राप्तिं प्रतिपादयद्भिर्वीरशैवाचार्यै-स्तयोः सहकारिसाधनत्वेनाष्टावरणानि, पञ्चाचाराश्च प्रतिपादितानि। सिद्धान्तेऽस्मिन्नष्टावरणानि साधकस्याङ्गानीति, पञ्चाचाराः प्राणाश्चेति प्रतिपाद्यन्ते। तस्मात् साधकोऽष्टावरणयुक्तः पञ्चाचारसम्पन्नः सन् ज्ञानकर्मणोः साहाय्येन षट्स्थलोक्तमार्गेणोपासनां कुर्वन्नेव शिवेन समरसो भवति।

अत्राङ्गीकृतमष्टावरण-पञ्चाचार-षट्स्थलाख्यं तत्त्वत्रयं दर्शनान्तरेष्व-नङ्गीकृतमिति तस्य विस्तृतं स्वरूपं सविमर्शं क्रमशः प्रस्तूयते।

---

१. सि. शि. १६।६१, ६४-६६

तृतीयः परिच्छेदः

अष्टावरणविज्ञानम्

"श्रेयांसि बहुविघ्नानि" इत्युक्त्यनुसारं श्रेयोमार्गे प्रवृत्तैः साधकैः स्वसाधनेषु बहुविधा विघ्ना अनुभूयन्ते। विनैव विघ्नपरिहारं न कोऽपि स्वलक्ष्यं प्राप्नोति। अतः षट्स्थलमार्गेण शिव-जीवैक्यरूपलिङ्गाङ्ग-सामरस्याख्यमोक्ष-प्रेप्सया प्रवृत्तानां साधकानां विघ्नबाधानिवारणार्थं वीरशैवाचार्या अष्टविधानि रक्षाकवचानि व्यवस्थापयामासुः, तान्येवात्र सिद्धान्ते 'अष्टावरणानि' इत्युच्यन्ते। चन्द्रज्ञानागमे—

गुर्लिङ्गं जङ्गमश्च तीर्थं चैव प्रसादकः।
भस्म-रुद्राक्ष-मन्त्राश्चेत्यष्टावरणसंज्ञिताः॥[1]

इति तेषामष्टावरणानां नामान्युल्लिखितानि। तदनुसारम्—१. गुरुः, २. लिङ्गम्, ३. जङ्गमः, ४. पादोदकम्, ५. प्रसादः, ६. भस्म, ७. रुद्राक्षः, ८. मन्त्र इतीमान्येवाष्टावरणानि। उक्तं च भगवता भाष्यकारेण श्रीपतिपण्डिताराध्येनापि—

भस्म रुद्राक्षकं लिङ्गं गुरुर्मन्त्रं तथा चरः।
पादोदकं प्रसादश्च शैवाष्टावरणानि हि॥[2] इति।

तदत्र प्रथमत आवरणशब्दार्थं निरूप्य क्रमशस्तेषामष्टावरणानां स्वरूपं विमृश्यते।

आवरणशब्दार्थविचारः

"आव्रियते देहादिकं येन तदावरणम्" इति त्वावरणशब्दस्य व्युत्पत्तिः। अस्य चाच्छादनम्, संगोपनम्, संवेष्टनमित्याद्यनेकेऽर्था भवन्ति। लोके

---

१. च. ज्ञा. क्रि. २।१

२. ब्र. सू. श्री. १।२।२, पृ. १६६

चावरणस्य प्रामुख्येन द्वे प्रयोजने भवतः। तत्र प्रथमं स्वरूपाच्छादनम्, द्वितीयं स्वरूपसंरक्षणं चेति।

तत्र तावदद्वैतवेदान्तेऽविद्यायामावरण-विक्षेपात्मकं शक्तिद्वयमङ्गीकृतम्। तत्रावरणशक्त्या आत्मनो वास्तविकं स्वरूपमाव्रियते। अत एव जीवः संसारे संसरतीति वेदान्तिनः प्रतिपादयन्ति। वीरशैवसिद्धान्तेऽष्टावरणे प्रयुक्तस्यावरण-शब्दस्य रक्षाकवचत्वार्थस्वीकारादेभिरष्टावरणैर्जीवो दोषैः परिरक्षते सांसारिकैः। तदुक्तमागमे—

इमानि शिवभक्तानां भवदोषततेः सदा।
निवारणैककार्याणि ख्यातान्यावरणाख्यया ॥[1] इति।

युद्धभूमौ योद्धा शत्रूणां शस्त्रप्रहरणैः स्वशरीरपरिरक्षणाय यथा कवचेन शरीरमावृणोति, तथैभिः शिवभक्तः कामक्रोधादिभिररिषड्वर्गैः परिरक्ष्यत इतीमान्यष्टावरणानीत्युच्यन्ते। तस्माद्यथा 'मशकार्थो धूमः' इत्यत्र "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इति कोशप्रमाणेन मशकनिवृत्त्यर्थो धूम इत्यर्थोपलब्धिर्जायते, तथैव आवरणार्थमावरणम्, अर्थादज्ञानाद्यावरणनिवारणार्थमेतानि साधनानि भवन्तीत्यावरणशब्देन व्यवह्रियन्ते।

यद्यपि योगशास्त्रे स्वीकृतानि यमनियमाऽऽसनप्राणायामप्रत्याहार-धारणाध्यानसमाध्याख्यान्यष्टौ योगाङ्गानि साधकस्य देह-मनो-बुद्ध्यादीन् दुर्वृत्तितो परिरक्षयन्ति, अथापि तेषां तत्र नावरणशब्देन व्यवहारो दरीदृश्यते।

तस्मादत्र प्रयुक्तोऽयमावरणशब्दोऽन्यदर्शनापरामृष्टः पारिभाषिकशब्द इति विज्ञेयम्। एवमावरणशब्देन व्यवहृतेष्वष्टस्वावरणेषु गुरुः, लिङ्गम्, जङ्गमश्चेति त्रीण्याराध्यानि (पूजनीयानि) भवन्ति। विभूतिः, रुद्राक्षः, मन्त्रश्चेति त्रीणि पूजायाः सामग्रीरूपाणि सन्ति। अवशिष्टे च पादोदक-प्रसादाख्ये पूजायाः फलरूपे।

इमान्यष्टावरणानि वीरशैवसिद्धान्ते साधकस्याङ्गानीति व्यवह्रियन्ते। लोके यथा करचरणादिसर्वावयवयुक्तात् शरीराल्लौकिकव्यवहारः सुचारुरूपेण संपद्यते, तथोक्ताष्टावरणेषु सत्स्वेव साधकस्य पारमार्थिको व्यवहारः सम्यक्

१. मुण्ड. १।२।१२

संपद्यत इति तानि साधकस्याङ्गानीति विज्ञेयम् । एतेष्वेकस्याप्यभावे साधकस्य लक्ष्यप्राप्तिर्न सिद्ध्यति । तस्माद्वीरशैवा अष्टावरणेषु निष्ठावन्तो भवन्ति । तदत्र क्रमशस्तेषां स्वरूपम्, तत्सम्बन्धेन च साधकस्य कथं परिरक्षा भवतीति यथाशास्त्रं यथामति च विमृश्यते । तदत्र प्रथमावरणभूतस्य गुरोः स्वरूपं विचारयामः ।

१. श्रीगुरुः

चतुर्विधेषु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थ इति सर्वैरपि दार्शनिकैरभ्युपगम्यते । स च लिङ्गाङ्गसामरस्यात्मक इति शक्तिविशिष्टाद्वैतसिद्धान्तः । लिङ्गाङ्गसामरस्यात्मकमिदं ज्ञानं सद्गुरोः करुणां विना दुष्प्रापमिति "तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"[१] इत्युपनिषद्वचनप्रामाण्येनास्मिन्नपि सिद्धान्ते गुरूपसत्तिर्विधीयते । तथाहि—

जिज्ञासुः सर्वसंसारदोषध्वंसकरं शिवम् ।
उपैति लोकविख्यातं ··· ······ ··· ···· ··· ।।
···· ···· ··· ··· ···श्रीगुरुं शिववादिनम् ।।[१] इति ।

तदत्र किं तावत्सद्गुरोः स्वरूपम् ? किं तल्लक्षणम् ? कथं तस्य सेवा विधेया ? कया रीत्या च स स्वशिष्यं भवसागरादुत्तारयति—इत्याद्या बह्व्यो जिज्ञासाः सम्भवन्ति । एतासां सर्वासां समाधानं यथामति सप्रमाणं प्रस्तूयते ।

प्रथमगुरुः शिवः

महर्षिः पतञ्जलिः—"स पूर्वेषामपि गुरुः कालेनानवच्छेदात्"[२] इत्यस्मिन् योगसूत्रे शिव एव प्रपञ्चस्य प्रथमगुरुरिति प्रतिपादितवान् । तत्तु समीचीनमेव प्रतिभाति । यतो हि संसारोरगदष्टानामज्ञजीवानामज्ञाननिवारणार्थमेव भगवान् शिवो वेदानागमांश्चाविश्चकार । तथा चोक्तम् —

सद्योजातेन ऋग्वेदं वामदेवेन याजुषम् ।
अघोरेण तथा साम पुरुषेण त्वथर्वणम् ।।
ईशानेन मुखेनैव कामिकाद्यागमांस्तथा ।
जनयामास विश्वेशः सर्वसिद्धिप्रदायकः ।।[३] इति ।

---

१. सि. शि. ६।१-६
२. यो. सू. १।२६
३. ब्र. सू. श्री. १।१।३

एतेषां वेदागमानामध्ययनेन मनुष्यो यदि गुरुपदवाच्यो भवति, तर्हि तेषामाविष्कारकः शिवः कथं न गुरुः स्यात्? तस्मात् "ज्ञानधर्मोपदेशेन कल्प-प्रलय-महाप्रलयेषु संसारिण उद्धरिष्यामि"[१] इति संकल्पवान् शिवः प्रपञ्चस्य प्रथमगुरुरेव। अत एव—"गृणाति उपदिशति वेदशास्त्राणि इन्द्रादिदेवेभ्यः" इति, यद्वा "गीर्यते स्तूयते देवमनुष्यगन्धर्वादिभिरिति गुरुरीश्वरः"[२] इत्याद्युक्तिरपि सङ्गच्छते।

अज्ञानविनाशद्वारा धर्मोपदेशकात् परशिवात् प्रसृतोऽयं ज्ञानप्रवाहो गुरु-परम्परयाऽद्यापि प्रवहमानोऽस्ति। अयं ज्ञानप्रवाह 'ओघ' इत्याख्यायते। आगमशास्त्रे ओघोऽयं दिव्यौघ-सिद्धौघ-मानवौघभेदेन त्रिधा विभक्तः। शिवो-पदिष्टं ज्ञानं तन्निकटवर्तिनो गणा देवाश्च प्रथमं समाकर्णयन्ति। ते च देवाः पुनः सिद्धानुपदिशन्ति, सिद्धाश्च मानवानित्येवं निरन्तरमनादिकालादारभ्य ज्ञानप्रवाहः प्रवर्तितो वर्तते।

५. वीरशैवीयो दिव्यौघः

शिवस्य नन्द्याद्यनन्ताः प्रमथगणाः सन्ति। तेषु प्रमथगणेषु रेवणुक-दारुक-घण्टाकर्ण-धेनुकर्ण-विश्वकर्णाख्याः पञ्च गणाः शिवस्यात्यन्तनिकटवर्तिनः। एभ्यः शिवः स्वकीयं ज्ञानं सम्यगुपदिश्य भूलोके तत्प्रतिष्ठापनाय तान् प्रेषयामास। ते च गणाधीश्वराः शिवाज्ञया रेवणाराध्य-मरुलाराध्य-एकोरामाराध्य-पण्डिता-राध्य-विश्वाराध्याख्यैरभिधानैर्भुवनप्रसिद्धेभ्यः पञ्चशिवलिङ्गेभ्यः प्रादुर्भूताः। तदुक्तं स्वायंभुवागमे—

श्रीमद्रेवणसिद्धस्य कुल्यपाकपुरोत्तमे।
सोमेशलिङ्गाज्जननमावासः कदलीपुरे॥

तद्वन्मरुलसिद्धस्य वटक्षेत्रे महत्तरे।
सिद्धेशलिङ्गाज्जननं स्थानमुज्जयिनीपुरम्॥

द्राक्षारामे रामनाथलिङ्गाद् युगचतुष्टये।
एकोरामस्य जननमावासस्तु हिमालये॥

सुधाकुण्डाख्यसुक्षेत्रे मल्लिकार्जुनलिङ्गतः।
जननं पण्डितार्यस्य निवासः श्रीगिरौ शिवे॥

१. यो. सू. भा. १।२५
२, आ. त., पृ. १००

काश्यां विश्वेश्वरे लिङ्गे विश्वाराध्यस्य संभवः।
स्थानं श्रीकाशिकाक्षेत्रं शृणु पार्वति सादरम्॥[1] इति।

इदमत्रैदम्पर्यम्—उपर्युक्तस्य स्वायम्भुवागमस्य वचनानुसारमान्ध्रप्रदेशस्य कुल्यपाक(कोलनुपाक)क्षेत्रस्थसोमेश्वराख्यशिवलिङ्गाद् दिव्यदेहधारी श्रीरेवणाराध्यः प्रादुर्बभूव। धर्मप्रचारार्थं कर्नाटकप्रान्ते बालेहोन्नूरग्रामे पीठमेकं संस्थापितमनेनाचार्यवर्येण। तदधुना 'रम्भापुरीपीठम्' इति नाम्ना प्रख्यातमस्ति।

मध्यप्रदेशस्यावन्तिकानगरीयवटक्षेत्रस्थसिद्धेश्वरमहालिङ्गाद् मरुलाराध्यः प्रादुरासीत्। स च कर्नाटकप्रदेशीयबल्लारीमण्डले उज्जयिनीग्रामे पीठमेकं प्रतिष्ठापयामास। तदधुना सद्धर्मपीठमिति नाम्ना समाख्यायते।

द्राक्षारामक्षेत्रस्थरामनाथलिङ्गात् प्रादुर्भूत एको रामाराध्यो धर्मप्रचारार्थं हिमालये पीठमेकं संस्थापयामास। उत्तरप्रदेशीये ओखिमठे तद् वैराग्यपीठमद्यापि विराजतेतराम्।

आन्ध्रप्रदेशस्य श्रीशैलक्षेत्रीयमल्लिकार्जुनाख्यज्योतिर्लिङ्गात् प्रादुर्भूतः पण्डिताराध्यस्तत्रैव पीठमेकं संस्थापितवान्। तदधुना सूर्यसिंहासनपीठमिति नाम्ना सुप्रसिद्धमस्ति।

उत्तरप्रदेशीय-काशीक्षेत्रस्थिताद् विश्वनाथाख्यज्योतिर्लिङ्गाद् विश्वाराध्यः प्रादुरासीत्। धर्मप्रचारार्थं तेन काश्यामेव पीठमेकं प्रतिष्ठापितम्। तच्च ज्ञानसिंहासनपीठमित्याख्यायते। अधुना तदेव 'जङ्गमवाडी मठ' इति नाम्ना प्रसिद्धमस्ति।

एतानि पञ्चपीठानि वीरशैवधर्मस्य प्रधानकेन्द्रभूतानि सन्ति। एतत्पीठाचार्या एव धर्मस्यास्य जगद्गुरवः। एते च 'पञ्चाचार्याः' इति ख्यातनामानः सन्ति। एत एव वीरशैवधर्मस्य संस्थापकाः।

शिवादेशानुसारं दिव्यदेहधारिणो भूत्वा पूर्वोक्तेभ्यः शिवलिङ्गेभ्यः प्रादुर्भूय, भूमण्डले वीरशैवधर्मं च प्रतिष्ठाप्य, पुनरेतेष्वेव शिवलिङ्गेषु ते पञ्चाचार्याः प्रविलीना भूत्वा शिवान्तिकं जग्मुरित्यागमिकवाक्यादवगम्यते।

---

१. वी. र., पृ. ३०

साक्षात् परशिवाज्ज्ञानं सम्पाद्य, दिव्यदेहधारिणश्च भूत्वा सुप्रसिद्धेभ्यः सिद्धेभ्योऽगस्त्यादिमहर्षिभ्यो वीरशैवधर्मतत्त्वं समुपदिश्य ते चाचार्यवर्याः शिवलिङ्गेषु दिव्यदेहसहिता एव विलीना इति कृत्वा एते पञ्चाचार्याः 'दिव्यौघः' इति कथ्यन्ते।

वीरशैवीयः सिद्धौघः

पूर्वोक्तेभ्यो दिव्यौघपदवाच्येभ्यः पञ्चाचार्येभ्यो बहवो महर्षयो वीरशैवसिद्धान्तमधीतवन्तः। तेषु अगस्त्य-दधीचि-व्यास-सदानन्द-दूर्वासः-प्रभृतयो महर्षयः सुप्रसिद्धाः सन्ति।

रम्भापुरीपीठस्य सुप्रसिद्धो रेणुकाचार्योऽगस्त्याय वीरशैवसिद्धान्तमुपदिष्टवानासीदिति विषयः सिद्धान्तशिखामणिग्रन्थादवगम्यते। ग्रन्थोऽयं रेणुकागस्त्ययोः संवादरूपो वर्तते। उपदेशानन्तरमगस्त्य आचार्यैरेवमादिष्टः—

अगस्त्य मुनिशार्दूल तपःसिद्धमनोरथ।
त्वां विना शिवशास्त्रस्य कः श्रोतुमधिकारवान्॥
स्थाप्यतां सर्वलोकेषु तन्त्रमेतत्त्वया मुने।
ईदृशं शिवबोधस्य साधनं नास्ति कुत्रचित्॥[1] इति।

एतद् गुर्वादेशमवधार्यैव महर्षिणाऽगस्त्येन वैयासिकसूत्राणां वीरशैवसिद्धान्तपरा वृत्तिर्विलिखिता। तद्वृत्तिमनुसृत्यैव श्रीपतिपण्डिताराध्येन श्रीकरभाष्यं विरचितमिति तदीयेन—

अगस्त्यमुनिचन्द्रेण कृतां वैयासिकीं शुभाम्।
सूत्रवृत्तिं समालोक्य कृतं भाष्यं शिवङ्करम्॥[2]

इति प्रतिज्ञाश्लोकेनावधार्यते। इयं च लघुसूत्रवृत्तिरिति मुनिचन्द्रवृत्तिरिति वा नाम्ना प्रसिद्धाऽऽसीत्। साऽधुना नोपलभ्यते। अथापि कुम्भघोणनगरेऽस्याः प्रतिरेका वर्तत इति श्रूयते[3]।

एवमेव उज्जयिनीपीठाचार्येण दारुकाचार्येण महर्षिर्दधीचिः, ओखिमठस्य वैराग्यपीठाधिकारिणा घण्टाकर्णशिवाचार्येण महर्षिर्व्यासः, श्रीशैलपीठाध्यक्षेण

---

१. सि. शि. २०।७२, ७४
२. ब्र. सू. श्री., मङ्गलश्लो. १७
३. ब्र. सू. श्री. भूमिका, पृ. ११५

पण्डिताराध्येन महर्षिः सदानन्दः, काशीपीठाधिपतिना विश्वाराध्येन महर्षिर्दुर्वासा च वीरशैवसिद्धान्तमधीतवन्त इति विषयः पाशुपततन्त्र-काशीखण्ड-श्रीशैलखण्ड-शङ्करसंहितादिग्रन्थेषु प्रतिपादितोऽस्ति[१]। एवं सिद्धौघपदवाच्येभ्यो महर्षिभ्य उपदिष्टोऽयं वीरशैवीयज्ञानप्रवाहः क्रमशो मानवौघरूपेण परिणतः।

वीरशैवीयो मानवौघः

पूर्वोक्तेभ्यो महर्षिभ्यः साक्षाद्वा तल्लिखितग्रन्थाभ्यासाद्वा स ज्ञानप्रवाह ऋषिकल्पेषु मानवश्रेष्ठेषु सम्प्राप्तः। एतन्मानवौघे शिवयोगिशिवाचार्यः, नीलकण्ठशिवाचार्यः, श्रीपतिपण्डिताराध्यः, मायिदेवः, नन्दिकेश्वरशिवाचार्यः, सिद्धनाथशिवाचार्यः, स्वप्रभानन्दशिवाचार्यः, शिवानुभवशिवाचार्यः, त्रिलोचनशिवाचार्यः, सोसलेरेवणाराध्य इत्यादयः परःशतमाचार्याः सन्ति। एभिरेव महानुभावैर्वीरशैवसाहित्यं परिरक्षितं परिवर्धितं च।

तदेवं परशिवात् दिव्यौघ-सिद्धौघ-मानवौघरूपेण सम्प्राप्तस्य ज्ञानप्रवाहस्याधीतिबोधाचरणादिना प्रचारणाय पूर्वोक्तेभ्यः पञ्चप्रधानपीठेभ्यो व्यतिरिक्तास्तदीयशाखामठाः सन्ति कर्णाटक-महाराष्ट्र-आन्ध्रादिप्रदेशेषु परःसहस्रसंख्याकाः। एतेषु सर्वेष्वपि मठेषु सन्ति मठाधिकारिणः स्वामिपादाः। ते सर्वे स्वस्वक्षेत्रेषु विद्यमानेभ्यो वीरशैवधर्मानुयायिभक्तेभ्यो दीक्षासंस्कारं विधाय तत्त्वज्ञानोपदेशं कुर्वन्ति। पूर्वोक्तपञ्चपीठाध्यक्षा जगद्गुरव इति, तच्छाखामठाधिकारिणश्च गुरव इत्यस्ति विभागः। तदत्र गुरुपीठेषु जगद्गुरुपीठेषु च पट्टाभिषेकार्हाणां गुरुवर्याणां लक्षणं तावत् परीक्ष्यते।

गुरुशब्दार्थः

"गुणान् रुन्धे इति गुरुः" इति व्युत्पत्त्या यो हि शिष्यस्य प्राकृतान् राजसादिगुणान् व्यपोह्य शिवतत्त्वं प्रबोधयति, स गुरुरित्युच्यते। तदुक्तं नीलकण्ठशिवाचार्येण—

गुणान् रुन्ध इति प्रोक्तो गुरुशब्दस्य विग्रहः।
सविकारान् राजसादीन् गुणान् रुन्धे व्यपोहति॥
गुणत्रयान् व्यपोह्याग्रे शिवं बोधयतीति सः।
विश्वस्तानां तु शिष्याणां गुरुरित्यभिधीयते॥[२] इति।

---

१. वी. र., पृ. ८
२. क्रि. सा. १६।१३८-१३९, पृ. २१

गुरुशब्दार्थः शिवयोगिशिवाचार्येण भिन्नप्रकारेण प्रतिपाद्यते। तथाहि—

गुणातीतं गुवर्णं च रूपातीतं रुवर्णकम्।
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः॥[1] इति।

अस्यायमर्थः—गुरुशब्दो द्व्यक्षरात्मकः। अत्राद्यो यो 'गु'वर्णो वर्तते, तस्य प्राकृतगुणातीतत्वमित्यर्थः, तथैव द्वितीयो यो 'रु' वर्णो वर्तते, तस्य चाशुद्धमाया-रूपातीतत्वमित्यर्थः। तदेवं निर्गुणं निराकारं च महालिङ्गस्वरूपं य उपदिशति, स एव गुरुरित्यवगन्तव्यः। अत एव—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥[2]

इत्यादिस्थलेषु गुरुस्तुतिव्याजेन तदेव स्वरूपमुपवर्णितम्। निरन्तर-शास्त्राध्ययनशीलस्याध्ययनानुकूलाचारवतश्चास्याचार्य इत्यपरं नाम वर्तते। तथा चोक्तम्—

आचिनोति च शास्त्रार्थमाचारे स्थापयत्यपि।
स्वयमाचरते यस्तु स आचार्य इति स्मृतः॥[3] इति।

गुरुशिवयोरभिन्नत्वम्

"साक्षाद् भर्गो नराकृतिः", "यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः"[4] इत्यादिप्रमाणवचनेषु गुरुशिवयोरभिन्नत्वमेव प्रतिपादितम्। मायाशक्ति-वशात् सर्वेषां कृते प्रत्यक्षायोग्यः शिवो भक्तानुग्रहार्थं गुरुरूपेण प्रत्यक्षो वर्तते। तदुक्तमाचार्यवर्यैः—

अप्रत्यक्षो महादेवः सर्वेषामात्ममायया।
प्रत्यक्षो गुरुरूपेण वर्तते भक्तिसिद्धये॥[5] इति।

गुरोरनुग्रहं विना जीवस्य शिवतापत्तेरभावात् शिवभक्तेः प्राग् गुरुभक्ति-रावश्यकी। अतः शिवनिर्विशेषतया गुरुभक्तिर्विधेया। अत एवोक्तम्—

---

१. सि. शि. १५।८
२. वी. चि., पृ. १०
३. सि. शि. १५।९
४. च. ज्ञा. क्रि. २।७
५. सि. शि. ९।५३

गुरुपूजैव पूजा स्याच्छिवस्य परमात्मनः ।[१]
गुरोरभ्यर्चनेनापि साक्षादभ्यर्चितः शिवः ।
नास्ति भेदस्तयोः कश्चिदेकत्वात्तत्त्वरूपतः ॥[२] इति ।

गुरोर्वैशिष्ट्यम्

"स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते" इति सुभाषितोक्त्या स्वातिनक्षत्रीयं मेघजलं सागरान्तर्वर्तिनि शुक्तौ पतित्वा मुक्तारूपेण परिणमत इति प्राकृतिको नियमः। मेघजलस्यैव मौक्तिकत्वापत्तावपि यथा जलापेक्षया मौक्तिकस्य महर्घता, तथा शिवस्यैव गुरुरूपतापत्तावपि शिवापेक्षया गुरोर्माहात्म्यमधिकं वर्णितं शास्त्रेषु। तथाहि—

शिवे रुष्टे गुरुस्त्राता न रुष्टे निजसद्गुरौ ।
त्राता शिवस्तदेतस्माद् गुरुपूजारतो भवेत् ॥[3] इति ।

अमुं भावं मनसि निधाय स्वतः शिव एव पार्वतीमुद्दिश्य—

तस्मात्तस्माच्च गिरिजे पञ्चाननसमुद्भवाः ।
मदादिसर्वलोकानां जगद्गुरुवरोत्तमाः ॥[४]

इति प्रबोधितवान् सुप्रभेदागमे ।

जगतः पित्रोरधिकस्य सद्गुरोरस्मदीयमातापित्रपेक्षयाधिक्यं तु कैमुतिकन्यायेन सिद्ध्यति। उक्तं च नीलकण्ठशिवाचार्येण—"न गुरोः सदृशी माता न गुरोः सदृशः पिता"[५] इति। अस्मदादिमातापितरस्तु सांसारिकमोहोत्पत्तौ कारणीभूताः सन्तो भवहेतवो भवन्ति। सद्गुरुस्तु मोहपाशच्छेदद्वारा भवनिवृत्तौ सहायको भवतीति पित्रपेक्षया तस्योत्तमत्वम्। तथा चोक्तम्—

शिष्यः पुत्र इति प्रोक्तः शिष्यः शिष्यत्वयोगतः ।
जिह्वालिङ्गान्मन्त्रशुक्लं कर्णयोनौ निषिच्य वै ॥
जातः पुत्रो मन्त्रपुत्रः पितरं पूजयेद् गुरुम् ।
निमज्जयति पुत्रं वै संसारे जनकः पिता ॥

---

१. च. ज्ञा., क्रि. २।९४
२. सि. शि. ९।५१
३. च. ज्ञा., क्रि. २।८२
४. वी. र., पृ. ५
५. क्रि. सा. १६।१०४, पृ. १९

संतारयति संसाराद् गुरुर्वै साधकः पिता।
उभयोरन्तरं ज्ञात्वा पितरं सम्प्रपूजयेत् ॥'[1] इति।

गुरोर्लक्षणम्

"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति सुभाषितोक्त्या जगति सद्गुणानामेव पूज्यता दरीदृश्यते। तादृशगुणवत्त्वेनैव विशिष्टव्यक्तयः पूज्या भवन्ति। एवमेव जगत्पूज्यो गुरुरपि—"गुरुश्च गुणवान् प्राज्ञः परमानन्दभासकः"[2] इत्यागमोक्त्या सद्गुणवानेव भवति। तर्हि गुरोर्गौरवदायका गुणाः के? इति जिज्ञासायां चन्द्रज्ञानागमे करुणोपेतः, वीतरागः, विमत्सरः, सम्प्रदायागतज्ञानः, लिङ्गाङ्गस्थलभेदज्ञः, षट्स्थलज्ञानतत्परः, दीक्षाकर्मादिकुशलः, षडध्वज्ञानवत्सलः, शिवैकाहितमानसः, गुरुवंशसमुद्भवश्चेत्यादिगुणवानेव गुरुपदवाच्यो भवतीति प्रतिपाद्य; व्यसनी, वामनः, कुब्जः, कोपो, कुटिलः, खलः, अधिकचपलः, हीनाङ्गः, सूचकः, व्याधिगः, काकनादः, लम्बोष्ठः, वक्रनासः, अधोदृष्टिः, शठस्तथा मिथ्याविनीततादिदुर्गुणवान् गुरुपदयोग्यो न भवतीति गुरोर्लक्षणं स्पष्टमुपदिष्टम्[3]। एवमेव पूज्यपादाः श्रीरेणुकाचार्या अपि—

उपैति लोकविख्यातं लोभमोहविवर्जितम्।
आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ॥
शिवसिद्धान्ततत्त्वज्ञं छिन्नसन्देहविभ्रमम्।
सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ॥
कुलक्रमागताचारं कुमार्गाचारवर्जितम्।
शिवध्यानपरं शान्तं शिवतत्त्वविवेकिनम् ॥
भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम्।
त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकम् ॥
लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम्।
लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम् ॥
लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम्।[4]

---

१. क्रि. सा. १६।१४४-४६, पृ. २२

२. च. ज्ञा., क्रि. २।४८

३. च. ज्ञा., क्रि. २।४८-६६

४. सि. शि. ६।२-६

इत्यादिरूपेण वीरशैवीयगुरोर्लक्षणानि प्रतिपादयामासुः। अत्रोक्तलक्षणपरीक्षणेन शिवसिद्धान्ततत्त्वज्ञमित्यादिना तस्य श्रोत्रियत्वम्, लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनमित्यादिना च ब्रह्मनिष्ठत्वं निश्चीयते। गुरुर्हि ज्ञानोपदेशेन, स्वकीयेन शास्त्रविहिताचरणेन चाज्ञजनानां मार्गदर्शको भवति। अतोऽत्र सिद्धान्ते तेन शिष्टाचारसम्पन्नेनापि भाव्यम्। अतो धार्मिकम्, सत्यवादिनम्, कुमार्गाचारवर्जितम्, भूस्मोद्धूलननिष्णातम्, लिङ्गधारणसंयुक्तम्, लिङ्गपूजापरायणमित्यादिना तस्य धर्माचरणशीलत्वमपि निरूपितमेव। अत एव पूज्यपादा रेणुकाचार्याः—

ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न सन्त्यजेत्।
आचारं महतां दृष्ट्वा प्रवर्तन्ते हि लौकिकाः॥[1]

इति लोकसंग्रहार्थं ज्ञानिभिरप्याचारशालिभिर्भाव्यमित्युपदिष्टवन्तः।

एतादृशज्ञानाचरणादयो गुणाः केषुचिद्विशिष्टवंशीयेषु सहजतया सम्प्राप्ता भवन्तीति धर्मान्तरेष्विव वीरशैवधर्मेऽपि गुरुवरणवेलायां तादृशविशिष्टवंशोत्पन्नेभ्यः प्राथम्यं प्रदीयते। अत एवात्र—"कुलक्रमागताचारम्" इत्युक्तम्। तत्रभवता व्याख्याकारेण श्रीमता मरितोण्टदार्येण—"कुलक्रमागताचारो गुरुवंशक्रमागताचारवान्"[2] इति कुलशब्दस्य गुरुवंश इति व्याख्यानं कृतम्। गुरुवंशस्यैव वीरमाहेश्वरवंशः, जङ्गमवंशश्चेत्यभिधानान्तरमपि वर्तते। एतादृशगुरुवंशोत्पन्ना मठस्थलसमुत्पन्ना इत्यप्याख्यायन्ते। अत एव—

मठस्थलसमुत्पन्नः शान्तः शैवागमार्थवित्।
अनूचानः प्रसन्नात्मा शिवदीक्षाभिषेचितः॥[3]

इति वीरशैवीयगुरुलक्षणनिरूपणावसरे श्रीमन्तो नीलकण्ठशिवाचार्यास्तस्यान्यगुणैः साकं मठस्थलसमुत्पन्नत्वमपि परिगणयामासुः।

अस्यायं भावः—वीर-नन्दि-भृङ्गि-वृषभ-स्कन्दाख्यानां शिवस्य पञ्चगणानां गोत्रे समुत्पन्ना एव वीरमाहेश्वरा जङ्गमा इति वा कथ्यन्ते। एते प्रत्येकं ग्रामस्य पवित्रक्षेत्रभूतेषु मठस्थलेषु निवसन्ति। अत एव ते हिरेमठः, पुराणमठः, स्थावरमठः, बृहन्मठ इत्याद्युपाधिभाजो भवन्ति। अतो वीरमाहेश्वरा-

१. सि. शि. १६।६५
२. सि. शि. ६।४, तत्त्व पृ. ८३, सोलापुरप्रकाशनम्, १९०५ ई०।
३. क्रि. सा., भा. ३, पृ. १३३

परपर्यायाणां जङ्गमानां[1] मठस्थलसमुत्पन्नत्वं व्यपदिश्यते। एतेन विज्ञायते यद् गुरुत्वप्राप्तौ सद्गुणैः साकं श्रेष्ठकुलोत्पन्नत्वमप्यावश्यकमिति। तस्माद् वीरशैवधर्मे पञ्चसु प्रधानपीठेषु तच्छाखापीठेषु वा जङ्गमवंशोत्पन्नानां नैष्ठिकब्रह्मचारि बटूनामेव गुरुपदे पट्टाधिकारो विधीयते। अत्र पट्टाभिषिक्ता आचार्याः 'शिवाचार्याः' इत्याख्यायन्ते।

वीरशैवपरम्परायां केचन शिष्यवर्गमठाः सन्ति, तेषु शिवस्य पञ्चवक्त्र-गणेश्वरवंशे समुत्पन्नेभ्यः 'पञ्चमशालि' इत्युपनामकेभ्यो नैष्ठिकब्रह्मचारिबटुभ्यो जङ्गमदीक्षां प्रदाय पट्टाधिकारः सम्पाद्यते। तत्र जङ्गमवंशोत्पन्नबटवो वीरशैवीयपञ्चजगद्गुरुपीठेषु तच्छाखामठेषु च पट्टाभिषिक्ता भवन्ति, पञ्चम-शालिवंशोत्पन्नबटवश्च केवलं पञ्चपीठानां केषुचित् शाखामठेष्वेव पट्टाभिषिक्ता भवन्तीत्ययं विशेषः।

तदेवं वीरशैवानां प्रधानतया पञ्चपीठानां विद्यमानत्वात् तत्र पट्टाभि-षिक्ता जगद्गुरव इति, तच्छाखामठेषु पट्टाभिषिक्ताश्च गुरवः शिवाचार्या इति वा समाख्यायन्ते। तस्माद् वीरशैवपरम्परायां पञ्चजगद्गुरवः, तच्छाखानु-यायिनः शिवाचार्याश्चानन्ताः सन्ति, शाखामठानामानन्त्यात्।

दक्षिणभारते प्रतिग्रामं प्रायो वीरशैवीयगुरुवर्गमठाः सन्ति। प्रतिमठं पट्टाभिषिक्तः शिवाचार्योऽधितिष्ठति। स एव स्वशाखानुयायिनां वीरशैव-भक्तजनानां दीक्षादिसंस्कारं विधाय षट्स्थलज्ञानोपदेशेन तान् संसारसागरा-दुत्तारयति।

अनेकगुरुवादनिरासः

आमोदार्थी यथा भृङ्गः पुष्पात् पुष्पान्तरं व्रजेत्।
विज्ञानार्थी तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्॥[2]

इत्यागमोक्तौ यद्येकेन गुरुणा सर्वासां जिज्ञासानां समाधानं न स्यात् तर्हि गुर्वन्तरं प्राप्य तासां समाधानाय प्रयतितव्यमिति भृङ्गदृष्टान्तेनानेक-गुरूपासना संसूचिता। दत्तात्रेयस्य चतुर्विंशतिसंख्याका गुरव आसन्निति

---

१. अतो विशिष्टवीरेति वीरमाहेश्वरेति च।
पर्यायो वर्तते देवि जङ्गमस्य महात्मनः॥ (वी. स. स. ११।४५)

२. भा. सं. सा., पृ. २६३

श्रीमद्भागवते प्रतिपादिसं वर्तते। वीरशैवसिद्धान्ते स बहुगुरुवादोऽनुमतो न वेति शङ्कायामुच्यते—सदाचारहीनत्वादयं बहुगुरुवादोऽत्र नानुमन्यते। तदुक्तमागमे—

पितृ-भ्रातृ-कलत्राणां पुत्रादीनां तथैव च।
दीक्षाशिक्षाविधानार्थमेक एव गुरुर्भवेत् ॥

गुरवो यत्र बहवो भवन्त्यन्योन्यभेदतः।
वीरशैवसदाचारस्तत्र नास्तीति निश्चयः ॥[१] इति।

अत्रेदमैदम्पर्यम्—वीरशैवसिद्धान्ते पञ्चविधा आचाराः प्रतिपादिताः सन्ति। तेष्वन्यतमो हि सदाचारः। अस्मिन्नाचारेऽष्टविधानि शीलानि[२] निरूपितानि। तत्र एकस्य वंशस्य एक एव गुरुः, तस्मिन्नेव गुरौ तैः श्रद्धावद्भिर्भाव्यम्, तेनैव च सर्वैर्दीक्षादिकं ग्राह्यमित्येकं शीलं प्रतिपादितं वर्तते। यथा शीलवती सती एकं पतिव्रताशीलमनुतिष्ठति, तथा वीरशैवभक्तोऽपि सदाचारोक्तशीलपरिपालनमुखेन एकस्यैव गुरोरुपासको भवति। तस्मात् सर्वे वीरशैवाः सदाचारपरिपालनार्थं स्वस्ववंशस्य ये परम्परागतगुरवो वर्तन्ते, तैरेव दीक्षां शिक्षां ज्ञानं च प्राप्नुवन्ति। एक एवायं गुरुर्दीक्षाप्रदानेन दीक्षागुरुरिति, शास्त्रोपदेशेन शिक्षागुरुरिति, शिवाद्वैतज्ञानोपदेशेन च ज्ञानगुरुरित्यभिधीयते।

१. दीक्षागुरुः

दीयते परमं ज्ञानं क्षीयते पाशबन्धनम्।
यया दीक्षेति सा तस्यां गुरुर्दीक्षागुरुः स्मृतः ॥[३]

इत्याचार्योक्त्यनुसारमाणवादिमलत्रयरूपपाशविच्छेदकः, शिवज्ञानप्रदायकश्च संस्कारविशेषो दीक्षेत्युच्यते। तादृशदीक्षाप्रदायको हि गुरुर्दीक्षागुरुरित्यभिधीयते।

---

१. सू. आ., क्रिया. ५।२९-३०

२. सदाचारोऽष्टशीलाढ्यः सेवितः कल्पपादपः।
सद्भक्तानां सुमनसां ददातीष्टफलं महत् ॥ (च. ज्ञा., क्रि. ९।२२)

३. सि. शि. १५।७

२. शिक्षागुरुः

दीक्षागुरुरसौ शिक्षाहेतुः शिष्यस्य बोधकः ।
प्रश्नोत्तरप्रवक्ता च शिक्षागुरुरितीर्यते ॥[१]

इत्युक्त्या पूर्वोक्तो दीक्षागुरुरेव यदा लिङ्गपूजाविधानस्य, तस्य प्राणवद्धारणीयत्वस्य च प्रशिक्षणं प्रददाति, सदा स शिक्षागुरुरित्यच्युते। अयं गुरुर्मन्त्रजपविधिं प्राणलिङ्गानुसन्धानपद्धतिं च प्रबोधयति। एवमाध्यात्मिकशिक्षाप्रदोऽयं गुरुः शिक्षागुरुरित्यवधेयम् ।

३. ज्ञानगुरुः

उपदेष्टोपदेशानां संशयच्छेदकारकः ।
सम्यग्ज्ञानप्रदः साक्षादेष ज्ञानगुरुः स्मृतः ॥[२]

इत्युक्त्यनुसारं शिवागमप्रतिपादितान् विषयान् स्वानुभवेन युक्तिप्रयुक्तिभिश्च सम्यक् प्रतिपाद्य, शिष्यसन्देहान् निवर्त्य च तस्य जीवन्मुक्तिहेतुभूतं तत्त्वज्ञानं य उपदिशति, स ज्ञानगुरुरित्युच्यते। तदेवं स्वस्ववंशपरम्परागत एक एव गुरुर्दीक्षाकरणेन दीक्षागुरुरिति, शिक्षाप्रदानेन शिक्षागुरुरिति, तत्त्वज्ञानोपदेशेन च ज्ञानगुरुरित्याख्यायते। एवं प्रकारेण सनातनेऽस्मिन् वीरशैवसिद्धान्ते कुलगुरुपरम्पराऽनादिकालादद्यावधि प्रवृत्ता वर्तते ।

सुशिष्यलक्षणं सद्गुरुकृपा च

"किं वा शिष्यस्य लक्षणम्"[१] इति देव्या पृष्टो हि शिवः—

अथ शिष्यस्वरूपं च वक्ष्ये संक्षेपतः श्रृणु ।
शुचिः सुशीलो धर्मिष्ठः सत्यवाग्विजितेन्द्रियः ॥

अहङ्कारविनिर्मुक्तो रागद्वेषादिवर्जितः ।
गुरुभक्तो जितक्रोधो गुर्वाज्ञापरिपालकः ॥

विषयासङ्गनिर्मुक्तो विनिर्जितमदाष्टकः ।
का वा गतिर्ममेत्येवं ध्यायमानो दिवानिशम् ॥

१. सि. शि. १५।१२

२. सि. शि. १५।२१

एवं गुणान्वितं शिष्यं परीक्ष्य गुरुरादरात्।
शिक्षयेत्तस्य वै चित्तं यथा भवति निर्मलम् ॥[१]

इत्येवं सुशिष्यस्य लक्षणमुपदिष्टवान्। तत्र तावत् सिद्धान्तशिखामणौ भगवता रेणुकाचार्येण—विवेकसम्पन्नः, विरागी, शुद्धमानसः, जिज्ञासुश्चेति तस्यैव लक्षणमुपदिष्टम्। एतत्पर्यालोचनेन विवेकादिसाधनचतुष्टयसम्पन्न एव सुशिष्य इति निश्चीयते।

अद्वैतवेदान्ते—"अथाऽतो ब्रह्मजिज्ञासा"[२] इत्यस्य शारीरिकसूत्रस्य व्याख्यानावसरे 'अथ' इत्यस्य आनन्तर्यमर्थमुक्त्वा कस्मादनन्तरमिति जिज्ञासायां विवेक-वैराग्य-शमादिषट्कसम्पत्ति - मुमुक्षुताख्यसाधनचतुष्टयसम्पत्त्यनन्तरमिति प्रतिपाद्यते। अत एव तत्र एतत्साधनसहित एव ब्रह्मज्ञानस्याधिकारीति निरूप्यते।

वीरशैवसिद्धान्ते जीवस्याणवादिमलत्रयावृतत्वस्वीकारात्, मलानां चाज्ञानरूपत्वाभावान्न तेषां केवलमुपदेशतो निवृत्तिः। द्रव्यरूपाणां मलानां निवृत्तिस्तु दृष्टिशक्त्यावारकस्य नेत्रगतस्य द्रव्यविशेषस्य शस्त्रचिकित्सावत्, त्रिविधदीक्षारूपेण संस्कारविशेषेणैव संभवति[३]। तस्मादत्र साधनसम्पत्त्यनन्तरं दीक्षाधिकारी भवति, दीक्षानन्तरं च स ब्रह्मज्ञानाधिकारी भवतीति स्वीक्रियते। तदुक्तं भगवता भाष्यकारेण—"मङ्गलस्य जिज्ञासायामन्वयाभावान्न मङ्गलार्थः, अदीक्षितस्य मलत्रयविध्वंसाभावान्न साधनचतुष्टयानन्तर्यम्, निगमागमोभयवेदान्तप्रतिपादित-भक्तिक्रियाज्ञानकाण्डत्रयविहित - स्थूलसूक्ष्मचिदचित्प्रपञ्च-प्रकाशकषट्स्थलपरशिवसाक्षात्कारकारण- बहुजन्मकृतशिवार्पितयजनयाजनतपोध्यानाद्यनेकपुण्यापूर्वफलकशरीरत्रयगतमलत्रयध्वंसक-कारुण्य - कल्याण - कैवल्य-विभूतित्रयप्रदायकाष्टावरण - पञ्चाचार - सद्गुरुकरुणाकटाक्षलब्धशक्तिपाताद्यव-च्छिन्नपरशिवेष्टलिङ्गधारणात्मकपाशुपतदीक्षाऽऽनन्तर्यमित्यथशब्दार्थो निर्णीयते"[४] इति। तस्मादत्र सिद्धान्ते विनैव दीक्षासंस्कारं न कोऽपि मोक्षाधिकारी भवितुमर्हति। स दीक्षासंस्कारोऽत्र गुरुकारुण्यमित्याख्यायते।

---

१. सू. आ., क्रि. ५।३१-३३

२. ब्र. सू. १।१।१

३. "मलस्य द्रव्यत्वाच्चाक्षुषपटलादेरिव न ज्ञानमात्रान्निवृत्तिः संभवति, अपि तु चक्षुर्वैद्यव्यापारेणेव दीक्षाख्येनेश्वरव्यापारेणैव" (त. सं. टीका, २८) इत्यघोरशिवाचार्येणाप्युक्तम्।

४. ब्र. सू. श्री. १।१।१, पृ. १०, ३३

"अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीत" इति विधिवाक्यानुसारेण वीरशैवधर्मेऽप्यष्टमे वर्षे दीक्षासंस्कारो विधीयते। अस्मिन् सन्दर्भे वीरशैवीयगुरुवर्गमठेषु पट्टाभिषिक्ताः शिवाचार्या दीक्षितेभ्यः स्वगोत्रीयशिष्येभ्य उपासनार्थमिष्टलिङ्गम्, जपार्थं पञ्चाक्षरमहामन्त्रं च प्रयच्छन्ति। अयं च संस्कारो न केवलं पुरुषाणामेव, किन्तु स्त्रियोऽप्यत्राधिकारिण्यो भवन्ति। इदमस्य धर्मस्य वैशिष्ट्यम्।

त्रिपुण्ड्रं चैव रुद्राक्षं नित्यार्चनजपं तथा।
होमध्यानादिकं सर्वं दीक्षाहीनस्य निष्फलम्॥
यथा मृगपतिं दृष्ट्वा भीतो याति वने गजः।
अदीक्षितोऽर्चयेल्लिङ्गं तथैवाहं महेश्वरि॥

इति दीक्षाबोधे दीक्षासंस्कारहीनानां सर्वा धार्मिकक्रिया निष्फला भवन्ति, शिवोऽपि तत्कृतपूजां नाङ्गीकरोतीति प्रतिपाद्य शिवदीक्षाया माहात्म्यमुपवर्णितम्। एतेनेदं निश्चीयते यद् वीरशैवीयसाधनमार्गे प्रवृत्तानां दीक्षासंस्कारोऽपरिहार्यरूपेण विधीयते।

गुरुसेवा तत्कारुण्यप्राप्तिश्च

यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान्।
तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद् भूतिकामः॥[1]

इति श्रुतावभ्युदयनिःश्रेयसेप्सुभिर्गुरुसेवा विधेयेत्युपदिश्यते।

सेवेत परमाचार्यं शिष्यो भक्तिभयान्वितः।
षण्मासान् वत्सरं वापि यावदेष प्रसीदति[2]॥

इति पूज्यपादै रेणुकाचार्यैरपि गुरुकारुण्यप्राप्तौ सेवैव परमावश्यकीति प्रदर्श्य सा च यावद्गुरुतोषं कर्तव्येत्युपदिष्टम्। गुरुतोषाय धनाद्यपेक्षया सेवैव परमोत्कृष्टं साधनम्। अत एव—

गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।
अथवा विद्यया विद्या चतुर्थं नास्ति साधनम्॥

१. मुण्ड. ३।१।१०
२. सि. शि. ६।७

इति सुभाषितोक्तौ गुर्वनुग्रहकारकेषु साधनत्रयेषु शुश्रूषाया एव प्राथम्यं प्रदर्शितम् । भगवता श्रीकृष्णेनापि—

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥[1]

इति तत्त्वज्ञानप्राप्तौ प्रणिपातस्य सेवायाश्च विधानं कृतम् । तदेतत्पर्यालोचनेन ज्ञायते यद् दीक्षारूपानुग्रहप्राप्तौ त्रिकरणपूर्वकं[2] गुरुसेवा विधेया ।

सा च सेवा आप्त-अङ्ग-स्थान-सद्भावाख्यया चतुर्विधा भवति । अत्राप्तो नाम स्वजनः । यथा स्वजनस्यागमने मनसि प्रमोदः सञ्जायते, अभ्यागतस्य च तस्य प्रेम्णा सेवा विधीयते लोके, तथा सद्गुरोरागमने सन्तुष्टान्तरङ्गेणाप्तवत् क्रियमाणा सेवा आप्तसेवेत्युच्यते ।

करचरणाद्यवयवानामङ्गशब्देन व्यपदेशः क्रियते । यथा मनुष्यः स्वशरीरे तद्गतावयवेषु च प्रियो भवति, तथा गुरोः पादाद्यवयवेषु प्रियवृत्तिः सन् पादप्रक्षालनम्, स्नापनम्, रुग्णाद्यवस्थायामङ्गसंवाहनमित्यादिरूपेण विधीयमाना हि सेवाऽङ्गसेवेत्युच्यते । "पादादिकेशपर्यन्तं लिङ्गान्यङ्गानि सद्गुरोः"[3] इत्युक्त्यनुसारं तत्त्वज्ञस्य सदाचारशीलस्य करुणावतश्च सद्गुरोः प्रत्येकमङ्गं पवित्रं शिवलिङ्गवत् पूज्यं च भवति । अतो वीरशैवसिद्धान्ते गुरुर्हि गुरुलिङ्गमित्यभिधीयते । तथा चोक्तम्—

तस्माद् गुरुशरीरं तु गुरुलिङ्गं भवेद् बुधाः ।
गुरुलिङ्गस्य पूजा तु गुरुशुश्रूषणं भवेत् ॥[4] इति ।

तस्माल्लोके यथोपचारैः शिवलिङ्गस्य पूजा विधीयते, तथा लिङ्गवत्पूज्यस्य गुरुलिङ्गाख्यस्य सद्गुरोरङ्गशुश्रूषणमेव तत्पूजेति परिज्ञाय सर्वैरपि मुमुक्षुभिरङ्गसेवा करणीया । एवं गुरोरङ्गस्पर्शेन तच्चरणामृतपानेन च सकलविधानां दुरितानां प्रक्षालनेन शिष्यः परिशुद्धो भवति । उक्तं चागमे—

यथैव वह्निसंपर्कान्मलं त्यजति काञ्चनम् ।
तथैव गुरुसंपर्कात् पापं त्यजति मानवः ॥

---

१. भ. गी. ४।३४
२. कायेन वाचा मनसा च क्रियमाणा सेवा त्रिकरणसेवा ।
३. क्रि. सा., भा. ३, पृ. २२
४. क्रि. सा., भा. ३, पृ. २२

स्वाचार्यचरणद्वन्द्वप्रक्षालितजलं सदा।
यः पिबेद्धारयेद्भक्त्या सर्वपापैः प्रमुच्यते ॥[१] इति।

एवमङ्गसेवानिरतः शिष्यो गुरुणा सह प्रियमधुरया वाचा व्यवहरन् प्रत्यहं दण्डवत्प्रणामं कुर्यात्, यतो हि गुरोरुपचारेषु वर्तते प्रियवाणीप्रणामयोः प्रामुख्यम्। नमस्कारप्रकारश्चोपवर्णित आगमे—

श्रीमानपि तपस्वी च शास्त्रज्ञः कुलशीलवान्।
कुर्याद्दण्डनमस्कारं निर्लज्जो गुरुसन्निधौ ॥[२] इति।

एवं नमस्कारं कृत्वा प्रशान्तमनस्केन शिष्येण प्रदक्षिणमपि विधेयम्। अनेन नमस्कारेण सद्गुरोरङ्गसेवया च शिष्यस्यायुः-प्रज्ञा-यशो-बलानां वृद्धिर्भवति। तदुक्तं मनुना—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥[३] इति।

तदेवंविधा सद्गुरोरङ्गसेवा शिष्यस्य सर्वविधकल्याणपरम्पराप्रदायिनीति निश्चीयते।

अथ तृतीया सेवा हि स्थानसेवा। अत्र स्थानं नाम सद्गुरोर्निवासक्षेत्रम्। "गुरुर्देवो यतः साक्षात् तद्गृहं देवमन्दिरम्"[४] इत्यागमोक्त्या तदीयनिवासक्षेत्रं देवमन्दिरवत् श्रद्धार्हम्। अतः—

गुरुयात्रा देवयात्रा तीर्थयात्रेति च त्रिधा।
आसां त्रिविधयात्राणां गुरुयात्रा फलाधिका ॥[५]

इत्यागमोक्त्या श्रद्धान्वितेन शिष्येण फलाधिका गुरुयात्राऽवश्यं कर्तव्या। तत्र गतेन च शिष्येण यावत्कालपर्यन्तं तत्र स्थीयते, तावत्कालपर्यन्तं स्वगृहे क्रियामाणसम्मार्जन-प्रक्षालनादिवन्निर्वञ्चनया गुरुस्थानेऽपि क्रियमाणा सेवा

१. च. ज्ञा., क्रि. २।१४, २२
२. च. ज्ञा., क्रि. २।३३
३. म. स्मृ. २।१२१
४. च. ज्ञा., क्रि. २।१२
५. च. ज्ञा., क्रि २।२८

सद्गुरोः स्थानसेवेत्युच्यते। वीरशैवपरम्परायां तदनुयायिनः शिष्याः प्रतिवर्षं विशेषेषु पर्वसु गुरुस्थानं गत्वा वित्तशाठ्यं विना सेवाकार्यं निर्वहन्ति।

चतुर्थी च सद्भावसेवेत्युच्यते। "भावो मानसचेष्टात्मा परिपूर्णः शिवाश्रयः"[१] इत्याचार्योक्त्या शिवाश्रिता मनोवृत्तिर्भाव इत्युच्यते। अतः "गुरुः साक्षात् परब्रह्म" इत्याकारको गुरुविषयकोऽयं विश्वासः सद्भावः। आध्यात्मिकक्षेत्रे भावनायाः प्राशस्त्यं वर्तते। विनैव भावनां क्रियमाणाः सर्वाः क्रिया निष्फला भवन्ति। अत एव—

भावनाविहितं कर्म पावनादपि पावनम्।
तस्माद्भावनया युक्तं परधर्मं समाचरेत्॥[२]

इत्यत्र पूज्यपादा रेणुकाचार्या भावनायाः प्राशस्त्यमुपदिष्टवन्तः। भावनां विना भयमात्रेण गुरोराप्ताङ्गस्थानसेवाकर्तारः सन्ति भूरिशः, किन्तु सद्भावनया सेवाकर्तारो दुर्लभा एव। तस्माद् गुरौ भयान्वितेन शिष्येण भावान्वितेनापि भाव्यम्।

एवं चतुर्विधसेवया यदा गुरुः सन्तुष्टो भवति, तदा तदग्रतः—

भो! कल्याणमहाभाग शिवज्ञानमहोदधे।
आचार्यवर्य सम्प्राप्तं रक्ष मां भवरोगिणम्॥[३]

इत्येवंप्रकारेण दीक्षाऽनुग्रहार्थं सम्प्रार्थयेत्। तदा सेवासन्तुष्टः कारुणिको गुरुः—

इति शुद्धेन शिष्येण प्रार्थितः परमो गुरुः।
शक्तिपातं समालोक्य दीक्षया योजयेदमुम्॥[४]

इत्याचार्यादेशानुसारं शिष्ये शक्तिपातचिह्नानि परीक्ष्य तदनुरूपां हि दीक्षां विधत्ते।

दीक्षाङ्गभूतो मलपरिपाकः

दीक्षारूपोऽयं गुर्वनुग्रहो न सर्वेषां सुलभप्राप्यः, किन्तु पक्वमलानामत

---

१. सि. शि. १६।६७
२. सि. शि. १६।६८
३. सि. शि. ६।९
४. सि. शि. ६।१०

एवेश्वरानुग्रहरूपशक्तिपातविशिष्टानामेव। अत एवोक्तम्—

परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन।
योजयति परे तत्त्वे स दीक्षयाचार्यमूर्तिस्थः॥[१] इति।

अत्रेदमाकूतम्—

"जीवत्वं दुःखसर्वस्वं तदिदं मलकल्पितम्"[२] इत्याचार्योक्त्यनुसारं मलत्रयावृतत्वं जीवत्वमिति निश्चीयते। तत्रेच्छाशक्तिसङ्कोच आणवमलः, ज्ञानशक्तिसङ्कोचो मायीयमलः, क्रियाशक्तिसङ्कोचश्च कार्ममल इत्युच्यते। एतेषां मलत्रयाणां परिपाकं विना शक्तिपातो न सञ्जायते। अत्र—"मलोऽप्यामश्च पक्वश्च भवेत् संसारकारणम्"[३] इति व्यासोक्त्यनुसारं जीवानां जननमरणात्मकसंसारस्य कारणीभूत आणवादिको मल आमः पक्वश्चेति द्विप्रकारो भवति। तत्र तपसा प्रक्षीणः पक्वस्तद्विपरीतश्चामः। पक्वमलश्च साधकस्तप्ततनुरुच्यते। तद्विपरीतश्चातप्ततनुरपक्वमलश्चेत्यभिधीयते। तथा चोक्तम्—

तपस्तप्ता तनुर्यस्य स तप्ततनुरुच्यते।
परिपक्वो विमोक्षाय सोऽश्नुते लिङ्गधारणम्॥
न करोति तपः पूर्वं सोऽतप्ततनुरुच्यते।
अपक्वोऽयं विमोक्षाय नाश्नुते लिङ्गधारणम्॥[४] इति।

अत एव श्रीमद्भी रेणुकाचार्यैः—

अतप्ततनुरज्ञो वै आमः संस्कारवर्जितः।
दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गधारणम्॥[५]

इत्यत्रापक्वमलस्य, अत एवेश्वरानुग्रहरहितस्य दीक्षाऽनधिकारिणो वीरशैवसिद्धान्ते क्रियादीक्षायां प्राप्यमाणेष्टलिङ्गधारणेऽनधिकारित्वं सूचितम्। अत एव पक्वमलो मुमुक्षुरेवेश्वरानुग्रहरूपं शक्तिपातं प्राप्नोति। तदुक्तमाचार्यवर्यैः—

---

१. त. प्र., १५
२. सि. शि. १८।१७
३. शि. पु. ७।१।३१।७२
४. वी. आ., च. पृ. ७८
५. सि. शि. ६।६०

स्वकर्मपरिपाकेन प्रक्षीणमलवासनः।
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः॥
शुद्धान्तःकरणे जीवे शुद्धकर्मविपाकतः।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी॥[1] इति।

एवं जीवोऽनेकजन्मार्जितसुकृतजन्यस्वकर्मपरिपाकवशेन विनष्टमलवासनो यदा जायते, तदेश्वरानुग्रहरूपशक्तिपातोऽस्य संभवति। ज्ञानोदये, कर्मसाम्ये, मलपरिपाके च शक्तिपातो[2] जायत इति मतत्रैविध्यं वर्तते। तत्र वीरशैवाचार्याः शक्तिपाते मलपरिपाकस्यैव कारणतामभ्युपगच्छन्ति।

शक्तिपातः

शक्तिपातस्य मुख्यं लक्षणं भगवद्भक्तेरुन्मेष इत्यवगन्तव्यम्। अत एव—

प्रसादादेव सा भक्तिः प्रसादो भक्तिसंभवः।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः॥[3]

इत्यत्राचार्यैरीश्वरानुग्रहरूपशक्तिपात-भक्त्योरन्योन्यसापेक्षत्वं प्रतिपादितम्। अत्रायं भावः—प्रथमतः साधकस्य मनसि सामान्यतो भक्तिरुन्मिषति। तद्भक्त्या सन्तुष्ट ईश्वरो यदा तदुपरि शक्तिपातं करोति, तदा तन्मनसि द्विगुणा भक्तिः सञ्जायते। तच्छक्तिपातवशादेव क्षणे क्षणे रोमाञ्चाऽङ्गकम्पनाश्रुपातादिकं च संभवति। तथा चोक्तम्—

लक्षणं शक्तिपातस्य प्रबोधानन्दसंभवः।
सा यस्मात् परमा शक्तिः प्रबोधानन्दरूपिणी॥
आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रिया।
यथा स्यात् कम्परोमाञ्चस्वरनेत्राङ्गविक्रिया॥[4] इति।

शक्तिपातचिह्नानि

येषां शरीरिणां शक्तिः पतत्येव निवृत्तये।
तेषां तल्लिङ्गमौत्सुक्यं मुक्तौ द्वेषो भवस्थितौ॥

---

१. सि. शि. ५।४८–४९
२. आ. त. शा., पृ. १०८–११०
३. सि. शि. ९।११
४. क्रि. सा., भा. २, पृ. १९५

भक्तिश्च शिवभक्तेषु श्रद्धा तच्छासके शिवे।
एभिर्लक्ष्यैरविच्छिन्नैः शक्तिपातो महात्मभिः॥
अनुमेयः सदीक्षैश्च शक्तिपातानुसारतः॥[1]

इति पारमेश्वर-मृगेन्द्रागमवचनोदाहरणेन निट्टूरुनञ्जनाचार्यः शक्तिपातचिह्नान्युक्त्वा, पुनः—

यत्र शक्तिर्न पतिता तत्र शुद्धिर्न जायते।
न विद्या न शिवाचारो न मुक्तिर्न च सिद्धयः॥
तस्माल्लिङ्गानि संवीक्ष्य शक्तिपातस्य भूरिशः।
ज्ञानेन क्रियया वाथ गुरुः शिष्यं विशोधयेत्॥

इति पूर्वोक्तशक्तिपातलक्षणरहितानां दीक्षायामनधिकारित्वं प्रतिपादितवान्। तदेतत्पर्यालोचनेन ज्ञायते यद् भगवदनुग्रहेण यन्मनसि भक्तेः समुन्मेषः सञ्जातः, स एव दीक्षाधिकारीति। अत एवोक्तम्—"किमत्र बहुनोक्तेन भक्ताः सर्वेऽधिकारिणः" इति।

भक्तानां वर्णाश्रमतानिरासः

तत्र तावत् शिवसिद्धान्ते मोक्षमार्गप्रवृत्तेषु भक्तिमात्रस्य परीक्षा क्रियते, न तु वर्णाश्रमाणाम्। अत एव—

भगवन् मोक्षमार्गोऽयं त्वया सम्यगुदाहृतः।
तत्राधिकारिणं ब्रूहि तत्र मे संशयो महान्॥

इति श्रीरामेण पृष्टे सति भगवान् शिवः—

ब्रह्मक्षत्रविशः शूद्राः स्त्रियश्चात्राधिकारिणः।
ब्रह्मचारी गृहस्थो वाऽनुपनीतोऽथवा द्विजः॥
वनस्थो वाऽवनस्थो वा यतिः पाशुपतव्रती।
बहुनात्र किमुक्तेन यस्य भक्तिः शिवार्चने॥
स एवात्राधिकारी स्यान्नान्यचित्तः कथञ्चन।[2]

इति वर्णाश्रमाणां भेदं विना सर्वेषां भक्तानामत्राधिकारित्वं सुस्पष्टमुपदिदेश। अत्रेदमवधेयम्—

---

१. वे. वी. चि. ६।७-८; मृ. वि. ५।४-५

२. शि. गी. १६।१-४

विशुद्धाः प्राकृताश्चेति द्विविधाः मानुषाः स्मृताः ।
शिवसंस्कारिणः शुद्धाः प्राकृता इतरे मताः ॥[1]

इति पूज्यपादानां श्रीरेणुकाचार्याणामुपदेशानुसारं मनुष्यसमाजस्य शुद्धाः प्राकृताश्चेति द्विधा विभागः क्रियते । तत्र शिवसंस्कारिणः शिवभक्ताः शुद्धा इति, तदन्ये च प्राकृता इत्यवगन्तव्यम् । तस्माद् ये शुद्धाः, त एव मोक्षाङ्गभूतदीक्षाधिकारिणः ।

ननु ब्राह्मणादिभेदेन मनुष्यसमाजश्चतुर्धा विभाजितो वर्तते । तत्कथमत्र विभागद्वयं प्रतिपाद्यत इति जिज्ञासायामुक्तं तैरेव—

वर्णाश्रमादिधर्माणां व्यवस्था हि द्विधा मता ।
एका शिवेन निर्दिष्टा ब्रह्मणा कथिताऽपरा ॥
शिवोक्तधर्मनिष्ठा तु शिवाश्रमनिषेविणाम् ।
शिवसंस्कारहीनानां धर्मः पैतामहः स्मृतः ॥[2] इति ।

अस्यायं भावः—अत्र खलु वर्णाश्रमव्यवस्था द्विविधा वर्तते, एका शिवेनोपदिष्टा, अन्या च ब्रह्मणा । शैवमार्गावलम्बिभिः शिवसिद्धान्तस्यैवानुसरणं कर्तव्यम् । शिवसिद्धान्ते भगवता शिवेन शुद्ध-प्राकृतभेदेन समाजस्य द्वैविध्यं प्रतिपादितम् । तत्र ये शुद्धा त एव दीक्षाधिकारिणः, नान्य इत्यवधेयम् । तस्मात् शुद्धः श्वपचोऽपि दीक्षाधिकारी, ब्राह्मणोऽपि यः प्राकृतः स नात्राधिकारीति निश्चयः । अत एवोक्तम्—"शिवभक्तिविहीनस्तु ब्राह्मणः श्वपचाधमः"[3] इति ।

ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा शूद्र एव वा ।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः ॥
शिवभक्तिसमावेशे क्व जातिपरिकल्पना ।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते ॥[4]

इति श्रीरेणुकाचार्यैरपि शिवभक्तेषु जातिभेदो निराकृतः । एवमेव मुकुटागमेऽपि—

१. सि. शि. १०।३४
२. सि. शि. १०।३५–३६
३. ब्र. सू. श्री. भूमिका, पृ. २९
४. सि. शि. ११।१०–११, पृ. २०९ सोलापुरप्रकाशनम्, १९०५ ई० ।

द्विजोऽपि मायी त्याज्यस्तु म्लेच्छो ग्राह्यो ह्यमायकः ।
स प्रियस्तु महेशस्य चतुर्वेदो न दाम्भिकः ॥

ब्राह्मणेन कृतं पापं शूद्रेण सुकृतं कृतम् ।
किं तत्र कारणं जातिर्धर्माधर्मेषु शस्यते ॥[1]

इत्यादिना शिवदीक्षायां वर्णाश्रमव्यवस्था निराकृता ।

तस्मात् शिवसिद्धान्तानुसारिणि वीरशैवसिद्धान्ते पैतामहवर्णव्यवस्थामपहाय शिवोपदिष्टवर्णाश्रमव्यवस्थानुसारं शिवसंस्कारिणः शिवभक्तान् संपरीक्ष्य शिवदीक्षा विधीयते ।

शिष्यपरीक्षा

गुरुस्तु स्वाश्रितं शिष्यं परीक्षेद् वर्षमेककम् ।
ब्राह्मणं क्षत्रियं वैश्यं द्वित्रिवर्षकमेव वा ॥

प्राणद्रव्यप्रदानाद्यैरादेशैश्च समासमैः ।
उत्तमांश्चाधमे कृत्वा नीचानुत्तमकर्मणि ॥

आक्रुष्टास्ताडिता वा ये विषादं नैव यान्त्यपि ।
ते योग्याः सततं शुद्धाः शिवसंस्कारकर्मणि ॥[2]

इत्यागमोक्त्यनुसारं दीक्षार्थं समागतं शिष्यं सम्यक् परीक्ष्य तत्र ये समुत्तीर्णा भवन्ति, तेषामेव मलपाशनिवारकः शिवज्ञानप्रदश्च दीक्षासंस्कारो विधीयते ।

दीक्षास्वरूपं तत्प्रकाराश्च

तत्र तावद् वीरशैवसिद्धान्ते शक्तिपाताद्यवच्छिन्न-श्रीगुरुकरुणा-कटाक्षलब्धलिङ्गधारणात्मकशिवदीक्षितानामेव ब्रह्मविद्याधिकारित्वस्वीकाराद् आगमादिशास्त्रेषु दीक्षास्वरूपं तत्प्रभेदाश्च प्रतिपादिताः । तदनुसारमत्र निरूप्यते ।

दीयते लिङ्गसम्बन्धः क्षीयते च मलत्रयम् ।
दीयते क्षीयते यस्मात् सा दीक्षेति निगद्यते ॥[3]

---

१. तन्त्रा. टी. भा. ९, आ. १५, पृ. २५५

२. च. ज्ञा., क्रि. २।७६–७८

३. का. आ., क्रि. १।१२

दीयते च शिवज्ञानं क्षीयते पाशबन्धनम्।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः ॥[1]

इत्यादिरूपेण कारणागमे सिद्धान्तशिखामणौ च दीक्षालक्षणं निर्दिष्टम्। अस्यायमर्थः—'दीक्षा'शब्दे दा=दाने, क्षी=क्षय इति द्वौ धातू वर्तेते। तत्र दा=दान इति धातुगत्या शिवज्ञानम्, अर्थात् परब्रह्मपरशिवाख्यमहालिङ्गज्ञानं यया दीयते, तथा क्षी=क्षय इति धातुगत्या पाशबन्धनम्, अर्थाद् आणवादि-मलत्रयं यया क्षीयते, सा ज्ञानक्रियात्मिका शक्तिरेव दीक्षेति निगद्यते। गुरु-कारुण्येन प्राप्तव्यो विलक्षणोऽयं संस्कारः। अनेन संस्कारेण साधकस्य योगाङ्ग-भोगाङ्ग-त्यागाङ्गाख्येषु कारण-सूक्ष्म-स्थूलाख्येषु शरीरत्रयेषु विद्यमानाना-माणव-मायीय-कार्माख्यानां मलत्रयाणां निवृत्तिस्तथा भावप्राणेष्टाख्यानां लिङ्गत्रयाणां प्राप्तिर्जायते। तदुक्तं मायिदेवेन—

तनुत्रयगतानादिमलत्रयमसौ गुरुः।
दीक्षात्रयेण निर्दग्ध्वा लिङ्गत्रयमुपादिशत् ॥[2] इति।

तदेवं मलत्रयनिवारकस्य संस्कारस्य त्रिविधरूपत्वाद् दीक्षात्रैविध्य-मत्राङ्गीक्रियते। तदुक्तमागमे—

सा दीक्षा परमा शैवी त्रिधा भवति निर्मला।
एका वेधात्मिका साक्षादन्या मन्त्रात्मिका मता।
क्रियात्मिका परा काचिदेवमेव त्रिधा भवेत् ॥[3] इति।

तदत्र क्रमशस्तासां स्वरूपं विमृश्यते।

१. वेधदीक्षा

"हस्तमस्तकसंयोगाद् दृष्टेर्वेधेति कीर्त्यते"[4] इत्यागमोक्त्या गुरोर्दिव्य-दृष्टिपातेन हस्तमस्तकसंयोगेन च शिष्यमनसि तदीयचिन्मयस्वरूप-ज्ञानकारकः संस्कारविशेषो वेधदीक्षेत्युच्यते। तदुक्तमाचार्यैः—

---

१. सि. शि. ६।११
२. अ. सू. ५।५२
३. का. आ., क्रि. १।१३
४. का. आ., क्रि. १।१४

गुरोरालोकमात्रेण हस्तमस्तकयोगतः ।
यः शिवत्वसमावेशो वेधादीक्षेति सा मता ॥[1] इति ।

अनया दीक्षया शिष्यस्याणवमलो निवर्तते, 'शिवोऽहम्' इति भावनाया उदयश्च संजायते । इयं शिवोऽहमितिभावनैव भावलिङ्गमित्युच्यते । एवं वेधादीक्षयाऽऽणवमलनिवृत्तौ सत्यां शिवोऽहमितिभावनया शिवजीवयोः सामरस्य-रूपयोगप्राप्तिर्भवतीति वेधादीक्षया प्राप्तशिवोऽहंभावरूपभावलिङ्गकोऽयं शुद्ध-जीवोऽत्र सिद्धान्ते 'योगाङ्गः' इत्याख्यायते । अत एव—

संयुयोज त्रिधाभूतं परादीक्षाबलेन तु ।
योगाङ्गे भावलिङ्गं तु वेधादीक्षाबलेन वै ॥[2]

इति मायिदेवेनापि वेधादीक्षया योगाङ्गे भावलिङ्गधारणमुपदिष्टम् । इयं वेधादीक्षा सप्तविधोपदेशगर्भा भवति ।

वेधादीक्षान्तर्गता सप्तविधोपदेशाः

तत्र तावत् कारणागमे[3] समय-निःसंसार-निर्वाण-तत्त्व-अध्यात्म-तत्त्व-विशोधन-तत्त्वबोधाख्याः सप्तोपदेशा वेधादीक्षान्तर्गता निरूपिताः । तेषां स्वरूपं तदागमानुसारेणात्र निरूप्यते ।

१. समयोपदेशः—"समयः शपथाचारकालसिद्धान्तसंविदः" इत्यमर-सिंहोक्त्याऽनेकार्थस्य समयशब्दस्य सिद्धान्तार्थोऽत्राभिप्रेतः । वेधादीक्षा-विधानवेलायां श्रीगुरुः समयसंस्कारं करिष्य इति संकल्प्य स्वदक्षिणहस्तं षड्वारं षडक्षरमहामन्त्रेणाभिमन्त्र्य तं शिवहस्तमिति विभाव्य शिष्यशिरसि विन्यस्य च "अयं मे हस्तो भगवान्"[4] इति मन्त्रं पठन् करुणापूर्णया दृष्ट्या विलोकयन्—

हित्वा बन्धुजने प्रीतिं तां भक्तेषु स्थिरां कुरु ।
एवं समयमादिश्य .... ॥[5]

---

१. सि. शि. ६।१३
२. अ. सू. ५।५७
३. का. आ., क्रि. १।९६–९७
४. ऋ. १०।६०।१२
५. का. आ., क्रि. १।१०१

इत्येवमुपदिशति । दीक्षासंस्कारात् प्राक् स्वबन्धुजनेषु या प्रीतिरासीत्, साऽधुना शिवभक्तेषु करणीयेति तु समयः, अर्थात् सिद्धान्तः । एतादृशसमयोपदेश एव वेधादीक्षान्तर्गता समयदीक्षेत्युच्यते ।

२. **निःसंसारोपदेशः**—शरीरेन्द्रियादिषु ममत्वबुद्ध्या क्रियमाणो व्यवहारः संसारः । संसारिणस्त्वन्वहं शरीराद्युपचारेष्वेव निरता भवन्ति । एतादृशप्राकृतिकोपचारं परिहृत्य भगवत्पूजोपचारस्योपदेश एव निःसंसारदीक्षेत्युच्यते । तथा चोक्तम्—

…………… निःसंसारां निबोधयेत् ।
देहेन्द्रियादिसंसारं परिहृत्य सदा मम ॥
पूजोपचारः संसार इति भावय चेतसि ।
इत्यादिश्य च[1] …………………… ॥ इति ।

३. **निर्वाणोपदेशः**—निर्वाणं नाम मुक्तिः । "मन एव मनुष्याणां कारणं बन्धमोक्षयोः"[2] इत्युक्त्यनुसारं मनसि विषयासक्ते संसारस्तन्निवृत्तौ च निर्वाणम् । तस्मात् तापत्रयभयाकुले संसारे मनो मा प्रेषय, यत्नतस्तन्निरोधं कुरु, इत्याकारक उपदेश एव निर्वाणदीक्षा । तदुक्तम्—

…………… दद्याच्च दीक्षां निर्वाणसंज्ञिताम् ।
मलत्रयसमुद्भूते तापत्रयभयाकुले ॥
दुरन्ते दुर्भवोपान्ते मनो न कुरु यत्नतः ।
इति निर्वाणमादिश्य[3] …………… ॥ इति ।

४. **तत्त्वोपदेशः**—"अनारोपितं रूपं तत्त्वम्" इत्युक्त्यनुसारेण वीरशैवसिद्धान्ते प्रपञ्चस्य सृष्टि-स्थिति-संहारादिकारणीभूतं हि लिङ्गतत्त्वमित्यभ्युपगम्यते । तस्यैवांशभूतमङ्गतत्त्वमित्युच्यते । अनादिकालाद भिन्नयोर्लिङ्गाङ्गतत्त्वयोः सामरस्योपदेश एव तत्त्वदीक्षा । तथा चोक्तम्—

…………… दद्यात् तत्त्वाभिधायिनीम् ।
लिङ्गाङ्गतत्त्वे विज्ञाय लिङ्गसायुज्यवान् भव ।
उपदिश्यैवम्[4] …………………… ॥ इति ।

---

१. का. आ., क्रि. १।१०१-१०२
२. ब्र. बि. २; शाटचाय. १
३. का. आ., क्रि. १।१०२-१०३
४. का. आ., क्रि. १।१०३-१०४

५. अध्यात्मोपदेशः—वीरशैवसिद्धान्ते सर्वैरपि मुमुक्षुभिः शिवलिङ्गोपासना क्रियते। उपास्ये तस्मिन् लिङ्गे स्वप्राणान्, स्वप्राणेषु च तल्लिङ्गमेवंप्रकारेण परस्परं सामरस्यं विभाव्य यो लिङ्गप्राणी भवति, तस्यैव जीवनमाध्यात्मिकं भवति। एतादृशाध्यात्मोपदेश एवाध्यात्मदीक्षा। उक्तं चागमे—

.... अथ च दद्यादध्यात्मसंज्ञिताम्।
प्राणे लिङ्गं प्रतिष्ठाप्य लिङ्गे प्राणं निधाय च॥
लिङ्गं निरीक्षमाणः सन् लिङ्गप्राणी सदा भव।
आदिश्यैवं[१] .... ॥ इति।

६. तत्त्वसंशोधनोपदेशः—वीरशैवसिद्धान्ते खाद्य-लेह्य-चोष्यादिकं सर्वमप्युपभोग्यवस्तुजातं शिवलिङ्गाय विनिवेद्य प्रसादरूपेण स्वीक्रियते। इतोऽपि विशेषरूपेण गन्ध-रस-रूप-स्पर्श-शब्द-तृप्त्याख्या ये षड्विषयाः सन्ति, तानपि लिङ्गार्पितान् कृत्वा प्रसादरूपेणोपभुङ्क्ष्वेत्येवमत्र गुरुरुपदिशति। एतादृशप्रसादोपभोगार्थं पूर्वोक्तविषयग्राहकेषु घ्राण-जिह्वा-चक्षुः-चर्म-श्रोत्र-मनआख्येषु षडिन्द्रियेषु क्रमश आचारलिङ्ग-गुरुलिङ्ग-शिवलिङ्ग-जङ्गमलिङ्ग-प्रसादलिङ्ग-महालिङ्गाख्यानि षड् लिङ्गानि विभाव्य तत्तद्विषयान् तत्तदिन्द्रियाधिष्ठितलिङ्गेभ्यो विनिवेद्यन्ते। एतादृशरहस्योपदेश एव तत्त्वसंशोधनोपदेशस्तत्त्वसंशोधनदीक्षेति वा निगद्यते। तदुक्तमागमे—

.... ततो दद्यात् तत्त्वसंशोधनात्मिकाम्।
शब्दादीन् विषयान् सर्वांस्तत्तदिन्द्रियगोचरान्॥
आचारलिङ्गमुख्येभ्यः षड्लिङ्गेभ्यः समर्पयन्।
वर्तस्व शुद्धधीर्नित्यं प्रयतोऽपि जितेन्द्रियः॥
उपदिश्यैवमपि च[२] .... ॥ इति।

७. तत्त्वोपदेशः—शिवजीवयोरेकत्वोपदेश एव तत्त्वोपदेशः। स चात्र लिङ्गाङ्गसामरस्यमित्युच्यते। श्रीगुरुस्तत्त्वमसीति महावाक्यमुखेन तदुपदिशति। एवमुपदिष्टो हि साधकस्तदेवाहमिति निरन्तरं ध्यायमानस्तिष्ठति। एतादृशलिङ्गाङ्गसामरस्यबोधकोपदेशस्तत्त्वोपदेशः, तत्त्वोपदेशिनी दीक्षा इति वा कथ्यते। तदुक्तमागमे—

---

१. का. आ., क्रि. १।१०४-१०५
२. का. आ., क्रि. १।१०५-१०७

.... दद्यात् तत्त्वोपदेशिनीम् ॥
सच्चित्सुखनिजाकारं लिङ्गं यद् ब्रह्मसंज्ञितम् ।
तदसि त्वमुपास्वातस्तदेवाहमिति ध्रुवम् ॥
वेधाख्यया दीक्षयैवं शिष्यमादिश्य देशिकः ।[1] इति ।

तदेवं वेधादीक्षायां सप्तविधोपदेशात्मिका अवान्तरदीक्षाः संभवन्ति । तीव्रशक्तिपातयुक्तानां साधकानामियं दीक्षा फलवती भवति ।

२. मान्त्री दीक्षा

"गुरुणोदीरिता कर्णे सा हि मन्त्रात्मिका भवेत्"[2], "मान्त्री दीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी"[3] इत्याद्युक्त्यनुसारेण शिष्यस्य दक्षिणे कर्णे निगूढं यथा स्यात् तथा यः पञ्चाक्षरमहामन्त्रोपदेशोऽस्ति, सा मननत्राणधर्मिणी मान्त्री दीक्षेति कथ्यते । शिवो हि पञ्चाक्षरमन्त्रस्वरूपः, अतोऽस्य मन्त्रस्य गुर्वादेशानुसारं प्राणायामपूर्वकं पुनः पुनरावृत्त्या मननेन च साधकस्य सूक्ष्मशरीरे, अर्थान्मनसि विद्यमानो मोहरूपो भेदापादकश्च मायीयो मलो निवृत्तो भवति । किञ्च, अनया दीक्षया शिष्यस्य 'चिद्रूपोऽहम्' इत्याकारकः प्रबोधो जायते । इयमेव चिदहन्ता 'प्राणलिङ्गम्' इति कथ्यते । एवं शिष्यस्य मायीयमलनिवारिका प्राणलिङ्गप्रबोधिका च दीक्षा मान्त्री दीक्षेत्याख्यायते । एतादृशदीक्षासम्पन्नो हि साधकः सर्वाण्यपि भोग्यवस्तूनि परशिवाय विनिवेद्यैवोपभुङ्क्त इत्ययं 'भोगाङ्गः' इत्यभिधीयते । अत एव "मन्त्रदीक्षाबलेनैव भोगाङ्गे प्राणलिङ्गकम्"[4] इति शिवयोगिना मायिदेवेन भोगाङ्गापरपर्याये सूक्ष्मशरीरे मन्त्रदीक्षया प्राणलिङ्गधारणमुपदिष्टम् ।

मन्त्रदीक्षान्तर्गता सप्तविधोपदेशाः

अस्यां मन्त्रदीक्षायामपि—चित्तैकाग्रता, दृढव्रतता, पञ्चेन्द्रियार्पणा, अहिंसा, लिङ्गनिष्ठा, लिङ्गमनोलया, सद्योमुक्तिश्चेति सप्तविधोपदेशा भवन्ति । तदत्रागमसिद्धान्तानुसारं क्रमशस्तेषां स्वरूपं विमृश्यते ।

---

१. का. आ., क्रि. १।१०७-१०८
२. का. आ , क्रि. १।१४
३. सि. शि. ६।१४
४. अ. सू. ५।५८

१. चित्तैकाग्रता—चाञ्चल्यं चित्तस्य सहजः स्वभावः। तच्चाञ्चल्यवशेन साधकस्यैकदेवोपासना भवितुं नार्हति। तस्मादत्र गुरुरेकदेवोपासनाया महत्त्वं प्रतिपाद्य शिष्यस्य चित्तैकाग्र्यं विदधाति। तथा चोक्तम्—

इष्टलिङ्गात् परं वस्तु शिष्य त्वं नावलोकय।
इत्येकाग्रमतिं दत्त्वा[१] ....॥ इति।

२. दृढव्रतता—"श्रेयांसि बहुविघ्नानि" इत्युक्त्यनुसारं शिवभक्तेन परिगृहीतेषु व्रतेषु विघ्नबाधायामुपस्थितायां सत्यां संभवत्येव तेषां परिच्युतिः। साधको यदि दृढमनस्कश्चेद् विघ्नैः पुनः पुनः प्रतिहन्यमानोऽपि स परिगृहीतव्रतात् कदापि परिच्युतो न भवति। एवं परिगृहीतस्य व्रतस्य यावद्देहपातं कदाचिल्लोपं विना परिपालनमेव दृढव्रततेत्युच्यते। एतादृश दृढव्रततोपदेश दृढव्रतदीक्षा। तदुक्तम्—

.... दीक्षां दद्याद् दृढव्रताम्॥
शरीरपातपर्यन्तं न जहीहि व्रतान्यपि।
दृढव्रतामिति प्रोक्त्वा[२] ....॥ इति।

३. पञ्चेन्द्रियार्पणा—पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि च स्वभावतः स्वस्वविषयेषु प्रवर्तन्ते। एतेषां विषयप्रवृत्तिं निरुध्य भगवदर्पणमेव पञ्चेन्द्रियार्पणमित्युच्यते। यथा पतिव्रता स्त्री स्वकीयैः कर्मेन्द्रियैर्ज्ञानेन्द्रियैश्च पतिपरायणा भवति, तथा वीरशैवसाधकाय स्वेष्टदेवं पतिं परिभाव्य सदा देहेन्द्रियमनोभिस्तदीया सेवा विधेयेति गुरोर्य उपदेशः, स पञ्चेन्द्रियार्पणदीक्षेत्याख्यायते। तथा चोक्तम्—

.... दद्यात् पञ्चेन्द्रियार्पणाम्।
सत्यहं मत्पतिर्लिङ्गमिति निश्चित्य चेतसि॥
सदा तनुमनोभावानिष्टादिभ्यः समर्पय।
इत्यादिश्य[३] ....॥ इति।

४. अहिंसा—तत्र तावद्योगशास्त्रे भगवता भाष्यकारेण व्यासेन—"तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः"[४] इत्यहिंसाया लक्षणमुक्तम्।

---

१. का. आ., क्रि. १।११२
२. का. आ., क्रि. १।११२-११३
३. का. आ., क्रि. १।११३-११४
४. यो. सू. भा. २।३०

एतादृशाऽहिंसायाः परिपालनार्थं सर्वभूतेष्वात्मदृष्टिरावश्यकी। अत एव वीरशैवाचार्याः—

......................ततो दद्यादहिंसासंज्ञितां गुरुः ॥
सर्वाणीमानि भूतान्यप्यात्मवत् परिभावयन्।
मा हिंसीरित्युपादिश्य[1] ....॥

इत्यागमवाक्यानुसारं शिष्याय सर्वभूतेष्वात्मदृष्टिमुपदिशन्ति। अयमुपदेश एवाहिंसादीक्षेत्याख्यायते।

५. लिङ्गनिष्ठा—परिदृश्यमानस्यास्य प्रपञ्चस्य लयगमनयोः कारणीभूतमाद्यन्तरहितं परशिवब्रह्म लिङ्गमित्युच्यते। तादृशे लिङ्गे विद्यमाना दृढा भक्तिरेव लिङ्गनिष्ठेत्यभिधीयते। सद्गुणायोपदिश्यमाना एतादृशी निष्ठैव लिङ्गनिष्ठादीक्षेत्यवगन्तव्यम्। तदुक्तम्—

.... लिङ्गनिष्ठामुपादिशेत् ॥
आदिमध्यान्तरहितं लिङ्गं यद् ब्रह्मसंज्ञितम्।
तन्निष्ठो भव सद्बुद्ध इत्युपादिश्य सद्गुरुः ॥
दीक्षामुपदिशेद्[2] ....॥ इति।

६. लिङ्गमनोलया—स्वभावतश्चञ्चलं संकल्पविकल्पात्मकं हि मनः। एतादृशस्य मनसः स्वाराध्ये महालिङ्गे लयकरणोपदेशो लिङ्गमनोलयदीक्षेत्यभिधीयते। तदुक्तम्—

.... भूयो लिङ्गरूपमनोलयाम् ॥
लिङ्गरूपमभिध्यायन्नमनस्कश्चिरं भव।
इत्यादिश्य पुनर्दद्यात्[3] ....॥ इति।

७. सद्योमुक्तिः—मान्त्रीदीक्षाया अन्तिमोपदेशः सद्योमुक्त्याख्यः। "मदुक्तार्थे स्थिरमतिः प्रवर्तस्व विसंशयः"[4] इत्यागमोक्त्यनुसारं श्रीगुरुर्जीवन्मुक्तेः स्वरूपमुपदिश्य तत्रैव शिष्यमतिं स्थिरीकरोति। गुरोरुपदेशे संशयं

---

१. का. आ., क्रि १।११४-११५
२. का. आ., क्रि. १।११५-११६
३. का. आ., क्रि. १।११६-११७
४. का. आ., क्रि. १।११८

विना प्रवृत्तस्य साधकस्य जीवन्मुक्त्यवस्था तु सहजतया प्राप्यते। एवं जीवन्मुक्त्यवस्थाप्रापकोपदेश एव सद्योमुक्तिदीक्षेत्युच्यते। तदेवं सप्तोपदेशविशिष्टा मान्त्री दीक्षेत्यवधेयम्।

३. क्रियादीक्षा

अधुना क्रमप्राप्ता क्रियादीक्षा तदवान्तरभेदाश्च यथाशास्त्रं प्रस्तूयन्ते। "कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा"[1] इत्याचार्योक्त्या मण्डपदेवतादिप्रतिष्ठापूर्वकं क्रियाप्रधाना हि दीक्षा क्रियादीक्षेत्याख्यायते। वीरशैवसिद्धान्ते एतत्सम्प्रदायप्रवर्तकानां रेवणसिद्ध-मरुलसिद्ध-एकोराम-पण्डिताराध्य-विश्वाराध्याख्यानां पञ्चाचार्याणां सम्प्रदायानुवर्तिन आचार्यपट्टाभिषिक्ताः परम्परागतमठस्थलसमुत्पन्ना एव गुरवो[2] दीक्षां प्रदास्यन्ति। ते खल्वेकस्मिन् शुभमुहूर्ते मठ-मन्दिरादिपवित्रस्थानेषु मण्डपं निरचय्य तन्मध्ये पूर्वोक्तपञ्चाचार्यप्रतीकान् पञ्चकलशान् संस्थाप्य तेषु तत्तदाचार्यानाहूय तत्साक्षित्वे कलशोदकैः शिष्यं त्रिवारमभिषिच्य, शिष्यस्य मांसपिण्डदेहं मन्त्रपिण्डं विधातुं तस्य दक्षिणकर्णे शिवपञ्चाक्षरमहामन्त्रं निगूढम्, अर्थात् परश्रुतिगोचरीभूतं यथा न भवति तथा कीर्तयन्ति। किञ्च, तदानीमेव तत्स्वरूपम्, छन्दः, तन्मन्त्रद्रष्टारं महर्षिम्, तद्देवता-प्रत्यधिदेवताः, करन्यासमङ्गन्यासं च निरूपयन्ति[3]।

एवं मन्त्रोपदेशेन शिष्यदेहं संशोध्य पञ्चसूत्रप्रक्रियया निर्मितमङ्गुष्ठप्रमाणं शैलजं लिङ्गं यद्वा नर्मदाबाणं गृहीत्वा जलाधिवास-धान्याधिवासक्रियया पञ्चगव्यैः पञ्चामृताभिषेकैश्च तस्य शिलात्वं निवर्त्य मूलपञ्चाक्षरमन्त्रेण संस्कृते तस्मिन् शिवलिङ्गे शिवकलानियोजनद्वारा प्राणप्रतिष्ठां च कृत्वा तल्लिङ्गं शिष्यहस्ते निधाय—

प्राणवद् धारणीयं तत्प्राणलिङ्गमिदं तव।
कदाचित् कुत्रचिद्वापि न वियोजय देहतः॥
यदि प्रमादात् पतिते लिङ्गे देहान्महीतले।
प्राणान् विमुञ्च सहसा प्राप्तये मोक्षसम्पदः॥[4]

---

१. सि. शि. ६।१४

२. क्रि. सा., भा. ३, पृ. १३३

३. सि. शि. ६।१९-२०

४. सि. शि. ६।२५-२६

इत्युपदिशन्ति। एवं क्रियादीक्षया प्राप्तमिदं शिवलिङ्गमिष्टलिङ्गमित्यभिधीयते। एवमिष्टलिङ्गप्रदानमेव क्रियादीक्षाया परमोद्देश्यम्। उक्तं चागमे—"शिष्यपाणितले दत्ता या दीक्षा सा क्रिया भवेत्"[1] इति। अनया दीक्षया कार्ममलस्य, अर्थात् शुभाशुभवासनानां निवृत्तिर्जायते।

क्रियादीक्षान्तर्गताः सप्तसंस्काराः

आज्ञोपमा च कलशाभिषेकाख्या ततः परम्।
स्वस्तिकारोहणं भूतिपट्टमायत्तमेव च॥
स्वायत्तमिति सप्तैताः क्रियादीक्षान्तरा मताः।[2]

इत्यागमोक्त्यनुसारं क्रियादीक्षायामपि—आज्ञा, उपमा, कलशाभिषेकः, स्वस्तिकारोहणम्, भूतिपट्टम्, आयत्तम्, स्वायत्तमिति सप्त संस्काराः संभवन्ति। क्रमशस्तेषां स्वरूपं निरूप्यते।

१. आज्ञादीक्षा—

परित्यज्य सदाचारं मा वर्तस्व सर्वदा।
इत्याज्ञादीक्षयाऽऽदिश्य ततस्त्वेवं वदेद् गुरुः॥[3]

इत्यागमादेशानुसारं श्रीगुरुर्दीक्षार्थमागताय शिष्याय प्रथमतो वीरशैवीयसदाचारम्, अहिंसादिदशविधधर्मस्वरूपं च सम्यगुपदिशति। अनन्तरं चोपदिष्टमार्गेणैव यावज्जीवं प्रवर्तितव्यमित्यादिशति। सद्गुरोरियमाज्ञैव आज्ञादीक्षेत्युच्यते।

२. उपमादीक्षा—

पुरातनकृताचारसदृशं कुर्विति स्फुटम्।
उपमादीक्षयाऽऽदिश्य शिष्यपापापनुत्तये।
प्राणानायम्य विधिवत्पञ्चगव्यानि साधयेत्॥[4]

इत्युक्त्यनुसारं श्रीगुरुः स्वेनोपदिष्टे सदाचारे धर्ममार्गे च विश्वासदार्ढ्यार्थं तादृशाचारशीलानामनेकेषां महात्मनां चरितानि शिष्याय श्रावयति।

---

१. का. आ., क्रि. १।१४
२. का. आ., क्रि. १।४३
३. का. आ., क्रि. १।४४
४. का. आ., क्रि. १।४५

एवमाचारशीलानां दृष्टान्तश्रवणेन श्रोतृवर्गस्य मनस्यस्माभिरप्याचारशीलैर्भाव्यमित्युत्कृष्टा भावना समुदेति । तदेवं दृष्टान्तमाध्यमेन सदाचारोपदेश एवोपमादीक्षेत्याख्यायते ।

३. कलशाभिषेकदीक्षा—कलशोदकैर्लिङ्गाङ्गयोरभिषिच्यमानः संस्कारविशेषो हि कलशाभिषेकदीक्षा । अनेनाभिषेकविधानेन लिङ्गस्य शिलात्वनिवृत्तिरङ्गस्य च पञ्चतत्त्वशुद्धिर्जायते । तत्रायं क्रमः—प्रथमं तावद्दीक्षामण्डपस्य मध्यभागे पञ्चाचार्यप्रतीकभूताः पञ्चब्रह्मकलशाः संस्थाप्यन्ते । तत्र पूर्वदिशि सद्योजातकलशः, दक्षिणे वामदेवः, उत्तरे तत्पुरुषः, पश्चिमे अघोरः, मध्ये चेशानकलश इति कलशस्थापनविधिः । एवं संस्थापितेषु कलशेषु सद्योजातादिपञ्चब्रह्मदेवान् श्रीरेणुकाचार्यादिपञ्चाचार्यांश्चावाह्यन्ति । तदनन्तरं पञ्चसूत्रप्रक्रियया विनिर्मितमङ्गुष्ठपरिमाणं शिलामयं शिवलिङ्गमादाय—

घर्षणादिक्रियाजातजातदोषोपशान्तये ।
हिरण्यशृङ्गप्रमुखैरनुवाकैरनुक्रमात् ॥
शिवलिङ्गं स्नापयामीत्यभिषिञ्चेदनन्तरम् ।[१]

इत्यागमादेशानुसारं पञ्चगव्येन, पञ्चामृतेन च शिवलिङ्गमभिषिच्य पूर्वोक्तपञ्चकलशस्थितेन शुद्धोदकेन पञ्चब्रह्ममनूत्तमैः पुनः शिवलिङ्गं संस्नाप्यते । तदनन्तरं शाणादिसंघर्षजाततापोपशान्तये जलाधिवासनम्, सप्तधातुस्फूर्तये च धान्याधिवासनं क्रियते[२] । अनन्तरं शास्त्रोक्तविधिना षडध्वन्यासः[३] सम्पाद्यते । शिवलिङ्गे प्रतिष्ठापितानां कलानां स्थैर्यार्थं चतुर्विंशत्युत्तरत्रिशतसंख्यायुतेन पञ्चाक्षरेण मनुना प्रधानकुण्डे होमो विधीयते । एवं शिवलिङ्गसंस्कारानन्तरं दीक्षार्थमागतं शिष्यमाहूय भद्रासने समुपवेश्य—

अथ शिष्यस्याभिषेकदीक्षां दद्याद् गुरूत्तमः ।
अनादिभवसम्पन्नसर्वदोषोपशान्तये ॥

पञ्चकुम्भोदकैः शुद्धैः शिष्यं संस्नापयेदपि ।
पञ्चतत्त्वविशुद्ध्यर्थं पञ्चब्रह्ममनून् जपन् ॥[४]

---

१. का. आ., क्रि. १।५०-५१
२. का. आ., क्रि. १।५४-६४
३. का. आ., क्रि. १।६६-७०
४. का. आ., क्रि. १।७४-७५

इत्यादेशानुसारं पञ्चकलशोदकैरभिषेकस्तस्य क्रियते। एवं साधकस्य शरीरगतानां पाञ्चभौतिकतत्त्वानां विशुद्ध्यर्थं क्रियमाणोऽभिषेक एव कलशाभिषेकदीक्षेत्यभिधीयते।

४. स्वस्तिकारोहणदीक्षा—"षडध्वशोधनद्वारा मांसपिण्डनिवृत्तये। स्वस्तिकारोहणाभिख्यां दीक्षां दद्याद्यथाविधि॥"[1] इत्यागमवचनप्रामाण्येन शिष्यस्य मांसपिण्डनिवृत्तये विधीयमानं षडध्वशोधनमेव स्वस्तिकारोहणदीक्षेत्युच्यते। तत्र तावत् शिवपुराणे—

कलां तत्त्वं च भुवनं वर्णं पदमतः परम्।
मन्त्रश्चेति समासेन षडध्वा परिपठ्यते॥[2]

इति षडध्वनां नामानि परिकीर्तितानि। उक्तेषु षडध्वसु वर्ण-पद-मन्त्राख्याः शब्दाध्वान इति, कला-तत्व-भुवनाख्याश्चार्थाध्वान इति विभागो विधीयते। साधकस्य पादादिमस्तकपर्यन्तेष्ववयवेष्वेतेषां न्यासेन, अर्थाद् दृढभावनया सम्बन्धेन तस्य शरीरमध्वात्मकं जायत इति तन्मांसपिण्डत्वं निवर्तते। तदध्वसम्बन्धस्तु—

संहारक्रमतो विद्वान् शब्दार्थात्मषडध्वनः।
पादादिषु तु विन्यस्येच्छिष्यस्य नियतात्मनः॥
वर्णाध्वानं शब्दरूपं विन्यस्येत् पादयोर्बुधः।
अर्थरूपं कलाध्वानं मेढ्रे न्यस्येदनन्तरम्॥
शब्दरूपं पदाध्वानं नाभौ विन्यस्य देशिकः।
तत्त्वाध्वानं त्वर्थरूपं हृदि न्यस्येदतन्द्रितः॥
मन्त्राध्वानं शब्दरूपं विन्यस्यैवं मुखे तथा।
अर्थरूपं च भुवनाध्वानं न्यस्येच्छिरस्यपि॥[3]

इत्येवं निरूपितः। एवमध्वसम्बन्धानन्तरमुक्तेषु पादादिशिखान्तेषु षट्सु स्थानेषु पुनः षडक्षरमन्त्रसम्बन्धो विधीयते। अनया रीत्या विधीयमानोऽध्वसम्बन्ध एव स्वस्तिकारोहणदीक्षेत्युच्यते।

---

१. का. आ., क्रि. १।७७

२. शि. पु. ७।२।१७।२

३. का. आ., क्रि. १।७८-८१

५. भूतिपट्टदीक्षा—भूतिर्नाम विभूतिः। शुद्धेन गोमयेन निर्मिताया विभूतेर्धारणेन शारीरकं मानसिकं च मालिन्यमपोह्यते। अत एव वीरशैवसिद्धान्ते भस्मस्नानं भस्मोद्धूलनं त्रिपुण्ड्रधारणं च विहितम्। अत एव दीक्षावसरे सद्गुरुरस्य माहात्म्यं संबोध्य स्वामृतकरेण शिष्यशरीरे विभूतिं धारयति। तदुक्तम्—

अनादिमलसंहृत्यै भूतिपट्टाख्यदीक्षया।
स्नानमुद्धूलनं भूत्या धारणं चापि कारयेत् ॥[1] इति।

तदेवं मलपरिहारकेण भस्मना क्रियमाणः शिष्यशरीरसंस्कारो भूतिपट्टदीक्षेत्याख्यायते। अत्र विभूत्या सह रुद्राक्षधारणमपि निरूप्यते।

६. आयत्तदीक्षा—पूर्वोक्तपद्धत्याऽभिषेकादिना सुसंस्कृतं पञ्चसूत्रप्रक्रियया विनिर्मितमङ्गुष्ठपरिमाणं यत् शिवलिङ्गमासीत्, तत्र प्राणप्रतिष्ठापनाद्यर्थं गुरुस्तल्लिङ्गं स्ववामहस्तपीठे गृहीत्वा संपूज्य शिष्याय प्रदर्शयति। तदुक्तम्—

इष्टलिङ्गं समादाय वामहस्तेऽभिपूज्य च।
सौम्यैतल्लिङ्गमीक्षस्वेतीष्टलिङ्गं प्रदर्शयेत् ॥[2] इति।

एवं गुरुः शिष्यायेष्टलिङ्गं प्रदर्श्योभयोर्मध्ये जवनिकापटं ग्राहयित्वा मङ्गलाष्टकमुच्चार्य, अक्षतान् विकीर्य च शिष्यम्—"अङ्गत्रयेऽपि दृढतो लिङ्गवान् भव सर्वदा"[3] इत्युपदिश्य जवनिकापटमपवारयति। एवमत्र भो शिष्य! अद्यप्रभृति भवान् लिङ्गायत्तो भवेतीष्टलिङ्गं प्रदर्शयति। श्रीगुरुणोपदिश्यमानत्वादियमायत्तदीक्षेत्यभिधीयते।

७. स्वायत्तदीक्षा—

वामहस्तं तु शिष्यस्य मलेनैवाभिमन्त्र्य च ॥
ससवारं सुसंपूज्य स्ववामकरसंस्थितम्।
निक्षिपेत्तत्र तल्लिङ्गं त्रियम्बकमनुं स्मरन् ॥[4]

१. का. आ., क्रि. ११८३
२. का. आ., क्रि. ११८९
३. का. आ., क्रि. ११९१
४. का. आ., क्रि. ११९४-९५

इत्यागमोक्त्यनुसारं स्वहस्तस्थितं सुसंस्कृतमिष्टलिङ्गं गुरुर्मन्त्रोपदेशपुरःसरं शिष्यस्य वामहस्तपीठे स्थापयति। तदा तल्लिङ्गं शिष्यस्यायत्तं भवति। एवमिष्टलिङ्गस्य शिष्यस्वाधीनीकरणमेव स्वायत्तदीक्षा।

तदेवंप्रकारेण त्रिविधासु दीक्षास्वाहत्यैकविंशतिसंख्याकाः संस्काराः संभवन्ति। संस्कारैरेभिः सुसंस्कृतोऽयं जीवो मलत्रयरहितः सन् षट्स्थल-ब्रह्मजिज्ञासाया अधिकारी भवति।

गुरोरावरणशब्दवाच्यत्वम्

वीरशैवीयाष्टावरणेषु प्रथमावरणत्वेन परिगणितो हि गुरुर्दीक्षात्रयेण मलत्रयमपवार्य लिङ्गत्रयं चोपदिश्य सन्मार्गप्रवर्तनद्वाराऽरिषड्वर्गेभ्यः शिष्यं परिरक्षतीत्ययं रक्षाकवचरूपावरणशब्दभाग् भवतीत्यवधेयम्।

२. लिङ्गम्

वीरशैवीयाष्टावरणेषु लिङ्गं तावद् द्वितीयावरणत्वेन परिगण्यते। तदत्र लिङ्गशब्दस्य कोऽर्थः? कतिविधं तत्? तत्प्राप्तिविधानं कीदृशम्? कीदृशी तत्पूजाविधिः? तत्फलं च किमित्यादिकं सर्वं यथाशास्त्रं विशदीक्रियते।

लिङ्गशब्दार्थः

लयं गच्छति यत्रैव जगदेतच्चराचरम्।
पुनः पुनः समुत्पत्ति तल्लिङ्गं ब्रह्म शाश्वतम्॥[1]

इत्याचार्योक्त्या जगदुत्पत्तिस्थितिलयकारणीभूतं यत् परशिवब्रह्म वर्तते, तदेवात्र सिद्धान्ते लिङ्गमित्याख्यायते। सूक्ष्मागमे—

लिकारो लयबुद्धिस्थो बिन्दुना स्थितिरुच्यते।
गकारात् सृष्टिरित्युक्ता लिङ्गं सृष्ट्यादिकारणम्॥[2]

इत्यक्षरार्थेनापि स एवाभिप्रायः प्रकटीकृतः। जगत्कारणीभूतं तल्लिङ्गतत्त्वं शिवशक्त्योः संयुक्तरूपम्, तस्य केवलशिवरूपत्वे जगत्कारणत्वं व्याहन्येत। आगमशास्त्रे शिवो नाद इति, शक्तिश्च बिन्दुरित्यभिधीयते। अनयोः संयुक्तं रूपं हि तल्लिङ्गम्। तद्यथा—

---

१. सि. शि. ६।३६

२. सू. आ., क्रि. ६।५

बिन्दुनादात्मकं सर्वं जगत् स्थावरजङ्गमम् ।
बिन्दुः शक्तिः शिवो नादः शिवशक्त्यात्मकं जगत् ॥
बिन्दुनादात्मकं लिङ्गं जगत्कारणमुच्यते ।[१] इति ।

एवं शिवशक्त्यात्मकाल्लिङ्गात् सृष्टेः प्रादुर्भावप्रकारः—

दक्षिणाङ्गात् ततो ब्रह्मा विष्णुर्वामाङ्गतस्तथा ।
समस्तवेदजननी गायत्री हृदयादभूत् ॥
वेदाः शिरस्समुद्भूताः साङ्गोपाङ्गाः सहस्रशः ।
उत्पद्यते लीयते च लिङ्गेऽस्मिन् सचराचरम् ॥[२]

इत्येवं प्रकारेण दर्शितः । अतः—"यतो वा इमानि भूतानि जायन्ते"[३] इत्याद्या ब्रह्मस्वरूपनिरूपणपराः श्रुतयोऽपि तल्लिङ्गस्वरूपमेवोपवर्णयन्तीत्यवधेयम्, "लिङ्गं तद् ब्रह्मसंज्ञितम्"[४], "लिङ्गं ब्रह्म सनातनम्"[५] इत्यादिस्थलेषु लिङ्ग-ब्रह्मपदयोः पर्यायत्वेनोक्तत्वात् । एवं चोपनिषत्सु यद् ब्रह्मपदेनोच्यते, तदेवागमशास्त्रे लिङ्गपदेनोच्यत इति सिद्धम् ।

लिङ्गं शैवमिदं साक्षाच्छिवशक्त्युभयात्मकम् ।
ध्यातव्यमर्चनीयं च भुक्तिमुक्तिफलेच्छुना ॥[६]

इति सूक्ष्मागमोक्त्या वीरशैवाचार्यास्तल्लिङ्गोपासनां कृत्वा तदुपासनापद्धतिं प्रचारितवन्तः । इयं चोपासना बहिरङ्गान्तरङ्गभेदेन द्विविधा । [७]मूलाधार-हृदय-भ्रूमध्यादिस्थानेषु ज्योतीरूपेण विराजमानस्य तस्यैव परात्परलिङ्गस्योपासनाऽन्तरङ्गेत्युच्यते । अन्तःस्थितस्य ज्योतिर्लिङ्गस्य प्रतिकृतिरूपेण शिलादिना निर्मितस्येष्टलिङ्गस्य पूजादिकं बहिरङ्गमित्यवगन्तव्यम् । दर्शनान्तरेष्विव वीरशैवदर्शनेऽपि जीवात्मनस्त्रिविधानि स्थूल-सूक्ष्म-कारणाख्यानि शरीराण्यभ्युपगतानि । यावन्ति शरीराणि तावन्ति लिङ्गानीति नियमादत्र

१. च. ज्ञा., क्रि. ३।१३,१६
२. सू. आ., क्रि. ६।१४-१५
३. तैत्ति. उ. ३।१
४. लि. च., पृ. ११८
५. सि. शि. ६।३५
६. सू. आ., क्रि. ६।७
७. आधारे हृदये वापि भ्रूमध्ये वा निरन्तरम् ।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणम् ॥ (सि. शि. ६।३८)

प्रत्येकं जीवस्य त्रिविधानां लिङ्गानामुपासना विहिता। तत्र स्थूलशरीरेणेष्ट-लिङ्गस्य, सूक्ष्मशरीरेण प्राणलिङ्गस्य, कारणशरीरेण च भावलिङ्गस्योपासना विधीयते। तदुक्तम्—

इष्टं स्थूलतनोः प्रोक्तं प्राणं सूक्ष्मतनोः स्मृतम्।
भावाख्यं कारणस्यैव तनुत्रयगतं त्रयम्॥
पूजयन्निष्टलिङ्गं तु निध्यायन् प्राणलिङ्गकम्।
भावयन् भावलिङ्गं वै मृत्युपाशांश्छिनत्ति सः॥[१] इति।

एतादृशानां त्रिविधानां लिङ्गानामुपासनयाऽङ्गपदवाच्यो जीवोऽपि लिङ्ग-स्वरूपो भवति, मृत्युपाशाच्च प्रमुच्यते। तदेवं जीवात्मनो मृत्युपाशच्छेदे कारणीभूतानामिष्ट-प्राण-भावाख्यानां त्रिविधानां लिङ्गानां स्वरूपं क्रमशो विचारयामः।

इष्टलिङ्गम्

क्रियादीक्षायां सद्गुरुणा संस्कृत्य प्रदीयमानमङ्गुष्ठपरिमाणं शैलजं शिवलिङ्गमत्र सिद्धान्ते 'इष्टलिङ्गम्' इत्यभिधीयते। अस्य निष्ठापूर्वकं पूजया पूजकस्येष्टप्राप्तिः संभवतीति तस्येष्टलिङ्गत्वोक्तिः समीचीनैव प्रतिभाति। यथा यज्ञोपवीतमुपनीतस्य बाह्यं चिह्नम्, तथेष्टलिङ्गं क्रियादीक्षासम्पन्नस्य वीरशैवस्य परिचायकं बाह्यं चिह्नमपीति विज्ञेयम्। तदुक्तं भगवता व्यासेन शङ्करसंहितायाम्—

यो हस्तपीठे निजमिष्टलिङ्गं विन्यस्य तल्लीनमनःप्रचारः।
बाह्यक्रियासंकुलनिस्पृहात्मा सम्पूजयत्यङ्ग स वीरशैवः॥[२] इति।

दीक्षासम्पन्नो हस्तपीठे इष्टलिङ्गपूजको वीरशैवः "कदाचित् कुत्रचिद्वापि न वियोजय देहतः"[३] इति श्रीगुरोराज्ञानुसारं पूजोपरान्तं तदिष्टलिङ्गं स्वशरीरे नाभेरुपरितनेषु कण्ठवक्षःस्थलादिष्वन्यतमे स्थाने सर्वदा धारयति।

विना विधानमीशानि न कुर्याल्लिङ्गधारणम्।
कृतं चेदकृतं विद्धि न तच्छैवमतं भवेत्॥[४]

---

१. च. ज्ञा., क्रि. ३।४५, ४८
२. वी. आ. च., पृ. ८३
३. सि. शि. ६।२५
४. पा. त. १।७७

इत्यागमोक्त्या पूर्वोक्तेन दीक्षासंस्कारेण विनैव यदि कश्चिदापणे लभ्यमानं शिवलिङ्गं क्रीत्वा स्वयमसंस्कृतमेव धारयति चेन्न तदिष्टलिङ्गमित्यभिधीयते। यथा विवाहसंस्कारं विना काचित् स्त्री स्वयमेव स्वहस्तेन स्वकण्ठे मङ्गलसूत्रधारणेन, सीमन्ते सिन्दूरधारणेन वा सौभाग्यवती न भवति; सौभाग्यप्रदायकस्य पतेस्तत्राभावात्; तथात्रापि संस्कारप्रदायकस्य सद्गुरोर्विना प्राप्तं लिङ्गं न तदिष्टलिङ्गं भवितुमर्हति। अतो मुमुक्षुभिर्वीरशैवैर्दीक्षामुखेनैव तद्धारणीयम्।

इष्टलिङ्गशब्दार्थपरीक्षणम्

नन्वेवं सद्गुरुणा प्राप्तं शरीरे सर्वदा धार्यमाणं यल्लिङ्गं तदिष्टार्थप्रदायकत्वादिष्टलिङ्गमिति यदुक्तं तन्न समीचीनम्, तादृशेष्टार्थप्रदायकत्वस्य भूमौ प्रतिष्ठापितेषु शिवलिङ्गेष्वपि विद्यमानत्वात्, अन्यथा काशिरामेश्वरादिशिवक्षेत्रयात्राया वैयर्थ्यापत्तेः, इति चेन्मैवम्, योगरूढ्या समाधीयमानत्वात्। तथाहि—इष्टलिङ्गमित्यत्र न केवलं यौगिकार्थोऽभिप्रेतः, किन्तु पङ्कजादिशब्दवद्योगरूढार्थः। तस्मादिष्टार्थप्रदायकत्वस्य भूमौ प्रतिष्ठापितेषु शिवलिङ्गेषु विद्यमानत्वेऽपि नैकमपि लिङ्गमिष्टलिङ्गनाम्ना व्यवहृतमद्यावधि, तेषां विश्वेश्वररामेश्वरादिनामभिरेव प्रसिद्धेः।

अपि च, इष्टं तावद् द्विविधम्—लौकिकं पारमार्थिकं चेति। तत्रैहिकामुष्मिकसुखप्रेप्सा लौकिकम्, मुक्तिश्च पारमार्थिकमिति विज्ञेयम्। विश्वेश्वरादीनां क्षेत्रियाणां शिवलिङ्गानामाराधनेन धर्मार्थकामाख्यानां लौकिकेष्टरूपाणां त्रिवर्गाणामेव प्राप्तिर्भवति, न तु परमपुरुषार्थस्य निःश्रेयसः, तदुपासनायाः प्रतीकरूपत्वात्।

अत्रेदमवधेयम्—प्रतीकोपासना अहंग्रहोपासना चेत्युपासनाया द्वैविध्यं प्रतिपादितं शास्त्रेषु। तत्रोपास्योपासकयोर्भेदबुद्ध्या लौकिकफलप्रेप्सया च क्रियमाणोपासना प्रतीकोपासनेत्युच्यते। सोऽहमित्युपास्योपासकयोरभेदबुद्ध्या क्रियमाणोपासा ह्यहंग्रहोपासना। इयमेव वेदान्ते मननमित्यभिधीयते। वीरशैवसिद्धान्ते प्रतिपादितेष्टलिङ्गोपासना न प्रतीकोपासना, किन्त्वहंग्रहोपासनैव। इष्टलिङ्गस्य स्वात्मज्योतिषः प्रतिकृतिरूपत्वात्, तल्लिङ्गं तदुपासकस्यैव प्राणानां प्रतिष्ठापितत्वात्[1]। स्वस्ववामहस्तपीठस्थितमिष्टलिङ्गं सर्वैरपि वीरशैवैः सोऽहं-

१. शिष्यस्य प्राणमादाय लिङ्गे तत्र निधापयेत्।
तल्लिङ्गं तस्य तु प्राणे स्थापयेदेकभावतः॥
एवं कृत्वा गुरुर्लिङ्गं शिष्यहस्ते निधापयेत्। (सि. शि. ६।२३-२४)

भावेनैवोपास्यते। निरन्तरं क्रियमाणयाऽनयोपासनया लिङ्गाङ्गसामरस्यरूपमैक्यम्, अर्थान्निःश्रेयसं प्राप्यते। इदमेव पारमार्थिकमिष्टं परमप्रयोजनं च। एतादृशपारमार्थिकेष्टप्रदायिकयाऽनयेष्टलिङ्गोपासनया लौकिकेष्टप्राप्तिस्तु कैमुतिकन्यायेन सिद्ध्यति। तस्मात् केवलं लौकिकेष्टप्रदायकेभ्यो भूप्रतिष्ठितशिवलिङ्गेभ्य उभयविधेष्टप्रदायकेषु वीरशैवैर्देहे धार्यमाणेषु शिवलिङ्गेष्वेवेष्टलिङ्गशब्दव्यवहारः सुचारु प्रतिभाति। एवमिष्टप्रदायकादस्मादेव शिवलिङ्गात् संसाररूपानिष्टस्यापि निवृत्तिर्जायते। अत एव सर्वैरपि वीरशैवैरस्य धारणं क्रियते। इदं चात्र प्रमाणम्—

इष्टलिङ्गमिदं साक्षादनिष्टपरिहारकम्।
धारयेदवधानेन शरीरे सर्वदा बुधः॥[1] इति।

श्रीमता मायिदेवेनापि—

इष्टिः पूजा तया नित्यमिष्टं पूजितमादरात्।
इष्टलिङ्गमिति प्रोक्तमाचार्यैर्लिङ्गपूजकैः॥
इष्टमर्थं स्वभक्तानामनुयच्छति सर्वदा।[2]

इत्येवमिष्टलिङ्गशब्दं नित्यपूज्यत्वरूपेण व्युत्पाद्यास्य वैशिष्ट्यं निरूपितम्। "इष्टिः=पूजा, तया नित्यमिष्टम्=प्रतिदिनं पूजितं यल्लिङ्गं तदिष्टलिङ्गम्" इति त्वस्य स्पष्टा व्युत्पत्तिः। प्रतिदिनं नियमेन पूज्यमानं लिङ्गमेवेष्टलिङ्गमित्यर्थः। "अहरहः सन्ध्यामुपासीत" इति विधिवाक्यमनुसृत्य नित्यं कर्म तावत्सर्वैरपि कर्तव्यमेव, अन्यथा प्रत्यवायप्राप्तिः। वीरशैवसिद्धान्ते शरीरे शिवलिङ्गधारणं तत्पूजा च नित्यकर्मेत्यभ्युपगम्यते। एवं शरीरे धृतस्य शिवलिङ्गस्य वीरशैवैर्नित्यमादरेण पूज्यमानत्वात् तदिष्टलिङ्गमित्युच्यते।

ननु ग्रामदेवालयेषु प्रतिष्ठितानामपि शिवलिङ्गानां प्रतिदिनं पूजासंभवात् तेषामपीष्टलिङ्गशब्दवाच्यत्वं संभवत्येवेति चेन्न, लिङ्गस्य नित्यपूजासंभवेऽपि पूजकस्य तन्नित्यकर्माभावात्, केनचिन्निमित्तेन ग्रामान्तरं देशान्तरं वा गतेनाऽर्चकेन तत्पूजाऽनुपपत्तेः। तस्मादेकेन साधकेन प्रतिदिनं पूज्यमानमेव लिङ्गमिष्टलिङ्गमित्यवगन्तव्यम्। वीरशैवाभिमतमिदं लिङ्गं साधकैः सर्वदा शरीरे धार्यत इति ग्रामान्तरं देशान्तरं वा गतेन साधकेनापि तत्पूजा कर्तुं शक्यत

---

१. सि. शि. ६।५०
२. अ. सू. ३।९-१०

इति न नित्यकर्मलोपप्रसङ्गः। तस्माद् देवालये प्रतिष्ठापितं लिङ्गं नेष्टलिङ्गम्, किन्तु देहे प्रतिष्ठापितमेव तदिति निश्चप्रचम्।

तदेतावता पर्यालोचनेन ज्ञायते यत् साधकेन सर्वदा शरीरे धार्यमाणम्, प्रतिदिनमादरेण पूज्यमानम्, अत एव जननमरणाख्यसंसाररूपानिष्टनिवारकं लिङ्गाङ्गसामरस्यरूपेष्टावाप्तिकरं च यल्लिङ्गं तदेवेष्टलिङ्गमिति।

स्थूलोपासनायाः प्राशस्त्यम्

ननु "बीजे यथाङ्कुरः सिद्धस्तथाऽऽत्मनि शिवः स्थितः"[1], "अनाद्यविद्यासम्बन्धात् तदंशो जीवनामकः"[2] इत्यादिवचनेषु शिवजीवयोरुभयोरपि हृदयपीठस्थितत्वेन प्रतिपादितत्वात् तत्रैव तयोरभेदचिन्तनया शिवसायुज्यस्य प्राप्तिसंभव इति किमर्थं वीरशैवैः [3]स्थूलरूपस्येष्टलिङ्गस्योपासना क्रियत इति चेत्, श्रूयतां रहस्यम्—वीरशैवसिद्धान्तेऽन्तरङ्ग-बहिरङ्गभेदेन द्विविधा हि लिङ्गोपासना विहिता। तत्राऽन्तरङ्गोपासना न सर्वेषां सुलभा, किन्तु स्थिरचेतसां योगिनामेव। अतो वीरशैवाचार्याः सर्वेषामत्र प्रवृत्त्यर्थं प्रथमं स्थूलोपासनां विधाय पुनस्तन्मुखेनैवाऽन्तरङ्गोपासनां निरूपितवन्तः।

किञ्च, "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः"[4] इत्युपनिषन्मन्त्रोक्त्या यावद्देहपातं हि कर्माण्यवर्जनीयानि। तत्र श्रीरेणुकाचार्यैः—"शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते"[5] इति शिवार्चनरूपं कर्म कर्तव्यमिति व्यवस्थाप्य, अर्चनादीनां कृते [6]मूर्तिरावश्यकीति च मत्वेष्टलिङ्गोपासनां व्यवस्थापितवन्तः।

शिलायां उत्कृष्टगुणाः

ननु जगद्व्यापकस्य जगदन्तर्यामिणश्च परशिवचैतन्यस्य चिज्जडेषु व्याप्तत्वाच्चेतने तत्पूजां विहाय जडे तावत् शिलानिर्मिते शिवलिङ्गे तत्पूजा

---

१. सि. शि. ५।३४

२. सि. शि. ५।३३

३. इष्टलिङ्गमिदं स्थूलं यद्बाह्ये धार्यते तनौ। (सि. शि. ६।४८)

४. ई. उ. २

५. सि. शि. ९।२२

६. आलम्बनं विना तस्य पदमुच्चैः सुदुष्करम्।
निर्गुणप्राप्तये नॄणां प्रतिमालम्बनं कृतम्॥ (शि. पु., वि. १२।६४)

न शोभनेति चेन्न; आपाततो जडरूपेण प्रतीयमानासु शिलादिष्वप्युत्कृष्टगुणसत्त्वात्। तदुक्तं सुभाषितकारेण—

न द्विषन्ति न याचन्ते परनिन्दां न कुर्वते।
अनाहूता न चायान्ति तेनाऽश्मानोऽपि देवताः॥[1] इति।

अस्यायमाशयः—अद्वेषणम्, अयाचनम्, अनिन्दनम्, अनाहूतस्थानेऽगमनमित्यादय उत्कृष्टगुणत्वेन परिगणिताः सन्ति। एते च गुणाः शिलानिर्मितेषु विग्रहेषु दरीदृश्यन्ते। एकस्मिन्नेव मन्दिरे प्रतिष्ठापितौ हरिहरविग्रहौ न परस्परं द्विष्यमाणाववलोकितौ केनापि। मन्दिरे गृहे वा विद्यमानो भगवद्विग्रहो न कुत्रापि भोजनादिकं याचते। यथा मनुष्यः प्रायः परनिन्दापरायणो भवति, तथा न कुत्रापि मूर्तिकृता परनिन्दा श्रवणपथमागता। लोके देवताविग्रहं भक्ता आनीय मन्दिरादिषु प्रतिष्ठापयन्त्येव, न कुत्रापि विग्रहः स्वयमागत्योपतिष्ठते। तदेतादृशानां गुणानां सत्त्वादेव जडानामपि शिलादीनां पूज्यत्वोपपत्तिः। अत एव चोक्तम्—"गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः" इति। तस्माद् गुणमहिम्ना जडमपि द्रव्यं देववत् पूज्यत इति पूजका अप्येतादृशोत्कृष्टगुणशालिनो भूयासुरित्यभिप्रायेणैव भारतीयमहर्षयो मूर्तिपूजापद्धतिमुपदिष्टवन्तः। अपरं च,

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते॥[2]

इत्याचार्योक्तौ समस्तस्यापि प्रपञ्चस्येश्वरशरीरत्वेन प्रतिपादितत्वात्, शिलादिकमपि तस्यैव स्थूलं रूपमिति तन्मुखेनैव सूक्ष्मस्वरूपप्राप्तिरित्यभिप्रायेण शिलानिर्मितशिवलिङ्गादीनां पूजाविधानमित्यवधेयम्।

शिवलिङ्गनिर्माणयोग्याः शिलाः

तत्र तावद् गरुडपुराणे गन्ध-पुष्प-गोमय-लवण-भस्म-गुड-शर्करा-धान्य-फल-दूर्वा-कर्पूर-नवनीत-अयस्कान्त-स्फटिक-वैडूर्यादिद्वात्रिंशद्द्रव्यैर्लिङ्गनिर्माण-विधिर्निरूपितः[3]। लिङ्गपुराणे च—"षड्विधं लिङ्गमित्याहुर्द्रव्याणां च प्रभेदतः"

१. सु. भा., पृ. १५९
२. सि. शि. १०।६६
३. शिवाङ्क, पृ. १५०

इति शैलज-रत्नज-धातुज-दारुज-मृण्मय-क्षणिकभेदेन लिङ्गनिर्माणोपयुज्यमानानां द्रव्याणां षड्विधत्वं प्रतिपादितम्। एतेन सर्वमपि वस्तुजातं शिवलिङ्गनिर्माण-योग्यमिति निश्चीयते। अत एवोक्तम्—"सर्वं लिङ्गमयं जगत्" इति। वीरशैवाचार्यास्तु—

स्फाटिकं शैलजं वापि चन्द्रकान्तमयं तु वा।
बाणं वा सूर्यकान्तं वा लिङ्गमेकं समाहरेत्॥[1]

इति स्फटिक-सूर्यकान्त-चन्द्रकान्त-बाण-शैलजानां पञ्चानां शिलानां नामान्युल्लिख्यैतेष्वेकतमां शिलां गृहीत्वेष्टलिङ्गं निर्मातव्यमित्युपदिष्टवन्तः। अधुना सूर्यकान्त-चन्द्रकान्तशिलयोर्दुर्मिलत्वाद् नार्मदम्, बाणम्, स्फाटिकम्, शैलजं वा लिङ्गं तावद् गृह्यते। तत्रापि—

श्रीशैलजं महादेवि ह्यैहिकामुष्मिकप्रदम्।
सर्वोत्तमोत्तमं लिङ्गं सर्वाभीष्टार्थदायकम्॥[2]

इति पारमेश्वरतन्त्रे श्रीशैलपर्वतीयशिलानिर्मितस्य लिङ्गस्याधिका प्रशंसा कृता। अतोऽत्र शैलजलिङ्गस्यैवाधिकोपयोगो दरीदृश्यते।

इष्टलिङ्गपरिमाणम्

वीरशैवैर्देहे धार्यमाणं पूज्यमानं चेदं लिङ्गं हृदयस्थात्मज्योतिषः प्रतिकृतिरिति पूर्वं प्रतिपादितत्वादिदमिष्टलिङ्गं तज्ज्योतिःप्रमाणमेव भवति। श्वेताश्वतरोपनिषदि—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः।
हृदा मनीषा मनसाभिक्लृप्तो य एतद् विदुरमृतास्ते भवन्ति॥[3]

इति तदात्मज्योतिषोऽङ्गुष्ठपरिमाणत्वं प्रतिपादितम्। श्रीमता अप्पय्यदीक्षितेनापि—"मनुष्यहृदयाब्जकोशानामङ्गुष्ठपरिमाणत्वात्" इति हृदयाकाशस्याप्यङ्गुष्ठमात्रत्वमेव निरूपितम्। एवं जीवात्मनो हृदयाम्भोजे शिवसान्निध्यस्यान्यत्रापि[4] बहु वर्णितत्वादिदमिष्टलिङ्गमपि हृदयाब्जतदन्तःस्थज्योतिर्वच्चाङ्गुष्ठपरिमाणमेव भवति।

---

१. सि.शि. ६।२१

२. पा. त. २।११

३. श्वे. उ. ३।१३

४. समस्तजगदात्मापि शङ्करः परमेश्वरः।
भक्तानां हृदयाम्भोजे विशेषेण विराजते॥ (सि.शि. १०।६७)
"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" (भ. गी. १८।६१)।

पञ्चसूत्रलिङ्गम्

लिङ्गवृत्तसमं पीठं दैर्घ्यं विस्तार एव च ।
तदर्धं गोमुखं चैव प्रोक्तं लिङ्गस्य लक्षणम् ॥[१]

इति नीलकण्ठशिवाचार्योक्त्यनुसारमिदमिष्टलिङ्गं पञ्चसूत्रप्रक्रियया निर्मीयते । अस्यायं भावः—तत्र तावत् शिवलिङ्गं शिवशक्त्युभयात्मकमिति पूर्वमुक्तमेव । तदनुसारं शिवलिङ्गस्य य उपरितनो बाणो वर्तते, स शिवस्वरूपः । अधो वर्तमानं पीठं तु शक्तिस्वरूपम् । शिवलिङ्गनिर्माणसमये प्रथमं बाणलिङ्गं निर्मीयते, तदनन्तरं तल्लिङ्गवृत्तपरिमाणं पीठं च । पीठस्य दैर्घ्यं विस्तारादिकं लिङ्गवृत्तसमपरिमाणमेव भवति, किन्तु गोमुखं तदर्धपरिमाणम् । तदेवं लिङ्गस्य वृत्तम्, पीठस्य दैर्घ्यम्, पीठस्याधोभागस्य विस्तारः, पीठस्योपरिभागस्य विस्तारश्चेत्येतेषां चतुर्णां लिङ्गावयवानां परिमाणं समानमेव भवति । गोमुखं तु लिङ्गवृत्तस्यार्धपरिमाणं भवति । इयमेव पञ्चसूत्रप्रक्रिया । अत्र किञ्चिदपि न्यूनाधिकं न कर्तव्यम् । अन्यथा—

लिङ्गाधिक्ये भवेन्मृत्युः शक्त्याधिक्ये धनक्षयः ।
लिङ्गशक्त्योः समत्वं हि भोगमोक्षफलप्रदम् ॥[२]

इति प्रमाणवचनेन महदनर्थप्राप्तिप्रसङ्गः । तस्मात् साधकस्य भोगमोक्षप्राप्तये सद्गुरुर्लिङ्गपरीक्षणं कृत्वा पञ्चसूत्रप्रमाणेन विनिर्मितमेव लिङ्गमनुगृह्णाति । किञ्च,

नकारश्चादिपीठं च मकारो मध्यमेव च ।
शिकारो वर्तुलं चैव वाकारो गोमुखं तथा ।
यकारो बिन्दुरेवं स्यात् प्रणवो लिङ्गमुच्यते ॥[३]

इत्यत्र केलदिबसवभूपालः पूर्वोक्तानां पञ्चलिङ्गावयवानां पञ्चाक्षरमन्त्ररूपत्वमुपवर्ण्येष्टलिङ्गपञ्चाक्षरमन्त्रयोरभिन्नत्वं प्रत्यपादयत् । तदेवं तात्त्विकदृष्ट्या पञ्चाक्षराण्येव पञ्चसूत्राणि, तैर्विनिर्मितमिदं लिङ्गं पञ्चसूत्रलिङ्गम् । पञ्चाक्षराणि यथा शिवसूचकानि भवन्ति, तथेदं पञ्चसूत्रलिङ्गमपि "सूचनात् परमेशस्य लिङ्गं सूत्रमितोरितम्" इति किरणागमोक्त्या

---

१. क्रि.सा., भा. ३, पृ. ४१; वी. आ. प्र. १।९४

२. क्रि.सा., भा. ३, पृ. ४१

३. शि. र. १।४।३९-४०

परशिवसूचकमेव भवति। तदेवं मुखे पञ्चाक्षरं जपन्, हस्तपीठे तन्मन्त्रस्वरूपं पञ्चसूत्रात्मकमिष्टलिङ्गं पूजयन्, हृदये च तस्यैवानुचिन्तनं कुर्वन् साधक एककालिकत्रिकरणपूजां निर्वर्तयतीति वीरशैवाचार्याः क्रियादीक्षायामिदं पञ्चसूत्रलिङ्गं संस्कृत्याङ्गीकुर्वन्ति।

इष्टलिङ्गसंस्कारविधिः

क्रियादीक्षोक्तविधिना शैलजस्य पञ्चसूत्रशिवलिङ्गस्य शिलात्वनिवृत्त्यर्थं जलाधिवास-धान्याधिवासादिकं कृत्वा पञ्चामृतपञ्चकलशाभिषेकैश्चाभिषिच्य, षोडशोपचारैः पूजा संपाद्यते। तदनन्तरं च—

सर्वलक्षणसम्पन्ने तस्मिंल्लिङ्गे विशोधिते।
पीठस्थितेऽभिषिक्ते च गन्धपुष्पादिपूजिते॥
मन्त्रपूते कलां शैवीं योजयेद्विधिना गुरुः।
शिष्यस्य प्राणमादाय लिङ्गे तत्र निधापयेत्॥
तल्लिङ्गं तस्य तु प्राणे स्थापयेदेकभावतः।
एवं कृत्वा गुरुर्लिङ्गं शिष्यहस्ते निधापयेत्॥[1]

इति श्रीरेणुकाचार्यदिशानुसारं सद्गुरुः शिष्यस्य मस्तके पञ्चकोणचक्रं विलिख्य मध्ये प्रणवं पञ्चदलेषु पञ्चाक्षरमहामन्त्रं चोल्लिख्य तदुपरि स्वदक्षिणहस्तमाधाय, तन्मस्तकस्य पश्चिमशिखाचक्रस्थितां चित्कलां ध्यात्वा, स्वयोगमहिम्ना संकल्पशक्त्या च तां चित्कलामङ्कुशमुद्रयाऽऽवाह्य तस्मिन् शिवलिङ्गे प्रतिष्ठापयति। एवं शिवकलासंयुक्ते लिङ्गे शिष्यस्य जीवकलारूपां तत्प्राणशक्तिमप्याकृष्य संस्थाप्य तल्लिङ्गं शिष्यहस्ते निधापयति। एवं सद्गुरुणा संस्कृत्य प्राप्तं शिवकला-जीवकलाभ्यां युक्तमिदं लिङ्गमधुना न पूर्ववज्जडरूपम्, किन्तु चित्कलास्वरूपमत एवेष्टार्थप्रदमनिष्टनिवारकं च भवति।

इष्टलिङ्गे चैतन्याभिव्यक्तेर्वैज्ञानिकत्वम्

संस्कारविशेषेण शिलामयेऽपीष्टलिङ्गे चैतन्याभिव्यक्तिर्जायत इति यदुक्तं तन्न काल्पनिकम्, किन्तु वैज्ञानिकम्। अत एव "तस्माद्वा एतस्मादात्मनः आकाशः संभूतः। आकाशाद्वायुः। वायोरग्निः। अग्नेरापः। अद्भ्यः पृथिवी। पृथिव्या ओषधयः। ओषधीभ्योऽन्नम्। अन्नात्पुरुषः। स वा एष पुरुषोऽन्नरस-

१. सि. शि. ६।२२-२४

मयः"[१] इत्यादिषु बहुषु श्रुतिषु[२] जडे चैतन्याभिव्यक्तेः प्रकारः सुस्पष्टं प्रतिपादितः। अस्यायं भावः—अशितमन्नं रस-रक्त-मांस-मेदोऽस्थि-मज्जारूपेण परिणमच्चत्वारिंशत्तमे दिने पितुः शरीरे शुक्ररूपेण मातुःशरीरे रजोरूपेण च परिणमते। पुनस्तयोरेव रेतोरक्तयोः संयोगेन पुरुषः संजायते। तथाहि श्रूयते—"पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति"[३] इति। उपनिषत्प्रतिपादितोऽयं पुरुषोत्पत्तिप्रकारो जडे चैतन्याभिव्यक्तिं वैज्ञानिकीं प्रसाधयति। एतत्प्रत्यक्षानुभूतदृष्टान्तेनैव सद्गुरुणा क्रियमाणेन संस्कारविशेषेण शिलामयेऽपि शिवलिङ्गे चैतन्याभिव्यक्तिर्जायत इति निश्चीयते। तस्मादिष्टलिङ्गे संस्कारविशेषेण जायमाना चैतन्याभिव्यक्तिर्वैज्ञानिकीति विज्ञेयम्।

इष्टलिङ्गे शिष्यप्राणसम्बन्धस्य रहस्यम्

सामान्यतः सर्वेषां प्राणिनां प्राणसम्बन्धस्तु स्वस्वसूक्ष्मशरीरेणैव भवति। तादृशसूक्ष्मशरीरसम्बन्धेन स्थूलशरीरमपि प्राणवत् प्रतीयते। सूक्ष्मशरीरे मनोबुद्ध्योः प्राबल्यं भवति। तयोर्निर्देशानुसारमेव प्राणानामिन्द्रियाणां च व्यवहारः। अत एव योगिनो दृढेन मानसिकसंकल्पबलेन स्वशरीरं त्यक्त्वा परकाये प्रविश्य पुनः स्वशरीरमागच्छन्ति स्मेति श्रीशङ्कराचार्यादीनां चारित्र्येण ज्ञायते। एतेनेदं निश्चीयते यद् य य मनोबुद्धी यत्रासक्त्या निवसतस्तत्रैव तस्य प्राणा अपि निवसन्तीति। लोके स्वशरीरादन्यत्र धन-क्षेत्र-कलत्र-पुत्रादिष्वत्यासक्ता अज्ञानिनो बह्वो दरीदृश्यन्ते। अत एतेषां परमप्रेमास्पदीभूतानां धन-क्षेत्रादीनां विनाशे, कलत्र-पुत्रादीनां वा मरणे एतेऽपि म्रियमाणा इवावलोक्यन्ते। तस्मात् प्राणसम्बन्धे परमप्रेमास्पदत्वं नियामकम्।

अज्ञजीवानां प्रेमाधिक्यं सांसारिकेषु वस्तुषु यथा भवति, तथा भक्तानां प्रेमाधिक्यं स्वेष्टे भगवति भवतीत्यत्र न सन्देहः। अत इहामुत्रफलभोगविरक्तेभ्यः परिशुद्धान्तःकरणेभ्यो भगवदनुग्रहरूपशक्तिपातविशिष्टेभ्यो भक्तेभ्यः क्रियादीक्षायां सद्गुरुणा शिवकलानियोजनपूर्वकमिष्टलिङ्गं यदा प्रदीयते, तदा तस्मिन् तेषां प्रेमाधिक्यं सञ्जायते। निःस्पृहाणां तेषां प्रेमास्पदीभूतस्य व त्वन्तर-

---

१. तै. उ. २।१।१

२. "अन्नं बै प्रजापतिस्ततो ह वै तद्रेतस्तस्मादिमाः प्रजाः प्राजायन्त" (प्र. उ. १।१४)।

३. छा. उ. ५।९।१

स्याभावाद् इष्टलिङ्गमेव परमप्रेमास्पदं भवति। परमप्रेमास्पदीभूते वस्तुन्येव प्राणसम्बन्धो भवतीति नियमेन;

प्राणवद्धारणीयं तत् प्राणलिङ्गमिदं तव।
कदाचित् कुत्रचिद्वापि न वियोजय देहतः ॥[1]

इत्येतादृशेन सद्गुरोरुपदेशेन च दीक्षावन्तो भक्ता लिङ्गप्राणिनो भवन्ति। अपरं च, वीरशैवीयोऽयं लिङ्गदीक्षासंस्कार एकविध आध्यात्मिको विवाहसंस्कार एव। तदुक्तमाचार्यैः—

अङ्गलिङ्गी ज्ञानरूपः सती ज्ञेयः शिवः पतिः।
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान् ॥ इति।[2]

अत्र शिवः पतिर्जीवश्च सती। लोके शीलवती सती विवाहानन्तरमनन्यमनस्का भूत्वा सर्वदा पतिपरायणा पतिप्राणा च भवति, तथाऽयं दीक्षासम्पन्नोऽङ्गपदवाच्यो जीवोऽन्यदेवविमुखो भूत्वा स्वेष्टलिङ्गपरायणो लिङ्गप्राणी च भवति; अर्थान्निरतिशयप्रेमवान् भवति। वीरशैवसिद्धान्ते "लिङ्गाङ्गसङ्गिनां तत्राजन्मान्तदीक्षा"[3] इत्युपनिषद्वचनानुसारमिदमिष्टलिङ्गधारणं यावज्जीवं विधीयते। तस्मात् सर्वैरपि दीक्षासम्पन्नैर्वीरशैवैरिष्टलिङ्गधारणं यावज्जीवं प्राणवद् धार्यते।

इष्टलिङ्गवियोगे प्राणसन्त्यागः

"यावज्जीवमग्निहोत्रं जुहुयात्" इति विधिवाक्येऽग्निहोत्रस्य नित्यकर्मत्वाद् यथा तस्य यावज्जीवं कर्तव्यत्वं विधीयते, तथेष्टलिङ्गधारणं तत्पूजा च वीरशैवानां नित्यं कर्म, अतस्तद्यावज्जीवमनुष्ठेयम्। तदुक्तम्—

लिङ्गस्य धारणं यस्य स्थूलदेहे न विद्यते।
तद्देहं निष्फलं ज्ञेयं जीवत्यक्तशरीरवत् ॥
तस्मात्तद्धारणं प्रोक्तं यावज्जीवाग्निहोत्रवत् ॥[4] इति।

एतादृशस्य नित्यव्रतस्य कदाचित् प्रमादाल्लोपे, अर्थात् तल्लिङ्गस्य शरीराद्वियोगे प्राणत्यागमन्तरा प्रायश्चित्तान्तरं नात्र विहितम्। तदुक्तं वातुलशुद्धाख्ये तन्त्रे—

१. सि. शि. ६।२५
२. सि. शि. १३।२
३. सि. उ., १२ श्लो.
४. सि. उ. वी. भा., पृ. २९

वीरशैवक्रमः प्रोक्तः प्रायश्चित्तविवर्जितः ।
प्राणलिङ्गे व्रते लुप्ते हस्तखड्गादवञ्चयन् ॥
मुखं पङ्कजवच्छिन्द्याद् वीरभृत्यस्य लक्षणम् । इति ।[१]

एतादृशानां बहूनां[२] प्रमाणवचनानामवलोकनेन व्रतोऽयमतीव कठोरः प्रतीयते । अतोऽस्य 'वीरव्रतः' इति प्रसिद्धिरस्ति । अयं वीरव्रतो निष्ठापूर्वकमत्र परिपाल्यत इति मतमिदं वीरशैव इति सार्थकनामभागभूत् । तदुक्तं चन्द्रज्ञानागमे—

इष्टलिङ्गवियोगे वा व्रतानां वा परिच्युतौ ।
तृणवत् प्राणसन्त्याग इति वीरव्रतं मतम् ॥
भक्त्युत्साहविशेषोऽपि वीरत्वमिति कथ्यते ।
वीरव्रतसमायोगाद् वीरशैवं प्रकीर्तितम् ॥[३] इति ।

नन्वेवं प्राणत्यागे आत्महत्यादोषप्रसक्तिरिति चेन्न,

यल्लिङ्गं गुरुणा दत्तं प्राणलिङ्गं तदेव हि ।
मध्ये नष्टे प्रमादेन देहं त्यक्त्वा शिवं व्रजेत् ॥[४]
गते लिङ्गे त्यजेत् प्राणं वीरशैवः स एव हि ।[५]

इत्यादिशास्त्रविहितत्वान्निर्दोषत्वापत्तिः । अत्रेदमाकूतम्—सांसारिकविषयव्यामोहेन, कस्यचिद्भयेन, असाध्येन रोगादिना वा पीडितः कश्चन पुरुषो रज्जुपाशादिना स्वयमेव म्रियते चेत्, सा आत्महत्येत्युच्यते । एवं मृतानां जनानां दुर्गतिः पुनर्जन्म च निश्चितमेव, किन्तु भगवद्भक्तिविशेषेण क्रियमाणमात्मार्पणं पूर्वोक्तशास्त्रप्रामाण्येन "अन्ते या मतिः सा गतिः" इत्युक्त्या च भगवत्स्वरूपप्रापकमेव भवति । एतादृशमात्मार्पणं भगवति विद्यमानं निरतिशयं

---

१. वा. त. १०।५१-५२
२. (क) यदि प्रमादात् पतिते लिङ्गे देहान्महीतले ।
प्राणान् विमुञ्च सहसा प्राप्तये मोक्षसम्पदः ॥ (सि. शि. ६।२६)
(ख) पा. त. २।१०२-१०३
(ग) प. र. ३।२
३. च. आ., क्रि. १०।३३-३४.
४. पा. त. २।१०२-१०३
५. प. र. ३।२

प्रेमाविष्करोति। लोकेऽपि प्रेमास्पदीभूतायाः कस्याश्चिद्व्यक्तेर्वस्तुनो वाऽऽत्यन्तिके वियोगे जाते सति हृद्गत्यवरोधेन तत्क्षणमेव म्रियमाणा बहवो दृश्यन्ते। नात्र शास्त्रादेशः, प्राकृतिकीयं घटना। एवं सांसारिकवस्तुनि विद्यमानं यन्निरतिशयं प्रेम तत्स्वेष्टलिङ्गे यदि स्यात्, तदा तद्वियोगेऽपि तस्य प्राणाः सहजतयैवोत्क्रमेयुः।

किञ्च, "गते लिङ्गे त्यजेत् प्राणम्" इति प्राणार्पणविधायकस्य शास्त्रस्य न प्राणार्पणे तात्पर्यम्, किन्त्विष्टलिङ्गे निष्ठादार्ढ्यार्थं तदित्यवगन्तव्यम्। यादृशं प्रेम वैषयिकवस्तुनि सहजतया प्रवर्तते, तादृशमेव प्रेम यदि भगवति स्यात्, तदा तस्य जीवनमेव परिवर्तितं स्यात्। अनादिकालात् सांसारिकप्रेम्णा संसारचक्रे परिभ्रममाणस्य जीवस्योद्धारार्थमिदं भगवत्प्रेमप्रशिक्षणम्। पूज्येषु वर्तमानमिदं निरतिशयं प्रेमैव भक्तिरित्युच्यते। इयं भक्तिरेव श्रद्धा-निष्ठा-अवधान-अनुभव-आनन्द-समरसरूपेण क्रमशो विकसिता सती भक्तं भगवत्स्वरूपे समरसं करोति। एवं भगवत्स्वरूपप्राप्तये भक्तेरेव मूलत्वात्, तस्याश्च निरतिशयप्रेमरूपत्वात्, सांसारिके वस्तुनि सहजतया विद्यमानमिदं प्रेम भगवति कर्तव्यमिति गूढाशयेनैवेष्टलिङ्गवियोगे प्राणत्यागरूपं कठिनं व्रतमाचार्यैरुपदिष्टम्।

अपि च, यथा प्राणरहितं हि स्थूलशरीरं लोके प्रेतमित्याख्यायते, तथा प्राणस्वरूपेष्टलिङ्गाभावे वीरशैवस्य शरीरमपि प्रेतवदस्पृश्यमेव भवति। तदुक्तं महाराष्ट्रभवेन सन्तशिरोमणिना मन्मथस्वामिना—

> जया चा प्राणलिङ्गी भरला। तो कैसे असा देही उरला॥
> लिङ्ग गेलिया देही संचरला। पिशाचवत् जाणिजे॥[1] इति।

तस्मात् प्रेतत्वकलङ्कप्रक्षालनार्थं सर्वैरपि वीरशैवैः प्राणवदिष्टलिङ्गधारणं कर्तव्यम्।

लिङ्गधारणेन पापप्रणाशनम्

भगवान् शिव एव जीवानां बहिरन्तर्वर्तिसकलविधानां दोषाणां निवारकः। अष्टमूर्तिर्हि स पृथिव्यादिपञ्चमहाभूतरूपेण सूर्य-चन्द्र-यजमान-रूपेण च जीवात्मनां बाह्यं मालिन्यं दूरीकरोतीति सर्वानुभवसिद्धमेव। "जपतो नास्ति पातकम्" इत्यत्र तस्यैव परशिवस्य नामजपेनान्तरङ्गमालिन्यस्य

१. प. र. ३।१४

प्रशमनं भवतीत्यपि प्रतिपादितम्। वीरशैवैर्धार्यमाणमिदमिष्टलिङ्गं परशिव-वाचकस्य तस्यैव पञ्चाक्षरस्य प्रतिकृतिरूपत्वात् तद्धारणेनापि सर्वविधानां पापानां प्रक्षालनं भवति। अत एव पूज्यपादैः श्रीरेणुकाचार्यैः—"लिङ्गस्य धारणं पुण्यं सर्वपापप्रणाशनम्"[1] इत्युपदिष्टम्। सूक्ष्मागमे च—

दर्शनात् सर्वपापघ्नं स्पर्शनादखिलार्थदम्।
अर्चनान्मोक्षदं देवि लिङ्गं को वा न पूजयेत्॥[2]

इति तद्दर्शनस्पर्शनार्चनादिभिर्निःश्रेयसप्राप्तिरपि प्रतिपादिता।

मल्लिङ्गधारणात् प्रीतिर्या पुनर्जायते मम।
सा प्रीतिर्नैव विज्ञानात् केवलान्मम पूजनात्॥[3]

इति कामिकोत्तरवचनं प्रमाणयद्भिर्नीलकण्ठशिवाचार्यैर्लिङ्गधारणं शिवस्य प्रीतिकरमिति निरूपितम्। तत्प्रीतिकरत्वादेव तदनुग्रहेण सर्वदोषनिवृत्ति-रित्यवगन्तव्यम्। अत एव लिङ्गाष्टके—"सञ्चितपापविनाशकलिङ्गम्"[4] इत्यभिहितम्। भूमौ शिवलिङ्गस्थापनेन तत्स्थलं यथा पवित्रं क्षेत्रं संजायते, तथा शिवलिङ्गधारिणामपि शरीरं क्षेत्रमेव भवति। "इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते"[5] इति गीतोक्तावपि शिवपूजकं शिवध्यानपरायणं च शरीरं क्षेत्रमित्युपदिष्टम्। अतः शिवलिङ्गधारिणां शरीराणि जङ्गमशिवालयानि। स्वयं पूतानि तान्यन्यानपि पावयन्ति।

अवधानेन लिङ्गधारणम्

इष्टलिङ्गमिदं साक्षादनिष्टपरिहारकम्।
धारयेदवधानेन शरीरे सर्वदा बुधः॥[6]

इत्याचार्यदिशानुसारं परमपावनमनिष्टपरिहारकं च तदिष्टलिङ्गं शरीरे सर्वदाऽवधानेन धारणीयम्। अवधानमिति पदस्य दक्षता जागृतिर्वाऽर्थो भवति।

१. सि. शि. ६।२८
२. सू. आ., क्रि. ६।६१
३. क्रि. सा., भा. ३, पृ. ४९
४. लिङ्गा., श्लो. ५
५. भ. गी. १३।१
६. सि. शि. ६।५०

तस्मालिङ्गधारकैः सदा जागरूकैर्भाव्यम्, अर्थान्मम शरीरे शिवलिङ्गं वर्तत इत्यस्य ज्ञानस्य कदापि विस्मृतिर्यथा न स्यात्तथा भाव्यम्। तद्विस्मरणेनैव प्रमादाः संभवन्ति। लोके मनुष्यः कमपि दुर्व्यवहारं सर्वसमक्षं कर्तुमक्षमः सन् प्रच्छन्नरूपेणैव कर्तुमिच्छति। दुराचारिणां दुर्व्यवहारोऽन्यैरपरिज्ञातोऽपि स्वमनसा परिज्ञायत एव। यथाऽस्माकं दुर्व्यवहारोऽस्मदीयेन मनसा सर्वदा परिज्ञायते, तथा सर्वत्र व्यापकेन परशिवेन सर्वेषां दुर्व्यवहारो ज्ञायत एव। सर्वव्यापकस्य तस्यापरोक्षत्वाभावाज्जनाः स्वव्यवहारं न कोऽपि पश्यतीति भ्रमन्ति। एतादृश-भ्रमनिवारणाय वीरशैवाचार्यास्तस्यैव परशिवस्य प्रतिकृतिरूपमिष्टलिङ्गं प्रदत्तवन्तः। अतः स्वशरीरेऽपरोक्षरूपेण विद्यमानमिष्टलिङ्गं प्रति येऽवधानिनो भवन्ति, ते प्रमादं न कुर्वन्त्येव। सर्वदा बाह्यविषयासक्तेनाऽनवधानिना लिङ्ग-धारिणाऽपि प्रमादाः क्रियेरन्नित्याचार्या जागरयन्ति तान्। सद्यःप्रसूता गौर्यथा यत्र कुत्रस्थितापि स्ववत्सं प्रतिक्षणमनुस्मरति, तथा दीक्षितेनाऽपि पुरुषेण स्वशरीरस्थितस्येष्टलिङ्गस्यावधानिना भाव्यम्। एवं सर्वदा वर्तमानं स्वेष्ट-लिङ्गविषयकं संस्मरणमेव सावधानं लिङ्गधारणमित्युच्यते। अनेनावधानेनैव प्रमादा न संभवन्ति, साधकस्य सन्मार्गप्रवृत्तिश्च जायते। एतादृशमवधान-मेवात्र सिद्धान्तेऽवधानभक्तिरित्युच्यते।

इष्टलिङ्गधारणस्थानानि

नन्विष्टलिङ्गं स्थूलशरीरेऽवधानेन धारणीयमित्युक्तम्, किन्तु स्थूलशरीरे कुत्र धारणीयम्? कथं वा धारणीयमिति जिज्ञासायामुक्तं तत्रभवद्भिः श्रीरेणुकाचार्यैः—

> मूर्ध्नि वा कण्ठदेशे वा कक्षे वक्षःस्थलेऽपि वा।
> कुक्षौ हस्तस्थले वापि धारयेल्लिङ्गमैश्वरम्॥[1] इति।

अत्र १. मस्तके, २. कण्ठदेशे, ३. वक्षःस्थले, ४. कक्षे, ५. कुक्षौ ६. हस्त-स्थले चेति स्थूलशरीरस्य षट्सु स्थानेषु कस्मिंश्चिदेकस्मिन् स्थाने यथेच्छया लिङ्गधारणं कर्तव्यमित्यादिष्टम्।

स्थूलशरीरस्य षट्स्वेव स्थानेषु लिङ्गधारणस्येदमैदम्पर्यम्—श्रोत्र-त्वक्-नेत्र-जिह्वा-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि मनोरूपमन्तःकरणं चेति षडिन्द्रि-याणि प्रसिद्धानि सन्ति। तत्र पञ्च ज्ञानेन्द्रियाणि क्रमशः शब्द-स्पर्श-रूप-रस-

---

१. सि. शि. ६।५१

गन्धाख्यान् पञ्च विषयाननुभवन्ति। मनस्तु सर्वविषयसाधारणम्, अर्थाद् अन्तः स्थित्वा श्रोत्रादीन्द्रियद्वारा शब्दादीन् सर्वान् विषयाननुभवति। वीरशैव-दर्शने सर्वे विषया लिङ्गार्पिताः सन्तः प्रसादरूपेण स्वीकर्तव्या इति नियमोऽस्ति। अतो विषयग्राहकेष्वेव षडिन्द्रियेषु क्रमशो मनसि महालिङ्गम्, श्रोत्रयोः प्रसादलिङ्गम्, त्वचि जङ्गमलिङ्गम्, नेत्रयोः शिवलिङ्गम्, जिह्वायां गुरुलिङ्म्, नासिकायां चाचारलिङ्गमिति षड्लिङ्गानि भावयित्वा तत्तदिन्द्रिय-विषयान् तत्तल्लिङ्गेभ्यो विनिवेद्य प्रसादं भुङ्क्ते हि साधकः। तदेवं सूक्ष्मशरीरे भावितानां षड्लिङ्गानां स्थानानि स्थूलशरीरेऽपि वर्तन्त इति द्योतनार्थं स्थूलशरीरे षट्स्वेव स्थानेषु लिङ्गधारणमाख्यातम्। तत्र मस्तकं महालिङ्ग-स्थानम्, कण्ठं प्रसादलिङ्गस्थानम्, बाहू जङ्गमलिङ्गस्थानम्, वक्षःस्थलं शिवलिङ्गस्थानम्, हृदयं गुरुलिङ्गस्थानम्, हस्तावाचारलिङ्गस्थानमिति विज्ञेयम्। वातुलशुद्धागमेऽपि—

मूर्ध्नि कण्ठे भुजे हस्ते हृत्स्थले नाभिमण्डले।
एतेषामेकदेशे तु धारयेत् शिवलिङ्गकम्॥[1]

इत्येतेषु षट्सु स्थानेष्वन्यतमे लिङ्गधारणं विहितम्। एतत्षट्स्थलातिरिक्तेषु जटाग्रे पृष्ठभागे न भेरधःस्थाने च लिङ्गधारणं निषिद्धम्। तद्यथा—

नाभेरधस्ताल्लिङ्गस्य धारणं पापकारणम्।
जटाग्रे त्रिकभागे च मलस्थाने न धारयेत्॥[2] इति।

तस्मान्निषिद्धानि स्थानानि परित्यज्य विहितेषु स्थानेष्वेकतमे यथेच्छया शिवभक्तैर्लिङ्गधारणं कर्तव्यम्।

इष्टलिङ्गधारणविधानम्

ननु पूर्वोक्तेषु स्थानेष्विष्टलिङ्गं कथं धारणीयम्? तद्विधानं कीदृशम्? इति जिज्ञासायामुक्तं पारमेश्वरतन्त्रे—

अथ कुर्यान्महादेवि सज्जिकाख्यं तदालयम्।
पञ्चसूत्रोत्थलिङ्गस्य यावत्पूर्णं तथा भवेत्॥

सौवर्णमुत्तमं देवि यदि शक्तस्तथा चरेत्।
राजतं पित्तलं ताम्रं नैव कांस्येन कारयेत्॥

---

१. वा. शु. आ. १०।३६

२. सि. शि. ६।५२

सीसेन त्रपुणा देवि तान्तवी पाटिकापि वा।
एतेष्वन्यतमं नित्यं नान्यत् कुर्यादनारतम्॥
परित्यज्यापि यत्नेन प्राणमानधनादिकम्।
संरक्षणीयं गिरिजे लिङ्गमेवं न संशयः॥[1] इति।

अस्यायं भावः—शरीरे इष्टलिङ्गधारणार्थं तत्परिमितमेव धातुमयमालयं निर्मीयते। तदिष्टलिङ्गालयं 'सज्जिका'शब्देन व्यवह्रियते। इयं च सज्जिका यथाशक्ति सुवर्ण-रजत-पित्तल-ताम्रादिधातुभिर्विनिर्मिता भवति। अत्र कांस्य-सीसयोः सज्जिका निषिद्धा वर्तते। सुवर्णादिधातुमयसज्जिकाया निर्माणेऽशक्तश्चेत् तान्तवीं सज्जिकां परिगृह्णीयादित्यागमादेशः।

सज्जिकाया आकृतिविषयेऽपि तत्रैव[2]—सा नन्दीश्वराकृतिश्चेत् स्वर्गापवर्गप्रदा, चूतफलाकृतिश्चेद् आयुरारोग्यफलदा, मोदकाकृतिश्चेद् आयुष्मत्पुत्र-सौभाग्यफलदा, बिल्वसमाकृतिश्चेद् ऐश्वर्यविजयायुष्यादिफलदा, तथा शिव-लिङ्गाकृतिश्चेद् भोगमोक्षैकसाधनी भवतीति विस्तरेण निरूपितं वर्तते। अतः शिष्यो गुरोरादेशानुसारं यथेप्सितफलावाप्तये नन्दीश्वराद्याकारां सज्जिकां गृहीत्वा तत्रेष्टलिङ्गं वस्त्रावेष्टनपुरःसरं संस्थाप्येष्टलिङ्गयुक्तां तां सज्जिकां शिवसूत्रेण सम्बद्ध्य पूर्वोक्तेषु षट्सु स्थानेष्वन्यतमे स्थाने धारयेत्।

अत्र सज्जिकाबन्धनायोपयुज्यमानं शिवसूत्रं धातुमयं तन्तुमयं वा भवितुमर्हति। धातुमयेषु शिवसूत्रेषु सौवर्णं सौभाग्यदायकम् राजतं, पुत्रकीर्त्योः प्रदायकम्, ताम्रं धनधान्यदायकम्, पैत्तलं सर्वभोगप्रदम्, कांस्यं कल्मष-नाशनम्, त्रपुसीसमयमभीष्टफलप्रदं भवति। तान्तवं तु सर्वकामप्रदं भवतीति तत्रैवागमे निरूपितं वर्तते।

अत्रेदमपि विज्ञेयं यत् तन्तुमयं शिवसूत्रं यदि शुक्लं चेद् ज्ञानप्रदम्, रक्तं चेद् वश्यकरम्, श्यामं चेत् शत्रुभयदायकम्, पीतवर्णं चेत् पुत्रदायकम्, चित्रवर्णं चेद्विचित्रफलदायकं भवति[3]। तदिदं शिवसूत्रं षट्त्रिंशत्तन्तुमयं भवति। उक्तं च तद्रहस्यमिष्टलिङ्गविज्ञानाख्ये ग्रन्थे—

ज्ञानकर्म समुच्चित्य श्रीगुरुलिङ्गजङ्गमाः।
षड्विधाः षट्स्थलैरुक्ताः षट्त्रिंशत्तत्त्वतो मताः॥

---

१. पा. त. २।३४-३७
२. पा. त. २।३८-३९
३. पा. त. २।४९-५१

अतो द्वाभ्यां समुच्चित्य त्रिरावृत्य प्रकल्पयेत्।
षट्सूत्रं तच्छिवं प्रोक्तं रुद्रग्रन्थिसमायुतम्॥
अप्रमत्तेन तद्धार्यं शिवसज्जिकया सदा॥[1] इति।

तदेवं स्वाभीष्टानुसारं सज्जिकां शिवसूत्रं च गृहीत्वा, सज्जिकायामिष्टलिङ्गं विन्यस्य, तां च शिवसूत्रेण संयोज्य, शास्त्रोक्तस्थाने शरीरे धारयित्वा च तदिष्टलिङ्गपूजारूपं नित्यं कर्म प्रत्यहं समाचर्यते वीरशैवमतानुयायिभिः।

वीरशैवीयं नित्यं कर्म

शास्त्रेषु विहितं निषिद्धं चेति द्विविधं कर्म निरूपितम्। तत्र वेदागमाद्यनुमोदितं विहितम्, तदननुमोदितं च निषिद्धम्। विहितकर्मापि नित्य-नैमित्तिक-काम्य-प्रायश्चित्तभेदेन चतुर्विधम्। तत्र येषां करणे विशेषपुण्याभावेऽप्यकरणे प्रत्यवायस्तानि नित्यकर्माणि, प्रत्यवायसाधनीभूताभावप्रतियोगीनीत्यर्थः। तदुक्तम्—

नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्।
उपेत्यातिक्रमे दोषश्रुतेरत्यागदर्शनात्॥
फलाश्रुतेर्वीप्सया च तन्नित्यमिह कीर्तितम्।[2] इति।

यथा वैदिकानां सन्ध्यावन्दनं [3]पञ्चमहायज्ञादिकं च नित्यं कर्म, तथागमिकानां तत्रापि वीरशैवानां स्वेष्टलिङ्गपूजैव नित्यं कर्म। तदुक्तं सूक्ष्मागमे—

एककालं द्विकालं वा त्रिकालं वापि शाङ्करि।
पूजयेन्नियतं लिङ्गं प्राणलिङ्गपरायणः॥
एवं यः कुरुते भक्त्या नित्यमा प्राणसंचरात्।
वीरशैवः स विज्ञेयः सर्वशैवोत्तमोत्तमः॥[4] इति।

तस्मात् प्राक्तनपुण्यविशेषेण गुरुकारुण्येन च प्राप्तमिष्टलिङ्गं यथाशक्ति प्रत्यहमेककालम्, द्विकालम्, त्रिकालं वा षोडशोपचारादिनाऽवश्यं निष्ठया

---

१. इ. वि., पृ. ८२

२. न्या. को., पृ. ४१७-४१८

३. अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥ (म. स्मृ. ३।७०)

४. सू. आ., क्रि. ६।५१-५२

पूजनीयम्। नित्यं विहितस्यास्य कर्मणो यावज्जीवं कर्तव्यत्वाद् जिज्ञासुना ज्ञानिना वा तल्लोपो न कर्तव्यः, अन्यथा प्रत्यवायोपपत्तिः।

यो हि विहितकर्माधिकारी सन्नपि विहितान्यतिक्रमते, तस्य प्रत्यहं प्रत्यवाय उपचीयते, तादृशप्रत्यवायोपचयेन च बद्धो न मोक्षमर्हति, तत्त्वज्ञानेन संशयविपर्ययादेरुन्मूलनेऽपि विहिताकरणजन्यप्रत्यवायप्रतिरोधे सामर्थ्यस्यादृष्टचरत्वात्। किञ्च, यद्यात्मज्ञानं कर्माणि निरुणद्धि, तदा प्रारब्धकर्मणोऽपि निरोधः स्यादिति शास्त्रसिद्धजीवन्मुक्तेरपलापप्रसङ्गः।

ननु विहिताकरणमभावरूपम्, नह्यभावस्य भावोत्पादनसामर्थ्यं दरीदृश्यते लोके? इति चेन्न, धृतशरीरो ह्यात्मा कायेन, वाचा, मनसा च सदा किञ्चिदपि कुर्वन्नेव तिष्ठति। सन्ध्यावन्दनवेलायां विहितमकृत्वा यदन्यत् कर्म करोति, तेनैव हि प्रत्यवायोत्पत्तिरिति नह्यभावेन भावोत्पत्तिप्रसङ्गः।

कर्मणां प्रागभावो यो विहिताकरणादिषु।
न चानर्थकरत्वेन वस्तुत्वान्नापनीयते॥
स्वकाले यदकुर्वंस्तत् करोत्यन्यदचेतनः।
प्रत्यवायोऽस्य तेनैव नाभावेन स जन्यते[१]॥

ननु सन्ध्यावन्दनवेलायां निषिद्धाचरणं प्रत्यवायहेतुस्तर्हि कोऽपि तस्मिन् समये किमपि निषिद्धमकुर्वन् तूष्णींभावेन तिष्ठति, योगं वाऽभ्यस्यति, तदा निषिद्धाचरणाभावात् कथं तस्य प्रत्यवायोत्पत्तिरिति चेन्न, केवलशरीरधारिणा योगमभ्यस्यतापि वा पुरुषेणावश्यकर्तव्यताविधेरुल्लङ्घनाद् भवत्येव प्रत्यवायः। तस्माद् विहिताकरणेन प्रत्यवायसमुत्पत्तेस्तस्य च बन्धनकारणतयाऽन्यतो विरतिविरहेण प्रत्यवायनिरोधार्थं मुक्तिमभिलषता पुरुषेण योगाभ्यासाप्रातिकूल्येन भिक्षाभोजनादिकमिव यथाकालं सर्वैरपि वीरशैवैरिष्टलिङ्गपूजारूपं नित्यं कर्मानुष्ठातव्यम्। अत एव—"ज्ञानामृतेन तृप्तोऽपि योगी धर्मं न सन्त्यजेत्"[२] इति पूज्यपादैः श्रीरेणुकाचार्यैरप्यादिष्टम्।

इष्टलिङ्गपूजाविधानम्

लिङ्गधारी सदा शुद्धो निजलिङ्गं मनोरमम्।
अर्चयेद् गन्धपुष्पाद्यैः करपीठे समाहितः॥[३]

---

१. न्या. क., पृ. ६८४
२. सि. शि. १६।६५
३. सि. शि. ६।५३

इत्याचार्योक्त्यनुसारं वीरशैवैरियमिष्टलिङ्गपूजा न कदाचिद् [1]बाह्यपीठेषु सम्पाद्यते, किन्तु स्ववामहस्तपीठ एव, तत्रैव तद्विधानात्। ननु वामहस्तस्यापकृष्टत्वात् तत्रेष्टलिङ्गं संस्थाप्य तत्पूजाकरणमशोभनमित्याक्षेपे श्रीनन्दिकेश्वरशिवाचार्याः—"अञ्जलिना वा पिबेदखर्वेण पात्रेण" इति श्रुत्या पानकरणाञ्जलिघटकत्वेन दक्षिणहस्तस्येवा-याप्युपयोगविधानेन, सकलवैदिकजनावश्यकाग्निमुखविनियुक्ते "अञ्जलौ पूर्णपात्रमानयति" इति श्रुत्या पूर्णपात्राधाराञ्जलिप्रविष्टवामहस्तस्योपयोगस्यावश्यम्भावेन, "उरसा शिरसा दृष्ट्या मनसा वचसा तथा। पद्भ्यां कराभ्यां कर्णाभ्यां प्रणामोऽष्टाङ्ग उच्यते ॥" इति बौधायनोक्त्या रुद्रन्यासे करद्वयस्य परमशिवनमस्कारयोग्यत्वप्रदर्शनेन पीठार्चकैरपि करद्वयेन पुष्पाञ्जलिप्रदानाच्च तत्र शिवपूजाकरणे दोषाभावात्"[2] इत्येवं सम्यक् सप्रमाणं चाक्षेपनिरसनपूर्वकं वामहस्तपीठार्चनस्य शास्त्रीयत्वं साधयामासुः। अतो वामहस्तपीठार्चने न कोऽपि दोषः।

पूजादौ तु शिवं ध्यात्वा जप्त्वा पञ्चाक्षरं मनुम्।
ततः संपूजयेद् देवं वीरशैवक्रमो भवेत् ॥[3]

इति सूक्ष्मागमादेशानुसारं साधकः स्नातः शुचिरासन उपविश्य निर्मलेन मनसा शिवं ध्यात्वा, तद्वाचकं पञ्चाक्षरमनुं स्वसंकल्पानुसारेण जप्त्वा च तदनन्तरमिष्टलिङ्गं वामहस्तपीठे निधाय श्रीरुद्राध्यायादिनाऽभिषिच्य यथेष्टैरुपचारैः संपूजयेत्।

तत्र तावत् सूक्ष्मागमे षट्स्थलात्मकं लिङ्गपूजाविधानं वर्णितम्। तद्यथा—साधको यदा भद्रासन उपविश्य विभूतिरुद्राक्षादिना स्वशरीरमलङ्करोति तदा स भक्त इति, पञ्चाक्षरजपाभ्यासवेलायां माहेश्वर इति, इष्टलिङ्गं वामहस्तपीठेऽक्ष्णोः समक्षं द्वादशाङ्गुलान्तरे निधाय प्रेम्णा तन्निरीक्षमाणः प्रसादीति, उपचारैस्तल्लिङ्गपूजायां प्राणलिङ्गीति, स्वेन कृतां पूजां शिवार्पितां कृत्वा सानन्दं यदाऽवतिष्ठते तदा शरण इति, तल्लिङ्गार्पितप्रसादमुपभुज्य यदा सन्तृप्तो भवति तदैक्य इत्यभिधीयते[4]।

---

१. बाह्यपीठार्चनादेतत्करपीठार्चनं वरम्।
सर्वेषां वीरशैवानां मुमुक्षूणां निरन्तरम् ॥ (सि. शि. ६।५४)

२. लि. च., पृ. ९०-९१

३. सू. आ., क्रि. ६।३६

४. इदमत्र रहस्यं वै श्रूयतां षट्स्थलात्मकम्।
भक्तस्थले समासीनो भूतिरुद्राक्षसंयुतः ॥

एतादृशीमङ्गषट्स्थलात्मिकामिष्टलिङ्गपूजां यथाशक्ति प्रतिदिनमेकवारं द्विवारं त्रिवारं वाऽवश्यं कुर्यात् । समर्थश्चेत् प्रतिदिनं प्रातः षड्वादने, नववादने, मध्याह्ने द्वादशवादने, अपराह्णे त्रिवादने, सायं षड्वादने तथा रात्रौ द्वादशवादने च पूजा कर्तव्येति सन्तशिरोमणिना मन्मथस्वामिना प्रतिपादितम्। अन्ते पुनस्तेनैवोक्तं यत् षड्वारं पूजाऽसंभवेऽपि त्रिकालं त्ववश्यं करणीया, अन्यथा स पशुतुल्य इति[१]।

परशिवस्य करचरणाद्युक्तसाकारमूर्तिपूजापेक्षया निराकारप्रतीकरूपस्य शिवलिङ्गस्यैव पूजा प्रशस्ता[२]। तत्रापीष्टलिङ्गरूपेण तत्पूजनं विशेषानुग्रहकारकं मानसिकस्वास्थ्यप्रदायकं च भवति। तस्माद् दीक्षितैः स्त्रीपुरुषादिभिर्यथाशक्त्यधिककालमिष्टलिङ्गमभ्यर्चनीयम् ।

इष्टलिङ्गपूजायां सूतकप्रतिषेधः

ननु वीरशैवीयदीक्षायां तद्विहितेष्टलिङ्गपूजायां च स्त्रियोऽप्यधिकारिण्य भवन्तीति प्रतिपादितम् । इष्टलिङ्गपूजाया नित्यकर्मत्वात् सा यावज्जीवमनुष्ठेया। धर्मशास्त्रे च प्रसूतादिसूतकप्राप्तावशौचं विहितम्। अशौचे प्राप्ते तद्गृहे तन्निवृत्तिपर्यन्तं वैदिकपूजादीनां निषेधश्चोपदिष्टः। तथा सति सूतकवेलायां वीरशैवस्त्रीभिस्तन्नित्यकर्म कथमनुष्ठीयेतेति चेन्मैवम्, इष्टलिङ्गपूजायां सूतकानामबाधकत्वात्। तदुक्तं सिद्धान्तागमवचनं श्रीकरभाष्ये—

षडक्षरजपं कृत्वा ततो माहेश्वरस्थले।
हस्ते कृत्वा लिङ्गमूर्तिं प्रसादिस्थलमाश्रितः ॥
लिङ्गं च भक्त्या संपूज्य प्राणलिङ्गिस्थले ततः ।
कृत्वा शिवार्पणं देवि सानन्दं शरणस्थले ॥
ऐक्यस्थले प्रसादोपभोगतृप्तिमवाप्नुयात् ।
एवं समरसाद् भावादङ्गषट्स्थलयोगतः ॥
यः पूजयति मां देवि वीरशैवः स उच्यते ।
(सू. आ., क्रि. ६।५४-५७)

१. प. र. ३।३४-३५

२. लिङ्गे सम्पूजनाद्ध्यानाच्छम्भुः सम्यक् प्रसीदति ।
ध्यायते पूज्यते चैव लिङ्गे सन्निहितः शिवः ॥
इष्टलिङ्गे ततो नित्यं पूजनीयः परः शिवः ।
(च. आ., क्रि. ३।३१-३२)

स्वेष्टलिङ्गैकपूजायां नैवाशौचं विधीयते ।
पौण्डरीके रजः स्त्रीणां स्वाग्निहोत्रे यथा तथा ॥
अक्षरस्पर्शयोग्याऽपि यथा जिह्वा महेश्वरि ।
मन्त्रोच्चारणमात्रस्य पूता भवति भूतले ॥
तथा सूतकिनः शैवाः पूजामात्रसुनिर्मलाः ।
नान्यस्पर्शानुकूलाः स्युरिति वेदानुशासनम् ॥[१] इति ।

अस्यायं भावः—प्रतिदिनं क्रियमाणेऽग्निहोत्रकर्मणि, दीर्घकालीनेषु पौण्डरीकादियागेषु च प्रवृत्तस्य यजमानस्य पत्नी मध्ये रजस्वलापि स्नानादिकं कृत्वाऽर्द्रवस्त्रं परिधाय यथा पुनर्यागे सम्मिलिता भवति, नित्यानुष्ठेयमानत्वेन दोषाभावात्; तथेष्टलिङ्गपूजाया नित्यकर्मत्वादत्रापि नैवाशौचप्राप्तिरिति विज्ञेयम् ।

ननु लिङ्गधारणस्याकरणे प्रत्यवायाभावान्न तन्नित्यं कर्म, तस्मादशौचकाले कुतो न तत् त्यज्यते ? इति चेन्न, प्रत्यवायवचनानां बहुत्वात् । तथाहि—

भक्तस्याबिभ्रतो लिङ्गं यावत्प्राणविधारणम् ।
श्वमांसभक्षणं तावदन्नेन रचितं भवेत् ॥
लिङ्गस्य धारणं यस्य स्थूलदेहे न विद्यते ।
तद्देहं निष्फलं ज्ञेयं जीवत्यक्तशरीरवत् ॥
तस्मात्तद्धारणं प्रोक्तं यावज्जीवाग्निहोत्रवत् ।
यथा श्मशानगं काष्ठमनर्हं सर्वकर्मसु ।
तथा लिङ्गविहीनस्तु सर्वकर्मबहिष्कृतः ॥[२]

इति वातुलागम-स्कन्द-लिङ्गपुराणादिष्वकरणे प्रत्यवायस्य प्रतिपादितत्वात्तन्नित्यकर्मेति निश्चेयम् । "नित्यं स्ववामहस्ताग्रे सावधानेन पूजयेत्" इति लिङ्गपूजायाश्च यावज्जीवभावित्वेन लिङ्गधारणतत्पूजादेरशौचप्रसक्तावपि कर्तव्यताऽस्त्येव, तत्राशौचविधानाभावात् । तदुक्तमाचार्यवर्यैः श्रीरेणुकाचार्यैः—

लिङ्गार्चनरतायाश्च ऋतौ नार्या न सूतकम् ।
तथा प्रसूतिकायाश्च सूतकं नैव विद्यते ॥[३] इति ।

---

१. ब्र. सू श्री. १।१।१, पृ, २३
२. सि. शिखो. वी. भा., पृ. २९
३. सि. शि. ९।४४

एवं सूतकिनां स्त्रीणां स्वेष्टलिङ्गपूजायामशौचत्वाभावेऽप्यन्यस्पर्शपाकादिव्यवहारेऽत्रशौचत्वमस्त्येव। मन्त्रोच्चारणे सुनिर्मलाऽपि जिह्वा यथा करस्पर्शयोग्या न भवति, तथैवात्रापि विज्ञेयम्। अत एव "पूजामात्रसुनिर्मलाः" इत्यागमोक्तिः।

लिङ्गधारणचन्द्रिकाकाराः श्रीमन्तो नन्दिकेश्वरशिवाचार्यास्तु—'रजस्वलानां धारणाद्यंशे परिशुद्धत्वे कर्मान्तरेऽपि परिशुद्धिः स्यादिति तुल्यम्। केचित्तु दन्तधावनगण्डूषजलादिना पवित्रीकृतमुखस्य मन्त्रोच्चारणादौ शुद्धत्वेऽप्यन्यशरीरनिष्ठीवनादावपरिशुद्धत्ववद् धारणपूजादिविषये परिशुद्धत्वेऽपि कार्यान्तरे तदभाव इति प्राहुः"[1] इत्यादिना पूजामात्रसुनिर्मलत्वपक्षे 'केचित्तु' इत्यरुचिं प्रदर्श्य, दीक्षासंस्कृतानां तासां स्त्रीणां सर्वदा परिशुद्धत्वमभ्युपेयमिति स्वाभिप्रायं प्रकटयामासुः। तेषामयमाशयः—

प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिग्रहः॥[2]

इति षडशीतिस्मृतिवाक्यानुसारं गृहयज्ञादौ ऋत्विग्वरणं प्रारम्भः, चान्द्रायणतीर्थयात्रा-लिङ्गधारणपूजादिव्रतेषु, पौण्डरीकादिदीर्घसत्रे च संकल्पः प्रारम्भः, विवाहकर्मणि नान्दीमुखादौ श्राद्धे पाकक्रिया प्रारम्भ इति विज्ञायते। एवं तत्तत्कर्मणामारम्भानन्तरं मध्ये रजस्वलाद्यशौचे प्राप्तेऽपि धर्मशास्त्रोक्तविधिना स्नानादिकं कृत्वा नूतनवस्त्रं परिधाय पुनस्तत्कर्म क्रियते, न तु पूर्णरूपेण त्यज्यते। एवमेव—

लिङ्गधारणकं नाम व्रतं माहेश्वराभिधम्।
यावज्जीवमिदं दत्तमिष्टलिङ्गं समर्चयेत्॥[3]

इत्यादिस्कन्दपुराणोक्तरीत्या लिङ्गधारणतत्पूजाव्रतस्यापि दीक्षासमये सद्गुरुसन्निधौ यावज्जीवभावित्वेन संकल्पकरणादान्तरालिकाशौचादिप्रसक्तावपि स्नानशिवपादाम्बुसंस्पर्शादिना तात्कालिकीं परिशुद्धिं कृत्वा तदवश्यं कर्तव्यमेव। अत एवोक्तमाचार्यैः —

गृहे यस्मिन् प्रसूता स्त्री सूतकं नात्र विद्यते।
शिवपादाम्बुसंस्पर्शात् सर्वपापं प्रणश्यति॥[4] इति।

१. लि. च., पृ. १९८-१९९
२. लि. च., पृ. १९७
३. लि. च., पृ. १९८
४. सि. शि ९.१४५

किञ्च, पूजादौ शौचमन्यत्राशौचमित्यत्र विनिगमनाभावाद् दीक्षासम्पन्नानां वीरशैवस्त्रीणां सर्वत्र शौचत्वमभ्युपगम्यते। ननु शिवपूजाद्यन्यस्पर्शपाकादेः प्रत्यक्षलोकाचारविरोध एव विनिगमक इति चेन्न, शिवपूजादावपि तद्विरोधस्य संभवात्, लिङ्गधारणलिङ्गपूजादेस्त्यागप्रसङ्गात्।

ननु "न हिंस्यात् सर्वा भूतानि", "न मांसमश्नीयात्", "नोच्छिष्टं कस्यचिद्द्यात्" इत्यादिशास्त्रवचनैर्निषिद्धत्वेऽपि प्रत्यक्षलोकाचारविरुद्धत्वेऽपि च "अग्नीषोमीयं पशुमालभेत", "सोमेन यजेत", "सोमेनोच्छिष्टम्", इत्यादिविशेषशास्त्रविहितपशुविशसनमांसभक्षणसोमपानादेः प्राकृतकर्तव्यत्ववत्; "तत्राजन्मान्तदीक्षा", "सर्वलिङ्गं स्थापयति[1]", "नित्यं स्ववामहस्ताग्रे सावधानेन पूजयेत्",[2] 'न तस्य सूतकं किञ्चित्प्राणलिङ्गाङ्गसङ्गिनः"[3] इत्यादिविशेषशास्त्रबलाद् रजस्वलादीनां लिङ्गधारणलिङ्गपूजाद्यंशे परिशुद्धत्वमिति चेन्न, क्रियादीक्षान्तर्गतस्वस्तिकारोहणदीक्षया श्रीगुरुणा जननीगर्भजातमांसपिण्डनिवृत्त्यर्थमापादमस्तकं संहारक्रमेण स्थानषट्के षडध्वन्यासः, अनन्तरमुत्पत्तिक्रमेणामस्तकपादं मन्त्रपिण्डोत्पत्त्यर्थं षडध्वन्यासः क्रियते; एवं संस्कारविशेषेणापगतमांसपिण्डस्योपगतमन्त्रपिण्डस्य निवृत्तजीवभावस्य वीरशैवस्त्रीपुरुषादेः स्वेष्टलिङ्गपूजातदन्यस्पर्शादावपि शुचित्वमेवाभ्युपगन्तव्यम्। अपरं च,

लिङ्गार्चनरता नारी सूतकी तु रजस्वला।
रविरग्निर्यथा वायुः कोटिकोटिगुणः शुचिः॥

यथा ह्यग्निसमावेशान्नायो भवति केवलम्।
तथैव मम सान्निध्यान्न ते प्रकृतिमानुषाः॥

तैलयुक्तं तु कार्पासं ज्योतिस्पर्शात् तथैव तत्।
स्नेहयुक्तस्य सद्भक्तेर्लिङ्गस्पर्शेन लिङ्गता॥

शैवं लिङ्गार्चनं यस्य यस्य चाग्निपरिग्रहः।
वानप्रस्थयतीनां च शरीरे नास्ति सूतकम्॥[4]

---

१. तै. आ. १०।१६।१
२. लि. च., पृ. १५७
३. सि. शि. ९।४३
४. लि. च., पृ. १९३-९४

इत्यादिषु वीरागम-पद्मपुराण-शिवरहस्य-पराशरस्मृतिवचनेषु लिङ्गधारिण्यो लिङ्गार्चनरताश्च स्त्रियो रव्यग्निवाय्वादिवत् सदा सुनिर्मलाः। यथा अग्निसंयुक्तमयःपिण्डं न साधारणमयःपिण्डं भवति, तथा लिङ्गसङ्गिन्यः स्त्रियो न प्राकृताः स्त्रियः, किन्तु लिङ्गस्वरूपाः, इत्यादिरूपेण प्राशस्त्यप्रतिपादनाल्लिङ्गधारिणीनां स्त्रीणां सर्वदाऽशौचाभाव एवेति।

लिङ्गधारणचन्द्रिकाकारस्य मतमिदं पूर्वोक्तसिद्धान्तागमविरुद्धत्वान्न समीचीनमिति प्रतिपादयद्भिः शङ्करशास्त्रिभिः समन्वयरूपेण स्वाभिप्रायः प्रकटीकृतः सिद्धान्तशिखोपनिषद्वीरशैवभाष्ये[1]। स एवात्र संगृह्यते—लिङ्गधारिणां सूतकात्यन्ताभावबोधकवाक्यानां शरणस्थलप्रविष्टविषयकत्वेन सामञ्जस्यं वक्तव्यम्। अन्यथा—"तथा सूतकिनः शैवाः पूजामात्रसुनिर्मलाः[2]" इति पूर्वोक्तागमवाक्यविरोधः स्यादेव। तस्मान्मोक्षोपयुक्तसाङ्गशिवार्चनादिनित्यकर्मेतरान्यस्पर्शपाकादिकार्ये रजस्वलादीनां लिङ्गधारणदीक्षासम्पन्नानामशौचमभ्युपगन्तव्यमेव।

न चाशौचस्वीकारेऽशुचिशरीरसम्बन्धात् स्थावरलिङ्गस्येव स्वेष्टलिङ्गस्यापि दीक्षासमये आचार्यकृतपूजनीयताप्रयोजकसंस्कारस्यापि नाशः स्यादिति वाच्यम्, इष्टलिङ्गस्थावरलिङ्गयोर्वैषम्यात्, स्थावरलिङ्गे पूजायां कर्तृनियमाभावात्, एकस्याशुचित्वे पुरुषान्तरेण तत्पूजाया निर्वाहात्, स्वेष्टलिङ्गपूजादेस्तु स्वेनैव यावज्जीवकर्तव्यत्वनियमात्, स्वेष्टलिङ्गपूजादेर्यावज्जीवकर्तव्यताबोधकशास्त्रबलेन दीक्षाकाले आचार्यकृतपुरुषैककर्तव्यताकपूजाप्रयोजकसंस्कारस्य स्थायित्वमभ्युपगम्यते। "सर्वलिङ्गं स्थापयति पाणिमन्त्रं पवित्रम्"[3] इत्यत्र पवित्रशब्देन शुच्यशुचिकालेऽपि स्वेष्टलिङ्गस्य धारणीयत्वस्य सूचितत्वात्।

अपगच्छतु सर्वस्वं शिरच्छेदनमस्तु वा।
माहेश्वरो न मुञ्चेत लिङ्गपूजामहाव्रतम्॥[4]
शुचिर्वाप्यशुचिर्वापि लिङ्गं सर्वत्र धारयेत्।
नित्यं स्ववामहस्ताग्रे सावधानेन पूजयेत्॥[5]

---

१. सि. शि. वी. भा., पृ. ३०-३७
२. सि. शिखो. वी. भा., पृ. ३२
३. तै. आ. १०।१६।१
४. सि. शि. १०।२२
५. सि. शिखो. वी. भा, पृ. ३३

इति कदापि स्वेष्टलिङ्गपूजादेस्त्यागायोगात् स्थावरलिङ्गे आचार्यकृतपूजनीयताप्रयोजकसंस्कारस्याशुचिशरीरस्पर्शेन नाशे कल्पितेऽपि स्वेष्टलिङ्गे तदभावात्। अन्यथा यागजन्यस्यापूर्वरूपसंस्कारस्य यजमानदम्पत्योरात्मगतस्य, गङ्गास्नानादिजन्यतत्तत्संस्काराणां चान्तरालिकाशौचेन नाशे सकलकर्मणामानर्थक्येन तद्बोधकवेदशास्त्रादेरप्रामाण्यापत्त्या बौद्धमतप्रवेशापत्तेः। तस्मान्नाशौचस्य संस्कारनाशकत्वं वक्तव्यम्।

ननु वर्षाकाले नदीनां रजःसूतकप्राप्तिरिति तदानीं नदीस्नानं धर्मशास्त्रे निषिध्यते, किन्तु—"यथा गङ्गा शिवसङ्गात्तथैव न सूतकं नाप्यशुचित्वमेषाम्"[1]

यथा विश्वेशनैकट्याद् गङ्गा सूतकवर्जिता।
तथा लिङ्गाङ्किता भक्ता पञ्चसूतकवर्जिताः॥[2]

इत्यादिसिद्धान्तशिखोपनिषत्-लिङ्गसारादिवचनप्रामाण्यात् शिवसंयुक्ताया गङ्गायाः कदापि सूतकप्राप्तिर्यथा न विहिता, तथा रजस्वलादीनां शिवलिङ्गस्य सर्वदा सद्भावात् कथमशौचत्वमिति चेन्न; "दुष्टचण्डालभाण्डेषु यथा भागीरथीजलम्"[3] इति गौतमोक्तप्रकारेण दुष्टचण्डालभाण्डानीतस्य तस्याप्यशौचस्य कल्पनीयत्वात्। तद्भाण्डानीतस्य तज्जलस्य तत्कालेऽशुचित्वमिव रजस्वलादीनां नित्यशिवसङ्गेऽपि ऋतुकालेऽशौचं वक्तव्यमेव।

ननु षडध्वशोधनसंस्कारार्हाणां सर्वेषामपि स्त्रीपुरुषाणां दीक्षासमय एव श्रीगुरुनिर्वर्तितमांसपिण्डत्वात्तत्कृतमन्त्रपिण्डत्व - तत्कृतलिङ्गाङ्गसामरस्यत्वेनैव जीवभावस्यापि निवृत्तत्वात्, शरणस्येव तेषां दृढतरलिङ्गाङ्गषट्स्थलसामरस्यसाक्षात्काराभावेऽपि न वक्तुं शक्यतेऽशौचमिति चेन्न, दीक्षासमये साधनावस्थासहितसामरस्यस्य गुरुणा कृतत्वात् साधनकाले साध्यमन्त्रतनुत्वात्मकशिवत्वाभिव्यक्तेर्मुक्तेरसंभवात्। नहि दृश्यते बीजावापसमये क्षेत्रे तत्फलम्।

किञ्च, यदि दीक्षासंस्कारेण मांसपिण्डनिवृत्त्या मन्त्रपिण्डोत्पत्त्यनन्तरं जीवभावोऽप्यत्यन्तं निवर्तेत, तदा दीक्षोत्तरं प्रत्यहं साधनानपेक्षणा स्यात्, शिवपूजाशिवध्यानशिवमन्त्रजपशिवमन्त्रार्थजिज्ञासादीनां साधनानामनेकेषां

---

१. सि. शिखो. १२ श्लो.।
२. सि. शिखो वी. भा., पृ. २८
३. तत्रैव, पृ. ३३

वैयर्थ्यापत्तेः, मांसपिण्डनिवृत्तिपूर्वकमन्त्रपिण्डोत्पत्तेर्भावनामात्रगम्यत्वाद् वस्तुतो जीवभावानिवृत्तेः। लिङ्गधारणचन्द्रिकाकारेणापि—"मांसपिण्डनिवृत्तेर्मन्त्र-पिण्डोत्पत्तेरिव भावनामात्रगम्यत्वात्" इत्युक्तम्। तस्माच्छिवपूजाद्यंशे सूतकिनां परिशुद्धत्वं नान्यत्रेति सिद्धम्।

नन्विदमशौचस्याव्याप्यवृत्तित्वपरं व्याख्यानं मूलविरुद्धमिति चेन्न, "न सूतकं नाप्यशुचित्वमेषाम्"[1] इत्यत्रेदंपदस्य सिद्धसाधकोभयसाधारण्यात्, षडङ्गेषु षड्लिङ्गयोगस्य षट्स्थलज्ञानसिद्धानामेव सत्त्वात्, पद्मपत्राम्भः-सम्बन्धवद्देहसम्बन्धवतां जीवन्मुक्तानामेव न सूतकं नाप्यशुचित्वमिति तात्पर्यम्। साधकानां त्वशौचस्याव्याप्यवृत्तित्वमेव वक्तव्यम्, अन्यथा सिद्धान्तागमविरोधः स्यादेव। एतेन—"न तस्य सूतकं किञ्चित् प्राणलिङ्गाङ्गसङ्गिनः"[2] इति श्रीरेणुकभगवत्पादोक्तेर्विरोधशङ्कापि परिहृतेति मन्तव्यम्। शरणाभिधानस्य जीवन्मुक्तस्य लिङ्गाङ्गसङ्गिनः सूतकसामान्याभावोक्तौ लिङ्गधारणदीक्षा-युतानां रजस्वलादीनामपि सूतकमस्ति न वेति शङ्कानिवारणार्थं "लिङ्गार्चन-रतायाश्च"[3] इत्यादिकमुक्तम्। अत्र लिङ्गार्चनरतत्वविशेषणेन लिङ्गार्चनादि-नित्यकर्मकर्तव्यतायामेव रजस्वलादीनामशौचस्याभावः, नान्यत्रेति भगवदा-चार्याणां तात्पर्यम्।

अपि च, "कर्मान्तरेऽपि परिशुद्धिः स्यादिति तुल्यम्"[4] इत्यस्मिन् नन्दि-केश्वरशिवाचार्यवाक्ये कर्मान्तरपदेन किमुच्यते? अन्यस्पर्शादिकमिति चे-दत्रान्यस्पर्शः कः? स्वभिन्नसवजनस्पर्शो वा स्वभिन्नानां केषाञ्चिज्जनानां स्पर्शो वा? आद्ये लोकविरोधः। द्वितीये त्विष्टापत्तिः। स्वशिशोरन्नप्राशनात्प्राक् तत्स्पर्शस्यावश्यकत्वात्। तस्मात् कर्मान्तरपदेन स्वशिशुस्पर्शे परिशुद्धिर्न त्वन्यत्रेति वक्तव्यत्वाल्लिङ्गधारणचन्द्रिकाकारस्याप्यशौचसंकोच एव तात्पर्यं वर्णनीयं भवति। तस्माच्छरणातिरिक्तानां सर्वेषां वीरशैवमतीयानां वास्त-विकशिवमयशरीरत्वाभावादशौचसंकोचोऽभ्युपगन्तव्य इति सिद्धान्त इति।

तदेवं नन्दिकेश्वरशिवाचार्याणां शङ्करशास्त्रिमहाभागानां च मतपर्या-लोचनेन निश्चीयते यद् यथा दीर्घकालीनेषु पौण्डरीकादिसत्रेषु रजस्वला-

---

१. सि. शिखो. १२ श्लो.।
२. सि. शि. ९।४३
३. सि. शि. ९।४४
४. लि. च, पृ. १९८

त्वादिसूतकप्राप्तावपि यजमानपत्नी स्नात्वा आर्द्रवस्त्रपरिधानेन तात्कालिक-शुद्धि विधाय यज्ञे सहभागिनी भवति, तथा वीरशैवस्त्रियोऽपि सूतकप्राप्तौ स्नात्वा गुरोर्जङ्गमस्य वा पादप्रक्षालितजलेन[1] (पादोदकेन) स्वात्मानं गृहं च संप्रोक्ष्य शुद्धि विधाय स्वेष्टलिङ्गपूजाधिकारिण्यो भवन्तीति।

इष्टलिङ्गं पवित्रं पवित्रकरं च भवति। अतोऽस्य वेदे 'पवित्रम्' इति नाम्ना प्रसिद्धिरस्ति। तस्मादशौचकाले तद्धारणे पूजने च न कोऽपि दोषः। तदुक्तं लिङ्गपुराणे भगवता व्यासेनापि—

पवित्रकरणात् पुंसां पवित्रमिति कथ्यते।
अतः सर्वेषु कालेषु लिङ्गधारणमुत्तमम्॥

गच्छंस्तिष्ठन्स्वपन् जाग्रन्निमिषन्नुन्मिषन्नपि।
शुचिर्वाप्यशुचिर्वापि लिङ्गं सर्वत्र धारयेत्॥

लिङ्गधारी सदा शुद्धो निजलिङ्गं मनोरमम्।
अर्चयन् गन्धपुष्पाद्यैः करपीठे समाहितः॥

नित्यानि कर्मवृन्दानि तथा नैमित्तिकानि च।
शिवार्पणधिया कुर्यात् सम्यग्ज्ञानाभिवृद्धये॥[2] इति।

तस्माद् वीरशैवसिद्धान्ते जन्म-मरण-रजःसूतकादिषु प्राप्तेष्वपीष्टलिङ्ग-धारणतत्पूजायां नाऽशौचमङ्गीक्रियते, किन्त्वन्यस्पर्शपाकादिलौकिकव्यवहारेषु लोकमर्यादया तदङ्गीक्रियत इति राद्धान्तः। वीरशैवीयोऽयं लिङ्गधारण-सिद्धान्तोऽवैदिक इति न भ्रमितव्यम्, वेदादिशास्त्रेषु तन्निरूपणात्। प्रसङ्ग-वशादत्र वेदादिशास्त्रप्रमाणानि निरूप्यन्ते।

इष्टलिङ्गधारणस्य वेदसम्मतत्वम्

वेदेषु शास्त्रसंघेषु पुराणेष्वागमेषु च।
ब्राह्मणस्य समाख्यातं लिङ्गधारणमुत्तमम्॥[3]

---

१. स्वाचार्यचरणद्वन्द्वप्रक्षालितजलं सदा।
यः पिबेद्धारयेद्भक्त्या सर्वपापैः प्रमुच्यते॥ (च. ज्ञा., क्रि. २।२२)

२. लि. पु. २।२१।१०६-१०९

३. लि. पु. २।२१।९७

वेदशास्त्रपुराणेषु कामिकाद्यागमेषु च ।
लिङ्गधारणमाख्यातं वीरशैवस्य निश्चयात् ॥[1]

इत्यादि लिङ्गपुराण-सिद्धान्तशिखामणिवचनपर्यालोचनेन लिङ्गधारण-सिद्धान्तोऽतीव प्राचीन इति विज्ञायते । तत्तच्छास्त्रप्रमाणनिरूपणपुरःसरं सोऽयं लिङ्गधारणसिद्धान्तोऽत्र प्रस्तूयते । तथाहि तत्रभवन्तः श्रीरेणुकाचार्याः—

ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते ।
तस्मात्पवित्रं तल्लिङ्गं धार्यं शैवमनामयम् ॥[2]

इत्यत्र—

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनुर्न तदामो अश्नुते शृतास इद्वहंस्तत्समाशत ॥[3]

इति ऋग्वेदीयमन्त्रं लिङ्गधारणप्रतिपादनपरमित्युपदिष्टवन्तः । अत्र "तल्लिङ्गं ब्रह्म शाश्वतम्[4]" "लिङ्गं ब्रह्म सनातनम्[5]" इत्यादिप्रयोगदर्शनाद् ब्रह्मशब्देन लिङ्गमुच्यते । तस्य पतिरधिष्ठाता तच्छरीरकः सन् तत्र स्थित इत्यर्थः । तस्माद् 'ब्रह्मणस्पते' इत्यस्य लिङ्गरूपशरीराधिष्ठितः परशिव इत्यर्थो भवति । उक्तमन्त्रस्य पूर्णार्थो नन्दिकेश्वरशिवाचार्येण—"हे ब्रह्मणस्पते ! लिङ्गरूपशरीरावच्छेदेन शरीरिभावेनाधिष्ठितपरमशिव ! ते=तव, तत् = ब्रह्मपदवाच्यलिङ्गरूपं शरीरम्, पवित्रम्=उक्तरीत्या शुच्यशुचिकालेऽपि धर्तुं योग्यम्, विततम्=इष्टादिभेदेन भक्तशरीरादिभेदेन वा बहुविधम् । प्रभुः=निग्रहानुग्रहसमर्थस्त्वं विश्वतः=समस्तानि, सार्व-विभक्तिकस्तसिल्, गात्राणि=भक्तशरीराणि, पर्येषि=व्याप्नोषि, धार्यमाणः सन् लिङ्गरूपशरीरद्वारा भक्ताङ्गसंयुक्तोऽसीत्यर्थः[6]" इत्येवं प्रतिपादितः ।

नन्वत्र ब्रह्मपदेन स्थावरलिङ्गमस्तु, किमनेनेष्टलिङ्गादिनेति चेन्न; स्थावरलिङ्गस्य शरीरधारणासम्भवेन प्रागुक्तार्थस्य गात्राणि पर्येषि विश्वत

---

१. सि. शि. ६।५७
२. सि. शि. ६।५८
३. ऋग्वे. ९।८३।१
४. सि. शि. ६।३६
५. सि. शि. ६।३५
६. लि. च., पृ. १२४-१२५

इत्यस्यानन्वयापत्तेः। भक्तगात्रेषु लिङ्गानां व्याप्तत्वं मायिदेवेन सविस्तरं प्रपञ्चितमनुभवसूत्रे[1]। तस्मादत्र ब्रह्मपदेन न स्थावरलिङ्गमर्थः। ऋग्वेदीयमन्त्रस्य पूर्वोक्तो लिङ्गधारणपरोऽर्थो महर्षेर्व्यासस्याप्यभिमतः। अत एव—

ब्रह्मेति लिङ्गमाख्यातं ब्रह्मणः पतिरीश्वरः।
पवित्रं तद्धि विख्यातं तत्सम्पर्कात् तनुः शुचिः॥

ऋगित्याह पवित्रं ते विततं ब्रह्मणस्पते।
तस्मात् पवित्रं तल्लिङ्गं धार्यं शैवमनामयम्॥

अतप्ततनुरज्ञो वै ह्यघो संसारलक्षणः।
दीक्षया रहितः साक्षान्नाप्नुयाल्लिङ्गमुत्तमम्॥

यः करोति तपः पूर्वं स तप्ततनुरुच्यते।
परिपक्वो विमोक्षाय सोऽश्नुते लिङ्गधारणम्॥[2]

इत्यादिरूपेण तन्मन्त्रार्थं लिङ्गधारणपरत्वेन व्याख्याय, तल्लिङ्गं दीक्षापूर्वकं सद्गुरुणैव प्राप्तव्यमित्यपि स्पष्टं प्रत्यपादयत्।

एवमेव—

अयं मे हस्तो भगवानयं मे भगवत्तरः।
अयं मे विश्वभेषजोऽयं शिवाभिमर्शनः॥[3]

इति ऋग्वेदीयेन मन्त्रान्तरेणापि लिङ्गधारणसिद्धान्तः सिद्ध्यति। अत्र "अथैनं भगवन्तं रुद्रं कुमारः पप्रच्छ", "अथ कालाग्निरुद्रं भगवन्तं सनत्कुमारः पप्रच्छ"[4], "इति संस्तूयमानस्तु भगवान् वृषभध्वजः" इत्यादिकालाग्निरुद्रोपनिषद्धरिवंशपुराणादिषु भगवच्छब्देन परशिव एवोच्यते।

---

१. इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे।
भावलिङ्गं तथैवास्ति आत्माङ्गे सुप्रतिष्ठितम्॥
हृदयाङ्गे महालिङ्गं श्रोत्राङ्गे तु प्रसादकम्।
त्वगङ्गे चरलिङ्गं च दृगङ्गे शिवलिङ्गकम्॥
जिह्वाङ्गे गुरुलिङ्गं स्यान्नासिकाङ्गे तथैव च।
आचारलिङ्गमश्रान्तं सुप्रतिष्ठितमेव हि॥ (अ. सू. ६।४-६)

२. लि. पु. २।२१।९८-१०२

३. ऋग्वे १०।६०।१२

४. काला. उ. २

तस्मादयं भगवान् = लिङ्गरूपी शिवः, मे हस्तः = हस्तगः, मे = मत्सम्बन्धी, अयं शिवो भगवत्तर इत्यर्थः ।

यथा — "आदित्यो भगवान् सूर्यो नीलग्रीवस्त्रिलोचनः"[1] इत्यत्र शिवादित्ययोरविभाज्यसम्बन्धद्योतनायादित्यगतो भगवानित्यनुक्त्वाऽऽदित्यो भगवानित्युक्तिः, तद्वदत्रापि हस्तशिवलिङ्गयोरविभाज्यसम्बन्धसूचनाय हस्तगत इत्यनुक्त्वा हस्तो भगवानित्युक्तम्,

गुरुणा दत्तलिङ्गं तु शिवमन्त्रेण धारयेत् ।
मूर्ध्नि कण्ठे भुजे हस्ते हृत्स्थले नाभिमण्डले ।
एतेषामेकदेशे तु धारयेत् शिवलिङ्गकम् ॥[2]

इति वातुलशुद्धागमे तस्य हस्तादौ धारणं चोपदिष्टम् । एवं हस्तादौ प्रतिष्ठापितस्य लिङ्गस्य वियोगे—

हस्तसिंहासने लिङ्गमप्रमादेन धारयेत् ।
प्रमादात् पतिते लिङ्गे सह प्राणान् परित्यजेत् ॥
भूमौ प्रतिष्ठितं लिङ्गं पुनर्नोत्पाट्यते यथा ।
देहे प्रतिष्ठितं लिङ्गमन्तेऽपि न विभज्यते ॥[3]

इत्यादिदोषविधायकस्कन्दपुराणीयशङ्करसंहिताया वचनानां विद्यमानत्वाद् हस्तशिवलिङ्गयोरविभाज्यत्वं सुस्पष्टमेव । एवं हस्तादौ लिङ्गधारणमुक्त्वा, "अयं माता अयं पिता"[4] इत्यर्थवादमुखेन तस्यैव सृष्ट्यादिकर्तृत्वं विधाय, "अयं विश्वभेषजः" इत्यनेन विश्वस्य = भवस्य, भेषजः = संसाररोगनाशक इति संहारकर्तृत्वं प्रतिपाद्यते । एवं सृष्ट्यादिकारको हस्तस्थितः स भगवान् कः ? इति जिज्ञासायां "अयं शिवाभिमर्शनः" इत्युक्तम्, अर्थाद् वाक्यशेषार्थकेन यवव्रीह्यधिकरणन्यायेन[5] हस्तगतो भगवान् शिव इत्यभिमृश्यते । भगवच्छब्दस्य नारायण-ब्रह्म-सनत्कुमारादिमहर्षिषु प्रयुज्यमानत्वेऽपि तत्प्रतिमादीनां हस्तादिषु धारणाप्रसिद्ध्या हस्ते शिवलिङ्गधारणस्य प्रतिपादितत्वाद् हस्तपदसान्निध्यादत्र भगवच्छब्देन[5] शिवलिङ्गस्यैव ग्रहणमित्येव निर्णेतव्यम् ।

१. लि. च , पृ. १४७
२. वा. शु. त. १०।३५-३६
३. लि. च., पृ. १५०
४. ऋग्वे. १०।६०।७
५. "व्रीहिभिर्यवैर्वा यजेत (आप. श्रौ. ६।३१।१३) इत्यत्र यवशब्दस्य म्लेच्छेषु प्रियङ्गौ, आर्येषु च दीर्घशूके प्रयोगदर्शनात् कस्यार्थस्य प्रकृते ग्रहणं कार्यमिति

अस्याः श्रुतेरुक्तार्थे—

यावज्जीवमिदं दत्तमिष्टलिङ्गं समर्चयन् ।
कराब्जपीठे विन्यस्य तद्धयानासक्तमानसः ॥

हस्तलिङ्गाङ्गसम्बन्धी सदानन्दाह्वयो मुनिः ।
सर्वोपनिषदर्थज्ञः शिवध्यानपरायणः ॥

एवं षट्स्थलनिर्णयं शिवपदप्राप्त्येकहेतुं सदा
यः सेवेत कराब्जपीठनिहितश्रीकण्ठलिङ्गार्चकः ।
स ज्ञानी स पुरातनः स च महान् माहेश्वरेषूत्तमो
मर्त्यस्तेन जगत्त्रयेऽपि सदृशो विद्येत देवोऽपि वा ॥[१]

इत्यादिशङ्करसंहितोक्तानि महर्षेर्व्यासस्य वचनान्युपोद्बलकान्यनुसन्धेयानि ।

श्रीनन्दिकेश्वरशिवाचार्या अस्य मन्त्रस्यार्थनिर्णयावसरे—"पूर्वाचार्यास्तु-अयं हस्तः शिवमभितः सर्वदा स्पृशतीति शिवाभिमर्शनः, तथा च सार्वकालिक-शिवस्पर्शस्य धारणं विनानुपपद्यमानत्वाद् हस्तादौ तत्सिद्धिः । न चाभित इत्यस्य सर्वभागावच्छेदेनेत्यर्थसत्त्वात् तथाविधस्पर्शस्य भूम्यादिप्रतिष्ठापितलिङ्गस्यापि सम्भवेन न लिङ्गधारणसिद्धिरिति वाच्यम्, अभित इत्यस्य देशकालोभयार्थकत्वे हस्तादिधृतलिङ्गस्यैव तथाविधस्पर्शसम्भवेन लिङ्गधारणसिद्धिः । येन कारणेन शिवाभिमर्शनः, अत एव जीवातुर्जीवनौषधं मे हस्तः । हे सुबन्धो परमशिव ! तवेदं प्रसर्पणमनुसरणमागमत् प्राप्तम् । तेन मे हस्तम् एहि धृतः सन् सर्वदा तिष्ठ । तथा च दक्षिणहस्तस्य शिवपूजाकरणत्वेनेतरहस्तस्य तदधिकरणत्वेन च सार्वकालिकशिवस्पर्शविशिष्टः करोऽभ्यर्हित इति भगवत्त्वमातृत्वपितृत्वादिना स्तुतिरुपपद्यते । सर्वदा शरीरस्य शिवलिङ्गसम्बन्धे शिवस्वरूपत्वं च [२]कैमुतिकन्यायसिद्धम्, "प्राणलिङ्गाङ्गसम्बन्धी स रुद्रो नात्र

जिज्ञासाम्—"यत्रान्या ओषधयो म्लायन्ते, अथैते मोदमानास्तिष्ठन्ति" (श. ब्रा. ३।६।१।१०) इति वाक्यशेषेण दीर्घशूकस्यैव ग्रहणं निर्णीयते । एवमिहाप्ययं मे शिवाभिमर्शन इति वाक्यशेषबलाद् भगवच्छब्देन शिव एव गृह्यत इति भावः" (लि. च. शरत्, पृ. १५२-१५३) ।

१. लि. च., पृ. १६१

२. "दण्डापूपन्यायेनेत्यर्थः । तत्स्वरूपं तु येन हस्तिना दण्डो भक्षितः, तेनापूपं किमुत भक्षयितुं न शक्येत ? दण्डभक्षकेणाऽपूपमनायासेन भक्ष्यत इति भावः" ।
(लि. च. शरत्, पृ. १६०)

संशयः" इत्युक्तेः। अहो लिङ्गधारणमाहात्म्यम्, हस्तद्वयस्य पूजातदधिकरणत्वविनियुक्तत्वेन सर्वशरीरस्याप्याचारादिलिङ्गस्थानत्वेन च सर्वमपि शरीरं शिवार्थमिति प्रशस्तमित्याहुः"[1] इति प्राक्तनाचार्याभिताथर्मपि प्रस्तूयोक्तमन्त्रस्य लिङ्गधारणपरत्वं दृढीकृतवन्तः।

ननु "पवित्रं ते विततम्[2]" इति मन्त्रेण लिङ्गधारणस्य विहितत्वात् पुनः "अयं मे हस्तो भगवान्[3]" इति मन्त्रेण स एवार्थः प्रतिपाद्यते चेद् द्वितीयो मन्त्रोऽन्यथासिद्धः स्यादिति चेन्न; पूर्वमन्त्रेण सामान्यतो लिङ्गधारणं विधाय द्वितीयेन मन्त्रेण शरीरे तद्धारणस्थलं निर्दिष्टमिति नान्यथासिद्धिसम्भवः।

एवमेव सर्वविद्याशिरोभूताया रुद्रैकादशिन्याः "या ते रुद्र" इति मन्त्रेणापि बाह्यलिङ्गधारणं सिद्ध्यति। प्रतिपादितं च तत् श्रीनन्दिकेश्वरशिवाचार्येण—

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम् ॥

इति सकलवेदशिखामणौ रुद्रैकादशिन्याम्—"या ते रुद्र शिवा तनूरघोराऽपापकाशिनी[4]" इति श्रुतिरपि। रुदं रोदनं संसारदुःखजनितं द्रावयतीति रुद्रः, रुद्रमज्ञानं द्रावयतीति वा रुद्रः। हे रुद्र! अघोरा शान्ताकारा, शिवा सर्वमङ्गलप्रदा, या ते तनुः=लिङ्गरूपं शरीरम्, सा अपापकाशिनी। लिङ्गरूपशरीरावच्छिन्नः शिवः शमदमसम्पन्ने भक्तगात्रे धार्य इति पर्यवसितार्थः[5]" इति। अस्याः श्रुतेर्लिङ्गधारणपरत्वं पूज्यपादैः श्रीरेणुकाचार्यैरपि—

अघोराऽपापकाशीति या ते रुद्र शिवा तनूः।
यजुषा गीयते यस्मात् तस्माच्छैवोऽघवर्जितः ॥[6]

इति समर्थितम्।

---

१. लि. च., पृ. १५८-१६०
२. ऋग्वे. ९।८३।१
३. ऋग्वे. १०।६०।१२
४. तै. आ. ४।५।१।१
५. लि. च., पृ. १२०-१२१
६. सि. शि. ६।६१

एवमेव—"निधनपतये नमः। निधनपतान्तिकाय नमः। ऊर्ध्वाय नमः। ऊर्ध्वलिङ्गाय नमः। ""एतत् सोमस्य सूर्यस्य सर्वलिङ्गं स्थापयति पाणिमन्त्रं पवित्रम्[1]" इत्यनेन यजुर्वेदीयमन्त्रेणापि लिङ्गधारणं प्रतिपादितम्। अत्र 'पाणिमन्त्रम्' इत्यस्य 'इष्टलिङ्गम्' इत्यर्थो भवति। तद्यथा—

मननात् त्रायते यस्मात् तस्मान्मन्त्रोऽयमीरितः।
वाच्यवाचकरूपेण द्विधा मन्त्रः प्रकीर्तितः॥
वाचको वर्णरूपः स्याद् वाच्यश्च परमः शिवः।
मनुदैवतयोरैक्यं तस्मादाहुर्महर्षयः ॥[2]

इति व्यासमहर्षेर्निरुक्त्या,

नमः पीठमिति प्रोक्तं शिकारं मध्यमीरितम्।
वाकारं गोमुखं वृत्तं यकारं गोलकं स्मृतम्।
ओङ्कारं लिङ्गमाख्यातं षड्वर्णं लिङ्गमुच्यते ॥[3]

इति सिद्धान्तसारावल्या वचनेन च पञ्चाक्षरमन्त्र-शिवलिङ्गयोरैक्यं प्रतिपादितम्। तस्माद्वाचकरूपेण मुखे विद्यमानो मन्त्र एव वाच्यरूपेण (लिङ्गरूपेण) पाणौ वर्तत इत्यर्थसंभवात् पाणिमन्त्रमित्यस्येष्टलिङ्गमित्यर्थो जायते। तथा चोक्तं महामहोपाध्यायेन शिवकुमारशास्त्रिमहाभागेन—"पाणिमन्त्रमित्यत्र मन्त्रपदेन लिङ्गमुच्यते, मन्त्रोऽस्यास्तीति मत्वर्थीयाच्प्रत्ययस्वीकारात्। पाणौ मन्त्रमिति व्युत्पत्त्या च पाणिस्थं लिङ्गं पाणिमन्त्रपदेनोक्तं भवति। पाणिस्थत्वं च लिङ्गस्य धारणं विना नोपपद्यत इत्यर्थापत्तिप्रमाणेन धारणं कल्प्यते"[4] इति।

उक्तमन्त्रस्य लिङ्गधारणपरत्वार्थो महर्षेर्व्यासस्याप्यभिमतः। अत एव तेनापि—

यजुरप्याह सर्वं वै लिङ्गं स्थापयतीति च।
तस्माद्धार्यं महालिङ्गं पाणिमन्त्रेति मन्त्रतः॥

---

१. तै आ. १०।१६
२. लि. च., पृ. ४६
३. लि. च., पृ. ४६
४. लि. च. शरत्., पृ. ६२-६३

पाणौ लिङ्गं विनिक्षिप्य दीक्षाकाले गुरुः शिवम् ।
येन स्तुवति तन्मन्त्रं पाणिमन्त्रं वदन्ति हि ॥'[1]

इत्येवंरूपेण स्पष्टरीत्या 'पाणिमन्त्रम्' इत्यस्य लिङ्गधारणार्थत्वं व्यवस्थापितम् ।

ग्रन्थगौरवभयादत्र लिङ्गधारणसिद्धान्तस्य वैदिकत्वे दिग्दर्शनमात्रं कृतम् । विशेषावधारणाय जिज्ञासुभिर्नन्दिकेश्वरशिवाचार्यस्य लिङ्गधारणचन्द्रिका, शिवपूजाशिवलिङ्गशिवयोगीन्द्रस्य श्रुतिसारभाष्यम्, भवानीशङ्कराराध्यस्य लिङ्गधारणदीपिका, आराध्यवीरेश्वरशास्त्रिणो वीरशैवान्वयचन्द्रिका, मरितोण्टदार्यस्य वीरशैवानन्दचन्द्रिका, श्रीपतिपण्डिताराध्यस्य श्रीकरभाष्यम्, इवटूरिनन्दिकेश्वरशास्त्रिणो वीरशैवाष्टावरणप्रमाणाष्टकाभरणमित्यादयो ग्रन्था अवलोकनीयाः । एवं परमाप्तपरमशिवप्रणीतवेदविहितत्वेन लिङ्गधारणं वैदिकमतसम्मतमिति सर्वैरपि वैदिकैस्तदङ्गीकर्तव्यमिति दिक् ।

लिङ्गधारणे विधिविचारः

ननु लिङ्गधारणस्य वैदिकत्वे तत्र को विधिः ? तिस्रः खलु विधेर्विधाः— अपूर्वविधिः, नियमविधिः, परिसंख्याविधिश्चेति । तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिरपूर्वः । यथा व्रीहीन् प्रोक्षतीति । नहि दृष्टाऽदृष्टप्रयोजनतया प्रत्यक्षादिना तत् सिद्धम् ।

पक्षे प्राप्तस्याप्राप्तांशपरिपूरणफलको विधिर्नियमः । यथा व्रीहीनवहन्तीति । अत्र तण्डुलनिष्पत्त्यर्थं नखविदलनादिरपि पक्षे प्राप्तः, अतोऽप्राप्तस्यावहननांशस्य परिपूरणफलको नियमविधिः ।

तत्र चान्यत्र चेति समुच्चयप्राप्तौ यत्र विधीयते सा परिसंख्या । यथा "पञ्च पञ्चनखा भक्ष्याः" इत्यत्र "शशकः शल्यको गोधा खड्गी कूर्मस्तु पञ्चमः" इति वचनेन, एषामन्येषां च पञ्चनखानां भक्षणप्राप्तौ, एते पञ्चैव पञ्चनखा भक्ष्या नेतर इति परिसंख्याविधिः । न च पक्षे प्राप्तस्यावघातादेर्विधायकत्वान्नियमः, नित्यप्राप्तस्य विधायकत्वात् परिसंख्येत्युभयोः स्वरूपतो भेदस्य विद्यमानत्वेऽपि फलतो भेदो नास्तीति शङ्कनीयम्, नियमविधौ इतरनिवृत्तिरर्थात् सिद्ध्यति; यतोऽवहननियमं विना नखविदलनस्य निवृत्तिर्न

१. लि. पु. २।२१।१०३-१०५

भवति। तस्मादप्राप्तांशपरिपूरणमेव मुख्यम्। परिसंख्याविधौ त्वितरनिवृत्तिः साक्षात् सिद्ध्यति; तत्रान्यविधानस्य सापेक्षत्वाभावात्। उक्तं च—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते॥[1] इति।

एवं विविक्तासु तिसृषु विधेर्विधासु लिङ्गधारणे नापूर्वविधिः, तस्य "पाणिमन्त्रं पवित्रम्"[2], "पवित्रं ते विततं ब्रह्मणस्पते:"[3], "या ते रुद्र"[4] इत्यादि-बहुश्रुतिविहितत्वात्। न नियमविधिः, शिवलिङ्गेतरभस्मरुद्राक्षादेरपि धारणस्य सत्त्वात्। न परिसंख्याविधिरपि, लिङ्गधारणादिकर्तव्यत्वाऽकर्तव्यत्वयोरेकदा समुच्चयप्रसक्त्यसंभवात्। अतो लिङ्गधारणं न वैदिकमिति चेन्न; विधि-त्रयेणापि तत्सिद्धत्वात्।

श्रीपतिपण्डिताराध्यैः—"अमृतस्य देवधारणो भूयासम्" इत्यत्रापूर्व-विधिः, लिङ्गधारणस्य "सर्वलिङ्गं स्थापयति" इत्यादिबहुश्रुतिविहितत्वेन नापूर्वविधिरिति चेत्, उपजीव्योपजीवकभावन्यायेन "सर्वलिङ्गं स्थापयति" इत्यादिवाक्यानां फलधारणशब्दायोगेनोपजीवित्वम्; "अमृतस्य देवधारणो भूयासम्" इत्यत्र मोक्षफलधारणनिधायकत्वश्रवणादुपजीव्यत्वम्; अतो न दोषः।

नियमविधिश्च, तान्त्रिकतप्तलिङ्गशूलडमरुशङ्खचक्राङ्कननिषेधपूर्वक-श्रौतभस्मरुद्राक्षलिङ्गधारणादिविधानश्रवणात्।

परिसंख्याविधिरपि, तान्त्रिकतप्तलिङ्गशूलडमरुशङ्खचक्राङ्कननिषेधपूर्वक-श्रौतशिखासूत्रभस्मरुद्राक्षलिङ्गधारणस्वीकारात्। "हरिकेशायोपवीतिने", "रुद्रः शिखा" इत्यादौ भस्मरुद्राक्षादिवच्छिवस्यैव शिखासूत्रधारणश्रवणाच्छिव-लाञ्छनत्वं सिद्धम्। "यश्छन्दसां" इत्यादिलिङ्गधारणविधायकश्रुतीनां परमेश्वरानुग्रहलब्धसर्ववेदार्थवेदिभिः सर्वज्ञ-व्यास-दुर्वासः-रेणुक-श्वेत-उपमन्यु-दधीचि-कुम्भसम्भवादिपूर्वाचार्यैर्लिङ्गधारणपरत्वेन व्याख्यानात् तवैव गौरवम्। वयं श्रुतियुक्त्यनुभूतिवादिनः, बौद्धादिवन्न युक्तिमात्रावलम्बिनः।[5] एवं

१. त. वा. १।१।४
२. तै. आ. १०।१६
३. ऋग्वे. ९।८३।१
४. तै. ब्रा. ४।५।१।१
५. ब्र. सू. श्री. १।१।१, पृ. ३२-३३

लिङ्गधारणस्य विधित्रयेणापि साधितत्वाद् इष्टलिङ्गधारणं वैदिकमित्यत्र न शङ्कालवलेशोऽपि।

आगमास्तत्संमतं लिङ्गधारणं च

तान्त्रिकवैदिकाख्ये वीरशैवसिद्धान्ते सिद्धान्तशब्दवाच्यानां कामिकादि-वातुलान्तानामष्टाविंशत्यागमानां प्रामाण्यमभ्युपगम्यते। एतेषामेवागमाना-मुत्तरभागे वीरशैवसिद्धान्तः प्रतिपादितो वर्तते[1]। सुविपुलस्याप्यस्यागम-साहित्यस्येदानीन्तने समये पूर्णरूपेण दुर्लभत्वं संजातमिदमस्माकं दौर्भाग्यमेव। तत्र तत्र खण्ड-खण्डरूपेण मिलितेषु तेषु वीरशैवीयोऽयं लिङ्गधारणसिद्धान्तः प्रतिपादितः समुपलभ्यते। तदेवात्र सप्रमाणं प्रदर्श्यते। तथाहि—

न वीरशैवसदृशं मतमस्ति जगत्त्रये।
सर्वभोगप्रदं पुण्यं शिवसायुज्यदायकम्॥
यस्य भस्म ललाटेऽस्ति कण्ठे लिङ्गं मदात्मकम्।
रुद्राक्षधारणं देहे सोऽहं देवि न संशयः॥[2]

गुरुणा दत्तलिङ्गं तु शिवमन्त्रेण धारयेत्।
मूर्ध्नि कण्ठे भुजे हस्ते हृत्स्थले नाभिमण्डले।
एतेषामेकदेशे तु धारयेत् शिवलिङ्गकम्॥[3]

तनुत्रयगतानादिमलत्रयमसौ गुरुः।
दीक्षात्रयेण सन्दह्य लिङ्गत्रयमुपादिशेत्॥
शिष्यपाणितले दत्ता या दीक्षा सा क्रिया भवेत्॥[4]
एककालं द्विकालं वा त्रिकालं वापि शाङ्करी।
पूजयेन्नियतं लिङ्गं प्राणलिङ्गपरायणः॥
एवं यः कुरुते भक्त्या नित्यमाप्राणसञ्चरात्।
वीरशैवः स विज्ञेयः सर्वशैवोत्तमोत्तमः॥[5]

---

१. सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्॥ (सि. शि. ५।१४)

२. पा. त. १।४२,४८

३. वा. शु आ. १०।३५-३६

४ का. आ., क्रि. १।१०, १४

५. सू. आ., क्रि. ६।५१-५२

इत्येवं रूपेण पारमेश्वरतन्त्र-वातुलशुद्धागम-कारणागम-सूक्ष्मागमादिषु वीरशैवानां दीक्षाविधिः, तद्द्वारा प्राप्तस्य लिङ्गस्य धारणम्, तत्पूजाविधिरित्यादिकं सम्यक् प्रतिपादितं वर्तते। जिज्ञासुभिः स्वकीयजिज्ञासाप्रशमनार्थमुपलब्धमागमसाहित्यमवलोकनीयम्।

पुराणानि तत्प्रतिपादितं लिङ्गधारणं च

महर्षिणा व्यासेन प्रतिपादितान्यष्टादशपुराणानि सुप्रसिद्धानि सन्ति। सोऽयं महर्षिर्वीरशैवाचार्येण घण्टाकर्णशिवाचार्येण दीक्षित आसीदित्यैतिह्यमपि वर्तते। अत एवाऽयं शिव-स्कन्द-लिङ्गपुराणादिषु प्रसङ्गानुसारेण वीरशैवसिद्धान्तं तदीयां लिङ्गधारणपद्धतिं च प्रपञ्चितवान्। तदेवात्र संक्षेपेणोदाह्रियते। तथाहि—

विभूत्यभ्यर्चनं कुर्याद् विभूत्या च निवेदयेत्।
पूजां कृत्वाऽथ तल्लिङ्गं शिरसा धारयेत् सदा ॥[1]

यथोक्ताः शिवधर्मा हि नन्दिना परिकीर्तिताः।
शैलादेन महाभागा विचित्रा लिङ्गधारकाः ॥
शिवस्योपरि लिङ्गं च ध्रियते च पुरातनैः।
लिङ्गेन सह पञ्चत्वं लिङ्गेन सह जीवितम् ॥[2]

धारयेदवधानेन लिङ्गं सद्गुरुणार्पितम्।
प्रमादात् पतिते लिङ्गे प्राणानपि परित्यजेत् ॥
पतिते प्राणलिङ्गे यो धत्ते प्राणान् नराधमः।
स चाण्डाल इति ज्ञेयः शिवद्रोही न तं स्पृशेत् ॥[3]

आचारलिङ्गं प्रथमं गुरुलिङ्गं द्वितीयकम्।
शिवलिङ्गं तृतीयं स्याच्चरलिङ्गं चतुर्थकम् ॥
प्रसादं पञ्चमं लिङ्गं महालिङ्गं तु षष्ठकम्।
भक्तो माहेश्वरश्चैव प्रसादी प्राणलिङ्गकः ॥
शरणैक्यस्थलैः षड्भिः क्रमाल्लिङ्गमुदाहृतम्।[4]

---

१. शि. पु. वि. १६।५७
२. स्क. पु. के. ७।४१-४२
३. स्क. पु. श. ८३।६७-६८
४. लि. पु. २।२१।१२२-१२४

इत्येतेषां व्यासीयवचनानां पर्यालोचनया स केवलं न वीरशैवशास्त्रज्ञः, किन्तु मर्मज्ञश्चासीदित्यवगम्यते ।

लिङ्गधारिणो देवा दानवा महर्षयश्च

तदेवं वेदागमपुराणादिशास्त्रप्रसिद्धमिदं लिङ्गधारणं न केवलं मनुष्यैः, किन्तु ब्रह्मादिदेवैर्दानवैर्गौतमादिमहर्षिभिश्च धृतमासीदिति—

ब्रह्मविष्ण्वादयो देवा मुनयो गौतमादयः ।
धारयन्ति सदा लिङ्गमुत्तमाङ्गे विशेषतः ॥
लक्ष्म्यादिशक्तयः सर्वाः शिवभक्तिविभाविताः ।
धारयन्त्यलिकाग्रेषु शिवलिङ्गमहर्निशम् ॥[१]

इत्यनेनाचार्यवचनेन विज्ञायते। तत्र महर्षिणा व्यासेन स्कन्दपुराणान्तर्गत-केदारखण्डस्य सप्तमाध्याये विष्णुरिन्द्रनीलमयं लिङ्गम्, ब्रह्मा मणिमयम्, इन्द्रो रत्नमयम्, चन्द्रो मुक्तामयम्, भानुस्ताम्रमयम्, कुबेरो रौक्मम्, यमो नीलमयम्, नैर्ऋता राजतम्, पवनश्च काश्मीरं (कौङ्कुमम्) लिङ्गमर्चयन्तीति प्रतिपादितम्। पुनरन्ते—

एवं ते लिङ्गिताः सर्वे लोकपालाः सवासवाः ।
तथा सर्वेऽपि गन्धर्वाः पाताले किन्नरैः सह ॥[२]

इत्यस्मिन् पद्ये "ते लिङ्गिताः सर्वे" इति तेषां लिङ्गधारित्वं च समर्थितम्। पुनस्तेनैव पद्मपुराणे—

धारणं गात्रसंस्पर्शमशेषदेहगोपनम् ।
मस्तके धारणं मुख्यं ब्रह्मणा च तथा कृतम् ॥
ललाटे धारणं शस्तं यथा लक्ष्म्या धृतं शुभम् ।
बाणेन च धृतं मूर्ध्नि दक्षिणोरसि वा पुनः ॥
कर्णे च हरकर्णेन मुनिना परमर्षिणा ।
धारयन्ति तथा लिङ्गं राक्षसाः केचिदुत्तमाः ॥[३]

---

१. सि. शि. ६।५५-५६

२. स्क. पु. के. ७।२५

३. पद्म. पु. पा. १०।१३०-१३४

इत्येवं ब्रह्मादिदेवानां लक्ष्म्यादिशक्तीनां चोत्तमाङ्गे लिङ्गधारणं निरूपितम्। अत एव महाराष्ट्रप्रदेशीये बार्शीग्रामे भगवतो विष्णोर्मूर्तिमस्तकम्, पण्ढरपुरग्रामे विठ्ठलमूर्तिमस्तकम्, कोल्हापुरग्रामे लक्ष्मीविग्रहस्य मस्तकं च लिङ्गाङ्कितमद्यापि दृश्यते। एवमेवान्यत्राप्यवलोक्यते[1]। शिवभक्ता बाणाद्या असुरा अपि लिङ्गधारिण आसन्निति निरूपयता व्यासेन हरकर्णादयो महर्षयोऽपि लिङ्गधारिणोऽभूवन्नित्यपि प्रतिपादितम्। एवमेवागस्त्य-गौतम-दुर्वासः-दधीचि-सनन्द-कश्यप-उपमन्यु-व्यास-हरकर्णादिमहर्षयः शिवभक्ताः शिवलिङ्गधारिण आसन्निति तत्र तत्र ग्रन्थेषु निरूपितमेव[2]। तस्मादिदं बाह्यलिङ्गधारणं सनातनं सर्वादृतं चेत्यवगम्यते।

तदेवं बाह्यलिङ्गधारणनिरूपणानन्तरं क्रमप्राप्तमान्तरं प्राणलिङ्गस्वरूपं तत्पूजाविधानादिकं च तावद् विमृश्यते।

प्राणलिङ्गस्वरूपम्

मान्त्रीदीक्षायां सद्गुरुणोपदिश्यमानं स्वकीयं चिद्रूपमेवात्र प्राणलिङ्गमित्युच्यते। सूक्ष्मस्वरूपस्यास्य विनैव योगाभ्यासं प्रत्यक्षानुभवाभावः। प्राणायामकुशलैरेव शिवयोगिभिरेव तदधिगन्तुं शक्यते। अत एव श्रीरेणुकाचार्याः—

> प्राणापानसमाघातात् कन्दमध्याद्यदुत्थितम्।
> प्राणलिङ्गं तदाख्यातं प्राणापाननिरोधिभिः॥[3]

इति तत्स्वरूपं योगाभ्यासगम्यमेवेति प्रतिपादयामासुः। श्लोकस्यायं भावः— गुरोरुपदेशेन साधको यदा प्राणायामप्रक्रियया मूलाधारस्थितमपानवायुं प्राणवायुना संघट्टयति, तदा तयोः संघर्षेण मूलाधाराज्ज्योतिरुत्पद्य सुषुम्नामार्गेणोर्ध्वं गच्छति। तज्ज्योतिरनाहतचक्रे, अर्थाद् द्वादशदल-हृदयकमल-कर्णिकायामङ्गुष्ठपरिमाणं विद्रुमवर्णं च स्फुरत् तिष्ठति। हृदये प्रकाशमानमिदं ज्योतिरेव वीरशैवाचार्यैः प्राणलिङ्गमित्युच्यते। यथा सूर्योदये तुहिनकणा-

---

१. बल्लारिनगरस्य नृसिंहमूर्तेः, काश्मीरदेशीयशारदामूर्तेः, तुलजापुरस्य भवानीमूर्तेः, काञ्चीक्षेत्रस्य कामाक्षीविग्रहस्य, काशीक्षेत्रस्य विशालाक्षीविग्रहस्य च मस्तके शिवलिङ्गमद्यापि विराजतेतराम्।

२. वी. र., पृ. ८

३. सि. शि. १२।६

स्तस्मिन् ज्योतिषि लीना भवन्ति, तथा हृदयस्थितेऽस्मिन् ज्योतिषि प्राणवायोरपि विलयो जायत इति कृत्वास्य प्राणलिङ्गमित्यभिधानम्। तदुक्तम्—

प्राणो यत्र लयं याति भास्करे तुहिनं यथा।
तत्प्राणलिङ्गमुद्दिष्टं तद्धारी स्यात्तदाकृतिः ॥[1] इति।

पदवाक्यप्रमाणज्ञैः श्रीमद्भिर्मरितोण्टदार्यैरपि—"कुम्भकशब्दितप्राणवायुनिरोधजनितकशेरुकादण्डान्तरस्थैकविंशतिग्रन्थिभेदनपूर्वककुण्डलिन्यूर्ध्वमुखीकरणद्वारा हृदयस्थितानाहतपद्माष्टदलव्यतिरिक्तचतुर्दलमध्यस्थकर्णिकान्तःस्थिताङ्गुष्ठपरिमाणविद्रुमप्रभप्राणशक्तिविशिष्टचित्स्वरूपमेव प्राणलिङ्गम्[2]" इति प्राणलिङ्गस्वरूपमुपवर्णितम्।

तदेतदवलोकनेन हृदयेऽनाहतचक्रे विद्यमानं ज्योतिर्लिङ्गमेव प्राणलिङ्गमिति निश्चीयते। प्रत्येकं मनुष्यस्य शरीरे आधार-हृदय-भ्रूमध्याख्येषु त्रिविधकेन्द्रेषु ज्योतिर्लिङ्गानामस्तित्वमभ्युपगम्यते[3]। तत्तत्केन्द्रेषु सदा विद्यमानमपि तज्ज्योतिस्तमोगुणादिमालिन्येनावृतत्वात् सर्वेषां सहजतया नापरोक्षं भवति। तदर्थं प्राणायामाभ्यास आवश्यकः। "ततः क्षीयते प्रकाशावरणम्[4]" इति महर्षेः पतञ्जलेरादेशानुसारं प्राणायामेन तदावरणेऽपसृते योगिभिस्तत्प्रत्यक्षीक्रियते। मनसोऽन्तःप्रवृत्तिरूपेऽस्मिन् साधनमार्गे सर्वे न प्रवर्तन्ते। अत एव "कश्चिद्धीरः प्रत्यगात्मानमैक्षद् व्यावृत्तचक्षुरमृतत्वमिच्छन्"[5] इति श्रुत्या स्थिरचेतसां केषाञ्चिदेव धीराणां तत्र प्रवृत्तिर्निरूपिता।

किञ्च, "अत्राऽयं पुरुषः स्वयंज्योतिः"[6] इत्यात्मनः स्वप्रकाशत्वं प्रतिपादयन्त्या श्रुत्या स प्रकाशः सर्वैरपि स्वप्नावस्थायामनुभूयत इति तत्स्थानस्यापि सङ्केतः कृतः। अत्रेदं रहस्यम्—जाग्रदवस्थायां दिवा सूर्यप्रकाशे, रात्रौ चन्द्रप्रकाशे, विद्युद्दीपप्रकाशे वाऽस्माभिर्व्यवहारः क्रियते। जाग्रदवस्थावत् स्वप्नावस्थायामपि गमनागमनाऽऽदानप्रदानादिको व्यवहारः प्रवर्तत एव। सोऽयं

१. सि शि. १२।७

२. वी आ. च., पृ. ४५६

३. मूलाधारे च हृदये भ्रूमध्ये सर्वयोगिनाम्।
ज्योतिर्लिङ्गं सदा भाति यद् ब्रह्मेत्याहुरागमाः ॥ (सि. शि. ६।३४)

४. यो. सू. २।५२

५. कठ. उ. ४।१

६. बृ. उ. ४।३।९

व्यवहारः प्रकाशमन्तरा न संभवति। "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः"[1] इति श्रुत्या च तदानीं सूर्य-चन्द्र-नक्षत्र-विद्युदादीनां प्रकाशाभावबोधनाद् व्यवहारान्यथाऽनुपपत्त्याऽऽत्मप्रकाशोऽभ्युपगन्तव्यः। सर्वास्ववस्थासु सदा विद्यमानोऽप्ययं प्रकाशो जाग्रदवस्थायामन्यप्रकाशानां विद्यमानत्वात् स्पष्टरूपेण नानुभवगोचरो भवति। स्वप्नावस्थायां च प्रकाशान्तराणां विलयादात्मप्रकाशः सर्वैरपि स्पष्टतयाऽनुभूयते।

एवं सर्वैः समानरूपेण स्वप्नावस्थायामनुभूयमानमिदमात्मज्योतिर्जाग्रदवस्थायां प्राणायामविधानेन ध्यानसाधनया वा शिवयोगिभिः साक्षात्क्रियमाणं प्राणलिङ्गमित्यभिधीयते। पूज्यपादाः श्रीरेणुकाचार्याः—

चिद्रूपं हि परं तत्त्वं शिवाख्यं विश्वकारणम्।
निरस्तविश्वकालुष्यं निष्कलं निर्विकल्पकम्॥
सत्तानन्दपरिस्फूर्तिसमुल्लासकलामयम्।
अप्रमेयमनिर्देश्यं मुमुक्षुभिरुपासितम्[2]॥

इत्यादिरूपेण तस्यैव प्राणलिङ्गस्य स्वरूपमुपवर्ण्य निरन्तरं क्रियमाणं तदीयानुसन्धानमेवान्तरं लिङ्गधारणमित्युपदिष्टवन्तः[3]।

ये धारयन्ति हृदये लिङ्गं चिद्रूपमैश्वरम्।
न तेषां पुनरावृत्तिर्घोरसंसारमण्डले[4]॥

इति तेषामेवोपदेशानुसारमन्तर्लिङ्गानुसन्धायिनो घोरात् संसारसागराद् विनिर्मुक्ता भवन्तीति ज्ञायते। अत एव वीरशैवाः स्वेष्टलिङ्गपूजावेलायामेव प्राणलिङ्गार्चनमनुसन्धानं च प्रत्यहं निर्वतयन्ति।

प्राणलिङ्गार्चनविधिः

आन्तरस्यास्य प्राणलिङ्गस्य पूजादिकमप्यान्तरिकैरेव द्रव्यैर्भाव्यमिति श्रीजगद्गुरुरेणुकाचार्यास्तां भावसामग्रीं तत्पूजाविधिं चोपवर्णितवन्तः[5]। तदनु-

---

१. कठ. उ. ५।१५

२. सि. शि. ६।३१-३२

३. आधारे हृदये वापि भ्रूमध्ये वा निरन्तरम्।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणम्॥ (सि. शि. ६।३८)

४. सि. शि. ६।४१

५. बद्धेन्द्रियनवद्वारो बोधदीपे हृदालये।
पद्मपीठे समासीनं चिल्लिङ्गं शिवविग्रहम्॥

सारमत्र क्षमागुणसम्पादनमेवाभिषेकजलम्, नित्यानित्य-आत्मानात्मविवेक एव तत्प्राणलिङ्गपरिधानवस्त्रम्, सर्वदा सत्यभाषणमेव तदीयमाभरणम्, इहामुत्रार्थ-फलभोगविराग एव पुष्पमाला, समाधिस्थितिरेव तल्लिङ्गलेपनं गन्धम्, अहङ्काररराहित्यमेवाक्षताः, श्रद्धाभक्तिरेव धूपः, चिद्रूपपरिज्ञानमेव दीपः, प्रापञ्चिकभ्रान्तेः परित्याग एव नैवेद्यसमर्पणम्, वाचिकं मानसिकं च मौनानुष्ठानं घण्टानादः, शब्दस्पर्शादिविषयाणां लिङ्गार्पणमेव ताम्बूलसमर्पणम्, क्षणिकेषु शब्दादिविषयेषु सुखभ्रान्तिपरित्याग एव प्रदक्षिणा। बुद्धौ तदखण्डत्वनिदिध्यासनमेव च प्रणिपातनमस्कारः। एवं यदा यदा साधकस्य मनस्येतेषामुत्कृष्टगुणानामाविर्भावो जायते, तदा तदा प्राणलिङ्गार्चनरूपमेव तदित्यवगन्तव्यम्।

तदेवं निरन्तरं क्रियमाणयाऽनया प्राणलिङ्गार्चनया साधकस्य मनोवृत्तिरन्तर्मुखीभूता इतोऽपि सूक्ष्मस्य भावलिङ्गस्यार्चने सक्षमा भवति। तदधुना क्रमप्राप्तं भावलिङ्गस्वरूपं तदर्चनपद्धतिं चावलोकयामः।

भावलिङ्गस्वरूपं तदर्चनपद्धतिश्च

क्रिया यथा लयं प्राप्ता तथा भावोऽपि लीयते।
यत्र तद्देशिकैरुक्तं भावलिङ्गमिति स्फुटम्॥[1]

इति सिद्धान्तशिखामणेर्वचनानुसारं सर्वासां बाह्यक्रियाणां विलये जाते सति स्वात्मरूपेण शिवं ध्यायमानस्य साधकस्य बुद्धौ "शिवोऽहम्" इत्याकारिका

भावयित्वा सदाकालं पूजयेद् भाववस्तुभिः।
क्षमाभिषेकसलिलं विवेको वस्त्रमुच्यते॥
सत्यमाभरणं प्रोक्तं वैराग्यं पुष्पमालिका।
गन्धः समाधिसम्पत्तिरक्षता निरहङ्कृतिः॥
श्रद्धा धूपो महाज्ञानं जगद्भासिप्रदीपिका।
भ्रान्तिमूलप्रपञ्चस्य नैवेद्यं तन्निवेदनम्॥
मौनं घण्टापरिस्पन्दस्ताम्बूलं विषयार्पणम्।
विषयभ्रान्तिराहित्यं तत् प्रदक्षिणकल्पना॥
बुद्धिस्तदात्मिकासक्तिर्नमस्कारक्रिया मता।
एवंविधैर्भावशुद्धैरुपचारैरदूषितैः॥
प्रत्यङ्मुखमना भूत्वा पूजयेल्लिङ्गमान्तरम्॥
(सि. शि. १२।१५-२०)

१. सि. शि. १५।३७

भावना समुदेति । तैलधारावन्निरन्तरोत्पन्नाया अस्या भावनाया बलेन साधकस्य शिरसि स्थिते सहस्रारकमले दिव्यज्योतिरेकमनुभवगोचरं भवति । तच्च त्रिकोण-षट्कोणाद्याकारं विना पूर्णरूपेण प्रकाशितं भवतीति निराकारमित्युच्यते । अस्मिन्नेव ज्योतिषि शिवं ध्यायमानस्य साधकस्य 'शिवोऽहम्' इत्याकारिका भावना प्रबुद्धा[1] भवतीत्यस्य 'भावलिङ्गम्' इति संज्ञा जाता। अस्यार्चनविधौ पूर्वोक्तभावनाया व्यतिरिक्तं न किञ्चिदपेक्ष्यते । अत एवोक्तम्—

भावेन गृह्यते देवो भगवान् परमः शिवः।
किं तेन क्रियते यस्य नित्यपूर्णो हि स स्मृतः ॥

अखण्डपरमानन्दबोधरूपः परः शिवः।
भक्तानामुपचारेण भावयोगात् प्रसीदति ॥[2] इति ।

एवं भावनामयव्यवहारविषयीभूतत्वाद् भावनाया विलयस्थानभूतत्वाच्च सहस्रारकमले विराजमानं तज्ज्योतिरेव भावलिङ्गमित्यभिधीयते । अस्यैव तृप्तिलिङ्गमिति नामान्तरमपि वर्तते । अन्तर्मुखो हि साधकः स्वेष्टलिङ्गपूजाऽनन्तरं प्राणलिङ्ग-भावलिङ्गयोरनुसन्धानेऽधिकारी भवति । भावलिङ्गानुसन्धानमेव वीरशैवोपासनायाश्चरमं लक्ष्यम् । वेधदीक्षायां सद्गुरुणोपदिष्टस्यास्य भावलिङ्गस्य निरन्तरचिन्तनेन साधकस्याणवमलो निवर्तते, स च शिवस्वरूपो भवति ।

अन्तर्लिङ्गपूजकैरपि बाह्यलिङ्गपूजनमावश्यकम्

ननु हृत्पुण्डरीकाद्यन्तर्वर्तिनो ज्योतिर्लिङ्गस्य भावनारूपेण धृतस्य मानसिकैरेवोपचारैर्मुमुक्षुभिर्योगिभिश्चोपास्यमानत्वेन मोक्षप्रदत्वं सर्वजनप्रसिद्धमिति तद्धारणेनैवेष्टसिद्धेर्बहिर्लिङ्गधारणं तत्पूजादिकं च निष्फलमेव स्यादिति चेन्न, अन्तर्यजनस्य बहिर्यजनपूर्वकत्वात् ।

अत्रेदमैदम्पर्यम्—"आदौ सगुणमाश्रित्य पश्चान्निर्गुणमाश्रयेत्" इतिन्यायेन सकलस्य, अर्थात् सगुणस्येष्टलिङ्गस्य पूजानन्तरमेव सकलनिष्कल-केवलनिष्कलयोश्च प्राणलिङ्ग-भावलिङ्गयोरनुसन्धानाधिकारी भवति । यथा बाह्ये

१. तद्ध्यानं मनसा यत्र प्राणलिङ्गार्चनं मतम् ।
मनोवृत्तिलयस्तत्र भावलिङ्गस्य पूजनम् ॥ (सू. आ., क्रि. ६।४७)

२. सि. शि. १५।३९

जाग्रदवस्थायामनुभूतार्थ एव अन्तः स्वप्नावस्थायां तत्संस्कारबलेन परिदृश्यते; तथा बाह्यलिङ्गपूजासंस्कारबलेनैवान्तर्लिङ्गपूजादिकं सरलतया सम्पद्यते। अपि च, ईश्वरानुग्रहं विना जीवो नान्तर्लिङ्गानुसन्धानसमर्थो भवति, ईश्वरानुग्रहश्च तदीयबाह्यपूजां विनाऽनुपपन्न इति बाह्यपूजाया अनिवार्यताऽवश्यमभ्युपेया। अत एव श्रीमद्भिमरितोण्टदार्यैः—

बाह्ये जाग्रदवस्थायामनुभूतार्थं एव हि।
अन्तः स्वप्नदशायां तु यथैव परिदृश्यते॥
तथाऽन्तर्यजनं नित्यं बहिर्यजनपूर्वकम्।
बहिर्यागविहीनश्चेदन्तर्यागो न सिद्ध्यति॥
तद्बाह्याङ्गे चान्तरङ्गे परमप्रीतिपूर्वकम्।
कर्तव्यं स्वेष्टलिङ्गस्य पूजनं च मनीषिभिः॥
गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणम्।
निस्सृतं कर्मणा बाह्ये पुनस्तासां तु भेषजम्॥
एवमन्तःशरीरस्थः परात्मा परमेश्वरः।
विनार्चनां बहिर्देवो हितं न कुरुते नृणाम्॥[१]

इति बहुभिर्युक्तिभिर्बाह्यलिङ्गार्चनं कर्तव्यमेवेति समर्थितम्। श्रीजगद्गुरुरेणुकाचार्यैरप्येवमेवादिष्टं वर्तते[२]।

इष्ट-प्राण-भावलिङ्गानामावरणशब्दवाच्यत्वम्

तदेवं वीरशैवसिद्धान्तेऽन्तर्लिङ्गानुसन्धातृभिः शिवयोगिभिस्तदननुसन्धातृभिः साधकैश्च बाह्यलिङ्गधारणं तदर्चनादिकं चावश्यमेव क्रियते, तस्य नित्यकर्मान्तःपातित्वात्; अन्यथा प्रत्यवायोपपत्तेः।

एवमत्रोक्तेन स्वेष्टलिङ्गोपासनेन नेत्रयोः, प्राणलिङ्गोपासनेन मनसः, भावलिङ्गोपासनेन बुद्धेश्च पावित्र्यं सम्पाद्य साधकस्त्रिभिः करणैः परिशुद्धो भवति। इन्द्रियमनोबुद्धीनां नैर्मल्यकारणीभूतानि इष्ट-प्राण-भावाख्यानि लिङ्गानि सांसारिकविषयैः साधकस्य परिरक्षकाणि भवन्तीतीमानि रक्षाकवचरूपावरणशब्दवाच्यानीत्यवधेयम्। तत्रापीष्टलिङ्गं स्थूलशरीरस्य, प्राणलिङ्गं सूक्ष्मशरीरस्य, भावलिङ्गं च कारणशरीरस्यावरणमिति विज्ञेयम्।

---

१. वी, आ च,, पृ. ५८

२. अन्तर्धारयितुं लिङ्गमशक्तः शक्त एव वा।
बाह्यं च धारयेल्लिङ्गं तद्रूपमिति निश्चयात्॥ (सि. शि. ६।४७)

३. जङ्गमः

इह खलु स्थावरं जङ्गमं चेति द्विविभागं जगत्। तत्रैकस्मिन् स्थाने सर्वदा वर्तमानं स्थावरम्, संचरणशीलं जङ्गममित्युभयोः सामान्या परिभाषा। वीरशैवसिद्धान्ते सर्वस्यापि प्रपञ्चस्य [1]शिवस्वरूपत्वाभ्युपगमात् पूर्वोक्तं प्रपञ्च-द्वैविध्यं शिवस्यैव स्वरूपद्वयमित्यङ्गीक्रियते। एवं सामान्यतः सर्वत्र शिवसान्निध्ये समानेऽपि स्थावरेषु शिवलिङ्गे, जङ्गमेषु च शिवज्ञानिनि शिवः शीघ्रमभि-व्यज्यत इति तयोरेवात्र पूजा विहिता, तस्माद्वीरशैवाष्टावरणेषु तृतीयावरणत्वेन परिगणितो जङ्गमः शिवज्ञानीत्यवधेयम्। अस्य चरः, चरलिङ्गमित्यपि नामान्तरं प्रसिद्धम्।

एक एव शिवः साक्षात् सर्वानुग्रहकारकः।
गुरुजङ्गमलिङ्गात्मा वर्तते भुक्तिमुक्तिदः[2]॥

इत्याचार्योक्त्यनुसारमेक एव शिवः गुरुरूपेण, लिङ्गरूपेण, जङ्गमरूपेण चावतीर्य स्वभक्तेभ्यो भुक्तिमुक्तिप्रदायको भवति। अत एव—"एकमूर्तिस्त्रयो भागा गुर्लिङ्गं तु जङ्गमः" इत्युक्तिः प्रसिद्धिं जगाम। तस्माद्वीरशैवसिद्धान्ते भगवत एतन्मूर्तित्रयं समानरूपेण समाद्रियते। गुरोर्लिङ्गस्य च स्वरूपादिकं पूर्वमुप-वर्णितम्। अधुना क्रमप्राप्तस्य तृतीयावरणरूपस्य जङ्गमस्य स्वरूपम्, जङ्गम-शब्दस्य दार्शनिकी परिभाषा, तदवस्थात्रयम्, जङ्गमशब्दस्य साम्प्रदायिकी परिभाषा चेत्यादिकं सर्वं यथाशास्त्रं विमृश्यते।

जङ्गमशब्दस्य तात्त्विकार्थः

जानन्त्यतिशयाद् ये तु शिवं विश्वप्रकाशकम्।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः॥[3]

इति श्रीजगद्गुरुरेणुकाचार्या जङ्गमशब्दस्य दार्शनिकपरिभाषामुखेन तात्त्विकार्थमुपवर्णितवन्तः। श्लोकस्यास्यायमर्थः—"तस्य भासा सर्वमिदं विभाति"[4] इति श्रुत्या स्वकीयचित्क्रियाशक्तिभ्यां प्रपञ्चप्रकाशकं शिवं ये स्वस्वरूपतया,

---

१. पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते॥ (सि. शि. १०।६६)

२. सि. शि ९।५९

३ सि. शि. ११।३६

४. मुण्ड. उ. २।२।१०

अर्थात् स्वात्मानं शिवस्वरूपमतिशयेन जानन्ति, अर्थान्निर्निश्चितरूपेण जानन्ति, ते जङ्गमा इति कीर्त्यन्त इति। एतेन जङ्गमो नाम जननमरणरहितो जीवन्मुक्तो महापुरुष इत्यवधेयम्।

वीरशैवसदाचारसंग्रहे[1] 'ज' इत्यस्य जननरहित इति, 'ग' इत्यस्य गमनरहित इति, 'म' इत्यस्य च मरणरहित इत्यक्षरार्थप्रतिपादनद्वारा जङ्गमस्य जरामरणशून्यत्वमत एव तस्य जीवन्मुक्तत्वं च प्रतिपादितम्। निःस्पृहो निरहङ्कारश्चायं लोककल्याणार्थं तत्त्वोपदेशाय सदा संचरणशीलो[2] भवति। शिवेन योगम्, अर्थाद् ऐक्यमापन्न इति शिवयोगीति नाम्नापि व्यपदिश्यते।

'ब्रह्म जानातीति ब्राह्मणः' इति व्युत्पत्त्या यथोपनिषत्प्रतिपादितो ब्राह्मणशब्दो ब्रह्मज्ञानिवाचको भवति, तथागमशास्त्रप्रतिपादितो जङ्गमशब्दोऽपि शिवज्ञानिवाचको भवति। तस्माद् ब्राह्मणजङ्गमशब्दौ तात्त्विकदृष्ट्या पर्यायवाचकाविति पर्यवस्यति।

तत्र तावद् वज्रसूचिकोपनिषदि ब्राह्मणशब्दो न जीव-देह-जात्यादिवाचक इति युक्त्या विखण्डय तस्य ब्रह्मज्ञानिवाचकत्वमेव समर्थितम्। तदेवात्र यथावत् प्रस्तूयते—"तत्र चोद्यमस्ति, को वा ब्राह्मणो नाम? किं जीवः, किं देहः, किं जातिः, किं ज्ञानम्, किं कर्म, किं धार्मिक इति। तत्र प्रथमो जीवो ब्राह्मण इति चेत्? तन्न, अतीतानागतानेकदेहेषु जीवस्यैकरूपत्वात्, एकस्यापि कर्मवशादनेकदेहसंभवात्, सर्वशरीराणां जीवस्यैकरूपत्वाच्च। तस्मान्न जीवो ब्राह्मण इति। तर्हि देहो ब्राह्मण इति चेत्तन्न, आचाण्डालं मनुष्याणां पाञ्चभौतिकत्वेन देहस्यैकरूपत्वाज्जरामरणधर्माधर्मादिसाम्यदर्शनाद् ब्राह्मणः श्वेतवर्णः, क्षत्रियो रक्तवर्णः, वैश्यः पीतवर्णः, शूद्रः

---

१. जकाराज्जननं दूरं गकाराद् गतिनाशनम्।
मकारान्मरणं नष्टं जङ्गमस्त्र्यक्षरात्मकः॥
यस्य नास्ति पुनर्जन्म गतिर्नास्ति कदाचन।
बाधते यं न मरणं शृणु नाथे स जङ्गमः॥
जरामरणशून्यत्वाद् गमागमविवर्जनात्।
मनुष्याचाररहित्याज्जङ्गमोऽयमुदाहृतः॥ (वी. स. स. १५।६-८)

२. सर्वलोकोपकाराय यो देवः परमेश्वरः।
चरत्यतिथिरूपेण नमस्ते जङ्गमात्मने॥ (वीरागमे)

कृष्णवर्ग इति नियमाभावात्; पित्रादिशरीरदहने पुत्रादीनां ब्रह्महत्यादिदोष-संभवाच्च। तस्मान्न देहो ब्राह्मण इति। तर्हि जातिर्ब्राह्मण इति चेत्तन्न, तत्र जात्यन्तरजन्तुष्वनेकजातिसंभवा महर्षयो बहवः सन्ति। ऋष्यश्रृङ्गो मृग्यः, कौशिकः कुशाज्जातः, जाम्बूको जम्बूकात्, वाल्मीको वल्मीकात्, व्यासः कैवर्तककन्यायाः, शशपृष्ठाद् गौतमः, वसिष्ठ उर्वशीतः, अगस्त्यः कलशाज्जात इति श्रूयमाणत्वात्। एतेषां जात्या विनाप्यग्रे ज्ञानप्रतिपादका ऋषयो बहवः सन्ति। तस्मान्न जातिर्ब्राह्मण इति। तर्हि ज्ञानं ब्राह्मण इति चेत्तन्न, क्षत्रियादयोऽपि परमार्थदर्शिनोऽभिज्ञा बहवः सन्ति। तस्मान्न ज्ञानं ब्राह्मण इति। तर्हि कर्म ब्राह्मण इति चेत्तन्न, सर्वेषां प्राणिनां प्रारब्धसंचितागामि-कर्मसाधर्म्यदर्शनात् कर्माभिप्रेरिताः सन्तो जनाः क्रियाः कुर्वन्तीति। तस्मान्न कर्म ब्राह्मण इति। तर्हि धार्मिको ब्राह्मण इति चेत्तन्न, क्षत्रियादयो हिरण्यदातारो बहवः सन्ति। तस्मान्न धार्मिको ब्राह्मण इति। तर्हि को वा ब्राह्मणो नाम? यः कश्चिदात्मानमद्वितीयं जातिगुणक्रियाहीनं षडूर्मिषड्भावे-त्यादिसर्वदोषरहितं सत्यज्ञानानन्दानन्तस्वरूपं स्वयं निर्विकल्पमशेषकल्पाधार-मशेषभूतान्तर्यामित्वेन वर्तमानमन्तर्बहिश्चाकाशवदनुस्यूतमखण्डानन्दस्वभाव-मप्रमेयमनुभवैकवेद्यमपरोक्षतया भासमानं करतलामलकवत् साक्षादपरोक्षीकृत्य कृतार्थतया कामरागादिदोषरहितः शमदमादिसम्पन्नो मानमात्सर्यतृष्णाशामोहा-दिरहितो दम्भाहङ्कारादिभिरसंस्पृष्टचेता वर्तते स एवमुक्तलक्षणो ब्राह्मण इति श्रुतिस्मृतिपुराणेतिहासानामभिप्रायः। अन्यथा हि ब्राह्मणत्व-सिद्धिर्नास्त्येव"[1] इति।

अनेनोपनिषत्प्रतिपादितेन ब्राह्मणशब्दनिर्वचनेन यथा ब्राह्मणो नाम न देहजात्यादिकम्, किन्तु ब्रह्मज्ञानीति निश्चीयते, तथा जङ्गमशब्दोऽपि न जीव-देह-जाति-ज्ञान-कर्म-धर्मादिवाचकः, किन्तु शिवज्ञानिवाचक इति निर्णीयते।

व्यावहारिको जङ्गमशब्दार्थः

ब्रह्मज्ञानिवाचकेनैव ब्राह्मणशब्देन यथा लोके ब्राह्मणजातिबोधो भवति, तथा शिवज्ञानिवाचकेन जङ्गमशब्देन जङ्गमजातेरपि बोधो भवत्येव। तस्माद् वीरमाहेश्वरवंशे समुत्पन्ना अपि जङ्गमा इत्याख्यायन्ते। अत एवोक्तम्—

अतो विशिष्टवीरेति वीरमाहेश्वरेति च।
पर्यायो वर्तते देवि जङ्गमस्य महात्मनः॥[2] इति।

---

१. ब. सू. उ. सम्पूर्णा।
२. वी. स. स. ११।४५

तस्माद् वीरमाहेश्वर-जङ्गमशब्दौ पर्यायवाचकावेव। [1]चन्द्रज्ञानागमेऽपि माहेश्वर-चर-जङ्गमशब्दानां पर्यायवाचकत्वं समर्थितम्। महाभारतस्यानुशासनपर्वणि[2] जङ्गमस्य लिङ्गिब्राह्मण इति व्यपदेशः कृतः। लिङ्गधारणरहितानामपि ब्राह्मणानां विद्यमानत्वात् तेभ्यो व्यावृत्त्यर्थमत्र लिङ्गीति विशेषणम्। ब्रह्मणा सृष्टेषु चतुर्वर्णेषु यथा ब्राह्मणस्य प्राशस्त्यम्, तथा शिवेन सृष्टायामतिवर्णाश्रमाख्यायां वीरशैवपरम्परायां वीरमाहेश्वरवंशोत्पन्नस्य जङ्गमस्यापि महिमाधिक्यं वर्तते। अत एव धार्मिकेषु पर्वकालेषु सर्वेऽपि वीरशैवाः सदाचारशीलं जङ्गममाहूय तत्पादपूजादिकं कृत्वा भोजनदक्षिणादिना तं परितोष्य तदीयचरणामृतस्य भक्त्या प्राशनं कुर्वन्ति।

प्रचलिताया अस्याः परम्पराया अवलोकनेन ज्ञायते यद् अस्मिन् जङ्गमवंशे बहुप्राचीनकालादेव शिवज्ञानिनां परम्परा समागता। अद्यापि तादृशशिवज्ञानवन्तो जङ्गमास्तत्र तत्र विद्यन्त एव। जङ्गमवंशोत्पन्नानां सर्वेषां तादृशज्ञानवत्त्वाभावेऽपि शिवज्ञानिनां सन्ततिरिति तेषामद्यापि माहात्म्यं वर्तते लोके। इयमवस्था ब्राह्मणपरम्परायामपि समानैव। नहि सर्वेऽपि ब्राह्मणा ब्रह्मज्ञानिनो भवन्ति, अथापि ब्रह्मज्ञानिनां सन्ततिरिति सर्वेषामपि ब्राह्मणानां समादरो वर्तते। तदेवं तात्त्विकदृष्ट्या व्यावहारिकदृष्ट्या च जङ्गम-ब्राह्मणशब्दौ समानार्थकावेव। अतो जङ्गमानां लिङ्गिब्राह्मणा इति लोके व्यवहारः।

जङ्गमस्य लक्षणम्

तत्र तावच्चन्द्रज्ञानागमे ज्ञानिजङ्गमस्य दश बाह्यलक्षणानि त्रीणि चान्तरङ्गलक्षणानि प्रतिपादितानि। तदनुसारं लिङ्गभस्मरुद्राक्षादिशिवचिह्नानामादरेण धारणम्, सद्गुरोः सेवा, सदा शिवस्तुतिः, शिवनामोच्चारणम्, शिवपूजनम्, शिवागमार्थानुसन्धानम्, शिवपुराणादीनां प्रत्यहं श्रवणम्, पूज्येषु नमस्कारः, शिवभक्तानामेव गृहेषु भोजनम्, स्वसामर्थ्यानुसारं सत्पात्रेषु

---

१. माहेश्वरश्चरो भक्तः शैवो जङ्गम इत्यपि।
सहजस्याभिधानानि भवन्तीश्वरशासनात्॥ (च. ज्ञा., क्रि. ४।७)

२. किमाहुर्भरतश्रेष्ठ विप्राः पात्रं सनातनम्।
लिङ्गिनं ब्राह्मणं चैव ब्राह्मणं चाप्यलिङ्गिनम्।
सद्वृत्तिमन्तं विज्ञाय लिङ्गिने चेतराय च।
देयमाहुर्महाराज उभावेतौ तपस्विनौ॥ (म. भा. अनु. २२।१-२)

दानमिति दशविधं तस्य बाह्यलक्षणम् । एवमेव मानसी पूजा, मानसिको जपः, स्वान्तः शिवसाक्षात्कारश्चेति त्रिविधमिदमन्तरङ्गलक्षणमिति[1] विज्ञेयम् ।

एतादृशविलक्षणलक्षणवन्तो जङ्गमाः सामान्यतो मनुष्यरूपेण विलोक्यमाना अपि साक्षात् परशिवरूपा[2] एव । तस्मात् स्वहितेप्सुना मनुष्येण यथाशक्ति यथाभक्ति च तेषां समादरः कर्तव्यः । तत्समादरेण सर्वतीर्थस्नानफलं सर्वदेवताराधनफलं च लभ्यते[3] ।

जङ्गमस्योत्कृष्टत्वम्

संसारसागरेऽगाथे दुःखावर्तशताकुले ।
मज्जतां मनुजानां वै पूजा माहेश्वरस्य नौः ॥

इति शङ्करसंहितायां माहेश्वरापरपर्यायस्य जङ्गमस्य पूजनमेव संसाराब्धितरणिरिति निरूप्य, पुनः क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाऽधिकाः, पशुभ्योऽपि नराः, तेषु द्विजातयः, तेषु लिङ्गाङ्गसङ्गिनः, तेषु च षट्स्थलज्ञानवानित्युत्तरोत्तरमाधिक्यं प्रतिपाद्य—"तस्मादप्यधिको नास्ति त्रिषु लोकेषु सर्वदा" इति षट्स्थलज्ञानिनो जङ्गमस्य सर्वोत्कृष्टत्वमुद्घोषितम्[4] । सिद्धान्तशिखामणावपि—

---

१. च. ज्ञा., क्रि ४।१२-१८

२. तद्यथाशक्ति संपूज्या जङ्गमा हि हितेप्सुना ।
यदमी मानुषाकाराः प्रत्यक्षपरमेश्वराः ॥ (च. ज्ञा., क्रि. ४।३०)

३. सर्वतीर्थाभिषेकाच्च सर्वयज्ञविधानतः ।
सर्वदेवाराधनाच्च चरपूजा गरीयसी ॥ (च. ज्ञा., क्रि. ४।३३)

४. क्रिमिकीटपतङ्गेभ्यः पशवः प्रज्ञयाधिकाः ।
पशुभ्योऽपि नराः श्रेष्ठास्तेषु श्रेष्ठा द्विजातयः ॥
द्विजातिष्वधिका विप्रा विप्रेषु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारस्तेभ्यः संन्यासिनोऽधिकाः ॥
तेषु विज्ञानिनः श्रेष्ठास्तेषु शङ्करपूजकाः ।
तेषु श्रेष्ठा महाभागा मम लिङ्गाङ्गसङ्गिनः ॥
लिङ्गाङ्गसङ्गिष्वधिकः षट्स्थलज्ञानवान् भवेत् ।
तस्मादप्यधिको नास्ति त्रिषु लोकेषु सर्वदा ॥
स वन्द्यः सर्वदा पूज्यः संसारविजिगीषुभिः ।
तस्मै दयं ततो ग्राह्यं स च पूज्यो यथा ह्यहम् ॥
(वी. आ. च., पृ. ४४५; स्कन्द. श. ८४।७१-७५)

अजङ्गमं तु यल्लिङ्गं मृच्छिलादिविनिर्मितम् ।
तद्वरं जङ्गमं लिङ्गं शिवयोगीति विश्रुतम् ॥
अचरे मन्त्रसंस्काराल्लिङ्गे वसति शङ्करः ।
सदाकालं वसत्येव चरलिङ्गे महेश्वरः ॥[1]

इति लिङ्गस्य चराचरभेदेन द्वैविध्यं प्रतिपाद्य, मृच्छिलादिना विनिर्मितादजङ्गमलिङ्गात् शिवयोगिरूपस्य जङ्गमलिङ्गस्यैवाधिक्यं हेतुपुरःसरमुपस्थापितम् । तस्माद्वीरशैवसिद्धान्ते स्वेष्टलिङ्गपूजापेक्षया जङ्गमार्चनस्य प्राशस्त्यमभ्युपगम्यते । "लिङ्गमुखं वै जङ्गमः" इत्युक्तौ जङ्गमस्य लिङ्गमुखत्वेनाभिधानाज्जङ्गमार्पितं सर्वं लिङ्गार्पितं सम्पद्यते । अत एव श्रीजगद्गुरुरेणुकाचार्यैः—

शिवयोगिनि सन्तृप्ते तृप्तो भवति शङ्करः ।
तत्तृप्त्या तन्मयं विश्वं तृप्तिमेति चराचरम् ॥[2]

इति जङ्गमतृप्त्या शिवसन्तृप्तिस्तया च चराचरस्य प्रपञ्चस्य सन्तृप्तिरिति समर्थितम् । अतोऽत्र जङ्गमार्चनं तदर्पणं च विशेषेण विधीयते ।

तदेवं शिवज्ञानप्राप्त्या सर्वोत्कृष्टत्वेन वर्तमानस्यास्य जीवन्मुक्तस्य जङ्गमस्य स्वय-चर-परभेदेनावस्थात्रयमभ्युपगम्यते । तस्मादयं स्वयजङ्गमः, चरजङ्गमः, परजङ्गमश्चेत्यवस्थाभेदेन व्यवह्रियते । तदत्र क्रमशस्तेषां स्वरूपं विचारयामः ।

स्वयजङ्गमः

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥[3]

इति श्रुत्युक्त्यनुसारमयं जङ्गमः सर्वत्र स्वात्मानमेव पश्यतीति स्वयजङ्गम इत्युच्यते । उक्तं च तल्लक्षणमाचार्यैः—

स्वच्छन्दाचारसन्तुष्टो ज्योतिर्लिङ्गपरायणः ।
आत्मस्थसकलाकारः स्वाभिधो मुनिसत्तमः ॥[4] इति ।

---

१. सि. शि. ९।६१-६२
२. सि. शि, ९।९१
३. ई. उ. ६
४. सि. शि. १५।५२

निर्ममो निरहङ्कारश्चायं न कस्यापि वशवर्ती भवति। स्वतन्त्ररूपेण कुत्रापि निवसन् स्वेष्टलिङ्गपूजया सह प्राणभावाख्यज्योतिर्लिङ्गानुसन्धानपरायणो भवति। अस्य च महात्मनः शिवज्ञानम्, शिवध्यानम्, भिक्षाहारः, एकान्तशीलत्वं चेति चत्वार्येव प्रधानकर्माणि[1]; अर्थादयं कस्यचिद् ग्रामस्य नगरस्य मठे मन्दिरे वा निवसन् शिवध्यानतत्परो भूत्वा भक्तेभ्यः शिवज्ञानमुपदिशति। शिवभक्तगृहादेव भिक्षामानीयातिथिभ्य आतिथ्यं कृत्वा स्वयं चोपभुङ्क्ते। "पण्डिताः समदर्शिनः"[2] इति गीतोक्त्यनुसारं सर्वत्र स्वात्मदर्शनरूपसमदर्शित्वमस्य प्राप्तमिति नाऽयं कमपि द्वेष्टि, न वा विजुगुप्सते।

चरजङ्गमः

स्वरूपज्ञानसम्पन्नो ध्वस्ताहम्ममताकृतिः।
स्वयमेव स्वयं भूत्वा चरतीति चराभिधः॥[3]

इति श्रीरेणुकोक्त्यनुसारं स्वस्वरूपज्ञानसम्पन्नः, अत एवाहङ्कारममकारशून्यो जीवन्मुक्तो यदा लोककल्याणार्थं सर्वत्र संचरति, तदाऽयं चरजङ्गम इत्यभिधीयते। कुत्रापि स्थायिरूपेण निवासरहितोऽयं ज्ञानोपदेशाय ग्रामाद् ग्राममटति। स्वसंचारे तत्र तत्र कांश्चिद् दर्शनमात्रेण, कांश्चित् स्पर्शतः, कांश्चिदुपदेशेन च जनानुद्धरति। लोकोद्धार एवास्य संचरणस्य मुख्यं प्रयोजनम्। अस्योपदेशश्रवणेन भक्तानामन्तःस्थो मलो निवर्तते, ते च शुचिनो भवन्ति। एवं भक्तोद्धारार्थं चरमाणोऽयं चरजङ्गमश्चरपट्टाधिकारीत्यप्युच्यते[4]।

अत्रेदं ज्ञातव्यं यत् प्राचीनकाले वीरशैवीयगुरुवर्गमठेषु सुयोग्यस्य व्यक्तिद्वयस्य पट्टाभिषेकं कुर्वन्ति स्म। तयोरेकः पट्टाधिकारी, अपरश्च चरपट्टाधिकारी। पट्टाधिकारी मठ एव निवसन् तत्रागतानां भक्तानां योगक्षेमं च वहन् तेभ्यो ज्ञानोपदेशं करोति स्म। चरपट्टाधिकारी तु भक्तानां गृहे गृहे गत्वा

---

१. ध्यनं शैवं तथा ज्ञानं भिक्षा चैकान्तशीलता।
यतेश्चत्वारि कर्माणि न पञ्चममिहेष्यते॥ (सि. शि. १५।५६)

२. भ. गी. ५।१८

३. सि. शि. १५।५७

४. कांश्चिद् दर्शनमात्रेण कांश्चिदङ्घ्रिसमीलनात्।
हस्तावस्पर्शतः कांश्चित् पावयन् प्रणतान् जनान्॥
एवंरीत्या भक्तिभिक्षां स्वीकुर्वन् सञ्चरन् सदा।
चरपट्टाधिकारी यः स एव चरजङ्गमः॥ (वी. स. सं. १५।३०-३१)

धर्मोपदेशेन तान् कृतार्थयति स्म। इयं परम्परा न केवलं शाखामठेष्वेव, किन्तु वीरशैवप्रधानपञ्चपीठेष्वप्यासीत्। गच्छता कालेन व्यवस्थासौविध्यार्थमेकस्यैवाधिकारद्वयप्रदानपरम्परा समागता। अत इदानीन्तना वीरशैवमठीयाः स्थिरचरपट्टाधिकारिणः प्रसङ्गानुसारं भक्तोद्धाराय संचरमाणा मठेऽपि निवसन्तश्च कार्यद्वयं सुचारुरूपेण निर्वहन्ति।

परजङ्गमः

"परश्चासौ जङ्गमश्च परजङ्गमः" इति व्युत्पत्त्या जीवन्मुक्तेषु श्रेष्ठः परजङ्गम इत्युच्यते। अपि च, परो नाम विश्वोत्तीर्णः परशिवः, तं स्वात्मरूपेण तैलधारावन्निरन्तरं ध्यायमानस्यास्य परं स्वस्माद् भिन्नं किञ्चिदपि वस्तु न प्रतीयत इत्ययं परजङ्गम इत्यभिधीयते। तदुक्तम्—

स्वयमेव स्वयं भूत्वा चरतः स्वस्वरूपतः।
परं नास्तीति बोधस्य परत्वमभिधीयते॥[1] इति।

अत्रेदं बोद्धव्यम्—स्वयजङ्गमो घटपटादिसर्वपदार्थेषु स्वात्मानं पश्यति, परजङ्गमस्य तु घटपटादयो न प्रतीयन्ते, किन्तु स सर्वत्र स्वात्मानमेव पश्यति, अर्थादस्य व्यावहारिकभेदस्यापि प्रतीतिर्न भवति। अत एवाऽयं शिवयोगिराट् परमहंसश्च कथ्यते। अस्य व्यावहारिकभेदस्यापि प्रतीत्यभावादनेन न तत्त्वोपदेशः कर्तुं शक्यते, किन्त्वस्य दर्शनेन स्पर्शनेन च जनाः कृतार्था भवन्ति। लोकसंग्रहादिवासनाविरहितोऽयं सदेहोऽपि निर्देहीत्युच्यते। अतोऽस्य भोजनादिक ऐहिको व्यवहारोऽन्येनैव सम्पाद्यते। परजङ्गमस्य पादस्पर्शेन नद्यः, पावनानि तीर्थानि, तदीयनिवासस्थानानि च दिव्यक्षेत्राणि भवन्ति।

जङ्गमस्यावरणशब्दवाच्यत्वम्

तदेवं जङ्गमशब्दस्य पर्यालोचनया वीरमाहेश्वरवंशोत्पन्नः, शिवज्ञानसम्पन्नः, स्वय-चर-परेत्यवस्थात्रयवान्, कस्मिंश्चिद् वीरशैवगुरुवर्गमठे चरपट्टाधिकारित्वेनाभिषिक्तो जीवन्मुक्तो महापुरुष एवात्र जङ्गमशब्दाभिप्रेतः। अयं च सर्वत्र संचरन् भक्तेभ्यः शिवज्ञानमुपदिशन् कामक्रोधाद्यरिषड्वर्गेस्तान् परिरक्षतीत्ययं जङ्गमोऽत्र सिद्धान्तेऽष्टावरणेषु तृतीयावरणत्वेन परिगणितः। इतः परं चतुर्थावरणत्वेन प्रतिपादितस्य पादोदकस्य स्वरूपं विचार्यते।

---

१. सि. शि. १५।६४

४. पादोदकम्

अष्टावरणेषु क्रमप्राप्तं चतुर्थमावरणं पादोदकम्। तदत्र किमिदं पादोदकं नाम? कीदृशस्तन्निर्माणविधिः? तत्सेवनपद्धतिश्च का? इत्यादिकं सर्वं यथाशास्त्रं विमृश्यते।

पादोदकशब्दार्थः

'पादस्य उदकं पादोदकम्' इति विग्रहेण पादप्रक्षालितं जलमिति, चरणामृतमिति वा सामान्यतोऽर्थो जायते। अस्य तात्त्विकार्थस्तु—

परमानन्द एवोक्तः पादशब्देन निर्मलः।
ज्ञानं चोदकशब्देन पादोदकमिति स्मृतम्॥[1]

इति पूज्यपादैः श्रीजगद्गुरुरेणुकाचार्यैरुपदिष्टः। तदुपदेशानुसारं स्वात्मस्वरूपस्य परमात्मनो वा यो निर्मल आनन्दः स पादः, तस्य यज्ज्ञानं तदुदकम्। तदेवं स्वात्मनः परमात्मनो वाऽऽनन्दस्वरूपज्ञानमेव पादोदकम्। निरुपाधिकं सुखमेवानन्दः। स च स्वात्मस्वरूपः। अस्य प्राप्तिरात्मज्ञानमन्तरा न सम्भवति। अत एव—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[2] इत्युपनिषत्सन्देशः।

एवं श्रुत्यादेशानुसारं सद्गुरुमुखेन स्वात्मस्वरूपस्य परमात्मस्वरूपस्य वा श्रवण-मनन-निदिध्यासनेन निरुपाधिकस्यानन्दस्य ज्ञानं संजायते। एतादृशानन्दज्ञानमेवात्र पादोदकशब्दस्य तात्त्विकार्थः। तदेवं सद्गुरुकृपोद्भूतस्य निर्मलस्य परशिवस्वरूपानन्दज्ञानामृतस्यास्वादनमेव तात्त्विकं पादोदकसेवनमित्यधिगन्तव्यम्।

त्रिविधं तात्त्विकपादोदकम्

तदिदं पादोदकं "दीक्षा शिक्षा ज्ञानमिति त्रिसंज्ञं तद्भवत्यहो"[3] इत्यागमोक्त्यनुसारं दीक्षापादोदकम्, शिक्षापादोदकम्, ज्ञानपादोदकं चेति त्रिविधं भवति।

---

१. सि शि. १९।७
२. बृ. उ. २।४।५
३. च. ज्ञा., क्रि. ५।५

अथवा पादशब्देन गुरुरेव निगद्यते ।
शिष्यश्चोदकशब्देन तयोरैक्यं तु दीक्षया ॥[1]

इत्याचार्योक्त्या पादोदकशब्दवाच्ययोर्गुरुशिष्ययोर्दीक्षाविशेषेण प्राप्तमैक्यज्ञानमेव दीक्षापादोदकम् । 'गुणान् रुन्धे इति गुरुः' इति व्युत्पत्त्या यो हि शिष्यस्य प्राकृतान् राजसादिगुणान् व्यपोह्य शिवत्वं प्रबोधयति, स गुरुरिति गुरुशब्दार्थः पूर्वमुक्त एव । तद्रीत्या दीक्षादिसंस्कारेण तत्त्वज्ञानोपदेशेन चाज्ञानादीनां मलानां निवृत्तौ शिष्योऽपि गुरुतुल्यो भवति, अर्थाद् यत्परशिवस्वरूपानन्दं गुरुरनुभवति, तदानन्दमधुना शिष्योऽप्यनुभवति । तत्त्वज्ञानसाम्यादानन्दसाम्यमेव । तस्मात् शिवदीक्षापगतद्वैतज्ञानयोर्गुरुशिष्ययोर्निजानन्दैक्यमेव दीक्षापादोदकमित्यर्थः । तदुक्तम्—

दीक्षयाऽपगतद्वैतं यज्ज्ञानं गुरुशिष्ययोः ।
आनन्दस्यैक्यमेतेन दीक्षापादोदकं स्मृतम् ॥[2] इति ।

तदेवं गुरोः करुणाकटाक्षेण, तदीयज्ञानोपदेशेन चापगतद्वैतबुद्धिः शिष्यो गुरुतुल्यं यत्परशिवब्रह्मस्वरूपानन्दमनुभवति, तदास्वादनमेव दीक्षापादोदकग्रहणमित्यवधेयम् ।

अत्राऽयं निष्कर्षः—आगमशास्त्रसंमतपरिभाषानुसारं पादो नाम गुरुः, उदकं नाम शिष्यः । तयोरभेद एव पादोदकम् । गुरुशिष्ययोरभेदो न शरीरेण, न मनसा, नापि बुद्ध्याद्युपाधिना; किन्त्वनुभूयमानपरशिवानन्दरूपेण । उभयोरनुभूयमानयोरानन्दयोरैक्यादुभयोरैक्यमित्युपचारः, "नाद्वैतं गुरुणा सह" इति व्यावहारिकभेदाऽभ्युपगमात् । एतादृशं गुरुशिष्ययोरनुभूयमानमानन्दैक्यं गुरुकृतवेधदीक्षासंस्कारेण प्राप्यमितीदं दीक्षापादोदकमिति कथ्यते । विषयोऽयम्—

अस्मात् प्रविततताद् बन्धात् परसंस्थानिरोधकात् ।
दीक्षैनं मोचयेत् पूर्वं शैवं धाम नयत्यपि ॥

इत्यनेन स्वायम्भुवागमवचनेन चाऽनुमोदित इति सिद्धान्तशिखामणेस्तत्त्वप्रदीपिकाकारेण पदवाक्यप्रमाणपारावारीणेन श्रीमता मरितोण्टदार्येण[3] निरूपितम् ।

---

१. सि. शि. १९।८
२. सि शि. १९।६
३. सि. शि. १९।६, अवतरणिका, पृ. १५६, सोलापुरप्रकाशनम्, ई. १९०५

एवं गुरुकृपोद्भूतं देशकालाद्यवच्छेदविहीनं नित्यनिर्मलं परशिवब्रह्मानन्दामृतरूपं दीक्षापादोदकमास्वादयन् शिवयोगी निराकाङ्क्षो भवरोगमुक्तः स्वस्वरूपे रममाणस्तिष्ठति ।

एवं दीक्षासंस्कारवेलायां गुरुकृतोपदेशश्रवणेन आनन्दैक्यमनुभवन् योगी तदानन्दानुभवदार्ढ्याय यदा गुरूपदिष्टशिक्षया, अर्थाद् अनुगुणयुक्तिभिरनवरतमनुचिन्तनरूपेण मननेन प्रयतते, तदा स शिक्षापादोदकीति तथा तस्य तादृशो दृढानुभवश्च शिक्षापादोदकमित्युच्यते । तदुक्तम्—

गुरुशिष्यमयं ज्ञानं शिक्षामननमीर्यते ।
तयोः समरसत्वं हि शिक्षापादोदकं स्मृतम् ॥[1] इति ।

अस्यायं भावः—गुरुमुखेन श्रुतस्यैव शास्त्रस्य तत्प्रतिपादिताभिरेव उक्तिप्रत्युक्तिभिश्चिन्तनेन पूर्वं श्रवणेन प्राप्त आनन्दो दृढो भवतीति मननमुपदिष्टम् । तादृशो गुरुकृतमननोपदेशोऽत्र 'शिक्षा' इत्युच्यते । यथा सुरगुरोः समुद्रमन्थनविचारेण सुराणां सुधा प्राप्ता, तथा शिक्षागुरुणोपदिष्टेन युक्तिरूपमन्थनदण्डसामर्थ्येन निगमागमात्मकवीरशैवशास्त्रसमुद्रस्य मन्थनेन शिवाद्वैतज्ञानामृतस्य पूर्वं प्राप्तस्य दार्ढ्यं संजायते ।

एवं मननेन दृढज्ञानानन्दवान् शिवयोगी हृदयाकाशे ज्ञानचन्द्रसमुद्भूतां परमानन्दमयीं ज्योत्स्नां स्वस्वरूपत्वेन परामृशति । एवं रीत्या गुरुकृतशिक्षोपदेशसामर्थ्येन स्वरूपानन्दमनुभवतो योगिनोऽन्यद् द्रष्टव्यं श्रोतव्यं वा नावशिष्यते । अत एव तं विषयमृगतृष्णाऽपि न बाधते । तदुक्तम्—

दृष्टे तस्मिन् परानन्दे देशकालादिवर्जिते ।
द्रष्टव्यं विद्यते नान्यच्छ्रोतव्यं ज्ञेयमेव वा ॥
आत्मानन्देन तृप्तस्य का स्पृहा विषये सुखे ।
गङ्गाजलेन तृप्तस्य कूपतोये कुतो रतिः ॥[2] इति ।

अत्राऽयं निष्कर्षः—पूर्वोक्तप्रकारेण परशिवब्रह्मानन्दज्ञानमेव पादोदकम् । तच्च गुरुकृतशिक्षया, अर्थाद् मननेन स्वात्मस्वरूपेण दृढं जातमिति शिक्षापादोदकमित्याख्यायते । तस्मात् शिक्षया दृढीभूतं परशिवब्रह्मानन्दज्ञानमेव शिक्षापादोदकमित्यवधेयम् ।

१. सि. शि. १९।१२
२. सि. शि. १९।१५-१६

एवं मननेन दृढीभूतं ज्ञानं यदा—"विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुसजातीयप्रत्ययप्रवाहो निदिध्यासनम्"[१] इत्याकारकेण निदिध्यासनेन निरन्तरमनुभूयते, तदेव ज्ञानपादोदकम्। अत्रेदमवधेयम्—शिक्षापादोदकस्थलेऽनुभूयमानस्य परशिवानन्दस्य तदीयज्ञानस्य च भेदो वर्तते। यदा निदिध्यासनबलेन "विज्ञानमानन्दं ब्रह्म"[२] इति श्रुतिप्रसिद्धपादोदकशब्दवाच्ययोः परशिवब्रह्मानन्दज्ञानयोः सामरस्यं भवति, तदा ज्ञानपादोदकमित्युच्यते। तदुक्तम्—

तदैक्यसम्पदानन्दो योऽसौ ज्ञानगुरुर्मतः।
तत्सामरस्यं शिष्यस्य ज्ञानपादोदकं विदुः॥[३] इति।

एवमखण्डानन्दज्ञानोदये संजाते विनष्टाज्ञानान्धकाराः शिवयोगिनः परमानन्दस्वरूपिणीं स्वस्वरूपस्थितिं प्राप्नुवन्ति। लोके निशावसाने सूर्योदये जाते सर्वोऽपि लोको विनिद्रः सन् सव्यापारो भवति, किन्तु मायारूपनिशावसाने चिदादित्ये प्रकाशिते योगिजनो निरस्तव्यापारः सुखं स्वपिति, कृतकृत्यतया समाधौ तूष्णीं तिष्ठतीत्यर्थः। अत एवोक्तं गीतायाम्—

या निशा सर्वभूतानां तस्यां जागर्ति संयमी।
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥[४] इति।

तस्माज्ज्ञानिन ईदृशी स्थितिरेव ज्ञानपादोदकप्राप्तिः। एतदवस्थावतां शिवयोगिनां विश्वविकल्पना नावभासते। अतोऽस्यानन्दानुभवस्य साम्यं न केनापि कर्तुं शक्यते। अत एव—

कुतो ब्रह्मा कुतो विष्णुः कुतो रुद्रः कुतो रविः।
साक्षात्कृतपरानन्दज्योतिषः साम्यकल्पने॥

अपरोक्षपरानन्दविलासस्य महात्मनः।
ब्रह्मविष्ण्वादयो देवा विशेषाः सुखबिन्दवः॥

यन्मात्रासहितं लोके वाञ्छन्ति विषयं नराः।
तमप्रमेयमानन्दं परमं को न वाञ्छति॥[५]

---

१. वे. सा., पृ. ७६
२. बृ. उ. ३।९।३४
३. सि. शि. १९।१९
४. भ. गी. २।६९
५. सि. शि. १९।२६-२८

इत्यादिरूपेण तन्माहात्म्यमुपवर्णितम्। तदेवं बाह्यव्यवहारविरहिते स्वस्वरूपानन्दज्ञाने विलय एव ज्ञानपादोदकमिति, तत्प्राप्तिरेव शिवयोगिनां चरमं लक्ष्यमिति च निश्चितम्।

एवमात्मज्ञानानुभवरूपाणां दीक्षा-शिक्षा-ज्ञानपादोदकाख्यानां तात्त्विकपादोदकत्रयाणां प्राप्तिरन्तःकरणशुद्धेर्विनाऽनुपपन्नेति तच्छुद्ध्यर्थं वीरशैवसिद्धान्त उपास्यरूपाणां गुरु-लिङ्ग-जङ्गमानां चरणामृतस्य सेवनविधिरुपदिष्टो वर्तते। तदेवात्र निरूप्यते।

त्रिविधं क्रियापादोदकम्

वीरशैवसिद्धान्ते आराध्यानां पूर्वोक्तानां गुरु-लिङ्ग-जङ्गमानां पादपूजाविशेषेण प्राप्यमाणं चरणामृतमेव क्रियापादोदकमित्युच्यते। तत्र गुरुपादपूजया लब्धं गुरुपादोदकम्, स्वेष्टलिङ्गपूजया लब्धं लिङ्गपादोदकम्, जङ्गमपादपूजया लब्धं च जङ्गमपादोदकमिति।

पादतीर्थं सदा पेयं भवबन्धमुमुक्षुभिः।
गुरोरपीष्टलिङ्गस्य चरस्यापि विशेषतः॥[1]

इत्यागमोक्त्यनुसारं वीरशैवैः प्रतिदिनं त्रिविधं पादोदकं सेव्यं भवति[2]। कदाचिद् एकस्य द्वयोर्वा प्राप्तावप्राप्तस्य भावेन सम्बन्धमाचरेदित्यागमादेशोऽस्ति। तदनुसारं गुरोर्जङ्गमस्य च पादोदकस्यालाभे इष्टलिङ्गोदक एव मनसा तयोरपि सम्बन्धं भावयित्वा सेवनीयम्। एवमन्यत्रापि सम्बन्धो भावनीयः[3]।

---

१. च. ज्ञा., क्रि. ५।६

२. पादोदकं यथा भक्त्या स्वीकरोति महेशितुः।
तथा शिवात्मनोर्नित्यं गुरुजङ्गमयोरपि॥
(सि. शि. ९।६७)

३. गुरोश्चरस्य चालाभे इष्टलिङ्गपदोदकम्।
लब्ध्वा गुर्वादिपादोदं भावयेन्मनसैव तत्॥
चरवर्जं गुरोर्लाभे लब्ध्वा गुरुपदोदकम्।
गुरुजङ्गमपादोदं लब्धवानिति भावयेत्॥
गुरुवर्जं चरप्राप्तौ लब्ध्वा चरपदोदकम्।
तदेव गुरुपादोदमिति मत्वा पिबेत् तदा॥
(च. ज्ञा., क्रि. ५।७-९)

क्रियापादोदकनिर्माणविधिः

वीरशैवपरम्परायां केवलं पादप्रक्षालितं जलं पादोदकमिति न कथ्यते, किन्त्वत्र एको विशिष्टः पादोदकनिर्माणविधिरस्ति। पारमेश्वरतन्त्रोक्तविध्यनुसारं गुरोर्जङ्गमस्य वा पादपूजावसरे प्रथमं पादौ प्रक्षाल्य गन्धपुष्पादिना सम्पूज्य चाङ्गुष्ठे रुद्रम्, तर्जन्यां शङ्करम्, मध्यमायां महादेवम्, अनामिकायां त्रियम्बकम्, कनिष्ठिकायामीशानम्, पादोपरि कपर्दिनम्, पादाधः सदाशिवम्, गुल्फयोरुग्रभर्गकावित्येवंरूपेण पादयोः सर्वावयवेषु शिवस्यानेका मूर्तीर्भावयित्वा, पुनस्तत्पादयोः कनिष्ठिकाद्यङ्गुष्ठपर्यन्तमङ्गुलीषु क्रमशो नकारादियकारान्तं पञ्चाक्षरमहामन्त्रं विलिख्य, पादौ साक्षात् शिवस्वरूपाविति ध्यात्वा च पादयोरधः पात्रविशेषं निधायाङ्गुष्ठयोरुपरि जलं प्रवाह्याधस्तनपात्रे तत् संगृह्यते। अनेन विधिना संगृहीतं चरणामृतमेव पादोदकमिति कथ्यते[१]।

पादोदकसेवनविधिः

पूर्वोक्तविधिना पादोदकसिद्ध्यनन्तरं तत्पादपूजायां संमिलिताः सर्वे वीरशैवदीक्षितभक्तमाहेश्वराः क्रमेणैकैकश आगत्य सद्गुरोर्जङ्गमस्य वा साष्टाङ्गप्रणिपातं कृत्वा, "स्वेष्टलिङ्गार्पणं कृत्वा स्वीकुर्वन्ति महेश्वराः"[२], "चरपादोदकेनैव लिङ्गमज्जनमुत्तमम्", "प्राणलिङ्गार्पितं कृत्वा पिबेद् भक्त इति स्थितिः"[३] इत्यादि सर्वागमसुधार्णव-क्रियासारादिग्रन्थोक्तदिशा तत्पादोदकेन स्वेष्टलिङ्गस्य त्रिवारं मज्जनं विधाय, सावधानेन च—

ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः॥[४]

इति मन्त्रं समुच्चारयन्तो लिङ्गमज्जितं तत्पादोदकं पिबन्ति, सर्वाङ्गेषु च तल्लेपनं कुर्वन्ति।

भुञ्जीत रुद्रभुक्तान्नं रुद्रपीतं जलं पिबेत्।
रुद्राघ्रातं सदा जिघ्रेदिति जाबालिकी श्रुतिः॥[५]

---

१. पा. त. ७।४७-५०

२. वी अ. प्र. भ, पृ. ९०

३. क्रि. सा. २८।१०८, भा. ३, पृ. २२६

४. वी. आ. च., पृ. ११९

५. सि. शि. ९।७०

इति श्रीरेणुकाचार्यैः पादोदकसेवनस्य श्रुतिसंमतत्वमपि प्रदर्शितम् ।

पादोदकसेवने नोच्छिष्टसूतकम्

नन्वेकस्मिन् पात्रे संगृहीतं पादोदकं पादपूजायां संमिलितैः सर्वैरपि क्रमशः सेव्यत इत्युक्तम् । तत्र प्रथमव्यक्तेः स्वीकारानन्तरं पात्रस्थं पादोदकमुच्छिष्टं जातम् । "न पर्युषितमश्नीयान्नोच्छिष्टं न कदर्थितम्"[१] इत्यादिवचनैरुच्छिष्टग्रहणस्य निषेधश्रवणात् कथं तत्सेव्यते ? इति चेन्न, "तथा लिङ्गाङ्किता भक्ताः पञ्चसूतकवर्जिताः"[२] इति पञ्चसूतकनिषेधश्रवणात्, पञ्चसु सूतकेषु उच्छिष्टस्यापि परिगणितत्वात्, अन्यत्रोच्छिष्टस्य परिपाल्यमानत्वेऽपि पादोदकग्रहणे तन्नाभ्युपगम्यते । अपि च, यथा सोमयागे हविःशेषभूतं सोमरसं चमसाख्ये पात्रे संगृह्य तस्मिन् यज्ञे संमिलिताः सर्वे ऋत्विजः क्रमशश्चमसपात्रेणैव सोमरसपानं कुर्वन्ति, अथापि तत्र नोच्छिष्टसूतकमभ्युपगम्यते, "न सोमेनोच्छिष्टम्" इति प्रमाणात्, एवमेव—"न तत्रोच्छिष्टं भजते शुद्धदेही"[३] इति पादोदकसेवनेऽप्युच्छिष्टदोषनिवर्तकप्रमाणसद्भावात् पादोदकस्य सर्वैर्मुमुक्षुभिर्वीरशैवैरेकस्मात् पात्रात् पर्यायतो ग्रहणेऽपि न दोषः[४] ।

क्रियापादोदकमाहात्म्यम्

अकालमृत्युमथनं सर्वव्याधिविनाशनम् ।
सर्वपापोपशमनं शम्भोः पादोदकं शुभम् ॥

शोषणं पापपङ्कस्य दीपन ज्ञानतेजसः ।
गुरोः पादोदकं चित्रं संसारद्रुमनाशनम् ॥

चरपादोदमहिमा वर्णितुं केन शक्यते ।
तद्धि मोचयितुं सद्यः शक्नुते यच्चराचरम् ॥[५]

इत्यागमोक्तौ शिवस्य, गुरोः, जङ्गमस्य च पादोदकस्य महिमा वर्णितो वर्तते । "यथा भावस्तथा भवति" इत्यभियुक्तोक्त्यनुसारं पादोदकसेवने यस्य

---

१. वी. आ. च, पृ. ११९
२. सि. शिखो. वी. भा., पृ. २८
३. सि. शिखो. १५ श्लो. ।
४. वी. आ. च., पृ. ११९
५. च. ज्ञा., क्रि. ५।१२, १६,१९

यादृशो भक्तिर्भवति, तस्य तादृशमेव फलं भवति। प्रतिदिनं जलसेचनेन यथा वृक्षस्य वृद्धिर्जायते, तथा प्रतिदिनं गुरु-लिङ्ग-जङ्गमानां पादोदकसेवनेन भक्ति-द्रुमस्य वृद्धिर्भवति; अचिरेणैव च कालेन तत्र मुक्तिफलं[1] समुदेति। अस्य सेवनेन सर्वविधानाममङ्गलानां पापानां च निवृत्तिर्भवति, सर्वमङ्गलपरम्परा: सर्वाश्च सिद्धयो लभ्यन्ते। अत एवोक्तम्—

सर्वमङ्गलमाङ्गल्यं सर्वपावनपावनम्।
सर्वसिद्धिकरं पुंसां शम्भोः पादाम्बुधारणम्॥[2] इति।

किञ्च, बोधायनसूत्र - शिवरहस्य - आदित्यपुराण - नन्दिकेश्वरस्तत्रादिषु बहुषु ग्रन्थेषु पादोदकस्य नियतग्राह्यत्वेन, भूतलस्थिताशेषतीर्थाश्रयत्वेन, शिव-सारूप्यप्राप्तिसाधनत्वेन, सकलरोगनिवर्तकौषधरूपत्वेन, सर्वमहापातकोपपातक-निवर्तकत्वेन च प्रतिपादितत्वाद्[3] मुमुक्षुभिः सर्वैस्तत् सेव्यं शिरसि धार्यं च।

तत्र तावत् शिवरहस्ये—पादोदकशब्दे विद्यमानानां चतुर्णामक्षराणां क्रमशः परमज्ञानप्रापकत्वम्, दोषनाशकत्वम्, जन्मदाहकत्वम्, कर्मनाशकत्वं च प्रतिपाद्य, तन्माहात्म्यं विशेषरूपेण वर्णितम्। तथाहि—

पाकारः परमं ज्ञानं दोकारो दोषनाशनः।
दकारो जन्म दहति ककारः कर्मनाशनः॥[4] इति।

---

१. पादतीर्थं सदा पेयं भवबन्धमुमुक्षुभिः।
गुरोरपीष्टलिङ्गस्य चरस्यापि विशेषतः॥ (च. ज्ञा., क्रि. ५।६)

२. सि. शि. ९।६८

३. पृथिव्यां यानि तीर्थानि या नद्यः पुण्यदाः शुभाः।
मत्पादे स्थापिता नित्यं तद्धार्यं च पदोदकम्॥
मम पादोदकं पुण्यं सदा धार्यं मदाश्रितैः।
त्र्यक्षा दशभुजा ज्ञेया मम तुल्यपराक्रमाः॥
अभिषिक्तजलं प्रातः पिबेन्नित्यं दिने दिने।
शूलकुष्ठाद्यपस्मारज्वराणां भेषजं प्रिये॥
पादोदकप्रसादान्न नित्यमासेवतां नृणाम्।
दशपातकनाशस्तु कथ्यते गणपुङ्गवाः॥
(वी. आ. च., पृ. ११०-११५)

४. वी. आ. च., पृ. ११५

महाराष्ट्रदेशीयेन श्रीमन्मथस्वामिना वीरशैवाचार्येण—

काशी मेलिया मुक्ति देत। सद्भावे सेविता श्रीगुरुतीर्थ।
तो सहज होय जीवन्मुक्त। तीर्थ माहात्म्य ऐसे हे॥
गंगातीर्थी एक अवगुण। खोली जाता जाय बुडोन।
गुरुतीर्थ न बुडवी म्हणून। तरुनी जाती कैलासी॥
द्वादशलिंगा करिता परिक्रमा। परि गुरुतीर्थाचा नये महिमा।
जेणे पाविजे स्वये परब्रह्मा। त्याची सरी कोण करी॥[1]

इत्यत्र काश्यादिक्षेत्रापेक्षया, गङ्गादितीर्थापेक्षया च गुरुपादतीर्थस्य माहात्म्यमधिकमुपर्णितम्। "काश्यां मरणान्मुक्तिः" इत्युक्त्यनुसारेण तत्र मरणे सति मुक्तिर्भवति, सा विदेहमुक्तिरेव, किन्तु गुरुपादोदकसेवनेन यत्र कुत्रापि निवसतो जीवन्मुक्तिः सहजतया जायते। गङ्गास्नानार्थं गतस्य संतरणमजानतः कस्यचिद् भक्तस्य कदाचिद् दुर्मरणं भवितुमर्हति, किन्तु गुरुपादतीर्थेन स्नानं कुर्वतो न कदापि तद् भवति। पादोदकसेवनेन यत्पुण्यं लभ्यते, तद् द्वादशज्योतिर्लिङ्गानां परिक्रमणेनापि न लब्धुं शक्यते। एतेन सर्वतीर्थक्षेत्रयात्रापेक्षया गुरुलिङ्ग-जङ्गमानां पादोदकसेवनमेव श्रेयस्तममिति निश्चितं भवति। "ये पिबन्ति पुनः स्तन्यं न पिबन्ति कदाचन"[2] इत्यस्मिन् ब्रह्माण्डपुराणवाक्ये पादोदकसेवनेनैषामपुनर्भवत्वमुद्घोषितम्।

गुरु-जङ्गमयोः पादतीर्थे एतत्सामर्थ्यस्य विद्यमानत्वे कारणं तदीयं सदाचरणमेव। शास्त्रविहितमार्गेण जीवनं यापयतां महात्मनां पादे, हस्ते, वाचि, दृशि; किं बहुना, सर्वाङ्गेऽपि तपोऽग्निर्ज्वलमानस्तिष्ठति। अतस्तदङ्गस्पर्शेन तद्दृष्टिपातेन च पतिताः पूता भवन्ति। अतस्तत्पादस्पर्शेन पूता काष्ठमयी पादुका पादवत् पूज्या, जलं च तीर्थवत् पावनं भवतीत्यत्र किमाश्चर्यम्। एवं सदाचारशीलयोर्महामहिमशालिनोर्गुरुजङ्गमयोः स्वेष्टलिङ्गस्य च पादोदकप्राशनेन न केवलं स्वयमेव, किन्तु दशपूर्वान् दशापरान् स्वकुलजानपि संसारसागरात् तारयति। तदुक्तं जाबालशाखायाम्—"भगवतः पादौ प्रक्षाल्य, शङ्खं प्रपूर्य, गन्धाक्षतपुष्पादिभिरभ्यर्च्य, चरुं निवेद्य, "इमं मे गङ्गे यमुने" इत्यभिमन्त्र्य, कद्रुद्रायेति नत्वा, संमार्जनं कृत्वा, ऋतं सत्यं

---

१. प. र २१४८-५०, पृ. १८
२. वी. आ. च., पृ. ११५

परब्रह्मेति प्राश्नुवीत। य एवं कुर्यात् स्वकुलजान् दशपूर्वान् दशापरान् आत्मानं तु तारयेत्"[1] इति। एवं सकलशास्त्रप्रतिपादितं पावनं पादोदकं सर्वैरपि श्रद्धया सेव्यम्।

पादोदकस्यावरणशब्दवाच्यत्वम्

अष्टावरणेषु चतुर्थावरणत्वेनाङ्गीकृतमिदं पादोदकं पूर्वोक्तरीत्या गुरुपादपूजया लब्धं गुरुपादोदकमिति, जङ्गमपादपूजया लब्धं जङ्गमपादोदकमिति, स्वेष्टलिङ्गपूजया च लब्धं लिङ्गपादोदकमिति त्रिविधं भवति। परमपावनानां त्रिविधपादोदकानां साक्षादाचारेण सम्बन्धाचारेण वा प्रतिदिनं सेवनेन स्थूल-सूक्ष्म-कारणाख्यानि शरीराणि परिशुद्धानि भवन्ति। एवं शरीरेन्द्रियमनोबुद्धीनां परिशुद्ध्या तदधिष्ठितो हि जीवात्मा न कदापि दुर्मार्गे प्रवृत्तो भवति। एवं पादोदकं मानसिकानिष्टचिन्तनरूपदोषाणां पूर्वकृतदुष्कर्मणां च विनाशकतया जन्ममरणरूपसंसारदाहकतया परमज्ञानप्रदानेन च शिवभक्तं सर्वदा परिरक्षतीतीदमप्यावरणशब्दवाच्यं भवत्येव। अतः सर्वैरपि शिवभक्तैरनेनावरणेन स्वात्मा सम्यग् रक्षणीयः।

५. प्रसादः

अष्टावरणेषु प्रसादः पञ्चममावरणम्। तदत्र कोऽयं प्रसादो नाम? कतिविधश्च सः? कथं स आवरणं भवति? इत्यादिकं यथाशास्त्रं सप्रमाणं प्रस्तूयते।

प्रसादशब्दार्थः

"नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते"[2] इत्युक्त्यनुसारं मनसो निर्मलत्वम्, अत एव तत्प्रसन्नत्वं च प्रसाद इत्युच्यते। "अन्नमशितं त्रेधा विधीयते। तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति, यो मध्यमस्तन्मांसम्, योऽणिष्ठस्तन्मनः"[3] इत्युपनिषद्वचनप्रमाणेनाशितस्यान्नस्य यदन्तिमः परिणामस्तन्मन इत्यवगम्यते। अतस्तत्रैव "अन्नमयं हि सोम्य मनः"[4] इत्युक्तम्। तस्मान्मनसो निर्मलत्वे निर्मलमन्नं हेतुः, तस्य दूषितत्वे च दूषितान्नमेव

१. वी. चि., पृ. ९२; वी. आ. च., पृ. ११३
२. सि. शि. ११।६
३. छा. उ. ६।५।१
४. छा. उ. ६।५।४

कारणम् । सद्गुरवे, जङ्गमाय, स्वेष्टलिङ्गाय च निवेदितमन्नं निर्मलं[१] भवति। "आयुर्वै घृतम्" इत्यत्रायुषः कारणीभूतं घृतं यथाऽऽयुःशब्देनोच्यते, तथा पूर्वोक्तं निमलमन्नं मनःप्रसादस्य कारणीभूतमिति प्रसाद इत्युच्यते। किञ्च, शिवस्य प्रसन्नता, अर्थाद् निष्ठायुक्तानां भक्तानामुपरि क्रियमाणः शिवानुग्रहोऽपि प्रसाद इति कथ्यते । अनेन शिवप्रसादेन सर्वं विश्वं शिवमयमेव प्रतिभाति[२] ।

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः ।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः ॥[३]

इत्यत्र पूज्यपादा रेणुकाचार्या भक्तिप्रसादयोर्बीजाङ्कुरवद् अन्योन्यहेतुत्वं प्रदर्शितवन्तः। अस्यायं भावः—साधको यदा भक्त्या स्वोपभोग्यानि वस्तूनि शिवाय समर्प्योपभुङ्क्ते, तदा तत्प्रसादेन मनःशुद्धिः, तया च शिवभक्तिवृद्धिरित्युत्तरोत्तरं शिवभक्तिवृद्धौ शिवप्रसाद एव कारणं भवति,[४] तन्माहात्म्याच्च शिवभक्तो विश्वं शिवमयं पश्यति ।

उपर्युक्तेन पर्यालोचनेन प्रसादो नाम शिवसमर्पितं वस्तुजातम्, मनसो नैर्मल्यम्, शिवानुग्रहश्चेति सिद्धम् । अत्र शिवनिर्माल्येन मनोनैर्मल्यम्, तेन च शिवानुग्रहाख्या प्रसादप्राप्तिरित्युत्तरोत्तरं प्रति पूर्वं पूर्वं कारणं भवति। तस्मान्मनोनैर्मल्यकारणीभूतस्य शिवसमर्पितान्नरूपस्य प्रसादस्य स्वरूपं तावद् विमृश्यते ।

अन्नशुद्धया मनःशुद्धिः

"आहारशुद्धौ सत्त्वशुद्धिः । सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतेर्लाभे सर्वग्रन्थीनां विप्रमोक्षः[५]" इत्युपनिषद्वाक्ये मनःशुद्धावाहारशुद्धिरेव कारणमित्युक्त्वा, तादृशेन शुद्धेनैव मनसा स्मृतेर्लाभः, अविद्याग्रन्थिभेदः, मोक्षश्च प्राप्यत इति सूचितम् । तदन्नशुद्धिः कथमिति चेदुच्यते—

---

१. शिवप्रसादो यद्द्रव्यं शिवाय विनिवेदितम् ।
निर्माल्यं तत्तु शैवानां मनोनैर्मल्यकारणम् ॥ (सि. शि. ११।७)

२. प्रसादे शाम्भवे सिद्धे परमानन्दकारणे ।
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः ॥ (सि. शि. ११।७२)

३. सि. शि. ९।११

४. प्रसादमूला सर्वेषां भक्तिरव्यभिचारिणी ।
शिवप्रसादहीनस्य भक्तिश्चापि न सिद्ध्यति ॥ (सि. शि. ११।६९)

५. छा. उ. ७।२६।२

तत्र तावत् शास्त्रेषु धर्ममार्गेणार्थं सम्पादनीयमित्युपदिष्टम् । अथापि लोभमोहाद्यरिषड्वर्गाक्रान्तचित्ता जना निषिद्धेनैव मार्गेणार्थसम्पादनशीला दृश्यन्ते, तादृशेन धनेन भोग्यमन्नादिवस्तुजातं च क्रीणन्ति । एवं निषिद्ध-धनलब्धान्नादीनामुपभोगेन मनोऽशुद्धं जायते, अशुद्धेन च मनसा पुनर्निषिद्धा-चरणमित्युत्तरोत्तरं मनुष्यस्य दुर्गतिरेव भवति । एतद्दुर्गतिदूरीकरणाय वीरशैवाचार्याः—

भुञ्जीत रुद्रभुक्तान्नं रुद्रपीतं जलं पिबेत् ।
रुद्राघ्रातं सदा जिघ्रेदिति जाबालिकी श्रुतिः ॥
अर्पयित्वा निजे लिङ्गे पत्रं पुष्पं फलं जलम् ।
अन्नाद्यं सर्वभोज्यं च स्वीकुर्याद् भक्तिमान्नरः ॥[1]

इति स्वीयमन्नादिभोग्यजातं स्वेष्टलिङ्गाय समर्पणीयमित्युपदिष्टवन्तः । समर्पितमन्नं लिङ्गरूपः शिवो नोपभुङ्क्ते, तस्य नित्यतृप्तत्वात्; किन्तु तद्दिव्यदृष्टिपातेन तद्गतदोषाः परिमार्जिता भवन्ति । एवं शिवार्पितस्य, अत एव परिशुद्धस्य प्रसादान्नस्योपभोगेन तत्परिणामभूतं मनश्च शुद्धं भवति । तदुक्तम्—

अन्नशुद्ध्या हि सर्वेषां तत्त्वशुद्धिरुदाहृता ।
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम् ॥[2] इति ।

तदेवमन्नगतार्जनादिजनितो दोषः शिवार्पणेन शुद्ध्यति । शिवार्पितेन परिशुद्धान्नेन मनश्च परिशुद्ध्यतीति सिद्धम् ।

किञ्च, मनुष्यस्य केवलमन्नमेव नाऽऽहारम्, किन्तु "आह्रियते यत्तद् आहारम्" इति व्युत्पत्त्या शब्दस्पर्शादिविषया अप्याहारशब्दवाच्या भवन्ति; तेषामपि श्रोत्रादीन्द्रियैराह्रियमाणत्वात् । यथा दूषितेनान्नेन मनः प्रदूषितं भवति, तथा भगवदनर्पितानां विषरूपाणां शब्दस्पर्शादिविषयाणामुपभोगेन मनो व्यामोहितं भवति । एवं व्यामोहितमनोयुक्तो हि जीवः पुनः पुनस्तद्-विषयभोगेप्सया संसारचक्रे बम्भ्रमीति । क्षणिकेषु शब्दादिविषयेष्वात्यन्तिक-सुखाभावान्न तदुपभोगेन मनस्तृप्यति । तदर्थं वर्षसहस्रं[3] भोगनिरतो ययातिः—

१. सि. शि. ९।७०-७१

२. सि. शि. ११।९

३. यत् पृथिव्यां व्रीहियवं हिरण्यं पशवस्स्त्रियः ।
एकस्यापि न पर्याप्तं तस्मात् तृष्णां परित्यजेत् ॥

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाऽभिवर्धते ॥[१]

इति स्वानुभवं प्रकाशयामास । एतदनुभवन्तोऽपि कोटिशो जनाः पुनस्तत्रैव रमन्त इति महदाश्चर्यम् । "भोगा न भुक्ता वयमेव भुक्ताः"[२] इति भर्तृहरेरनुभववचनानुसारं विषयविषपानेन बहवो मृत्युमुखमुपगताः । यावत् प्रपञ्चे स्थीयते तावत् शब्दस्पर्शादिविषयोपभोगस्त्वनिवार्य एव । तर्हि विषयगतविषनिवृत्तिः कथमिति जिज्ञासायां भगवदर्पणमुपदिश्यते । मीराबाई-प्रह्लादादयो भक्ताः साक्षाद् विषमपि भगवत्प्रसादं मत्वा पीतवन्तः, अथापि न ते मृता इत्यैतिह्यं वर्तते खलु । तस्माद् वीरशैवदर्शने शब्दादिविषयाः प्रसादरूपा भवेयुरिति तत्तद्विषयग्राहकेष्विन्द्रियेषु लिङ्गसान्निद्ध्यमुपदिष्टम् । तदनुसारं पञ्चसु ज्ञानेन्द्रियेषु क्रमशः श्रोत्रयोः प्रसादलिङ्गम्, त्वगिन्द्रिये चरलिङ्गम् (जङ्गमलिङ्गम्), नेत्रयोः शिवलिङ्गम्, जिह्वायां गुरुलिङ्गम्, नासिकायामाचारलिङ्गमिति ज्ञानेन्द्रियेषु पञ्चसु पञ्च लिङ्गानि भावनीयानि । एवमेव पञ्चसु कर्मेन्द्रियेष्वपि क्रमाद् वागिन्द्रिये प्रसादलिङ्गम्, पाणीन्द्रिये चरलिङ्गम्, पादेन्द्रिये शिवलिङ्गम्, पाय्विन्द्रिये गुरुलिङ्गम् उपस्थेन्द्रिये चाचारलिङ्गमिति पूर्वोक्तान्येव लिङ्गानि भावनीयानि । अत्र श्रोत्रेन्द्रियं शब्दग्राहकम्, वागिन्द्रियं शब्दोत्पादकमित्यादिरूपेण ज्ञानेन्द्रिय-कर्मेन्द्रिययोर्विषयस्यैक्यादुभयोरिन्द्रिययोरेकमेव लिङ्गमधिष्ठानत्वेनाङ्गीकृतम् । अथेन्द्रियाध्यक्षे मनसि महालिङ्गं भावनीयम् । एवमेकादशेन्द्रियेष्वाहत्य षड्लिङ्गानि तथा स्थूल-सूक्ष्म-कारणाख्येषु शरीरेषु पूर्वोक्तानि इष्ट-प्राण-भावाख्यानि लिङ्गानीत्यत्र साधकस्य सर्वाङ्गं लिङ्गमयमुपदिष्टम्[३] ।

पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ॥
(म. भा. आदि. ८५।१३, १५)

१. म. भा. आदि. ८५।१२; म. स्मृ. २९४

२. वै. श. श्लो. ७

३. सर्वेष्वङ्गेषु सर्वत्र सर्वदा सर्वतोमुखम् ।
लिङ्गरूपोपदेशेन सुप्रतिष्ठितमात्मनि ॥
इष्टलिङ्गं तु बाह्याङ्गे प्राणलिङ्गं तथान्तरे ।
भावलिङ्गं तथैवाऽस्मिन्नात्माङ्गे सुप्रतिष्ठितम् ॥
हृदयाङ्गे महालिङ्गं श्रोत्राङ्गे तु प्रसादकम् ।
त्वगङ्गे चरलिङ्गं तु दृगङ्गे शिवलिङ्गकम् ॥

सर्वाङ्गलिङ्गमयोऽयं साधको गुरूपदेशानुसारं श्रोत्रेन्द्रियविषयं शब्दं तदिन्द्रियाधिष्ठिताय प्रसादलिङ्गाय समर्प्य शब्दप्रसादम्, त्वगिन्द्रियविषयं स्पर्शं तदिन्द्रियाधिष्ठिताय चरलिङ्गाय निवेद्य स्पर्शप्रसादम्, नेत्रेन्द्रियविषयं रूपं तदिन्द्रियाधिष्ठिताय शिवलिङ्गाय समर्प्य रूपप्रसादम्, रसनेन्द्रियविषयं रसं तदिन्द्रियाधिष्ठिताय गुरुलिङ्गाय निवेद्य रसप्रसादम्, नासिकाया विषयं गन्धं तदिन्द्रियाधिष्ठितायाचारलिङ्गाय समर्प्य गन्धप्रसादम्, एवमेव सर्वेन्द्रियाध्यक्षे मनस्यधिष्ठिताय महालिङ्गाय सर्वेन्द्रियविषयसुखं निवेद्य तृप्तिप्रसादं स्वीकरोतीति न ते विषया अस्य मनोविकारकारणीभूताः, प्रत्युत मनःप्रसादहेतवो भवन्ति। तथा चोक्तम्—

तस्मादर्पणसद्भावज्ञानमेव समभ्यसेत्।
अथ गन्धो रसो रूपं स्पर्शः शब्दस्ततः परम्॥
परिणामाः पदार्था हि षडेते सार्वकालिकाः।
एकैकस्य पदार्थस्य नानाभेदाः पृथक्-पृथक्॥
एवम्भूतेषु सर्वेषु पदार्थेषु निरन्तरम्।
लिङ्गार्पणधिया आत्मा प्रसादसुखमश्नुते॥[1] इति।

किञ्च "तेन त्यक्तेन भुञ्जीथाः"[2] इत्युपनिषद्वाक्यमपि भोग्यपदार्थस्य लिङ्गार्पितत्वमेवोपदिशति। अस्य मन्त्रस्यार्थः शङ्करशास्त्रिभिः—"ततः तस्मात्, तेन उक्तशिवलिङ्गेन, त्यक्तेन उपभुज्य विसृष्टेन, शुद्धसिद्धप्रसिद्धरूपप्रसादेन, भुञ्जीथाः 'भुज पालनाभ्यवहारयोः' इति धातोरभ्यवहारं कुर्वित्यर्थः। अत्र केचन तेनेति तृतीयान्तस्य तच्छब्दस्य पूर्वानुक्तत्यागपरत्वेन व्याख्यानं कुर्वन्ति, अभ्यवहारार्थकभुजधातोः पालनार्थत्वं च प्रतिपादयन्ति। तन्न सम्भवति, ईशित्रोः ईशितव्यसापेक्षत्वात्, तन्मिथ्यात्वे ईशितृत्वस्यैवानुपपन्नत्वात्, तत्त्वे ईशा वास्यमित्यादेरप्रामाणिकत्वापत्तेः, तच्छब्देन सन्निहितपूर्वोक्तस्य ईशपदार्थस्य ग्रहीतुं युक्तत्वात्। भुजधातोः पालनार्थे भुञ्जीथारित्येतद्रूपस्यासंगतत्वात्। गत्यन्तराभावे च व्याकरणविरुद्धप्रयोगस्य छान्द-

जिह्वाङ्गे गुरुलिङ्गं तु नासिकाङ्गे तथैव च।
आचारलिङ्गमश्रान्तं सुप्रतिष्ठितमेव हि॥
यथा ज्ञानेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम्।
तथा कर्मेन्द्रियाङ्गेषु क्रमाल्लिङ्गं प्रतिष्ठितम्॥ (अ. सू. ६।२, ५-८)

१. अ. सू. ७।३१, ३२, ३५

२. ई. उ. १

सत्त्वादिकल्पनं युज्यते। प्रकृते च शिवलिङ्गभुक्तशेषप्रसादाभ्यवहारार्थस्यौचित्ये पालनार्थस्यात्यन्तायुक्तत्वाच्च"[१] इत्येवं लिङ्गार्पितप्रसादग्रहणार्थत्वेन व्यवस्थापितः। तस्माद् यत्किञ्चिदपि वस्तुजातं लिङ्गार्पितमकृत्वा न स्वीकर्तव्यम्। तदुक्तम्—

आत्मभोगाय नियतं यद्यद् द्रव्यं समाहितम्।
तत्तत् समर्प्य देवाय भुञ्जीतात्मविशुद्धये॥[२]
शब्दस्पर्शरूपरसगन्धतन्मात्रपञ्चकम्।
असमर्प्य न भुञ्जीत भगवन्तमुमापतिम्॥[३] इति।

इह जगति भोग्यं धार्यं चेति वस्तु द्विप्रकारं भवति। तत्रान्न-जलौषधादिकं भोग्यम्, वस्त्राऽलङ्करणादिकं च धार्यम्। पूर्वोक्तप्रकारेण साधकः स्वीयं सर्वं भोग्यं धार्यं च वस्तुजातं तत्तदिन्द्रियगतलिङ्गार्पणमुखेन प्रसादरूपेण स्वीकृत्य प्रसादगुणयुक्तो भवति। एवं लिङ्गभोगोपभोगिनो वीरशैवसाधकाः सहजरूपेणैव मानसिकीं शुद्धिं सम्पाद्य सदा प्रसन्नचित्ता भवन्ति। तस्मात्—"निर्माल्यं तत्तु शैवानां मनोनैर्मल्यकारणम्"[४] इति श्रीरेणुकाचार्योपदेशानुसारं सर्वैरपि शिवभक्तैर्मनोनैर्मल्याय शिवनिर्माल्यं स्वीकर्तव्यम्।

शिवनिर्माल्यस्वीकारे दोषाभावः

ननु शिवनिर्माल्यं मनोनैर्मल्यकारणमिति यदुक्तं तन्नोचितम्, 'स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः'[५]

शम्भोर्निवेदितं भक्तं तत्तीर्थं शाकमेव वा।
विप्रः कदा न भुञ्जीयाद् भुक्त्वा कृच्छ्रं समाचरेत्॥[६]

इत्यादिना कालिकापुराण-प्रायश्चित्तकाण्डादिषु शिवनिर्माल्यस्याग्राह्यत्वप्रतिपादनादिति चेन्न; विकल्पासहत्वात्। तद्यथा—

१. ई. उ. १, शाङ्करीव्याख्या, पृ. ५, ९
२. सि. शि. ११।११
३. च ज्ञा., क्रि. ५।२५
४. सि. शि. ११।७
५. वी. आ. च., पृ. १२४
६. तत्रैव, पृ. १२४

शिवनिर्माल्यं कथमग्राह्यम् ? श्रुतिनिषिद्धत्वाद्वा, स्मृतिपुराणागमनिषिद्धत्वाद्वा, विधायकवचनाभावाद्वा ? नाद्यः, शिवप्रसादो न सेव्य इति श्रुतिनिषेधादर्शनात् । प्रत्युत—"रुद्रेण भुक्तमश्नन्ति रुद्रेण पीतं पिबन्ति रुद्रेणाघ्रातं जिघ्रन्ति । तस्माद् ब्राह्मणाः प्रशान्तमनसो निर्माल्यमेव भक्षयन्ति"[१], "त्वा दत्तेभो रुद्र शन्तमेभिः शतं हिमा अशीय भेषजेभिः" इत्यादिश्रुतिषु प्राशस्त्येन शिवनिर्माल्यस्वीकारस्यावश्यकत्वप्रतिपादनात् । अत्र द्वितीयायाः श्रुतेः—हे रुद्र, त्वया अशीय भुक्त्वा दत्तेभिः दत्तैः, शन्तमेभिः सुखतमैः, भेषजेभिः संसारभयभैषजैः, तत्परिहारहेतुभिरिति योजना, योऽहं पितरं त्वामुपास्य, व्यस्मद्द्वेषः विगताहङ्कारः, अत एव व्यंहो निष्पापोऽभवम् । तं मा मामनुगृहाणेत्यर्थः[२] ।

न द्वितीयः, स्मृत्या निषेधस्य निर्माल्यभेदेनाऽनधिकारिविषयत्वेन च व्यवस्थाप्यमानत्वात् । तथाहि—

देवस्वं देवताद्रव्यं नैवेद्यं च निवेदितम् ।
चण्डद्रव्यं बहिःक्षिप्तं निर्माल्यं षड्विधं भवेत् ॥[३]

इत्युक्त्या निर्माल्यं तावद् षड्विधं भवति । तत्र देवोद्देशेन दत्तं ग्राम-भूमि-दासी-दासादिकं चतुष्टयं देवस्वम्, हेम-रौप्य-रत्नादिकं देवद्रव्यम्, देवाय कल्पितं पत्र-पुष्प-जल-फल-अन्नादिकं नैवेद्यम्, शिवोपभुक्तं स्रग्गन्धान्नपानादिकं निवेदितम्, चण्डेशाय समर्पितं द्रव्यं चण्डद्रव्यम्, पिशाचादिनिमित्तं मण्डपादिभ्यो बहिः प्रदत्तं च बहिःक्षिप्तमिति विज्ञेयम्[४] ।

१. वी. आ. च., पृ. १२१
२. ई. उ. १. शाङ्करीव्याख्या ।
३. वी. चि., पृ. ११२; वी. आ च., पृ. १२४
४. देवस्वं ग्रामभूम्यादिदासीदासचतुष्टयम् ।
हेमरूप्यं च रत्नादि देवद्रव्यमिति स्मृतम् ॥
यत्संकल्प्य तु देवाय पत्रं पुष्पं फलं जलम् ।
अन्नपानादि तत्सर्वं नैवेद्यमिति कीर्तितम् ॥
शिवोपभुक्तस्रग्गन्धमन्नपानादिकं तथा ।
निवेदितमिति प्रोक्तं सर्वपापहरं परम् ॥
स्थापिते विधिना लिङ्गे सर्वैर्देवासुरैर्नरैः ।
एतत् त्रिविधनिर्माल्यं चण्डेशोऽधिकृतं शिवे ॥
बहिः क्षिप्तमनर्हं हि अन्यद्रव्यत्वकारणात् ।
पिशाचानां च सर्वेषामधिकारो हि सर्वदा ॥ (वी चि, पृ ११२-११३)

अत्रोक्तेषु षड्विधनिर्माल्येषु देवस्व-देवताद्रव्य-नैवेद्याख्यानि त्रिविधानि निर्माल्यानि देवोद्देशेन प्रदत्तानीति न तेषु कस्याप्यधिकारः, "किञ्चिद् द्रव्यापहारेण रौरवं नरकं व्रजेत्"[1] इति देवस्वाद्यपहारे दोषश्रवणात्।

किञ्च, देवैः, असुरैः, नरैर्वा भूमौ संस्थापितेषु शिवलिङ्गमन्दिरेषु चण्डेशस्यापि स्थापना क्रियते। यद्देवालये चण्डेशो वर्तते, तद्देवालयस्थशिवलिङ्गार्पिते नैवेद्ये चण्डेशस्याधिकारः। अतस्तच्चण्डद्रव्यमित्युच्यते। बहिःक्षिप्तेषु पत्र-पुष्प-अन्नादिषु पिशाचादीनामधिकारः। एवं चण्डद्रव्यबहिःक्षिप्तयोरपि निर्माल्ययोर्न कस्याप्यधिकारः।

एषु षड्विधेषु निर्माल्येषु निवेदितं तावदवशिष्टम्। सर्वदोषहरं तदेवं भक्तैर्मुमुक्षुभिश्च ग्राह्यं भवति। तस्मान्निर्माल्यनिषेधकवाक्यानां निवेदितातिरिक्तानां देवस्वादिविषयकत्वेन, निवेदिताख्ये निर्माल्ये च निषेधवाक्यस्य शिवसंस्कारवर्जिताभक्तविषयकत्वेन[2] व्यवस्थाप्यमानत्वान्न निषेधवचनविरोधापत्तिप्रसङ्गः। अन्यथा—

निर्माल्यं धारयेन्मूर्ध्नि नैवेद्यं चापि भक्षयेत्।
तत्प्रसादोदकं पीत्वा गाणपत्यमवाप्नुयात्॥
शिरसा धारयेद् भक्त्या यो निर्माल्यमलोभतः।
अहमेव धृतस्तेन सोमः सोमकलाधरः॥
निर्माल्यसलिलं प्राश्य देवदेवस्य शूलिनः।
क्षयकुष्ठज्वरश्वासैर्मुच्यते किल्बिषैरपि॥[3]

इत्यादिप्रसादस्वीकारस्यावश्यग्राह्यत्वप्रतिपादनपराणां भूयसां वचनानामप्रामाण्यप्रसङ्गात्।

न तृतीयः, निर्माल्यग्रहणविधायकानां श्रुति-स्मृति-पुराणादिवचनानां शतशः श्रूयमाणत्वात्। तस्मान्निवेदिते शिवनिर्माल्ये वर्तते शिवभक्ताधिकार इति ग्रहणे न कोऽपि दोषः।

---

१. वी. चि., पृ. ११२

२. जिह्वाचापलसंयुक्तः शिवसंस्कारवर्जितः।
शिवनिर्माल्यभोगी चेद् रौरवं नरकं व्रजेत्॥
(ई. उ. १ शाङ्करीव्याख्या, पृ. ६)

३. वी. आ. च., पृ. १३१-१३२

ननु निवेदिताख्यं निर्माल्यं ग्रहणयोग्यमित्युक्तम्। अत्र—"निवेदनशब्दस्य कोऽर्थः ? किमन्नस्य देवतापुरतः स्थापनम्, उत तद्विशिष्टमन्त्रोच्चारणम्, आहोस्वित् तद्विशिष्टहस्तचेष्टाविशेषः, अथवा तद्विशिष्टघण्टानादः, तद्विशिष्टनेत्रनिमीलनं वा, कोऽपि मानसाभिसन्धिर्वा ? नाद्यः, पुरतः स्थापनमात्रेण निवेदितत्वप्रसिद्ध्यभावात्। अन्यथा स्त्रीजनकृतदेवतापुरस्थापनमात्रेण निवेदनसिद्धेरितरव्यापारनैरर्थक्यं स्यात्। न द्वितीयः, तथा सति व्याधिवशेन मन्त्रोच्चारणासमर्थस्य निरन्तरभक्तियुक्तस्य निवेदनकर्तृत्वं न स्यात्। न तृतीयः, व्याध्युपहतहस्तस्य पुरुषस्य हस्तचेष्टाविशेषाभावान्निवेदनाकर्तृत्वापत्तेः, अथ च तात्कालिकान्नस्थमशकमक्षिकाद्युत्सारणार्थं कृतो हस्तव्यापारोऽपि निवेदनं स्यात्। न चतुर्थः, अन्यापहृतघण्टस्य, पथि गच्छतो वा घण्टानादाभावान्निवेदनकर्तृत्वं न स्यात्। न पञ्चमः, अक्षिरोगदूषितस्य मशकपातभीत्या तत्कालनिमीलिताक्षस्य वा भक्तियुक्तस्य निवेदनकर्तृत्वं न स्यात्; इति चेन्न, एतदुपलक्षितो विशिष्टो वा न मम त्वदीयमिदं त्वं भुङ्क्ष्वेति मानसाभिसन्धेरेव निवेदनशब्दार्थत्वात्। तस्मान्निवेदनं नाम देवतोद्देश्यकद्रव्यत्यागविशिष्टक्रियाविशेषोपहितदेवताकर्तृकतृप्तिसाधकभुक्तिरूपमानसाभिसन्धिविशेषः"[1] इत्येवंरूपेण श्रीमरितोण्टदार्या निवेदनशब्दस्य तत्त्वार्थं निरूप्य शिवनिवेदितं ग्राह्यमित्युपदिष्टवन्तः। अपि च, बालकृष्णभट्टविरचिते शैवोत्कर्षप्रकाशे—

मल्लिङ्गधारिणो लोके देशिका मत्परायणाः।
मदेकशरणास्तेषां योग्यं नैवान्यजन्तुषु[2] ॥

इति लिङ्गधारिणां वीरशैवानां स्वेष्टलिङ्गादिनिवेदितस्य निर्माल्यस्याधिकारित्वमुपदिष्टम्। तस्मात् शिवलिङ्गधारिणः शिवभक्ता वा शिवनिर्माल्याख्यस्य प्रसादस्याधिकारिणो[3] नान्य इति सिद्धम्। लिङ्गप्रसादवद् वीरशैवैर्गुरुजङ्गमयोरपि प्रसादः स्वीकर्तव्यो भवति।

---

१. वी. आ. च., पृ. १३०-१३१

२. ई. उ. १ शाङ्करीव्याख्या, पृ. ७

३. निर्माल्यं निर्मलं शुद्धं शिवेन स्वीकृतं यतः।
निर्मलैस्तत्परैर्धार्यं नान्यैः प्राकृतजन्तुभिः ॥

शिवभक्तिविहीनानां जन्तूनां पापकर्मणाम्।
विशुद्धे शिवनिर्माल्ये नाधिकारोऽस्ति कुत्रचित् ॥ (सि. शि. ९।७५-७६)

प्रसादत्रैविध्यम्

वीरशैवसिद्धान्ते गुरुः लिङ्गम्, जङ्गमश्चेत्याराध्यत्रयस्याङ्गीकारात् स्वेष्टलिङ्गादिभ्य इव गुरुजङ्गमाभ्यामपि स्वकीयं भोग्यं धार्यं च वस्तुजातं निर्वञ्चनं समर्प्य तद्भुक्तावशिष्टः प्रसादः प्रतिदिनं स्वीक्रियते, शिवलिङ्ग-प्रसादवद् गुरु-जङ्गमयोः प्रसादस्यापि मनःशुद्धिकरत्वात् । तदुक्तमाचार्यैः—

शिवलिङ्गप्रसादस्य स्वीकाराद्यत्फलं भवेत् ।
तथा प्रसादस्वीकाराद् गुरुजङ्गमयोरपि ॥
तस्माद् गुरुं महादेवं शिवयोगिनमेव च ।
पूजयेत् तत्प्रसादान्नं भुञ्जीत प्रतिवासरम् ॥[१] इति ।

तदेवमाराध्यत्रयभुक्तावशिष्टः प्रसादोऽपि गुरुप्रसादः, लिङ्गप्रसादः, जङ्गमप्रसादश्चेति त्रिविधो भवति ।

गुरुलिङ्गजङ्गमानां भुक्तशेषः प्रसादकः ।
शुद्ध-सिद्ध-प्रसिद्धाख्यः स हि मुक्त्येकसाधनः ॥[२]

इत्यागमोक्त्यनुसारं सद्गुरोर्भुक्तावशिष्टः शुद्धप्रसाद इति, लिङ्गनिवेदितः सिद्धप्रसाद इति, जङ्गमभुक्तावशिष्टश्च प्रसिद्धप्रसाद इत्याख्यायते ।

मनःप्रसादाकाङ्क्षिभिः सर्वैरपि साधकैरेष त्रिविधः प्रसादः प्रतिदिन-मवश्यं स्वीकर्तव्यः । कदाचिद् गुरु-जङ्गमयोः प्रसादाऽलाभे, प्राप्ते लिङ्गप्रसाद एव तयोरपि प्रसादं भावयित्वा सेवनीयः । एवमत्राराध्यत्रयसत्त्वात् प्रसाद-त्रैविध्यम् ।

किञ्च, श्रीमन्तो मायिदेवमहोदयाः—स्वेष्टलिङ्गाय निवेदितः शुद्ध-प्रसाद इति, प्राणलिङ्गायार्पितः सिद्धप्रसाद इति, भावलिङ्गाय समर्पितः प्रसिद्धप्रसाद इत्यपि निरूपितवन्तः[३] । अत्र भोग्यवस्तुनो रूपमिष्टलिङ्गाय, तद्रसास्वादनं प्राणलिङ्गाय, तत्तृप्तिश्च भावलिङ्गाय समर्पणीयमिति विज्ञेयम् ।

---

१. सि. शि. ९।७७-७८

२. च. ज्ञा., क्रि. ५।२०-२१

३. इष्टलिङ्गार्पितं शुद्धं प्राणलिङ्गमुखार्पितम् ।
सिद्धं ततः प्रसिद्धं हि भावलिङ्गार्पितं विदुः ॥ (श. सू. ७।२२)

प्रसादस्वीकारे नोच्छिष्टत्वदोषः

ननु गुरु-जङ्गमयोर्भुक्तावशिष्टप्रसादः प्रतिदिनं स्वीकर्तव्य इति यदुच्यते तन्नोचितम्, उच्छिष्टदोषदूषितत्वात्, "न पर्युषितमश्नीयान्नोच्छिष्टं न कदर्थितम्"[1] इत्यत्रोच्छिष्टसेवनस्य निषेधश्रवणाच्चेति चेन्न; तस्य सामान्य-व्यक्तिविषयकत्वात्। सामान्यव्यक्तीनामुच्छिष्टसेवनेन दोषे सम्भवेऽपि विशिष्टयोः पूज्ययोर्गुरुजङ्गमयोर्भुक्तावशिष्टप्रसादसेवने न स सम्भवति। अत एव मनुस्मृते-र्व्याख्याकारेण कुल्लूकभट्टेन—"उच्छिष्टं च भुक्तावशिष्टान्नमविशेषात् कस्यापि न भुञ्जीत। गुरूच्छिष्टं च विहितत्वाद् भोज्यम्"[2] इति गुरोर्भुक्तावशेषे नोच्छिष्टत्वदोष इति व्यवस्थापितम्।

ऋतं सत्यं परं ब्रह्मामृतमित्यपि गीयते।
प्रसादस्तस्य महिमा केन वा वर्ण्यते कथम्॥

गुरूच्छिष्टं पुरोडाशं चरस्यापि विशेषतः।
चरगुर्वोः प्रसादस्तु ध्रुवं पावित्र्यदायकः॥[3]

इत्यागमशास्त्रे प्रसादस्य माहात्म्यमुपवर्ण्य गुरु-जङ्गमयोर्भुक्तावशिष्टः प्रसादः पुरोडाशवत् पवित्रो ग्राह्यश्चेति विहितत्वात् पादोदकवत् प्रसादसेवनेऽपि नोच्छिष्टत्वदोषप्रसक्तिरिति निश्चेयम्।

प्रसादमाहात्म्यम्

मनसः प्रसन्नतासम्पादकस्य, शिवानुग्रहरूपप्रसादप्रापकस्य, शिवसायुज्य-प्रदायकस्य च प्रसादस्य माहात्म्यं शास्त्रेषु बहु वर्णितं वर्तते। तद्यथा—

प्रसादो जनकः प्रोक्तो जननी भक्तिरीरिता।
अनयोरैक्यभावेन जनिता मुक्तिकन्यका॥

शिवप्रसादेन शिवस्य सन्निधिः शिवप्रसादेन विशुद्धिरात्मनः।
शिवप्रसादेन युतस्य सुव्रता! न जन्मनाशौ भवतः सदैव तु॥

आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशनम्।
श्रीपुष्टिकीर्तिदं वन्दे जङ्गमस्य प्रसादकम्॥[4]

---

१. वी. आ. च., पृ. ११९
२. म. स्मृ. ४।२११
३. च. ज्ञा., क्रि. ५।३४-३५
४. वी. चि., पृ. ११४

इत्यत्रोक्तेन प्रसादमाहात्म्येन ज्ञायते यत् प्रसादसेवनं भक्त्या कर्तव्यमिति। अत एवात्र प्रसादः पितेति, भक्तिश्च मातेति रूपकेण प्रतिपाद्य, तयोः संगमेनैव मुक्तिरूपा कन्या जायत इत्युक्तम्। प्रतिदिनं भक्त्या गुरु-लिङ्ग-जङ्गमानां प्रसादसेवनेन मानसिकव्यथानां दैहिकव्याधीनां दारिद्र्यादिदोषाणां च हरणं हरसान्निध्यं च प्राप्यते। अत एवोक्तं स्वच्छन्दललितभैरवागमे—

पादोदकस्य पानेन सामीप्यं भजते सदा।
मत्प्रसादोपभोगेन सारूप्यं प्रतिपद्यते ॥[1] इति।

महाभारतस्यानुशासनपर्वणि भगवान् कृष्णः स्वपुत्राय प्रद्युम्नाय—

अथ मामब्रवीद् भूयः स मुनिः संशितव्रतः।
कृष्ण पायसमिच्छामि भोक्तुमित्येव सत्वरम् ॥
ततोऽहं ज्वलमानं वै पायसं प्रत्यवेदयम् ॥
तं भुक्त्वैव स तु क्षिप्रं ततो वचनमब्रवीत्।
क्षिप्रमङ्गानि लिम्पस्व पायसेनेति स स्म ह ॥
अविमृश्यैव च ततः कृतवानस्मि तत् तथा।
तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यमृक्षयम् ॥
एवं व्युष्टमहं प्राप्तो ब्राह्मणस्य प्रसादजम्।[2]

इत्येवंप्रकारेण परमशिवभक्तस्य दूर्वासोमहर्षेरुच्छिष्टप्रसादलेपनेन मम शरीरं वज्रकठिनं जातमिति प्रतिपादयन् प्रसादमाहात्म्यमुपवर्णितवान्। आमस्तकं सर्वाङ्गे तत्प्रसादलेपनेऽपि पादतले तदलेपनात् तत्तथैवावशिष्टम्। अत एवान्ते व्याधबाणेन पाद एव विद्धो हरिः स्वावतारं समापयामास। तस्मादेवंमहिमान्वितोऽयं प्रसादः सर्वैरपि भक्तियुक्तैर्ग्राह्यः।

प्रसादस्यावरणशब्दवाच्यत्वम्

अष्टावरणेषु पञ्चमावरणत्वेन प्रतिपादितोऽयं प्रसादो गुरुप्रसादः, लिङ्गप्रसादः, जङ्गमप्रसादश्चेति त्रिविधो भवति। परमपावनानां त्रिविधानामपि प्रसादानां भक्त्या सेवनेनाधिव्याधीनां निवृत्तिः, मनसः शुद्धिश्च जायते। मनसि परिशुद्धे परमात्मापि प्रसीदति। एवं मानसिकदुर्विचाराणां दूरीकरणद्वारा तत्र प्रसादगुणमुत्पाद्य साधकं परिरक्षमाणोऽयं प्रसादोऽन्ते शिवसायुज्यं च प्रापयतीति रक्षाकवचरूपावरणशब्दवाच्यो भवति। अतः सर्वैरपि भक्तिमद्भिर्गुरुलिङ्गजङ्गमानां प्रसादसेवनद्वारा स्वकीयदेहमनोबुद्धीनां परिरक्षा करणीया।

---

१. अ. वि., पृ. ७७

२. म. भा , अनु. १५९।२२, २४-२६, ५६

६. भस्म

अष्टावरणेषु क्रमप्राप्तं षष्ठमावरणं हि भस्म। तदधुना भस्मशब्दस्य कोऽर्थः ? कतिविधश्च सः ? तन्निर्माणविधिश्च कीदृक् ? का तद्धारणपद्धतिः ? कथं च तदावरणं भवतीत्यादिकं सर्वं यथाशास्त्रं तावद् विमृश्यते।

भस्मशब्दार्थः

भस्मशब्दस्य परशिवप्रकाशः, गोमयविनिर्मिता विभूतिश्चेत्यर्थद्वयं भवति। तत्र—"स एष भस्मज्योतिः"[१], "भस्मज्योतिः समाम्नातम्"[२], "भस्मेदं शाम्भवं ज्योतिः"[३] इत्यादिनिगमागमवचनप्रामाण्येन परशिवप्रकाशो भस्मशब्दस्य तात्त्विकोऽर्थः। परशिवो हि स्वयं ज्योतिःस्वरूपः। "तस्य भासा सर्वमिदं विभाति"[४], "यद्भासा भासते विश्वम्"[५] इत्यादिश्रुतिशास्त्रप्रमाणै-स्तस्यैव प्रकाशेन विश्वमिदं प्रकाशते। विश्वव्यापकस्यापि तस्य सुलभं प्राकट्यस्थानं मानवहृदयमेव। यतो हि—

चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथाऽनलः।
बीजे यथाऽङ्कुरः सिद्धस्तथात्मनि शिवः स्थितः॥[६]

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥[७]

इत्यादिस्थलेषु तस्य सर्वेषां हृदयान्तर्वर्तित्वमुपदिष्टम्[८]।

हृदये सन्निहितस्याप्यस्य परिज्ञानाभावाज्जीवात्मानः संसारचक्रे परिभ्रमन्ति खलु। एतदनर्थनिवृत्त्यर्थं तज्ज्योतिषो ज्ञानमावश्यकम्। तज्ज्ञानार्थं स्वयंज्योतिःस्वरूपस्य परशिवस्य स्वहृदये यदनुचिन्तनं तदेव निरुपाधिकभस्म-धारणमित्युच्यते[९]। एतादृशभस्मधारणेन किं फलं प्राप्यत इति जिज्ञासायाम्—

---

१. बृ. जा. उ ७।२
२. च. ज्ञा., क्रि. ६।६४
३. च. ज्ञा., क्रि. ६।६६
४. मुण्ड २।२।१०
५. सि. शि. १।४, पृ. ३
६. सि. शि. ५।३६, पृ. ६४
७. भ. गी. १८।६१
८. समस्तजगदात्माऽपि शङ्करः परमेश्वरः।
भक्तानां हृदयाम्भोजे विशेषेण विराजते॥ (सि० सि० १०।६७)
९. महाभस्मेति संचिन्त्य महादेवं प्रभामयम्।
वर्तन्ते ये महाभागा मुख्यास्ते भस्मधारिणः॥ (सि. शि. ७।२)

"भस्मधारणादेव मुक्तिर्भवति। तद्भस्मधारणादेव शिवसायुज्यमाप्नोति। न स पुनरावर्तते न स पुनरावर्तते। स एष भस्मज्योतिः"[१] इति बृहज्जाबालोपनिषदि निरुपाधिकभस्मधारणं निःश्रेयसकारणमित्युपदिष्टम्। पुनस्तत्रैव आरुणिश्वेतकेतुदूर्वासऋभुनिदाघजडभरतदत्तात्रेयरैवतकभुसुण्डप्रभृतयः परमहंसाः परशिवप्रकाशचिन्तनरूपभस्मधारणादेव मुक्ता अभूवन्नित्यपि निरूपितम्।

शिवमहापुराणे महर्षिणा व्यासेन—"एकं ज्ञेयं महाभस्म द्वितीयं स्वल्पसंज्ञकम्"[२] इति भस्मनो द्वैविध्यं प्रतिपाद्य, परशिवप्रकाशस्य महाभस्म इति, गोमयनिर्मिताया विभूतेश्च स्वल्पभस्म इति नाम व्यवस्थापितम्।

अतो महाभस्म-निरुपाधिकभस्म-चिद्भस्म-भस्मज्योतिरित्याद्यपरपर्यायः परशिवप्रकाशो भस्मशब्दस्य तात्त्विकोऽर्थः। गोमयविनिर्मिता विभूतिस्तु भस्मशब्दस्य लौकिकोऽर्थः। गोमयभस्मनो धारणेनापि शारीरिक-मानसिकदोषाणां निवृत्तिः, परशिवज्ञानयोग्यता च प्राप्यत इति तस्यापि धारणादिकं श्रुत्यादिषु समुपदिष्टम्। इदं च भस्म सोपाधिकमित्याख्यायते। तदेवं भस्मशब्दस्य परशिवप्रकाशो गोमयविभूतिश्चेत्यर्थद्वयं जातम्। तदधुना वीरशैवपूजाविधौ धार्यमाणस्य सोपाधिकस्य भस्मनः स्वरूपं तत्प्रकारादिकं च निरूप्यते।

सोपाधिकं भस्म तत्प्रकाराश्च

पञ्चब्रह्मन्यासादिसम्बन्धात् शिवमन्त्रसंस्कृताग्नौ समुत्पन्नं यद् गोमयभस्म, तदेव सोपाधिकं भस्मेति शिवागमप्रवीणैः प्रतिपाद्यते[३]। अत्रेदमवधेयम्—शिवः पञ्चमुख इत्युपनिषत्प्रसिद्धम्। सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशानाख्यान्येव तस्य पञ्च मुखानि। पञ्चमुखोऽयं शिवः सदाशिव इत्याख्यायते। वीरशैवसिद्धान्ते प्रतिपादितेषु षट्त्रिंशत्तत्त्वेषु तृतीयं तत्त्वमेव सदाशिवतत्त्वम्। सदाशिवस्य पञ्चमुखेभ्य एव सचराचरोऽयं प्रपञ्चः प्रादुर्भूतः। एतानि पञ्चमुखानि क्रमशः पूर्व-दक्षिण-पश्चिम-उत्तर-ऊर्ध्वदिशामधिष्ठातृशक्तिरूपाणि। एतान्येव पृथिव्यप्तेजोवाय्वाकाशाख्यानां पञ्चमहाभूतानामुत्पत्तिस्थानानि। एतेभ्य एव निवृत्ति-प्रतिष्ठा-विद्या-शान्ति-शान्त्यतीताख्याः पञ्च कलाः, नन्दा-भद्रा-सुरभि-सुशीला-सुमनाख्याः पञ्च दिव्यगावश्च समुद्भूताः। अद्यतन्यो

---

१. बृ. जा. उ. ७।२

२. शि. पु विद्ये, २४।२

३. शिवाग्न्यादिसमुत्पन्नं मन्त्रन्यासादियोगतः।
तदुपाधिकमित्याहुर्भस्मतन्त्रविशारदाः ॥ (सि. शि. ७।३)

गावस्तासामेव सन्तानपरम्परारूपाः। एतासामेव गवां गोमयेन क्रमशो विभूति-भसित-भस्म-क्षार-रक्षाख्यानि पञ्च सोपाधिकभस्मानि निर्मीयन्ते। एतेषां नामभेदे तदुत्पत्ति-फल-प्रयोगभेदाः कारणम्[1]। तदत्र क्रमशस्तेषामुत्पत्ति-फल-प्रयोगादिकं तावद् विमृश्यते।

१. विभूतिः

"सद्योजाताद्विभूतिश्च"[2] इत्याचार्योक्त्या सदाशिवस्य सद्योजात-मुखोद्भूतकपिलवर्णनन्दाख्याया गोर्गोमयेन निर्मितं हि भस्म विभूतिरित्युच्यते। उक्तं चोपनिषदि—"सद्योजातात् पृथिवी। तस्याः स्यान्निवृत्तिः। तस्याः कपिलवर्णा नन्दा। तद्गोमयेन विभूतिर्जाता"[3] इति। सदाशिवस्य पश्चिमदिङ्मुखमेव सद्योजातमुखम्। आर्तभक्तानां संरक्षणाय सद्यः, अर्थात् तत्क्षणमेव जातत्वात्, जायमानत्वाद्वा शिवः सद्योजात इत्याख्यायते। महानारायणोपनिषदि—

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः।
भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः॥

इति तत्स्वरूपमुपवर्ण्य तस्य स्तुतिश्च कृता। वृषभेन्द्रपण्डितशिवाचार्येण—"सद्योजातं क्षितिः प्रोक्ता वामदेवस्तथा जलम्" इतिकामिकागमोक्तरीत्या पृथिव्यात्मकमृच्छिलादिनिर्मितशिवलिङ्गं प्रपद्यामि पूजाधारणादिना प्राप्नुयामीत्यर्थः। सद्योजाताय साधनान्तरनिरपेक्षतया भक्तप्रार्थनाकालाविर्भूताय नमो नमः। अत्र वैशब्देनानन्यशरणत्वं सूच्यते। तथा—"शिव एको ध्येयः शिवङ्करः" इत्यथर्वशिरसि श्रूयते। नमो नम इति नमःपदपुनरावृत्तिः शिवस्य सर्वदेवतातिशयत्वं सूचयति। एवं शिवमन्त्रेषु सर्वत्र ज्ञेयम्। भवे भवे प्रतिजन्मनि। अतिभवे भगवद्ध्यानधारणपूजादिविहीनपाञ्चरात्रादिदुष्टजन्मनि। न भवस्व मां न जनयस्वेत्यर्थः। महापाशुपतमते जनयस्व। इति भक्तप्रार्थनामन्त्रमिदम्। भवस्य विष्ण्वादिसर्वकार्यवर्गस्य, उद्भवो जन्म यस्माद्भवति तस्मै जगज्जन्मादिलक्षणविशिष्टशिवायेत्यर्थः"[4] इति तद्भाष्यमकारि। एतेन शिवस्य सर्वोत्कृष्टत्वं भक्तानुग्राहकत्वं च सिद्धम्।

---

१. विभूतिर्भसितं भस्म क्षारं रक्षेति भस्मनः।
एतानि पञ्च नामानि हेतुभिः पञ्चभिर्भृशम्॥ (सि. शि. ७।४)

२. सि. शि. ७।८

३. बृ. जा. उ. १।१

४. म. ना. उ. १५ अनु. शैवभाष्यम्।

एतादृशसद्योजातशिवात् सर्वादौ यथा पृथिवी-निवृत्ति-कलादयः प्रादुर्भूतास्तथैव कपिलवर्णा नन्दाख्या गौरपि समुद्भूता। "नन्दयतीति नन्दा" इति व्युत्पत्त्या बहुविधोपकारेण लोकानानन्दयतीत्यस्या नाम नन्दा जातम्। अद्यतना याः कपिलवर्णा गावः सन्ति, ताः सर्वास्तस्या एव सन्तानरूपाः, अतस्तासामपि नाम 'नन्दा' इत्येव। एतादृशनन्दाख्याया गोर्गोमयेन शास्त्रोक्तविधिना विनिर्मितमेव भस्म विभूतिरिति भण्यते।

विभूतेर्भूतिहेतुत्वम्

"विभूतिर्भूतिहेतुत्वात्"[1] इत्याचार्योक्त्या नियमेन श्रद्धया च तद्धारणेन भूतेरैश्वर्यस्य प्राप्तिर्भवतीत्यस्य नाम विभूतिरिति जातम्। ऐश्वर्यं तावद् द्विविधम्—लौकिकं पारमार्थिकं चेति। तत्र धनधान्यादिकमणिमाद्यष्टसिद्ध्यादिकं च लौकिकम्, स्वस्वरूपज्ञानं तावत् पारमार्थिकमैश्वर्यम्।

गोरवयवेषु विभिन्नदेवानां निवासवद् गोमये लक्ष्मीनिवासः प्रतिपाद्यते[2]। लक्ष्मीनिवासभूतेनैव गोमयेन विभूतेर्निर्मीयमाणत्वात् तद्धारणेन लक्ष्म्या अनुग्रहो जायते, दारिद्र्यं च विनश्यति। अत एव श्रीनीलकण्ठशिवाचार्याः—

एतानि तानि शिवमन्त्रपवित्रितानि
भस्मानि कामदहनाङ्गविभूषितानि।
त्रैपुण्ड्रकानि रचितानि ललाटपट्टे
लुम्पन्ति दैवलिखितानि दुरक्षराणि॥[3]

इति शिवस्याङ्गभूषणभूताया विभूतेर्धारणेन दैवलिखितानि दारिद्र्यादिदुरक्षराणि लुम्पन्तीति निरूपितवन्तः। तस्माद् विभूतिधारणेन लौकिकैश्वर्यप्राप्तिः शास्त्रसंमता।

अनेकेषां प्राचीनमहर्षिणां चरित्रावलोकनेन विभूतिरणिमाद्यष्टैश्वर्याणामपि प्राप्तिहेतुरिति विज्ञायते। श्रीजगद्गुरुरेणुकाचार्याणां परमशिष्यो महर्षिरगस्त्यो ऋषिसमाजे विख्यातः खलु। विभूतिधारणनिष्ठस्यास्यास्याष्टसिद्धयः

---

१. सि. शि. ७।५

२. "अष्टैश्वर्यमयी लक्ष्मीर्गोमये वसते सदा" (म. भा., आश्व., पृ. ६३४८); कल्याण, गो·अंक, पृ. ६५, ३३३

३. क्रि. सा., भा. २, पृ. ८१

करतलामलकायमाना आसन्। एकदा समुद्रे प्रच्छन्नै राक्षसैः पीडितो वरुणो स्वरक्षार्थमस्यान्तिकमाजगाम। राक्षसानां दुर्व्यवहारेण क्रुद्धोऽगस्त्यः समुद्रतीरमासाद्य, अभिमन्त्रितं भस्मादाय ललाटे धृत्वा, करयोरालेप्य च पाणिं प्रसार्याम्भोधिमाजुहाव। तदाऽम्भोधिस्तस्य करे नीहारकणवत् समागतः। तस्याः पानेन राक्षसान् संहारयामास सः[1]।

महर्षेरगस्त्यस्य समुद्रपानवृत्तान्तो विश्वप्रसिद्धः। तदिदं सामर्थ्यं तस्य विभूतिधारणात् प्राप्तमासीदिति श्रीमन्तो नीलकण्ठशिवाचार्याः क्रियासारे वर्णितवन्तः। एवं विभूतिधारणव्रतनिष्ठा नैके महर्षयोऽणिमाद्यष्टैश्वर्यं प्राप्तवन्त इति विषयः पुराणादिषु समुपलभ्यते।

पाकपात्रस्य बाह्याङ्गे संस्पृष्टोऽप्यग्निरन्तस्थं तण्डुलं तथा पाचयति, तथा स्थूलशरीरे धार्यमाणापि विभूतिरन्तःकरणं परिपक्वं करोति। परिपक्वे चाऽन्तःकरणे स्वरूपज्ञानं प्राप्यते। एवं लौकिकपारमार्थिकयोरैश्वर्ययोर्हेतुभूतत्वादिदं भस्म विभूतिरिति सार्थकनाम्नाऽभिधीयते।

नित्यकर्मणि विभूतेः प्रयोगः

"धारयेन्नित्यकार्येषु विभूतिं च प्रयत्नतः"[2] इत्याचार्योक्त्या नित्यकर्माचरणवेलायां विभूतेर्धारणं कर्तव्यम्। "नियमेन भवं नित्यम्, नित्यं च तत् कर्म नित्यकर्म" इति व्युत्पत्त्या दीक्षासंस्कारानन्तरं यावदायुरवश्यं कर्तव्यमेव कर्म नित्यं कर्मेत्युच्यते। "नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्"[3] इति मीमांसाशास्त्रे नित्यकर्मणो लक्षणमुक्त्वा तदतिक्रमे प्रत्यवायश्च प्रदर्शितः।

वीरशैवानां तु लिङ्गधारणम्, तत्पूजा, पञ्चाक्षरमहामन्त्रजपः, श्रीरुद्रपारायणम्, शिवध्यानम्, शिवागमशास्त्रस्वाध्यायः, प्राणलिङ्गभावलिङ्गयोरनु-

---

१. समुद्रतीरमासाद्य भस्मादायाभिमन्त्रितम्।
धृत्वा ललाटे करयोरालेप्य सहसा ऋषिः॥
आजुहावाम्बुधिं पाणिं प्रसार्य स महानृषिः।
तदानीमागतोऽम्भोधिः करे नीहारबिन्दुवत्॥
प्राशयामास तं ध्यात्वा महादेवमृषीश्वरः।
संहरेन्द्रासुरान् पापान् राक्षसानपि दुर्जनान्॥
एवमुक्त्वा ददौ भस्म सुरेशाय घटोद्भवः। (क्रि. सा., भा. २, पृ. १३०-१३१)

२. सि. शि. ७।९

३. न्या. को., पृ. ४१७-४१८

सन्धानमित्यादयो नित्यकर्मान्तर्गता भवन्ति। तस्मादेतादृशकर्माचरणवेलायां विभूतेरवश्यं धारणं कर्तव्यम्। अन्यथा नित्यं कर्मापूर्णमेव भवति।

तदेवं सदाशिवस्य सद्योजातमुखोद्भूतकपिलवर्णाया नन्दाख्याया गोर्गोमयेन विनिर्मितम्, नित्यकर्मणि धार्यमाणम्, अणिमाद्यैश्वर्याणां हेतुभूतं भस्म विभूतिरिति व्यपदिश्यते।

२. भसितम्

"वामाद्भसितमेव च"[1] इत्युक्त्या सदाशिवस्य वामदेवमुखसंजातकृष्णवर्णाया भद्राख्याया गोर्गोमयेन सम्पादितं भस्मैव भसितमित्याख्यायते। उक्तं चोपनिषदि—"वामदेवादुदकम्। तस्मात् प्रतिष्ठा। तस्याः कृष्णवर्णा भद्रा। तद्गोमयेन भसितं जातम्[2]" इति। सदाशिवस्य उदीचीदिङ्मुखमेव वामदेवमुखम्। 'वामश्चासौ देवश्च वामदेवः' इति विग्रहेण शिवस्यातिसुन्दरत्वात् स वामदेव इत्युच्यते। महानारायणोपनिषदि—"वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः" इति वामदेवस्वरूपमुपवर्ण्य तस्य स्तुतिश्च कृता।

श्रीवृषभपण्डितशिवाचार्येण—"वामदेवाय लीलामङ्गलविग्रहाय नमः। ज्येष्ठाय नमो ब्रह्मविष्ण्वादिजनकत्वेन महाप्रलयसाक्षित्वेन वा शिवस्य ज्येष्ठत्वमुक्तम्। श्रेष्ठाय नमः, मृत्युञ्जयत्वेन शिवस्य ब्रह्मविष्ण्वादिभ्यः श्रेष्ठत्वम्। रुद्राय नमः, महाप्रलये ब्रह्मविष्ण्वादीन् रोदयति, द्रावयतीति रुद्रः। कालाय नमः, जीवकर्मानुगुण्येन तत्तत्कालेषु फलप्रदत्वात् तस्य कालात्मकत्वम्। कलाकाष्ठादिविकरणहेतुत्वात् कलविकरणत्वम्, कलविकरण इति ह्रस्वश्छान्दसः। बलविकरणाय नमः। विगतानि करणानि यस्यासौ विकरणः, बलश्चासौ विकरणश्च तथोक्तः। शरीरेन्द्रियनिरपेक्षतया सर्वकारणसामर्थ्यवानित्यर्थः, "अपाणिपादोऽहमचिन्त्यशक्तिः" इति श्रुतेः। बलाय नमः, ब्रह्मविष्ण्वादीनां दुर्जय इत्यर्थः। बलप्रमथनाय नमः, मत्स्यकूर्मवराहनृसिंहवामनावतारसंहारकर्तेत्यर्थः। सर्वभूतदमनाय नमः, महाप्रलयकर्तेत्यर्थः। मनोन्मनाय नमः, बुद्धिप्रेरकाय नमः। "स नो देवः शुभया स्मृत्या संयुनक्तु"इति श्रुतेः"[3] इति तन्मन्त्रस्य भाष्यमकारि। एतेन शिवस्य ज्येष्ठत्वं श्रेष्ठत्वं च विज्ञायते।

---

१. स. शि. ७।८

२. बृ. जा. उ. १।१

३. म. ना. उ. १६ अनु. शैवभाष्यम्, पृ. ७९-८०

एवं ज्येष्ठाद् वामदेवात् सर्गादौ यथा जलमहाभूतप्रतिष्ठाकलादयः समुद्भूताः, तथैव कृष्णवर्णा भद्राख्या गौरपि समुत्पन्ना। "श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्"[१] इत्यमरसिंहोक्त्या बहुविधानां कल्याणपरम्पराणां साधनभूतत्वादस्या नाम भद्रेति। इदानीन्तनाः कृष्णवर्णा या गावस्ताः सर्वास्तस्या एव सन्तानरूपाः, तस्मात्ता भद्रानाम्नैव व्यवहर्तव्याः। एतादृशभद्राख्याया गोर्गोमयेन शास्त्रोक्तरीत्या कल्पितं भस्मैव भसितमित्याख्यायते।

भसितस्य तत्त्वावभासकत्वम्

"भसितं तत्त्वभासनात्"[२] इत्याचार्योक्त्या तत्त्वभासकत्वादस्या भसितमिति नाम। अनारोपितं रूपं हि तत्त्वम्। वीरशैवसिद्धान्ते सचराचरात्मकमिदं जगत् तत्त्वात्मकमभ्युपगम्यते। अतोऽत्र शिवादिभूम्यन्तानि षट्त्रिंशत्तत्त्वानि।

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते ॥[३]

इत्याचार्योपदेशानुसारं तेषां सर्वेषां तत्त्वानां शिवस्वरूपेण ज्ञायमानत्वमेव तत्त्वज्ञानत्वम्।

एतादृशतत्त्वज्ञानं प्रति शास्त्रश्रवणस्य कारणत्वेऽपि ततः प्रागन्तःकरणशुद्धिरावश्यकी। सा च भस्मधारणादेव सिद्ध्यति। अत एवोक्तं मरितोण्टदार्यैः— "निःश्रेयसैकसाधनब्रह्मविद्याऽन्तरङ्गचित्तशुद्धिसम्पादकत्वेन वैदिकशिवपूजाङ्गत्वेन च भस्मधारणं कर्तव्यम्"[४] इति।

अन्तःकरणशुद्ध्यर्थं शास्त्रेषु तीर्थस्नान-शिवमन्त्रजप-योगाभ्यासादिकमुपदिष्टम्। एतद् विना केवलं श्रद्धया भस्मधारणेनाप्यन्तःकरणशुद्धिर्भवति तत्त्वज्ञानं च प्राप्यते। तदुदाहृतं मत्स्यपुराणवचनं श्रीमद्भिर्नीलकण्ठशिवाचार्यैः—

किं यज्ञैः किमनेकतीर्थकलहैः किं वेदपाठश्रमैः
किं घोरैर्विविधैस्तपोभिरमलैः किं मन्त्रतन्त्रैर्जपैः।

१. अ. को. १।४।२५
२. सि. शि. ७।५
३. सि. शि. १०।६६
४. वी. च., पृ. १३३

किं ध्यानैः किमनेकदाननिकरैः किं सांख्ययोगश्रमै-
र्मोक्षार्थी सितभस्मना च निपुणः कुर्यात् त्रिपुण्ड्रं बुधः ॥[१] इति।

मत्स्यपुराणीयेऽस्मिन् वचने यज्ञ-तीर्थस्नान-वेदाध्ययन-ध्यान-दान-सांख्यादि-शास्त्राध्ययनं विनापि भस्मत्रिपुण्ड्रधारणेनैव मोक्षप्राप्तिः प्रतिपादिता। किञ्च,

मुक्त्वा त्रिपुण्ड्रं मोक्षस्य साधनं नहि विद्यते।
यथा कृशानुरहितस्त्वध्वरो न विराजते ॥[२]

आयुष्कामो यथा राजन् भूतिकामोऽथवा नरः।
नित्यं वै धारयेद्भस्म मोक्षकामो च वै द्विजः ॥[३]

इत्यादिवायवीयसंहिता-महाभारतीयवचनेष्वग्निं विनाऽध्वरो यथा न संभवति, तथा विनैव भस्मधारणं मोक्षोऽसम्भव इति निरूप्य, आयुष्कामवद् भूतिकामवच्च मोक्षार्थिना पुरुषेणापि भस्मधारणं कर्तव्यमिति सिद्धान्तितम्। अपि च—

सत्यं शौचं जपो होमस्तीर्थं देवादिपूजनम्।
तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् ॥[४]

इति नारदीयस्मृतौ भस्मत्रिपुण्ड्रं विना क्रियमाणानां सत्यभाषण-शौचाचरण-जप-होमादीनां व्यर्थता घोषिता।

तदेतत्पर्यालोचनेन ज्ञायते यत् शरीरे धार्यमाणमिदं भस्म साधकस्याऽन्तरङ्गं संशोध्य तत्त्वज्ञानमुत्पादयति। तत्तत्त्वज्ञानबलेनैव तस्मै शिवादि-भूम्यन्तानि षट्त्रिंशत्तत्त्वानि शिवस्वरूपे भासन्ते। एवं साक्षात् परम्परया वा भस्म तत्त्वभासने हेतुर्भवतीत्यस्य नाम भसितमिति जातम्।

नैमित्तिककर्मणि भसितोपयोगः

"नैमित्तिकेषु भसितम्"[५] इत्याचार्योक्त्या नैमित्तिककर्मसम्पादनावसरे भसिताख्यभस्मन उपयोगः कर्तव्यः। "निमित्तादागतम्, निमित्ते भवं वा नैमित्तिकम्" इति व्युत्पत्त्या गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-

१. क्रि. सा., भा. २, पृ. ८७
२. क्रि. सा., भा. २, पृ. ८४
३. क्रि. सा., भा. २, पृ. ८९
४. क्रि. सा., भा. २, पृ. ९०
५. सि. शि. ७।९

अन्नप्राशन-चौलकर्म-शिवदीक्षा-विवाह-अन्त्येष्ट्याख्यानि दश कर्माणि तेन तेन निमित्तेन क्रियमाणानीति नैमित्तिककर्माणीत्युच्यन्ते। एतेषां नैमित्तिककर्मणां सम्पादनसमये भसितस्य धारणमुपदिष्टमाचार्यैः।

तदेवं सदाशिवस्य वामदेवमुखसंजातायाः कृष्णवर्णाया भद्राख्याया गोर्गोमयेन निर्मितम्, नैमित्तिककर्मणि धार्यमाणम्, तत्त्वभासने हेतुभूतं भस्म भसितमित्याख्यायते।

३. भस्म

"अघोराद्भस्म संजातम्"[१] इत्युक्त्या सदाशिवस्याघोरमुखोद्भूतरक्तवर्णसुरभिनाम्न्या गोर्गोमयेनोत्पादितं भस्मेत्युच्यते। उक्तं चोपनिषदि—"अघोराद्वह्निः। तस्माद्विद्या। तस्या रक्तवर्णा सुरभिः। तद्गोमयेन भस्म जातम्"[२] इति। सदाशिवस्य दक्षिणाशामुखमेवाघोरमुखम्। "न घोरः अघोरः" इति विग्रहेण शिवस्येदं प्रशान्तं स्वरूपम्। अत एव तैत्तिरीयसंहितायाम्—"या ते रुद्र शिवा तनूरघोराऽपापकाशिनी"[३] इति शिवस्याघोरत्वम्, अपापेषु भक्तेषु प्रकाशमानत्वं चोपदिष्टम्। तत्र तावन्महानारायणोपनिषदि—"अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः"[४] इति शिवस्याघोरत्वं पुनस्तस्य घोरत्वं घोरतरत्वं च प्रतिपाद्य स्तुतिः कृता।

वृषभपण्डितशिवाचार्येण—"भक्ताभीष्टफलप्रदानुकूलरूपत्वादघोरत्वं दुष्टनिग्रहरूपत्वेन (निग्रहत्वम्) घोरत्वम्। मृत्युकालादीनां संहारकत्वेन घोरघोरत्वम्। तादृग्भ्यः सर्वेभ्यः, चेतनाचेतनात्मकाष्टमूर्तिभ्यः। सर्वशर्वेभ्यः पशुपतित्व-चन्द्रशेखरत्वादिपञ्चविंशतिलीलाविग्रहेभ्यः। रुद्रेभ्यः शिवेभ्यः। ते तेभ्यः। वचनव्यत्ययश्छान्दसः। नमोऽस्तु नमस्करोमीति भावः"[५] इति तन्मन्त्रस्य भाष्यं कृतम्।

एतेन निग्रहानुग्रहसमर्थः शिवो घोराऽघोरोभयरूप इति सिद्धम्। तत्राऽघोररूपात् शिवात् सर्गादौ यथा वह्निविद्याकलादयः सम्भूताः, तथैव रक्तवर्णा

---

१. सि. शि. ७।८

२. बृ. जा. उ. १।१

३. तै. सं. ४।५।१।१

४. म. ना. उ. १७ अ.

५. म. ना. उ. १७ अ. शैवभाष्यम्, पृ. ८०

सुरभिनाम्नी गौरपि संजाता। स्वयं सुगन्धित्वात् सुगन्धगव्यप्रदायकत्वाच्चास्याः सुरभिरिति नाम। अद्यतना रक्तवर्णा या गावः सन्ति, ताः सर्वास्तस्याः सन्तानरूपाः। अत एतासामपि नाम सुरभिरित्येवावधार्यम्। अस्या गोमयेन शास्त्रोक्तविधिना सम्पादिता विभूतिरेव भस्म इत्युच्यते।

भस्मनः पापभर्त्सनत्वम्

"पापानां भर्त्सनाद् भस्म"[1] इत्याचार्योपदेशानुसारं मनोवाक्कायजन्यानां पापानां भर्त्सनाद् भयोत्पादनाद्वाऽस्य नाम भस्मेति। अतः "भस्म सर्वाघभक्षणात्"[2] इति श्रुतिरपि। अमरसिंहः—

अस्त्री पङ्कं पुमान् पाप्मा पापं किल्बिषकल्मषम्।
कलुषं वृजिनैनोऽघमंहो दुरितदुष्कृतम्॥[3]

इति पापस्य द्वादश पर्यायनामान्युक्तवान्। एतानि सर्वाण्यपि नामान्यर्थगर्भितानि। तद्यथा—पच्यते व्यक्तीभवति, विस्तृतो भवति वा दुःखमनेनेति पङ्कम्; आप्नोति व्याप्नोति लोकानिति पाप्मा; पिबति भक्षयति कर्तारमिति पापम्; केलयति क्रीडयति विषयेष्ववति किल्बिषम्; शुभं कर्म स्यति समाप्तं करोतीति कल्मषम्, कलयति वशीकरोतीति कलुषम्, वृजत इति वृजिनम्, यन्ति गच्छन्त्यधोऽनेनेत्येनः, अथवा एति गच्छति प्रायश्चित्तेनेत्येनः, अङ्घते गच्छति दानादिना इत्यघम्, अंहति गच्छति शुभकर्मभिरित्यंहः, दुष्टमितं गमनमनेनेति दुरितम्, दुष्टीकृतं करणमनेनेति दुष्कृतम्, इत्येवं पापस्य पर्यायनाम्नां[4] व्युत्पत्त्यवलोकनेन पाप्मा नाम दुःखजनकः, विनाशकः, शब्दस्पर्शादिविषयप्रवर्तकः, दोषप्रदायक इति; तस्य च क्षयः प्रायश्चित्तेन, नित्यानुष्ठीयमानशुभकर्मणा वा कर्तुं शक्यत इत्यपि ज्ञायते।

नानाविधानां दुष्कर्मणां दूरीकरणाय स्मृतिशास्त्रे बहुविधानि प्रायश्चित्तकर्माणि प्रतिपादितानि सन्ति। नहि सर्वैस्तानि कर्तुं सुकराणि। अतः श्रुतिस्मृतिषु सर्वविधदुरितप्रशमनाय भस्मधारणव्रतमुपदिष्टम्। भस्मस्नान-भस्मोद्धूलन-त्रिपुण्ड्रधारणात्मकमेव तद् व्रतं भवति। व्रतमिदं निष्ठया यः परिपालयति, स भस्मनिष्ठ इत्युच्यते। भस्मनिष्ठस्य सर्वाणि पापानि दह्यन्ते। तथा च श्रुतिः—

---

१. सि. शि. ७।५
२. बृ. जा. उ. १।१
३. अ. को. १।४।२३
४. अ. को. १।४।२३, रामाश्रमी, पृ. ५१-५२

भस्मनिष्ठस्य दह्यन्ते दोषा भस्माग्निसङ्गमात् ।
भस्मस्नानविशुद्धात्मा भस्मनिष्ठ इति स्मृतः ॥
भस्मसंदिग्धसर्वाङ्गो भस्मदीप्तत्रिपुण्ड्रकः ।
भस्मशायी च पुरुषो भस्मनिष्ठ इति स्मृतः ॥[1] इति,

"भस्म मननादेव किल्बिषादीनि नाशयति । भस्म मननादेव पापं भस्मसात् करोति । भस्म मननादेव संसारोत्तारणं करोति । स एष भस्मज्योतिः"[2] इति च ।

मद्यपान-गुरुपत्नीगमन-स्तेय-ब्रह्महत्यादीन्यसाध्यानि पापान्यपि भस्मधारणेन नश्यन्तीति स्मर्यते च[3] । शरीरस्य कण्ठ-बाहु-वक्षो-नाभि-पृष्ठ-पार्श्वाद्यवयवेषु भस्मधारणेन तत्तदवयवजनितानि दुरितानि दूरीभवन्तीति शिवराघवसंवादेन[4] विज्ञायते । महर्षिर्व्यासस्तु—

त्रिपुण्ड्रसहितो जीवः पूज्यः सर्वैः सुरासुरैः ।
पापान्वितोऽपि शुद्धात्मा किं पुनः श्रद्धया युतः ॥[5]

इति त्रिपुण्ड्रधारणेन पापात्मापि पूतात्मा पूज्यश्च भवतीति भस्मधारिणः शुद्धात्मनः सद्गतित्वं कैमुतिकन्यायेन सिद्ध्यतीति प्रतिपाद्य, "धिग्भस्मरहितं भालम्"[6] इति भस्मधारणविरहितस्य जीवितं धिःकारयामास । तस्माद् भस्मनः पापभर्त्सनत्वं तद्रक्षकत्वं च शास्त्रसिद्धम् ।

---

१. बृ. जा. उ. ५।१८-१९
२. क्रि. सा., भा. २, पृ. ४४
३. मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ।
भस्मच्छन्नो भस्मशय्यां शयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥
(बो. अ. प्र. भ., पृ. १६)
४. कण्ठे च धारणात् कण्ठभागादिकृतपातकम् ।
बाह्वोर्बाहुकृतं पापं वक्षसो मनसा कृतम् ॥
नाभ्यां पृष्ठकृतं पापं पृष्ठे गुदकृतं हरेत् ।
पार्श्वयोर्धारणाद् राम परस्त्र्यालिङ्गनादिजम् ॥
तद्भस्मधारणं शस्तं सर्वं तद्वत् त्रिलिङ्गकम् । (क्रि. सा., भा. २, पृ. ८५)
५. शि. पु. विद्ये., २४।२५
६. शि. पु. विद्ये., २४।४५

प्रायश्चित्तकर्मणि भस्मप्रयोगः

"प्रायश्चित्तेषु सर्वेषु भस्म नाम यथाविधि"[१] इत्याचार्योक्त्या सर्वविधानां प्रायश्चित्तकर्मणां सम्पादनावसरे भस्मन उपयोगः क्रियते। "प्रायः चित्तम्, प्रायश्चित्तम्" इति व्युत्पत्त्या प्रायो नाम तपः, चित्तं नाम निश्चयः, एवं निश्चितं तप एव प्रायश्चित्तम्। तदुक्तमङ्गिरस्स्मृतौ—

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।
तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम्॥[२] इति।

विभिन्नानां दुरितानां शमनाय विभिन्नानि तपांसि स्मृतिषु निर्दिष्टानि सन्ति। तानि सर्वाण्यपि प्रायश्चित्तकर्माणीत्युच्यन्ते।

[३]विहितस्याननुष्ठानात्, निन्द्यस्य सेवनात्, इन्द्रियाणामनिग्रहाच्च नरः पतितो भवति, हीनजन्मसु जायते च। तदुक्तं मनुना—

शरीरजैः कर्मदोषैर्याति स्थावरतां नरः।
वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम्॥[४] इति।

एवं हीनजन्मप्रदायकानां गुप्तरूपाणां प्रकटरूपाणां च पापानां प्रशमनाय तपःस्वाध्यायादिना शरीरशोषणम्, गङ्गास्नानम्, हिरण्य-गो-भूदानादिकं प्रायश्चित्तं कर्मोपदिष्टम्[५]। अत्रेदमवधेयम्—एकदा कृतप्रायश्चित्तेन पुरुषेण पुनस्तद् दुरितं कर्म नाचरणीयम्। इतः प्रभृति कदापि दुष्कृतं नाऽचरिष्यामीति पश्चात्तापबुद्ध्यैव प्रायश्चित्तं करणीयम्, अन्यथा तन्निष्फलं स्यात्[६]।

---

१. सि. शि. ७।१०

२. न्या. को., पृ. ५९२

३. विहितस्याननुष्ठानान्निन्द्यस्य च निषेवणात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥ (श. क., पृ. ३१९)

४. म. स्मृ. १२।९

५. शोषणेन शरीरस्य तपसाऽध्ययनेन च।
पापकृन्मुच्यते पापाद् दानेन च दमेन च॥
गङ्गाह्निकं देवपूजा वेदाभ्यासः सरित्प्लवः।
नाशयन्त्याशु पापानि महापातकजान्यपि॥
एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः।
अनाविष्कृतपापांस्तु मन्त्रैर्होमैस्तु शोधयेत्॥ (वाचस्पत्यम्, पृ. ४५२७)

६. कृत्वा पापं हि सन्तप्य तस्मात् पापात् प्रमुच्यते।
नैवं कुर्यां पुनरिति निवृत्त्या पूयते नरः॥ (म. स्मृ. १२।२३०)

कारणागमस्य क्रियापादे—"प्रायश्चित्तविधिं वक्ष्ये सदा लिङ्गाङ्गसङ्गिनाम्"[1] इति भगवता शिवेन वीरशैवीयप्रायश्चित्तविधिर्विशेषेण निरूपितो वर्तते। दीक्षितैर्वीरशैः स्वेष्टलिङ्गं शरीरे सदा धारणीयम्, नित्यं तत् पूजनीयं चेति नियमः। एतन्नियमपरिपालनावस्थायां कदाचिदनिवार्यरूपेण प्रमादेन वा दोषाः सम्भवन्ति। तद्दोषनिष्कृतिर्विविधैः प्रायश्चित्तैर्भवति। तदेवात्र सारेण किञ्चिदुच्यते—

लिङ्गधारिणो नापितस्पर्शे पूर्वतनं शिवसूत्रं विसृज्य, अन्यत् परिधाय चाष्टोत्तरशतवारं पञ्चाक्षरीं जपेत्। स्वेष्टलिङ्गस्य नापितस्पर्शे श्रीरुद्रेण विशेषेण प्रोक्षणं कर्तव्यम्। चाण्डालादिजनस्पर्शे शिवसूत्रमपास्य, पवमानादिभिः सम्प्रोक्ष्य, मूलमन्त्रं (पञ्चाक्षरीं) गायत्रीं चाष्टोत्तरसहस्रकं जप्त्वा नक्ताशनो भवेत्। अदीक्षितैः सवर्णैश्चासवर्णैश्च संगतौ मूलमष्टोत्तरशतं जपेत्। नित्यकर्मणः स्वेष्टलिङ्गपूजायाः कालभङ्गे, नियतानां पत्रपुष्पानां चालाभे मूलमष्टोत्तरशतम्, पूजायाश्च लोपे मूलं सहस्रकं जपेत्।

पूजावसरे कदाचित् प्रमादेन स्वेष्टलिङ्गस्याधःपतने पुनस्तद् गृहीत्वा मूलमष्टोत्तरशतं जप्यम्। स्वेष्टलिङ्गे द्वित्रिखण्डतया भग्ने सर्जरसेन संयोज्य तत्त्वकलान्यासं कुर्यात्। लिङ्गस्य चूर्णीभावेऽन्यस्मिन् लिङ्गे ताः कला आरोप्य गुरोः करात् तत्प्राप्य बिभृयात्। अथ स्वेष्टलिङ्गस्य लोपे प्राणत्यागः कर्तव्यः। प्राणत्यागे त्वशक्तश्चेद् एकविंशतिदिनावधि निराहारः सन्मूलं जपेत्, लिङ्गमन्वेषयेच्च। तल्लाभे तत्क्षणमेव धारयेद् गुरुपूजां च कुर्यात्। तल्लिङ्गाऽलाभे तु सद्भक्तियोगतोऽसून् विसृजेत्। प्राणत्यागे त्वशक्तश्चेत् गुरोः करादन्यल्लिङ्गं प्राप्याप्रमादतो बिभृयात्। अन्यल्लिङ्गधारणानन्तरमकस्मात् पूर्वलिङ्गप्राप्तौ पूर्वलिङ्गं गुरवे विनिवेद्य जले क्षिपेत्।

ननु नष्टस्वेष्टलिङ्गः सद्भक्त्या प्राणान् त्यजति चेत्, लिङ्गवर्जितस्य तस्याऽन्त्यसंस्कारः कथं स्यात्? तदर्थं यद्यन्यल्लिङ्गं धार्यं चेत्, प्राणत्यागो निरर्थकः स्यात्। एवं नष्टलिङ्गस्योभयथा दोष इति देव्या पृष्टो महादेवः प्राह—नष्टेष्टलिङ्गो भक्तः सद्यः प्राणान् विमुञ्चति चेत्, स तत्क्षणमेव मुक्तो भवति, अतस्तदसुत्यागे नाऽनर्थप्राप्तिः। अन्त्यसंस्कारवेलायां तु नष्टलिङ्गस्य कला आकृष्यान्यस्मिन् लिङ्गे नियोज्य गुरुणा तत्प्रदेयम्। एवं गुरुप्रदत्तान्य-

---

१. का. आ., क्रि. १०।२

लिङ्गसम्बन्धेन मृतात्मनः संस्कारो विधेयः । अतो वीरशैवैः स्वेष्टलिङ्गं प्राणवद्धारणीयम्[१] । तदेवमेष वीरशैवीयः प्रायश्चित्तविधिः । तदेतेषां सर्वेषां प्रायश्चित्तकर्मणामनुष्ठानसमये—"प्रायश्चित्तेषु सर्वेषां भस्म धार्यं यथाविधि" इति पूर्वोक्ताचार्यादेशानुसारं विधिवद् भस्मधारणं कर्तव्यम् ।

एवं सदाशिवस्याघोरमुखोद्भूतरक्तवर्णसुरभिनाम्न्या गोर्गोमयेनोत्पादितम्, प्रायश्चित्तकर्मणि धार्यमाणम्, पापानां भर्त्सकं भक्षकं वा भस्मेत्यभिधीयते ।

४. क्षारम्

"क्षारं तत्पुरुषात्तथा"[२] इत्याचार्योक्त्या सदाशिवस्य तत्पुरुषमुखादाविर्भूतश्वेतवर्णसुशीलाख्याया गोर्गोमयेन विनिर्मितं भस्मैव क्षारमित्युच्यते । उक्तं चोपनिषदि—"तत्पुरुषाद्वायुः । तस्माच्छान्तिः । तस्याः श्वेतवर्णा सुशीला । तस्या गोमयेन क्षारं जातम्"[३] इति । सदाशिवस्य पूर्वककुब्मुखमेव तत्पुरुषमुखम् । "स एव पुरुषः, तत्पुरुषः" इति व्युत्पत्त्या शिवस्यैव पुरुषशब्दवाच्यत्वम् । अत एव महर्षिः पतञ्जलिः—"क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः"[४] इति तस्य क्लेशाद्यभावात् स पुरुषविशेष इति प्राह ।

महानारायणोपनिषदि—"तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात्"[५] इति तत्पुरुषस्वरूपमुपवर्ण्य तस्य स्तुतिश्च कृता ।

श्रीवृषभपण्डितशिवाचार्येण—"तत्पुरुषाय विद्महे । महादेवाय सर्वदेवताधिकाय । तत्पुरुषाय, तत्संज्ञकमुखाय शिवाय । शिवमित्यर्थः । विद्महे उपास्महे । धीमहि ध्यायेम । इति बाह्याभ्यन्तरोपासनमुक्तम् । तद् उपासनम् । रुद्रः शिवः, प्रचोदयाद् निर्वर्तयत्वित्यर्थः"[६] इत्येतन्मन्त्रस्य भाष्यमकारि । एतेन शिवस्य पुरुषश्रेष्ठत्वं देवदेवत्वमन्तर्बाह्योपास्यत्वं च सिद्ध्यति ।

---

१. का. आ., क्रि. १०।१-४५

२. सि. शि. ७।८

३. बृ. जा. उ. १।१

४. यो. सू. १।२४

५. म. ना. उ. १८ अनु. ।

६. म. ना. उ. १८ अ., शैवभाष्यम्, पृ ८०

एतस्मात् तत्पुरुषशिवात् सर्गादौ यथा वायुशान्तिकलादयः प्रादुर्भूताः, तथैव श्वेतवर्णा सुशीलाख्या गौरपि समुत्पन्ना। "शोभनं शीलं यस्याः सा सुशीला" इति व्युत्पत्त्या सर्वेष्वपि प्राणिषूत्कृष्टचारित्र्यादस्या नाम सुशीलेति जातम्। इदानीन्तनाः श्वेतवर्णा यावत्यो गावः सन्ति, ताः सर्वास्तस्या एव सन्तानरूपा इत्यवधार्यम्। एतादृशसुशीलाख्याया गोर्गोमयेन शास्त्रोक्तविधिना सम्पादितं भस्मैव क्षारमित्याख्यायते।

क्षारस्यापत्क्षारणत्वम्

"क्षारणात् क्षारमापदाम्"[1] इत्याचार्योपदेशानुसारं तापत्रयोत्पन्नविपदां क्षारणात्, अर्थात् क्षयीकरणाद् अस्याः क्षारमिति नाम। "आपदर्थं धनं रक्षेत्", "धनैरापदं मानवा निस्तरन्ति" इत्यादिसुभाषितोक्त्याऽऽपदां दूरीकरणाय धनमेव साधनमिति बहवो धनार्जन एवाऽऽसक्ताः सन्ति। किन्तु व्यवहारमाध्य-मत्वाज्जीवने धनस्यावश्यकत्वेऽपि धनमात्रेण सर्वासामापदां निरासो न सम्भवतीति ध्येयम्।

किञ्च, लौकिकीनां कासाञ्चिदापदां धनेन निवृत्तिसम्भवेऽपि पारलौ-किकीनां विपदां निस्तारो न कदापि शक्यते कर्तुम्। अत एव—"परलोके धनं धर्मः" इत्युक्तम्। स्वेष्टदेवे तद्देवताप्रियवस्तुषु च श्रद्धासमर्पणं धार्मिकस्य लक्षणम्। शैवानां वीरशैवानामिष्टदेवस्तु शिवः। शिवस्यात्यन्तं प्रियं वस्तु भस्म। "भस्म ये विनिन्दन्ति निन्दन्ति शिवमेव ते" इत्युक्तौ हि भस्म-शिवयोस्तादात्म्यं प्रतिपादितम्। तस्मात् तद्धारणेन शिवानुग्रहः, तेन चापदां परिक्षयः।

काम्यकर्मसु क्षारोपयोगः

"क्षारं काम्येषु सर्वदा"[2] इत्याचार्योक्त्या सर्वविधानां काम्यकर्मणा-मनुष्ठानसमये क्षाराख्यभस्मन उपयोगः क्रियते।

यत्किञ्चित् फलमुद्दिश्य यज्ञदानजपादिकम्।
क्रियते कायिकं यच्च तत्काम्यं परिकीर्तितम्॥[3]

इति प्रमाणोक्त्या फलोद्देशेन क्रियमाणानि यज्ञ-दान-जपादिकानि कर्माणि काम्यानि। प्रायः सर्वे पशु-पुत्र-धनाद्यैहिकम्, स्वर्गाद्यामुष्मिकं च फलं

१. सि. शि. ७।५

२. सि. शि. ७।९

३. श. क., पृ. ९२

कामयन्ते। "उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः" इति सुभाषितोक्त्या कामनामात्रेण न कस्यापि सङ्कल्पसिद्धिर्भवति। तदर्थं कर्मावश्यं कर्तव्यम्। तत्तत्फलोद्देशेन काम्यकर्मणां सम्पादनावसरे क्षाराख्यभस्मधारणेन शीघ्रमेव मनोरथसिद्धिर्भवति। तस्मादाचार्यादेशानुसारं काम्यकर्मानुष्ठानावसरे शास्त्रोक्त-विधिना क्षारस्य धारणं विधेयम्।

एवं सदाशिवस्य तत्पुरुषमुखसंजातश्वेतवर्णसुशीलाख्याया गोर्गोमयेन सम्पादितम्, काम्यकर्मणि धार्यमाणम्, सर्वासामापदां क्षयकारकं भस्म क्षार-मित्युच्यते।

५. रक्षा

"रक्षा चेशानवक्त्राच्च"[१] इत्युक्त्या सदाशिवस्येशानमुखनिर्गतचित्र-वर्णसुमनाख्याया गोर्गोमयेन परिकल्पितं भस्मैव रक्षेति व्यपदिश्यते। तदुक्तमुप-निषदि—"ईशानादाकाशम्। तस्माच्छान्दयतीता। तस्याश्चित्रवर्णा सुमनाः। तद्गोमयेन रक्षा जाता"[२] इति। सदाशिवस्योर्ध्वं हरिद्वर्णं मुखमेवेशान-मुखम्। सर्वनियामकत्वात् शिवस्येशानेति नाम। तत्स्वरूपम्—"ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोऽम्"[३] इति महानारायणोपनिषदि निरूपितम्।

श्रीवृषभपण्डितशिवाचार्येण च—"ईशान इति। सर्वविद्यानां निगमा-गमस्मृतिपुराणादीनाम्, ईशानो नियामकः। एतेन सर्वविद्याकर्तृत्वं शिवस्यो-पदिष्टम्। "यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतौ वर्तमानस्य चकारस्यानुक्तसमुच्चायकत्वाद् वेदेतरसर्वशास्त्राणि चतुर्मुखाय दत्तवानित्यर्थः सूच्यते। ईश्वरः सर्वभूतानाम्, "एको विष्णुर्महद्भूतं पृथग्भूता-न्यनेकशः" इति भारतवचनेन विष्णोरपि भूतत्वव्यपदेशात्, विष्ण्वादिसर्वजीवानां प्रभुरित्यर्थः। ब्रह्माधिपतिः, ब्राह्मणानामधिपतिरित्यर्थः। "ब्रह्मा विप्रः प्रजा-पतिः" इति नानार्थरत्नमालायाम्। "त्वं देवानां ब्राह्मणानामधिपतिर्विष्णुः क्षत्रियाणामधिपतिः" इति सामश्रुतौ। "ब्राह्मणानां शिवो देवः क्षत्रियाणां तु माधवः" इति मनुस्मृतौ च तथा श्रूयते। ब्रह्मणः चतुर्मुखस्य। अधिपतिः प्रभुः। इदं नवब्रह्मणामप्युपलक्षणम्। ब्रह्म, ब्रह्मपदवाच्यः शिवः, मे मम अस्तु। स

---

१. सि. शि. ७।८

२. बृ. जा. उ. १।१

३. म. ना. उ. १९ अनु.।

कीदृशः ? ओङ्कारवाच्यः । सदाशिवो महाकैलासनिवासलीलामङ्गलविग्रहः । एतेन शिवस्य चिच्छक्त्यवच्छिन्नत्वं सदाशिवस्य वशीकृतमायात्वं च बोध्यते । शाम्यति परमानन्दरूपेण निर्विकारो भवतीति शिवः । "निस्त्रैगुण्ये शिवाय नमः" इति महिम्नस्तवे तथा श्रूयते । शेरते सज्जनमनांस्यस्मिन्निति, शेते सज्जनमनस्ययमिति वा शिवः । एतादृक्छिवः, मे मनसि सदा निवसतु । इति भक्तप्रार्थनामन्त्रमिदम्"[१] इत्येवमस्य मन्त्रस्य भाष्यमकारि । एतेन शिवस्य सर्वशास्त्रजनकत्वम्, सर्वदेवादीनां नियामकत्वम्, ॐकाररूपत्वं च सिद्धम् ।

एतादृशेशानशिवात् सर्गादौ यथाऽऽकाशशान्त्यतीतावकलादयः प्रादुर्भूताः, तथैव चित्रवर्णा सुमनाख्या गौरपि समुत्पन्ना । "शोभनं मनो यस्याः सा सुमनाः" इति व्युत्पत्त्या सर्वप्राणिष्वस्याः सत्त्वातिशयत्वं ध्वन्यते । अद्यतन्यश्चित्रवर्णा या गावः सन्ति, ताः सर्वास्तस्या एव सन्तानरूपाः । अत एवैता अपि सुमनाख्ययैव व्यवहर्तव्या भवन्ति । एतासां गोमयेन परिकल्पितं भस्मैव रक्षेत्युच्यते ।

रक्षायाः परिरक्षकत्वम्

"रक्षणात् सर्वभूतेभ्यो रक्षेति परिगीयते"[२] इत्याचार्योक्त्या सर्वभूतेभ्यः परिरक्षतीत्यस्या रक्षेति नाम जातम् । तत्र बृहज्जाबालोपनिषदि— "भूत-प्रेत-पिशाच-ब्रह्मराक्षसापस्मारादिभवभीतेभ्योऽभिरक्षणाद्रक्षेति"[3] इति तद्रक्षणप्रकारो विस्तार्य निरूपितः । एतेन रक्षाख्यं भस्म स्वधारकमाध्यात्मिक-आधिभौतिक-आधिदैविकाख्यतापत्रयेभ्यः संरक्षतीति विज्ञायते । श्रीनीलकण्ठशिवाचार्याः—

ज्वररक्षःपिशाचाश्चाप्यसुरा यातुधानकाः ।
कुमारग्रहभूताश्च कूष्माण्डा डाकिनीगणाः ॥
ब्रह्मराक्षसमुख्याश्च पूतनाकुष्ठगुलमकाः ।
भगन्दराणि सर्वाणि ह्यशीतिर्वातरोगकाः ॥
चतुःषष्टिः पित्तरोगाः श्लेष्मसंप्रतिपञ्चकाः ।
व्याघ्रसर्पभयं चैवाप्यन्ये दुष्टमृगा अपि ॥
भस्मस्नानेन नश्यन्ति सिंहेनेव मृगादयः ।[४]

---

१. म. ना. उ. १९ अ., शैवभाष्यम्, पृ. ८१-८२

२. सि. शि. ७।५

३. बृ. जा. उ. १।१

४. क्रि. सा., भा. २, पृ. ८४

इति देवीकालोत्तरवचनमुदाहृत्य, भस्मनस्त्रितापनाशकत्वमुपदिष्टवन्तः। तदत्र क्रमशस्तन्नाशकत्वं विमृश्यते।

बाह्याध्यात्मिकदुःखनिवृत्तिः

"वातपित्तादिजं दुःखं बाह्यमाध्यात्मिकं मतम्"[1] इत्युक्त्या त्रिदोषजनितैः शारीरिकै रोगैर्जायमानं दुःखमेव बाह्यमाध्यात्मिकं दुःखम्। तत्र वातप्रकोपेणैकाशीतिः, पित्तप्रकोपेण चतुःषष्टिः, कफप्रकोपेण च पञ्चदशोत्तरद्विशतरोगाः सम्भवन्तीत्यायुर्वेदाचार्याणामभिप्रायः। एतन्निवारणाय चरक-सुश्रुतादिमहर्षयो वनस्पत्यौषधमाविश्चक्रुः। भस्मतन्त्रविशारदा महर्षयो मन्त्रसंस्कारेण शास्त्रोक्तविधिना विनिर्मितमेव भस्मानुपानभेदेन सर्वरोगोपशामकमित्याहुः। पञ्चगव्ये पोषकतत्त्वानि, रोगनिवारकतत्त्वानि च सन्निहितानि। अत एव धार्मिकविधिषु शारीरिकमानसिकशुद्ध्यर्थं पञ्चगव्यप्राशनमुपदिष्टम्।

तत्र गोमयं दुर्गन्धनाशकम्, वीर्यवर्धकम्, पोषकम्, कान्तिप्रदम्, मलनिवारकं च भवति। अतः प्राचीनकालादेव गृहसंमार्जनादिषु रोगचिकित्सादिषु च तस्योपयोगः क्रियते खलु। गोमये मेन्थल्-अमोनिया-फेनॉल-इण्डॉल-फार्म्यालिनादितत्त्वानि सन्तीति वैज्ञानिकानामभिप्रायः[2]।

एतादृशेन गोमयेन संजातं भस्मैकं दिव्यमौषधमेव। ताम्बूलपत्रनिम्बपत्ररसे भस्मनोऽञ्जनं विधाय नेत्रयोर्धार्यमाणे सति सर्पदंशजनिता प्रज्ञाहीनता निवर्तते। मधुमिश्रितभस्मलेपनेन व्रणनिवृत्तिर्जायते। अन्त्यावस्थायामौष्ण्याधिक्येनानवरतश्वेदनिःसरणदशायां सर्वाङ्गे भस्मलेपनेन तदवरोधो भवति। मातुः स्तन्ये गुञ्जाप्रमाणस्य भस्मनो मिश्रणं कृत्वा दिनत्रयं दिनसप्तकं वा लेह्यमाने बालग्रहजनिता दुष्परिणामा विनिवर्तन्ते। गुञ्जाप्रमाणं भस्म त्रिकटु च मधुमिश्रितं प्रत्यहं त्रिवारं सप्त-चतुर्दश-अष्टाविंशति-चतुरशीतिदिनं यावद्वा सेवनेन श्वासकासौ निवर्तेते। शीतलारोगप्रभावेण शरीरे सञ्जातव्रणनिवृत्तौ गोमयभस्मावलेपनमेवामोघमौषधम्। दग्धगोमयोपलनिर्मितेन दन्तमञ्जनेन दन्तरक्तस्राव-दन्तवेदना-मुखदौर्गन्ध्यादिकं विनश्यति। विषयोऽयं कर्नाटकप्रदेशीयबन्निकोप्पग्रामनिवासिनाऽऽयुर्वेदविशारदेन डॉ० एस्० एफ्० हिरेमठनामधेयेन वैद्येन प्रपञ्चितः। भस्मनो बाह्याध्यात्मिकदुःखनिवृत्तिप्रकारोऽत्र

---

१. सि. शि. ५।६३

२. कल्याण, गो अंक, पृ. ३३०

मनाग् दर्शितः। इतोऽप्यधिकमस्योपयोगो विद्वद्भिर्विज्ञेयः। एवं रोगनिवारणेनारोग्यरक्षकत्वाद् भस्म 'रक्षा' इत्यभिधीयते।

अन्तरङ्गाध्यात्मिकदुःखनिवृत्तिः

"रागद्वेषादिसम्पन्नमान्तरं परिकीर्त्यते"[1] इत्याचार्योक्त्या कामक्रोधाद्यरिषड्वर्गसंजातमान्तरमाध्यात्मिकं दुःखमित्युच्यते। कामक्रोधादयो मानसिकज्वररूपाः। एतैर्मनोबुद्धोनां क्रमशो दौर्बल्यं जायते। नहि बाह्यौषधैरेषामुपशमः शक्यः। तदर्थं निर्मलं ज्ञानमेव महौषधम्। तज्ज्ञानोत्पत्तौ हेतुभूताऽन्तःकरणशुद्धिर्भस्मधारणेन भवतीति पूर्वमुक्तम्। एवमन्तःकरणशुद्धिद्वारा ज्ञानोदये कारणीभूतं भस्म कामाद्यन्तरङ्गतापान् विनाश्य सद्भक्तं संरक्षतीत्यस्य रक्षेति नाम।

आधिभौतिकदुःखनिवृत्तिः

"भूतान्यधिकृत्य जायत इत्याधिभौतिकम्" इति व्युत्पत्त्या राज-चोरव्याघ्रादिभिरुत्पन्नं दुःखमेवाधिभौतिकम्। "आधिभौतिकमेतद्धि दुःखं राजादिभूतजम्"[2] इति। प्राणिषु परस्परपीडोत्पादने लोभद्वेषादिरेव कारणम्। अनादिकालादेव प्राणिषु लोभद्वेषादेर्विद्यमानत्वात् स्वाभाविकोऽयं परस्परपीडाव्यवहारः।

भस्मधारणेनान्तःकरणशुद्ध्या साधके सात्त्विकभाव उदेति। तन्महिम्ना सोऽहिंसको भवति, तल्लोभद्वेषौ निवर्तेते च। "अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः"[3] इति महर्षेः पतञ्जलेः सूत्रानुसारेणास्य सान्निध्ये क्रूरप्राणिनोऽपि स्वाभाविकं क्रौर्यं त्यक्त्वा सात्त्विका भवन्ति। अत एव तपस्विनामाश्रमेषु परस्परवैरस्वभावाः प्राणिनो मैत्रीभावेन व्यवहरन्ति स्मेति बाणकादम्बर्यादिग्रन्थेभ्यो ज्ञायते।

भस्मधारिणां तपस्विनां सात्त्विकस्वभावप्रभावेण क्रूरा अपि सात्त्विका भवन्तीति न तेषामाधिभौतिकदुःखसम्भवः। एवमाधिभौतिकदुःखेभ्यो भस्मनिष्ठं संरक्षतीत्यस्या रक्षेति नाम।

---

१. सि. शि. ५।६३
२. सि. शि. ५।६४
३. यो. सू. २।३५

आधिदैविकदुःखनिवृत्तिः

"देवानधिकृत्य जायत इत्याधिदैविकम्" इति व्युत्पत्त्या ग्रह-यक्ष-भूत-पिशाचादिभिरुत्पन्नं दुखमेवाधिदैविकम्। तदुक्तम्—"आधिदैविकमाख्यातं ग्रहयक्षादिसम्भवम्"[१] इति। धर्मभ्रष्टा आचारहीनाश्च जना नवग्रहैः, भूत-पिशाचादिभिश्च पीड्यन्ते। रवि-सोम-मङ्गल-बुध-बृहस्पति-शुक्र-शनि-राहु-केत्वाख्या नवग्रहाः, विद्याधर-अप्सरस्-यक्ष-रक्ष-गन्धर्व-किन्नर-पिशाच-गुह्यक-सिद्ध-भूत-प्रेतादिदेवयोनिविशेषाश्च शिवस्यानुचराः[२]। अतः शिवे, शिवप्रियभूते भस्मनि चैतेषामत्यादरः। शिवप्रियभस्मधारिणो भक्ता एतैः [३]शिवस्वरूपेणाव-लोक्यन्त इति न ग्रहयक्षादिभिः शिवभक्तपीडाऽवकाशः। अतो भस्मधारिण आधिदैविकदुःखेभ्योऽपि संरक्षिता भवन्ति। तदेवं भस्मनिष्ठं भक्तं त्रितापैः परिरक्षतीति भस्म रक्षेति नाम्ना व्यवह्रियते।

मोक्षकर्मणि रक्षाया उपयोगः

"रक्षा च मोक्षकार्येषु प्रयोक्तव्या सदा बुधैः"[४] इत्याचार्योक्त्या मोक्ष-कार्येषु, अर्थाद् निष्कामकर्मसु रक्षाख्यभस्मन उपयोगः कर्तव्यः। निष्काम-कर्मान्तःकरणशुद्धिद्वारा मोक्षहेतुर्भवतीतीदं मोक्षकर्मेत्युच्यते। "बन्धाय विषया-सक्तं मुक्त्यै निर्विषयं मनः" इत्युक्त्या सांसारिकविषयानभिलाषित्वमेव मुक्ते-र्मूलम्। तच्च निष्कामकर्मयोगिभिरेव लभ्यं नान्यैः। अत एव भगवता कृष्णेन—

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥[५]

इत्यत्र निष्कामकर्मयोगस्य रहस्यमुपदिष्टम्। सांसारिकफलानभिलाषिणं भक्तं शिवः स्वस्वरूपे विलापयति, अर्थाद् ऐक्यमनुगृह्णाति। सर्वेषु कर्मसु निष्काम-कर्मैव श्रेष्ठम्, तदेव मोक्षहेतु च। अतः पूर्वोक्ताचार्योक्त्या निष्कामकर्मावसरे शास्त्रोक्तविधिना रक्षाख्यं भस्म धारणीयम्।

---

१. सि. शि. ५।६४

२. "श्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचराः" (म. स्तो. २४)।

३. "भस्मसन्दर्शनादेव शिवदर्शनमश्नुते" (च. ज्ञा., क्रि. ६।६६)।

४. सि. शि. ७।१०

५. भ. गी. २।४७

तदेवं सदाशिवस्येशानमुखनिर्गतचित्रवर्णसुमनाख्याया गोर्गोमयेन निर्मितम्, मोक्षकर्मणि धार्यमाणम्, तापत्रयेभ्यः परिरक्षकं भस्म रक्षेत्याख्यायते ।

सांसारिकजीवानां रक्षार्थं मङ्गलार्थं पावित्र्यार्थं च भगवता शिवेन सर्गादौ भस्म तावत् सृष्टम्[1]। अत एतन्माहात्म्यं[2] विज्ञाय श्रुति-स्मृति-शास्त्रोक्त-विधिना नित्य-नैमित्तिक-काम्य-प्रायश्चित्त-मोक्षाख्यकर्मकर्तव्यावसरेषु क्रमशो विभूति-भसित-क्षार-भस्म-रक्षाख्यानां पञ्चविधभस्मनां गुरूपदेशानुसारमुपयोगं कृत्वा तत्तत्कर्मणां फलं साधकैः प्राप्तव्यम्। एतेषां पञ्चविधानां भस्मनां निर्माणं तावच्चतुर्धा प्रतिपादितं शास्त्रेषु। तदधुना तन्निर्माणविधिर्विचार्यते।

भस्मनिर्माणविधिः

भस्मतन्त्रविशारदा भस्मनिर्माणविधिं कल्प-अनुकल्प-उपकल्प-अकल्पभेदेन चतुर्धा निगदितवन्तः[3]। एतेषु प्रथमः कल्पविधिरेवोत्कृष्टतमः। तदभावेऽन्ये विधय आश्रीयन्ते।

कल्पविधिः

"कल्पः शास्त्रे विधौ न्याये" इति मेदिनीवचनानुसारं कल्पशब्दस्य वेदाङ्गभूतं कल्पशास्त्रम्, न्यायः, पद्धतिश्चेत्यर्थत्रयं भवति। प्रकृते तावद् विधिरर्थो ग्राह्यः। कल्पविधानेन भस्मनिर्माणावसरे गोमयग्रहण-पिण्डीकरण-शोषण-दहन-संग्रहणादयो मन्त्रसंस्कारपुरःसरा भवन्ति।

शुक्लपक्षस्य कृष्णपक्षस्य वा चतुर्दश्यां स्वयमुपोष्य गाः स्नापयित्वा मन्त्रसंस्कृतमेव तृण-जलादिकं तस्यै देयम्। प्रातः शीघ्रमेवोत्थाय कृतमङ्गल-

---

१. रक्षार्थं मङ्गलार्थं च पवित्रार्थं मया पुरा।
भस्म सृष्टं मुने श्रौतं दत्तं देव्याः प्रियेण तु ॥ (क्रि. सा., भा. २, पृ. ८३

२. भूतप्रेतपिशाचाश्च महारोगाश्च दुस्सहाः।
भस्मदर्शनमात्रेण पलायन्ते न संशयः ॥
भूतविद्रावणे पापसंहृतौ मुक्तिसाधने।
न भस्मनोऽन्यत् सदृशमित्येतच्छिवशासनम् ॥
भस्मनो महिमाऽगण्यस्तं वक्तुं केन शक्यते। (च. ज्ञा., क्रि. ६।६७–६९)

३. भस्मोत्पादनमुद्दिष्टं चतुर्धा तन्त्रवेदिभिः।
कल्पं चैवानुकल्पं च उपकल्पमकल्पकम् ॥ (सि. शि. ७।१२)

स्नानः पयोऽर्थं गां विसृजेत् । एवं वत्सस्तनपानावसरे प्राप्तं गोमयं सद्योजातमन्त्रोच्चारपुरःसरमभूमिपातं गृह्णीयात् ।

अत्रेदमप्यवधेयम्—"विकटाङ्गामुन्मत्तां महाखलां मलिनामशिवादिचिह्नान्वितां पुनर्धेनुं कृशाङ्गीं वत्सहीनामशान्तामदुग्धदोहिनीं निरिन्द्रियां जग्धतृणां केशचेलास्थिभक्षिणीं सन्धिनीं नवप्रसूतां रोगार्तां गां विहाय प्रशस्तगोमयमाहरेत्"[1] इति श्रुतेर्गर्हितां धेनुं परित्यज्य प्रशस्तलक्षणयुताया गोर्गोमयमेव संग्रहीतव्यम् ।

अनन्तरं वामदेवमन्त्रोच्चारणपूर्वकं गोमयस्य लघुगात्राणि पिण्डानि कार्याणि । पुनस्तानि तत्पुरुषमन्त्रेण शोषयित्वा शिवमन्त्रसंस्कृताग्नावघोरमन्त्रपठनपुरःसरं भस्मीकुर्यात् । अन्ते चेशानमन्त्रं पठन् तद् भस्म संगृह्य विल्व-रजत-स्वर्णमयादिपात्रेषु स्थापनीयम् । अनेन विधिना निर्मितमिदं भस्म [2]कल्पभस्मेत्यभिधीयते । सर्वश्रेष्ठत्वादिदं प्रथममुपादेयम् ।

अनुकल्पविधिः

वनेषु प्राप्तं शुष्कं गोमयमानीय चूर्णीकुर्यात् । तच्चूर्णं पूर्वोक्तविधिनाऽघोरमन्त्रपठनपूर्वकं दहेत् । अनन्तरमीशानमन्त्रेण पूर्वोक्तपात्रेष्वन्यतमे तत्संगृह्णीयात् । अत्र गोमयग्रहण-पिण्डीकरण-शोषणाख्यविधिषु प्रयुज्यमानानां मन्त्रत्रयसंस्काराणां लोपो जात इति कल्पभस्मान्न्यूनसंस्कारवत्त्वादिदमनुकल्पभस्मेत्युच्यते[3] । अतोऽस्य स्थानं द्वितीयम् ।

उपकल्पविधिः

भस्मनिर्माणस्य तृतीयो विधिरयम् । आपणे लभ्यमानं भस्मानीय तस्य चूर्णं कृत्वा वस्त्रेणोत्तार्य वत्सस्तन्यपानावसरे प्राप्तेन गोमूत्रेण च तत्पिण्डीकृत्य पुनस्तत् शोषयेत् । अनन्तरं पूर्वोक्तविधिनाऽघोरमन्त्रेण सन्दह्येशान-

---

१. बृ. जा. उ. ३।१

२. यथा शास्त्रोक्तविधिना गृहीत्वा गोमयं नवम् ।
सद्येन वामदेवेन कुर्यात् पिण्डमनुत्तमम् ॥
शोषयेत् पुरुषेणैव दहेद् घोराच्छिवाग्निना ।
कल्पं तद् भस्म विज्ञेयम् ………… ॥ (सि. शि ७।१३-१४)

३. वनेषु गोमयं यच्च शुष्कं चूर्णीकृतं तथा ।
दग्धं चैवानुकल्पाख्यम् ………… ॥ (सि. शि. ७।१५-१६)

मन्त्रेण च संगृह्य पात्रे स्थापयेत्। एतद्विधिना निर्मितमिदं भस्म [1]उपकल्प-भस्मेत्याख्यायते। साक्षाद् गोमयपिण्डेनानिर्मितत्वादस्य तृतीयं स्थानम्। अत्रापि मन्त्रत्रयसंस्कारलोपो विज्ञेयः।

अकल्पविधिः

एष भस्मनिर्माणस्य चतुर्थो विधिः। मन्त्रसंस्काराऽनभिज्ञैरन्यैर्यथा-कथञ्चिदापादितं भस्मैवाऽकल्पभस्मेत्युच्यते[2]। मन्त्रसंस्कारस्यैवाभावादस्य चतुर्थं स्थानम्।

अत्रोक्तेषु चतुर्विधेषु भस्मसु प्राथमिकं कल्पभस्मैवोत्कृष्टम्। अतः सर्वैस्तदेव ग्राह्यम्। तदलाभेऽन्यतमत् प्रयोक्तव्यम्। अत्रेदमप्यवधेयं यच्चतु-र्विधमपि भस्म गुरोर्जङ्गमस्य वा पादोदकप्रोक्षणेन संस्कर्तव्यम्। एवं मन्त्र-संस्कारेण पादोदकप्रोक्षणेन च भस्माधिकशक्तिसम्पन्नं सद् धारकस्य सर्वविधं मनोरथं पूरयिष्यति। भस्मधारणस्यापि भस्मस्नान-भस्मोद्धूलन-त्रिपुण्ड्धारणभेदेन त्रिविधो वर्तते शास्त्रीयो विधिः। स एवाधुना क्रमशो विचार्यते।

भस्मस्नानम्

एष्वेकतममादाय पात्रेषु कलशादिषु।
त्रिसन्ध्यमाचरेत् स्नानं यथासम्भवमेव वा॥[3]

इत्याचार्यादेशानुसारं प्रत्यहं त्रिकालमेककालं वा भस्मस्नानं कर्तव्यम्। भस्म-धारणविधाविदं प्रथमम्। भस्मस्नानकाले स्वच्छोदकेन प्रथमं स्नानं कृत्वा हस्त-पादौ प्रक्षाल्य वा पवित्रासन उपविश्य पूर्वोक्तरीत्या कलशादिपात्रेषु भिन्नतया संस्थापितेषु कल्पादिभस्मस्वेकतमदादाय वामकरतले तत्स्थाप्य दक्षिणपाणिनाऽऽच्छाद्य दक्षिणोरौ निवेश्य "मौनी भस्माभिमन्त्रयेत्" इति शिवागमवचनान्मौनी भूत्वा मूलमन्त्रेण (पञ्चाक्षरेण) अष्टवारमभिमन्त्र्य सर्वाङ्गे भस्मस्नानं विधेयम्।

---

१. ....आपणादिगतं तु यत्।
वस्त्रेणोत्तारितं भस्म गोमूत्राबद्धपिण्डकम्।
दग्धं प्रागुक्तविधिना भवेद् भस्मोपकल्पकम्॥ (सि. शि. ७।१६-१७)

२. अन्यैरापादितं भस्माप्यकल्पमिति निश्चितम्। (सि. शि. ७।१७)

३. सि. शि. ७।१८

इदं स्नानं शिरसा पादपर्यन्तम्, पादतः शिरःपर्यन्तम्, हृदयतः शिरोनाभिपादपर्यन्तमिति त्रिप्रकारं भवति। एतत्स्नानावसर ईशानमन्त्रेण शिरसि, तत्पुरुषमन्त्रेण मुखे, अघोरमन्त्रेण हृत्प्रदेशे, वामदेवमन्त्रेण नाभौ, सद्योजातमन्त्रेण पादयोः, प्रणवेन सर्वाङ्गे च भस्म प्रोक्षणीयम्। इदमेव भस्मस्नानम्।

सप्तस्नानेष्वस्य वैशिष्ट्यम्

धर्मशास्त्रेषु मान्त्र-भौम-आग्नेय-वायव्य-दिव्य-वारुण-मानसभेदेन सप्तविधं [1]स्नानमुपदिष्टम्। तत्र "आपो हि ष्ठा" इत्यादिवेदमन्त्रपठनपुरःसरं मस्तके जलप्रोक्षणं मान्त्रस्नानम्। गङ्गादिपवित्रनदीनां मृत्तिकया मस्तके तिलकधारणं भौमस्नानम्। भूमिसम्बद्धत्वाद् भौमस्नानमिति पार्थिवस्नानमिति वेदमुच्यते। भस्मस्नानमेवाग्नेयस्नानम्। अग्नौ सर्ववस्तुदाहकत्ववदत्र सर्वदोषदाहकत्वस्य विद्यमानत्वादिदमाग्नेयमित्युच्यते। गोधूलिमिश्रितस्य वायोः शरीरस्पर्श एव वायव्यस्नानम्। दिवि भवं दिव्यमिति व्युत्पत्त्या प्रातः सायं वा श्रद्धया आतपयुक्तवर्षेण क्रियमाणं स्नानमेव दिव्यस्नानम्। नद्यां सरोवरे वाऽवगाह्य क्रियमाणं स्नानं वारुणस्नानमित्युच्यते। मनसि निरन्तरं क्रियमाणं भगवत्स्मरणमेव मानसस्नानम्।

इत्येवमुक्तेषु सप्तसु स्नानेषु केवलं बाह्यमलमात्रनिवारकमान्त्र-भौम-वायव्य-दिव्य-वारुणस्नानापेक्षया केवलमान्तरिकदोषनिवारकमानसस्नानापेक्षया च बाह्याभ्यन्तरदोषोपशामकमाग्नेयाख्यं भस्मस्नानमेव वरम्[2]। भस्मस्नानेनैव पुरुषः प्रकृतिबन्धनाद् विमुच्यते। तदुक्तम्—

---

१. मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च।
वारुणं मानसं चैव सप्त स्नानं प्रकीर्तितम्॥
आपो हि ष्ठेति वै मान्त्रं मृदालम्भस्तु पार्थिवम्।
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते।
वारुणं चावगाह्यं च मानसं विष्णुचिन्तनम्॥
(योगियाज्ञवल्क्यवचनम्, श. क., पृ. ४५३)

२. भस्मना विहितं स्नानमिदमाग्नेयमुत्तमम्।
स्नानेषु वारुणाद्येषु मुख्यमेतन्मलापहम्॥
भस्मस्नानवतां पुंसां यथायोगं दिने दिने।
वारुणाद्यैरलं स्नानैर्बाह्यदोषापहारिभिः॥ (सि. शि. ७।२२-२३)

आर्द्रं तु प्रकृतिं विन्द्यात् प्रकृतिं बन्धनं विदुः ।
प्रकृतेस्तु प्रहाणार्थं भस्मना स्नानमिष्यते ॥[१] इति ।

अस्यायं भावः—रक्तशुक्लयोर्जलमयत्वात्, तयोरेव जन्मसम्भवाच्च जलं तावद् बन्धनकारकं प्रकृतिरित्युच्यते। "पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान्"[२] इति भगवदुक्तौ पुरुषस्य बन्धिका प्रकृतिरिति प्रतिपादितत्वाच्च मुक्त्यर्थं प्रकृतेः प्रहाणमावश्यकम्। प्रत्यहं क्रियमाणेन भस्मस्नानेन जलपानजलस्नानोत्थयोर्दोषयोर्निवृत्तिः प्रकृतेः शुद्धिश्च सम्भवतीति तदवश्यं सर्वैः कर्तव्यम्। अनेनैव भस्मस्नानेन ब्रह्मादयो विबुधाः, नारदादयो महर्षयः, सनकादयो योगिनः, बाणाद्या दानवाश्च निर्मुक्तदोषा अभूवन्[३]।

अत्रेदमवधेयं यत् पूर्वोक्तविधानेन भस्मस्नानावसरे तत्कणानां भूमौ पतनं यथा न भवेत् तथा जागरितैर्भाव्यम्। अन्यथा महदनर्थं स्यादिति श्रीनीलकण्ठशिवाचार्याः—

यावन्तः पतिता भूमौ भस्मनः परमाणवः ।
तावद्वर्षसहस्राणि रौरवं नरकं व्रजेत् ॥[४]

इति पुरुषार्थप्रबोधकवचनमुदाहृत्यास्मान् जागरितवन्तः। तस्मादवधानेनैव भस्मस्नानं करणीयम्। एतादृशेन स्नानेन शरीरस्थाः सर्वेऽपि रोमकूपा भस्मपूर्णा भवन्ति, तेन सम्पूर्णं च शरीरं शिवमयं जायते। तदुक्तमुपनिषदि—"जनको ह वैदेहः। स होवाच याज्ञवल्क्य! भस्मस्नानेन किं जायत इति। यस्य कस्यचिच्छरीरे यावन्तो रोमकूपास्तावन्ति लिङ्गानि भूत्वा तिष्ठन्ति" इति।

भस्मस्नानेन वैज्ञानिको लाभः

गोमयनिर्मिते भस्मनि रोगाणुनाशकसामर्थ्यस्य विद्यमानत्वाच्छरीरे तल्लेपनेन विद्यमानश्चर्मरोगो विनश्यति, पुनरन्यो नैवाविर्भविष्यति च।

---

१. सि. शि. ७।२५

२. भ. गी. १३।२१

३. ब्रह्माद्या विबुधाः सर्वे मुनयो नारदादयः ।
योगिनः सनकाद्याश्च बाणाद्या दानवा अपि ॥
भस्मस्नानयुताः सर्वे शिवभक्तिपरायणाः ।
निर्मुक्तदोषकलिला नित्यशुद्धा भवन्ति हि ॥ (सि. शि. ७।२६-२७)

४. क्रि. सा., भा. २, पृ. २२

आधुनिके समाजे सौन्दर्यवर्धनाय 'स्नो-पाउडर' इत्याख्यं शुभ्रद्रव्यमङ्गलेपनायोपयुज्यते। तद्द्रव्ये सुगन्धमपहाय पोषकं संरक्षकं वा न किञ्चित् तत्त्वं निहितम्। प्रत्युताधिककालं तस्योपयोगेन 'स्किन् कैंसर' इत्याख्योऽसाध्यश्चर्मरोगो जायत इति पौर्वात्य-पाश्चात्यवैद्यविदुषामाशयस्तत्र तत्र पत्रिकासु प्रकाशितोऽवलोक्यते। अत आरोग्याकाङ्क्षिभिः 'स्नो-पाउडर'-द्रव्यं परित्यज्य गोमयभस्मनैवाङ्गलेपः कर्तव्यः। यदि सुगन्धमपेक्षते चेत्, तर्हि तद्भस्मनि श्रीगन्धकाश्मीरोशीर–सुगन्धजलादीनां मिश्रणं कर्तव्यम्[१]। तादृशेन भस्मस्नानेन शारीरकमारोग्यं सौगन्ध्यं मानसिकी शान्तिश्च लभ्यते।

भस्मोद्धूलनम्

भस्मधारणविधौ द्वितीयो विधिर्भस्मोद्धूलनाख्यः। उत्कृष्टं धूलनमुद्धूलनमिति व्युत्पत्त्या भस्मस्नानकाले सर्वाङ्गेषु निक्षिप्तानां भस्मकणानां सम्यगालेपनमेव भस्मोद्धूलनम्। "उद्धूलयेत् तेन देहं त्रिपुण्ड्रं चापि धारयेत्"[२] इत्याचार्यदिशानुसारं त्रिपुण्ड्रधारणात् पूर्वमुद्धूलनं कर्तव्यम्। नियमेन क्रियमाणेन भस्मोद्धूलनेन शरीरगताः परमाणवोऽपि परिवर्तिता भवन्ति। श्यामवर्णो हरिर्भस्मोद्धूलनेन शुभ्रवर्णो जात इति रोचककथा बृहज्जाबालोपनिषदि प्रतिपादिता। अतोऽन्तरङ्गबहिरङ्गयोः शुभ्रत्वकाङ्क्षिभिः सर्वैरपि पाउडरोद्धूलनमपहाय भस्मोद्धूलनमेव कर्तव्यम्।

त्रिपुण्ड्रधारणं तत्स्थानानि च

भस्मधारणविधौ त्रिपुण्ड्रधारणमन्तिमं महत्त्वपूर्णं च। अत एव—"सर्वाङ्गोद्धूलनं चापि न समानं त्रिपुण्ड्रकैः"[३] इत्युक्तम्। "त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सजलेन हि"[४] इत्याचार्यदिशानुसारं वामहस्ततले भस्मादाय, "अग्निरिति भस्म वायुरिति भस्म ..."[५] इति मन्त्रेणाभिमन्त्र्य, "मा नस्तोके तनये

---

१. संयोज्य गन्धसलिलैः कपिलामूत्रकेण वा।
चन्द्रकुङ्कुमकाश्मीरमुशीरं चन्दनं तथा॥
अगुरुत्रितयं चैव चूर्णयित्वा तु सूक्ष्मतः।
क्षिपेद् भस्मनि तच्चूर्णमोमिति ब्रह्ममन्त्रतः॥ (बृ. जा. उ. ३।२७-२८)

२. सि. शि. ७।२८

३. सि. शि. ७।२९

४. सि. शि. ७।३०

५. अथर्वशिरः, ५

मा न ˙˙˙ ”[1] इति मन्त्रेण तत्र जलमिश्रणं कृत्वा, मूलमन्त्रेणाष्टधाऽभिमन्त्र्य च, ॐ शिवाय नम इति मस्तके, ॐ महेश्वराय नम इति ललाटे, ॐ रुद्राय नम इति कर्णयोः, ॐ श्रीकण्ठाय नम इति कण्ठे, ॐ शम्भवे नम इति भुजद्वये, ॐ ईश्वराय नम इति हृदये, ॐ महादेवाय नम इति नाभौ, ॐ पशुपतये नम इति पृष्ठके, ॐ शङ्कराय नम इति बाहुयुग्मे, ॐ वृषभाय नम इति ककुद्देशे, ॐ परमात्मने नम इति मणिबन्धद्वये—इत्येवं मन्त्रोच्चारणपूर्वकं मुख्यतया पञ्चदशसु स्थानेषु त्रिपुण्ड्रधारणं कर्तव्यमिति पूज्यपादै रेणुकाचार्यैरुपदिष्टम्[2] ।

तत्र तावद् बृहज्जाबालोपनिषदि[3], चन्द्रज्ञानागमे[4], शिवमहापुराणे[5] च द्वात्रिंशत्-षोडश-अष्ट-पञ्चस्थानानीति त्रिपुण्ड्रधारणस्य स्थानभेदा निरूपिताः । तदनुसारमुत्तमाङ्गम्, ललाटम्, कर्णौ, नेत्रे, नासापुटौ, वक्त्रम्, गलः, अंसद्वयम्, कूर्परौ, मणिबन्धद्वयम्, हृदयम्, पार्श्वौ, नाभिः, गुह्यद्वयम्, ऊरुद्वयम्, स्फिग्बिम्बौ, जानुद्वयम्, जङ्घाद्वयम्, पादद्वयं चेतीमान्येव द्वात्रिंशत्स्थानानि । शिरः, ललाटम्, कण्ठः, अंसद्वयम्, भुजद्वयम्, कूर्परौ, मणिबन्धद्वयम्, हृदयम्, नाभिः, पार्श्वौ, पृष्ठं चेतीमानि षोडशस्थानानि । शिरः, ललाटम्, कर्णौ, अंसद्वयम्, हृदयम्, नाभिश्चेतीमान्यष्टौ स्थानानि । एवमेव ललाटम्, भुजद्वयम्, हृदयम्, नाभिश्चेतीमानि पञ्चस्थानानि ।

उपर्युक्तेषु तत्तदवयवेषु त्रिपुण्ड्रधारणेन ततदङ्गजनितानां पापानां निवृत्तिर्भवतीति यथेष्टमधिकाधिकस्थानेषु भस्मत्रिपुण्ड्रधारणं लाभप्रदमेव । अधिकस्थानेषु त्रिपुण्ड्रधारणाऽभावेऽपि ललाटे तावदवश्यमेव धारणीयम् । अन्यथा वायवीयसंहितायाः—

---

१. तै. सं. ४।५।१०

२. त्रिपुण्ड्रं धारयेन्नित्यं भस्मना सलिलेन च ।
स्थानेषु पञ्चदशसु शरीरे साधकोत्तमः ॥
उत्तमाङ्गे ललाटे च श्रवणद्वितये तथा ।
गले भुजद्वये चैव हृदि नाभौ च पृष्ठके ॥
बाहुयुग्मे ककुद्देशे मणिबन्धद्वये तथा ।
त्रिपुण्ड्रं भस्मना धार्यं मूलमन्त्रेण साधकैः ॥ (सि. शि. ७।३०-३२)

३. बृ. जा. उ. ४।१२-३६

४. च. ज्ञा., क्रि. ६।४४-५६

५. शि. पु. विद्ये., २४।९८-१०४

येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम्।
स्मशानसदृशं तस्मान्न प्रेक्ष्यं पुण्यकृज्जनैः॥
धिग् भस्मरहितं भालं धिग् ग्राममशिवालयम्।[1]

इति वचनानुसारं तज्जन्म धिक्कृतं स्यात्।

तिर्यक्त्रिपुण्ड्रस्य माहात्म्यम्

"यस्य कस्यचिच्छरीरे त्रिपुण्ड्रस्य लक्ष्म वर्तते। प्रथमा प्रजापतिर्द्वितीया विष्णुस्तृतीया सदाशिव इति"[2], "त्रिपुण्ड्रं कारयेद्धीमान् ब्रह्मविष्णुशिवात्मकम्"[3] इत्यादिनिगमागमवचनेषु तिर्यक्त्रिपुण्ड्रस्य यास्तिस्रो रेखा वर्तन्ते, ताः क्रमशो ब्रह्म-विष्णु-शिवात्मिका इत्युपदिष्टम्। उक्तदेवतात्रये पृथग् पृथग्रूपेण ये निष्ठावन्तो भक्ताः सन्ति, तैः सर्वैरपीदं त्रिपुण्ड्रं धार्यम्, तस्य सर्वदेवसमन्वयात्मकत्वात्। अत एव—"समस्ततत्त्वैकरसा विभूतिस्तथैव पुण्ड्रोऽयमयं त्रिपुण्ड्रः"[4] इति शिवरहस्यवचनमुदाहृतं श्रीनीलकण्ठशिवाचार्यैः।

तत्र तावल्लोके वैष्णवा ऊर्ध्वपुण्ड्रम्, शैवाश्च तिर्यक्पुण्ड्रं धार्यमाणाऽवलोक्यन्ते। उभावपि स्वस्वपक्षसमर्थनाय प्रमाणानि चोपस्थापयतः। तिर्यक्त्रिपुण्ड्रधारणे किं विनिगमकमिति जिज्ञासायां श्रीनीलकण्ठशिवाचार्याः—

स्रष्टा सृष्टिच्छलेनाह त्रिपुण्ड्रस्य प्रशस्तताम्।
ससर्ज स ललाटं हि तिर्यग् नोर्ध्वं न वर्तुलम्॥
तिर्यग्रेखाः प्रकाशन्ते ललाटे सर्वदेहिनाम्।
तथापि मानवा मूर्खा न कुर्वन्ति त्रिपुण्ड्रकम्॥
न तद्ध्यानं न तद्दानं न तज्ज्ञानं न तत्तपः।
विना तिर्यक्त्रिपुण्ड्राङ्कं विप्रेण यदनुष्ठितम्॥[5]

इति कूर्मपुराणवचनमुदाहृत्य ललाटं तावन्नोर्ध्वं नापि वर्तुलम्, किन्तु प्रकृत्या तस्य तिर्यक्त्वात् तत्रस्थानां रेखाणामपि तिर्यक्त्वाद् भस्मनस्तिर्यक्त्रिपुण्ड्रमेव

---

१. क्रि. सा., भा. २, पृ. ८४
२. बृ. जा. उ. ७।७
३. च. ज्ञा., क्रि. ६।४२
४. क्रि. सा., भा. २, पृ. ८७
५. क्रि. सा., भा. २, पृ. ८०

कार्यमिति विनिगमकं प्रदर्श्य तद्विना क्रियमाणानि ध्यान-दान-ज्ञान-तपांसि निष्फलानीत्युपदिष्टवन्तः। तस्मात् शास्त्रबलेन सहजेन प्राकृतिकनियमेन च तिर्यक्त्रिपुण्ड्रमेव धारणीयम् । तद्धारणप्रकारस्तावद् द्विविधः। स एवात्र विचार्यते।

त्रिपुण्ड्रधारणप्रकारः फलं च

स्वदक्षिणकरस्य मध्याङ्गुलित्रयेण षडङ्गुलायतम्, अलिकमानकम्, श्रोत्रप्रमाणम्, नेत्रयुग्मवर्ति फालप्रमाणं वा त्रिपुण्ड्रधारणं प्रथमः प्रकारः। द्वितीयस्त्वनुलोमविलोमात्मकः। तत्र मध्यमानामिकाभ्यां स्वफालस्य वामतो दक्षिणपर्यन्तमनुलोमक्रमेण भस्मनो रेखाद्वयं विलिख्य, तन्मध्येऽङ्गुष्ठेन दक्षिणतो वामपर्यन्तं विलोमक्रमेण रेखामेकां रचयेदिति। तदुक्तं शिवमहापुराणे—

मध्यमानामिकाङ्गुल्या मध्ये तु प्रतिलोमतः।
अङ्गुष्ठेन कृता रेखा त्रिपुण्ड्राख्याऽभिधीयते ॥[1] इति।

यो हि भस्मना एवमृजु, श्वेतम्, अविच्छिन्नम्, सान्द्रम्, श्रोत्रप्रमाणकं च त्रिपुण्ड्रकं कुरुते स रौद्रधर्मसंयुक्तः, अर्थात् शिवाचारयुक्तः सन् "य इदं त्रिपुण्ड्रं धरते स वेदत्रयधारी भवति" इति श्रुत्युक्तप्रमाणेन वेदत्रयस्वाध्याय-फलमवाप्नोति। तस्मात्—"प्रातःकाले च मध्याह्ने सायाह्ने च त्रिपुण्ड्रकम्"[2] इत्याचार्यदिशानुसारमेककालम्, द्विकालम्, त्रिकालं वा भस्मत्रिपुण्ड्रधारणेन सर्वदोषविनिर्मुक्तः शिव एव भवति।

एवं शिवसायुज्यदायकमिदं त्रिपुण्ड्रधारणं [3]वेदादिसकलशास्त्रेषूपदिष्टम्, सकलदेव-दानव-महर्षिभिः श्रद्धया धारितं च[4]।

---

१. शि. पु. विद्ये. २४।८६-८७

२. सि. शि. ७।३८

३. शैवागमेषु वेदेषु पुराणेष्वखिलेषु च।
स्मृतीतिहासकल्पेषु विहितं भस्मपुण्ड्रकम् ॥ (सि. शि. ७।४२)

४. ब्रह्मा विष्णुश्च रुद्रश्च देवाः शक्रपुरोगमाः।
त्रिपुण्ड्रं धारयन्त्येव भस्मना परिकल्पितम् ॥
वसिष्ठाद्या महाभागा मुनयः श्रुतिकोविदाः।
धारयन्ति सदाकालं त्रिपुण्ड्रं भस्मना कृतम् ॥ (सि. शि. ७।४०-४१)

भस्मधारणव्रतावधिः

वेदागमोपनिषत्पुराणप्रसिद्धमिदं भस्मधारणं वीरशैवानां स्वेष्टलिङ्ग-पूजाङ्गभूतम्। अन्यैः शैवैरिदं स्वतन्त्रव्रतत्वेन परिगण्यते। पाशुपतव्रतमिति नाम्ना तैरिदं विज्ञाप्यते।

यावच्छरीरपातं वा द्वादशाब्दमथापि वा।
तदर्धं वा तदर्धं वा मासमेकं तथापि वा।
दिनद्वादशकं वाथ व्रतसंकल्पनावधि ॥[1]

इति वायवीयसंहितायां द्वादशदिनादारभ्याजन्मपर्यन्तमस्यावधिः प्रतिपादितः। अतः स्वस्वशक्त्यनुसारं संकल्पं कृत्वा भस्मधारणव्रतमनुष्ठेयम्। स्वेष्टलिङ्ग-पूजाङ्गत्वेनोक्तत्वाद् वीरशैवानां कृते व्रतमिदमाजन्माचरणार्हम्।

भस्मन आवरणशब्दवाच्यत्वम्

अष्टावरणेषु षष्ठावरणत्वेन परिगणितमिदं भस्म अणिमाद्यष्टैश्वर्यप्रदानेन, शिवतत्त्वप्रकाशनेन, मनोवाक्कायजन्यानां पापानां भर्त्सनेन, तापत्रयोत्पन्नविपदां क्षयीकरणेन, ग्रहयक्षादिसर्वभूतेभ्यः परिरक्षणेन च भस्मधारकमभितः संरक्ष्य परशिवप्रकाशरूपनिरुपाधिकभस्मधारणयोग्यतामुत्पादयतीतीदमपि रक्षाकवच-रूपावरणशब्दवाच्यं भवति। अतः सर्वैरपि श्रद्धालुभिः स्वयमेव कल्पादिविधिना भस्मोत्पाद्य पूर्वोक्तेन शास्त्रीयविधिना स्नानोद्धूलनत्रिपुण्ड्रादिकं प्रत्यहं यावज्जीवमनुष्ठेयम्।

७. रुद्राक्षः

अष्टावरणेषु क्रमप्राप्तं सप्तममावरणमेव रुद्राक्षः। तदत्र रुद्राक्षशब्दस्य कोऽर्थः? कतिप्रकारः सः? तदुत्पत्तिः कथम्? कस्तद्धारणविधिः? कथं च स आवरणं भवतीत्यादिकं यथाशास्त्रं प्रस्तूयते।

रुद्राक्षशब्दार्थः

"रुद्रस्य अक्षः रुद्राक्षः" इति व्युत्पत्त्या रुद्राक्षशब्दस्य रुद्रदृष्टिरित्यर्थो भवति। "सर्वो ह्येष रुद्रः"[2], "एको हि रुद्रो न द्वितीयाय तस्थुः"[3] इत्यादि-

---

१. क्रि. सा., भा. २, पृ. २५
२. महाना. १०।११
३. श्वे. उ. ३।२

श्रुत्यनुसारं चराचरात्मकस्य प्रपञ्चस्य रुद्ररूपेणावलोकनमेव रुद्रदृष्टिः। भगवता कृष्णेन—

> विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
> शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥[1]

इत्यत्र तादृशरुद्रदृष्टेः स्वरूपमुपवर्णितम्। समतादृष्टिः समाजे शान्तिस्थापनाया मूलम्। एतदर्थमेवानादिकालाद् दार्शनिकानां प्रयासः परिदृश्यते। सर्वत्र समदर्शनमेव मानवजीवनस्य चरमं लक्ष्यम्। गुरुशास्त्रोपदेशश्रवणेन स्वकीयपरिश्रमेण च तादृशभावनासम्पादनमन्तरङ्गरुद्राक्षधारणम्। एतादृशसमताभावनाया अभावादेव मृगायमाणा मनुष्याः परस्परं कलहायन्तो मनुकुलविनाशरता अवलोक्यन्ते। अत एव—"मनुष्यरूपेण मृगाश्चरन्ति" इत्युक्तं सुभाषितकारेण। आकारमात्रेण मनुष्यो न मनुष्यः, किन्तु मनुष्यत्वविशिष्टः। मनोरपत्यैः सर्वैः प्रथमं मनुष्यैर्भाव्यम्। "मनसा सीव्यतीति मनुष्यः" इति निरुक्त्या सङ्कुचितेन मानसिकसम्बन्धेन बद्धः पशुरिति व्यवह्रियमाणोऽयं जीवस्तस्यैव सम्बन्धस्य निवृत्त्या मुक्तो भवति[2]।

> शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते।
> शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम्॥[3]

इत्याचार्योक्त्या शिवज्ञानप्राप्तावेव पूर्वोक्तसम्बन्धनिवृत्तिः। एवं च बन्धनहेतुभूतसङ्कुचितसम्बन्धनिवारकं शिवज्ञानमेव रुद्रदृष्टिः। तदेषा रुद्रदृष्टिः, अर्थात् सर्वस्य रुद्रस्वरूपेणावलोकनमेव रुद्राक्षशब्दस्य तात्त्विकोऽर्थः। तस्मात्—"यत्र यत्र मनो याति तत्र तत्र ब्रह्मदर्शनम्" इत्युक्त्या निरन्तरं प्रवहमानायां मनोवृत्तौ रुद्रानुचिन्तनमन्तरङ्गाऽक्षमालेत्युच्यते।

रुद्रनेत्रसमुत्पन्नस्य वृक्षविशेषस्य बीजमपि रुद्राक्षशब्देन व्यवह्रियते। अयं तु रुद्राक्षशब्दस्य व्यावहारिकोऽर्थः। आगमोक्तविधिना श्रद्धया चैतद् रुद्राक्षधारणेनाऽन्तःकरणशुद्ध्या पूर्वोक्ता रुद्रदृष्टिः प्राप्यते। एवं रुद्रदृष्टेर्हेतुभूतत्वादिदं वृक्षविशेषस्य बीजं रुद्राक्ष इत्यभिहितम्। निगमागमेषु रुद्राक्षोत्पत्तिर्निरूपिता। तदनुसारमत्र किञ्चिदुच्यते।

---

१. भ. गी ५।१८

२. "ममेति बद्धयते जन्तुर्न ममेति विमुच्यते"।

३. सि. शि. १६।३१

रुद्राक्षोत्पत्तिः

प्राचीनतमे काले तारकासुरो नाम राक्षस आसीत्। तस्य च तारकाक्ष-विद्युन्मालि-कमलाक्षाख्यास्त्रयः पुत्रा आसन्। अतिकठोरेण स्वतपोबलेन ब्रह्माणं प्रसन्नीकृत्य दुर्भेद्यानि पुरत्रयाणि तैः प्राप्तानि। तदाप्रभृति ते त्रिपुरासुरनाम्ना प्रख्याता अभूवन्। तपोबलिष्ठास्ते गच्छता कालेनाऽहङ्कारवशीभूताः शास्त्र-निषिद्धाचरणरताः सन्तो लोककण्टका जाताः। तदा सर्वैर्देवैः प्रार्थितस्त्रिनेत्रो महादेवो रुद्रस्त्रिपुरासुरसंहारायोन्मीलितलोचनस्त्रिपुरयोगमुपलभ्य त्रिपुराणि दग्धवान्। एतदर्थं सहस्रवर्षं यावद् रुद्रस्योन्मीलितनेत्रत्वात् तेभ्यो बह्वो जलबिन्दवो भूमौ निपतिताः। तेभ्य एव जलबिन्दुभ्यो रुद्राक्षाः समुत्पन्नाः। रुद्रनेत्रसमुत्पन्नत्वादेषां नाम रुद्राक्ष इत्यभूत्[1]। तदुक्तमुपनिषदि—"त्रिपुरवधार्थ-महमनिमीलिताक्षोऽभवम्। तेभ्यो जलबिन्दवो भूमौ पतितास्ते रुद्राक्षा जाताः"[2] इति। रुद्रनेत्रसमुत्पन्नत्वादेषामपि [3]रुद्रनेत्रवल्लोकपावनत्वम्, अत एव तद्धारणेनाधिकाधिकफलप्रदातृत्वं च सिद्ध्यति। उक्तं च तत्रैव—"तेषां नामोच्चारमात्रेण दशगोप्रदानफलं दर्शनस्पर्शनाभ्यां द्विगुणं फलमत ऊर्ध्वं वक्तुं न शक्नोमि"[4] इति।

अश्रुवैशिष्ट्यम्

लोके दुःखाश्रु-आनन्दाश्रु-योगाश्रुभेदेनाश्रु तावत् त्रिविधम्। सांसारिक-सन्तापेन केनचित् कृतया पीडया वा सन्तप्तानां जिविनां नेत्रेभ्यो निर्गतान्यश्रूणि

---

१. (क) त्रिपुराणां वधार्थाय विभुना शम्भुना पुरा।
उन्मीलितानि चक्षूंषि दिव्यं वर्षसहस्रकम्॥
उभाभ्यां चारुपक्ष्मभ्यां पतिता जलबिन्दवः।
त एव बिन्दवो जाता महारुद्राक्षवृक्षकाः॥
स्थावरत्वमनुप्रापुर्भक्तानुग्रहकारणात्। (च. ज्ञा., क्रि. ७।४-५)

(ख) पुरा त्रिपुरसंहारे त्रिणेत्रो जगतांपतिः।
उदपश्यत् पुरां योगमुन्मीलितविलोचनः॥
निपेतुस्तस्य नेत्रेभ्यो बहवो जलबिन्दवः।
तेभ्यो जाता हि रुद्राक्षा रुद्राक्षा इति कीर्तिताः॥ (सि. शि. ७।४६-४७)

२. रु. जा. उ. १

३. "रुद्रनेत्रसमुत्पन्ना रुद्राक्षा लोकपावनाः" (सि. शि. ७।४८)।

४. रु. जा. उ. १

दुःखाश्रूणि। अभिलषितार्थप्राप्तावानन्दातिरेकेण निःश्रितान्यश्रूण्यानन्दाश्रूणि। त्राटकादिना मुद्राद्यभ्यासवेलायां निपतितान्यश्रूणि योगाश्रूणि। तत्तदश्रूत्पत्तौ निमित्तभूतैः सर्वैरपि तत्तच्छुभाऽशुभानि फलान्यवश्यमनुभवितव्यानि भवन्ति। अधिकारेण, बलेन, धनेन चाढ्यः कञ्चन कमप्यसमर्थं पीडयति चेत्, तत्पीडायाः प्रत्युत्तरं प्रतिपीडया कर्तुमसमर्थः स यदि सन्तापेन रोदिति, तदा तद्दुःखाश्रुप्रभावेण स पीडकोऽपि कदाचिदवश्यं दुःखी भवतीति लोकानुभवः। एवमेवानन्दाश्रुनिमित्तभूतोऽप्यानन्दभाग् भवत्येव।

एवं सामान्यजनानामेवाश्रुष्वेतादृशसामर्थ्यसत्त्वाद् जगद्रक्षकस्य रुद्रस्य योगाश्रुषु किमु वक्तव्यम्। दुष्टसंहारशिष्टसंरक्षणावसरे समुत्पन्नेभ्यो रुद्रयोगाश्रुभ्यो रुद्राक्षाणामुत्पत्तिरिति तेष्वपि दुर्भावनायाः संहारकत्वं सद्भावनायाः संरक्षकत्वं च वर्तत इति वीरशैवाचार्या रुद्राक्षान् रक्षाकवचरूपावरणत्वेन परिगृहीतवन्तः।

रुद्राक्षप्रभेदाः

रुद्रनेत्रसमुत्पन्ना रुद्राक्षा लोकपावनाः।
अष्टत्रिंशत्प्रभेदेन भवन्त्युत्पत्तिभेदतः॥[1]

इति पूज्यपादानां जगद्गुरुरेणुकाचार्याणामुपदेशानुसारं रुद्राक्षा अष्टत्रिंशत्प्रकारा भवन्ति। सूर्य-चन्द्र-अग्नयः शिवस्य नेत्राणि। अतः स त्रिणेत्र इत्युच्यते। त्रिपुरसंहारवेलायां शिवेन नेत्रत्रयाण्युन्मीलितानि। तदा सूर्यात्मनो नेत्रान्निपतितेभ्यो जलबिन्दुभ्यः कपिलवर्णा द्वादश रुद्राक्षाः, सोमरूपाद्विलोचनान्निर्गतेभ्योऽश्रुभ्यः श्वेतवर्णाः षोडशप्रकारा रुद्राक्षाः, एवमेव वह्निरूपाद्विलोचनान्निपतितेभ्यो जलबिन्दुभ्यः कृष्णवर्णा दशविधा रुद्राक्षाः समुत्पन्नाः। तदेवमाहत्याष्टत्रिंशत्प्रभेदा[2] भवन्ति रुद्राक्षाः।

तत्र—"सरति आकाशे, सुवति कर्माणि लोकं प्रेरयति वेति सूर्यः" इति व्युत्पत्त्या सूर्यस्तावत् सर्वप्राणिनां प्रेरकः। स [3]तपिन्यादिद्वादशकलात्मक इति

---

१. सि. शि. ७।४८

२. नेत्रात् सूर्यात्मनः शम्भोः कपिला द्वादशोदिताः।
श्वेताः षोडश सञ्जाताः सोमरूपाद् विलोचनात्॥
कृष्णा दशविधा जाता वह्निरूपाद् विलोचनात्। (सि. शि. ७।४९-५०)

३. तपिनी तापिनी धूम्रा मरीचिर्ज्वलिनी रुचिः।
सुषुम्णा भोगदा विश्वा बोधिनी धारिणी क्षमा।
कभाद्या वसुदाः सौर्याष्ठडान्ता द्वादशेरिताः॥ (शा. ति. २।१४-१५)

'द्वादशात्मा' इत्युच्यते। एवं रुद्रनेत्रभूतस्य सूर्यस्य द्वादशकलात्मकत्वादेव तस्माद् द्वादशप्रकाराः कपिलवर्णा रुद्राक्षा जाताः।

"सूतेऽमृतमिति सोमः" इति व्युत्पत्त्या स्वकिरणैरमृतस्य वर्षणाच्चन्द्रस्य सोम इति नाम। तस्य [1]अमृतादिषोडशकलात्मकत्वात् स कलानिधिरित्यप्युच्यते। एवं रुद्रनेत्रभूतस्य सोमस्य षोडशकलात्मकत्वादेव तस्मात् श्वेतवर्णाः षोडशप्रकारा रुद्राक्षाः संजाताः।

"वहति हव्यमिति वह्निः" इति व्युत्पत्त्या तत्तद्देवोद्देशेन प्रदत्तं हविर्भागं तत्तद्देवाय प्रापणादग्नेर्वह्निरिति नाम। वह्निरपि [2]धूम्रार्चिःप्रभृतिदशकलात्मको भवति। अत एवास्माद् वह्निनेत्रात् कृष्णवर्णा दशविधा रुद्राक्षाः समुत्पन्नाः। अत्र रुद्राक्षाणां प्रभेदे रुद्रनेत्रभूतानां सूर्य-सोम-वह्नीनां कलाभेद एव कारणमित्यवगम्यते।

रुद्राक्षपरीक्षणम्

धारणीयस्य रुद्राक्षस्य परीक्षणमप्यावश्यकम्। अत एव पूज्यपादा रेणुकाचार्याः—अच्छिद्रं कनकप्रख्यमनन्यधृतमुत्तमम्" इति सुयोग्यस्य रुद्राक्षस्य लक्षणमूचुः। तदनुसारं क्रिमिभिरदष्टः, स्वर्णसदृशप्रभः[3], अन्याऽधृतः, अर्थाद् नूतन एव रुद्राक्षो धारणयोग्यः। मनुष्यस्य हीनानामुत्कृष्टानां वा संस्काराणां प्रभावस्तदुपयुज्यमानेषु वस्तुष्वपि भवतीति वैज्ञानिकोऽयं विचारः। अतोऽस्मदुत्कृष्टगुरुजनधृतरुद्राक्षधारणे दोषाभावेऽपि हीनसंस्कारिणां धारणेन तत्संस्कारप्रभावोऽस्मासु स्यादित्यनन्यधृतमेव रुद्राक्षमुत्तमम्। चन्द्रज्ञानागमे शिवमहापुराणे च—

"ताम्राः स्निग्धा दृढाः स्थूलाः कण्टकैः सहिताः शुभाः" इति,

---

१. अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा।
पूर्णा पूर्णामृता कामदायिन्यः स्वरजाः कलाः॥ (शा. ति. २।१२-१३)

२. धूम्रार्चिरूष्मा ज्वलिनी ज्वालिनी विस्फुलिङ्गिनी।
सुश्रीः सुरूपा कपिला हव्यकव्यवहे अपि।
यादीनां दशवर्णानां कला धर्मप्रदा इमाः॥ (शा. ति. २।१५-१६)

३. निकषे हेमरेखेव यस्य रेखा प्रदृश्यते।
तदक्षमुत्तमं विद्यात् तद्धार्यं शिवपूजकैः॥ (च. ज्ञा., क्रि. ७।१७)

क्रिमिदष्टं च्छिन्नभिन्नं कण्टकैर्हीनमेव च ।
व्रणयुक्तमयुक्तं च षड्रुद्राक्षान् विवर्जयेत् ॥[1]

इति च ग्राह्याणां त्याज्यानां च रुद्राक्षाणां लक्षणमुपवर्णितम् । अत्रेदमप्यवधेयम्—रुद्राक्षमामलकप्रमाणं चेदुत्तमम्, बदरीफलप्रमाणं मध्यमम्, चणकप्रमाणं चाधममिति[2] । तस्माद् रुद्राक्षधारकैः सुपरीक्ष्यैव रुद्राक्षा धारणीयाः ।

रुद्राक्षमुखानि तत्फलानि च

रुद्राक्षास्तावद् एकमुखाच्चतुर्दशमुखपर्यन्ताः भवन्ति । [3]रुद्राक्षजाबालोपनिषत्-[4]शिवमहापुराण-[5]शिवार्चनचन्द्रिकादिषु मुखभेदेन रुद्राक्षमहिमाभेदो वर्णितः । तदनुसारमत्र किञ्चिदुच्यते ।

एकवक्त्रो हि रुद्राक्षः साक्षात् परशिवस्वरूपः । तस्य दर्शनमात्रेण ब्रह्महत्यादयो दोषा निवर्तन्ते । तत्पूजनेन सर्वोपद्रवनाशः, अखण्डितलक्ष्मीप्राप्तिः, अन्ते शिवसायुज्यं च प्राप्यते ।

द्विवक्त्रो हि रुद्राक्षोऽर्धनारीश्वरात्मको भवति । तद्धारणेनार्धनारीश्वरस्य शिवस्यानुग्रहः प्राप्यते । विशेषतो गोवधजन्यं पापं निवर्तते ।

त्रिवक्त्ररुद्राक्षो गार्हपत्य-दक्षिणाग्नि-आहवनीयात्मकाग्नित्रयस्वरूपो भवति । तद्धारणेन हुतभक् तुष्यति, तस्य सर्वा विद्याः प्रादुर्भवन्ति च ।

चतुर्वक्त्ररुद्राक्षश्चतुर्मुखब्रह्मस्वरूपः । अयं च नरहत्यां व्यपोहति । अस्य दर्शनेन स्पर्शनेन च धर्म-अर्थ-काम-मोक्षाख्यचतुर्वर्गफलप्राप्तिर्जायते ।

पञ्चवक्त्ररुद्राक्षः पञ्चमुखसदाशिवस्वरूपः । तद्धारणेनागम्यागमन-अभक्ष्यभक्षणजनितानि दुरितानि विनश्यन्ति, सर्वे मनोरथाः सिद्ध्यन्ति, शिवसायुज्यं च प्राप्यते ।

---

१. च. ज्ञा., क्रि. ७।१४; शि. पु. विद्ये. २३।२१-२२

२. धात्रीफलप्रमाणं तु श्रेष्ठमेतदुदाहृतम् ।
बदरीफलमात्रं तु मध्यमं प्रोच्यते बुधैः ।
अधमं चणमात्रं स्यादिति विद्धि बृहस्पते ॥
(च. ज्ञा., क्रि. ७।९-१०; शि. पु विद्ये. २५।१४-१५)

३. रु, जा. उ. २।१-१६

४. शि. पु. विद्ये. २५।६४-८०

५. शि. च., पृ. १६

षड्वक्त्ररुद्राक्षः षण्मुखस्वरूपः। दक्षिणभुजे तद्धारणेन महदारोग्यप्राप्तिः, मनोबुद्धीनां विशुद्धिः, ब्रह्महत्यादिपातकानां निवृत्तिश्च जायते।

सप्तवक्त्ररुद्राक्षो ब्राह्मीमाहेश्वर्यादिसप्तमातृस्वरूपः। तद्धारणेन महदारोग्यम्, महाश्रीः, महती ज्ञानसम्पत्तिश्च लभ्यते।

अष्टवक्त्रो हि रुद्राक्षोऽष्टवसुस्वरूपः, भैरवस्वरूपश्च भवति। तद्धारणेन दीर्घायुष्ट्वम्, शिवसायुज्यम्, गङ्गाऽनुग्रहश्च प्राप्यते।

नववक्त्ररुद्राक्षो नवदुर्गास्वरूपः। स्ववामहस्तेऽस्य धारणेन लक्षकोटि-कोटिमहापातकानि विनश्यन्ति, धारकः सर्वेश्वरो जायते च।

दशवक्त्ररुद्राक्षो यमदेवस्वरूपः। तद्धारणेन ग्रह-यक्ष-पिशाचाद्याधि-भौतिकदुःखनिवृत्तिः, सर्वमनोरथानां प्राप्तिश्च भवति।

एकादशवक्त्रो हि रुद्राक्ष एकादशरुद्रस्वरूपः। विजयप्रदस्य सौभाग्य-दायकस्य चास्य रुद्राक्षस्य शिखायां धारणेन शतवाजपेयशतसहस्रगोदानफलं च प्राप्यते। अन्ते रुद्रसायुज्यं च लभ्यते।

द्वादशवक्त्ररुद्राक्षो द्वादशादित्यस्वरूपो विष्णुस्वरूपश्च। कण्ठेऽस्य धारणेन बहुदक्षिणगोमेधाश्वमेधफलाधिकारी भवति। धारकस्य दंष्ट्रि-शृङ्गि-चोर-अग्नीनां भयं न जायते, सर्वपापक्षयश्च संजायते।

त्रयोदशवक्त्रो हि रुद्राक्षः कामदेवस्वरूपो विश्वेदेवस्वरूपश्च। अखिल-भोगप्रदस्यास्य धारणेन सर्वा मङ्गलपरम्पराः प्राप्यन्ते, मातृ-भ्रातृ-स्त्रीवधजनितो दोषश्च निवर्तते।

चतुर्दशवक्त्रो हि रुद्राक्षः परशिवस्वरूपः। सर्वरोगनिवारकस्य महदा-रोग्यप्रापकस्यास्य मस्तके धारणेन सकलविधानि दुरितानि दूरीभवन्ति, सर्वाश्च सिद्धयः प्राप्यन्ते।

तदेवं प्राचीनग्रन्थावलोकनेन रुद्राक्षाणां मुखभेदेन फलभेदाः परिज्ञायन्ते। अथापि सर्वेष्वपि रुद्राक्षेषु दोषनिवारकत्वम्, इष्टार्थप्रदायकत्वं च वर्तत एव। "यादृशी भावना यस्य फलं भवति तादृशम्" इत्युक्त्यनुसारेणाधिकभावुका जीवा अधिकाधिकफलभाजो भवन्ति।

रुद्राक्षधारिणे पथ्यम्

औषधसेविभो रोगिभिः शीघ्रारोग्यप्राप्त्यर्थं यथा पथ्यं परिपाल्यते, तथा रुद्राक्षधारिभिस्तत्फलप्राप्तयेऽपि पथ्यं परिपालनीयं भवति। निषिद्धाहार-

सेवनेन निषिद्धाचरणेन च रुद्राक्षधारणस्य फलं तावन्नैव प्राप्यते। तदुक्त-मुपनिषदि—

मद्यं मांसं च लशुनं पलाण्डुं शिग्रुमेव च।
श्लेष्मातकं विड्वराहमभक्ष्यं वर्जयेन्नरः॥[1] इति।

तस्मात् सर्वैरपि रुद्राक्षधारिभिः सात्त्विकाहारिभिः सदाचारशीलैश्च भाव्यम्।

वीरशैवीयरुद्राक्षधारणविधिः

रुद्राक्षजाबालोपनिषदि कालाग्निरुद्रो निदाघजडभरतदत्तात्रेयकात्यायन-भरद्वाजकपिलवसिष्ठपिप्पलादसनत्कुमारादिभ्यो रुद्राक्षधारणविधिं विस्तरेण निरूपितवान्। तत्र शिरः-कण्ठ-वक्षो-बाहु-मणिबन्धादिषु विभिन्नमुखानां विभिन्नसंख्यानां च रुद्राक्षाणां धारणमुपदिश्य,

सराणां सप्तकं वापि बिभृयात् कण्ठदेशतः।
मुकुटे कुण्डले चैव कर्णिकाहारकेऽपि वा॥
केयूरकटके सूत्रं कुक्षिबन्धे विशेषतः।[2]

इति तत्तदवयवविशेषेषु रुद्राक्षनिर्मितान्येव कटककेयूराद्याभरणानि धारणीयानी-त्यादिष्टवान्।

सिद्धान्तशिखामणौ पूज्यपादाः श्रीजगद्गुरुरेणुकाचार्या महर्षिमगस्त्य-मुद्दिश्य वीरशैवीयं रुद्राक्षधारणविधिं निरूपितवन्तः। तदेवात्र प्रस्तूयते।

शिवपूजापरायणो वीरशैवः स्वेष्टलिङ्गपूजावसरे एकमुखमेकं रुद्राक्षं शिखायाम्, द्वि-त्रि-द्वादशवक्त्रान् त्रीन् शिरसि, एकादशाननान् षट्त्रिंशद् मूर्ध्नि, दशमुखं द्वयं पञ्चमुखं द्वयं सप्तमुखं द्वयमेवं षट् षट् कर्णद्वये, षण्मुखं षोडश, अष्टमुखं च षोडशेत्याहत्य द्वात्रिंशत् कण्ठे, चतुर्वक्त्रान् पञ्चाशद्वक्षसि, त्रयोदश-मुखान् षोडश षोडश बाह्वोः, नवमुखान् द्वादश द्वादश मणिबन्धयोः, एवमेव चतुर्दशमुखानष्टोत्तरशतसंख्याकान् यज्ञोपवीतवद् धारयेत्[3]।

---

१. रु. जा. उ. २।१७

२. रु. जा. उ. १।१८-२०

३. शिखायामेकमेकास्यं रुद्राक्षं धारयेद् बुधः।
द्वित्रिद्वादशवक्त्राणि शिरसि त्रीणि धारयेत्॥

रुद्राक्षधारणावसरे स्थानभेदेन मन्त्रभेदा अपि निरूपिताः[1]। तद्यथा—ॐ सदाशिवाय नम इति शिखायाम्, ॐ वह्निसूर्यसोमाधिपाय नम इति शिरसि, ॐ षट्त्रिंशत्तत्त्वात्मने नम इति मस्तके, ॐ षड्ब्रह्मणे नम इति दक्षिणकर्णे, ॐ अष्टमूर्त्यात्मने नम इति वामकर्णे, ॐ त्र्यम्बककलात्मने नम इति कण्ठे, ॐ श्रीकण्ठादिमूर्त्यात्मने नम इति वक्षसि, ॐ सुखासनादिषोडशमूर्त्यात्मकाय श्रीकण्ठाय नम इति दक्षिणबाहौ, ॐ सोमकलात्मकाय श्रीसोमनाथाय नम इति वामबाहौ, ॐ द्वादशादित्यात्मने श्रीमहादेवाय नम इति दक्षिणमणिबन्धे, ॐ केशवादिमूर्त्यधिपाय श्रीमदुमापतये नम इति वाममणिबन्धे, ॐ शतरुद्रविद्येश्वरात्मने श्रीविश्वेश्वराय नम इति रुद्राक्षयज्ञोपवीतं धारणीयम्।

अत्रेदमवधेयम्—पूर्वोक्तप्रकारेण तत्तदङ्गेषु रुद्राक्षधारणावसरे तत्तत्संख्याकानां रुद्राक्षाणां माला विनिर्मातव्या भवन्ति। तदानीं "तन्मुखे मुखं तत्पुच्छे पुच्छम्"[2] इत्यक्षमालोपनिषदुक्तरीत्या मुखे मुखं पुच्छे पुच्छं च संयोज्य रुद्राक्षाणां माला ग्रथितव्या। एवं शास्त्रोक्तविधिना श्रद्धया च तत्तदङ्गेषु रुद्राक्षधारणं कृत्वा पूर्वोक्तपथ्यपरिपालनेन तद्धारणफलमवश्यमुपलभ्यते।

रुद्राक्षधारणेन षडध्वशुद्धिः

शैव-वीरशैवपरम्परायां शिवदीक्षासमये षडध्वशुद्धिस्तावत् प्रतिपाद्यते। स्वशरीरे भावनया षडध्वनां सम्बन्धस्थापनमेव षडध्वन्यासः षडध्वशुद्धिश्चेत्यभिधीयते। आगमशास्त्रे वर्ण-पद-मन्त्र-कला-तत्त्व-भुवनानि षडध्वशब्देन व्यवह्रियन्ते। एतेष्वाद्यास्त्रयोऽध्वानः शाब्दाः, अवशिष्टास्त्रयश्चार्था इति विभागः क्रियते[3]।

षट्त्रिंशद् धारयेन्मूर्ध्नि नित्यमेकादशाननान्।
दशसप्तपञ्चवक्त्रान् षट् षट् कर्णद्वये वहेत्॥
षडष्टवदनान् कण्ठे द्वात्रिंशद् धारयेत् सदा।
पञ्चाशद् धारयेद् विद्वान् चतुर्वक्त्राणि वक्षसि॥
त्रयोदशमुखान् बाह्वोर्धरेत् षोडश षोडश।
प्रत्येकं द्वादश वहेन्नवास्यान् मणिबन्धयोः॥
चतुर्दशमुखं यज्ञसूत्रमष्टोत्तरं शतम्।
धारयेत् सर्वकालं तु रुद्राक्षं शिवपूजकः॥ (सि. शि. ७।५३-५७)

१. वै. शि. वि., पृ. १४

२. अ. मा. उ. १

३. त. या., पृ. ३३

प्रपञ्चस्य शिवमयत्वात्, प्रपञ्चान्तःपातित्वादेषामध्वनामपि शिवस्वरूपत्वमेव। एतेषु शिवभावापत्तिरेव शिवताऽभिव्यक्तेर्मार्ग इत्येतेऽध्वशब्देनोच्यन्ते। रुद्रनेत्रोत्पन्नानां रुद्राक्षाणामपि रुद्ररूपत्वात् पूर्वोक्तरीत्या तत्तदङ्गेषु तेषां धारणेन षडध्वशुद्धिरिति श्रीमन्तो मरितोण्टदार्याः प्रतिपादयन्ति। तथाहि-"शुद्धमिश्रसङ्कीर्णभुवनाधीशशिवाष्टविद्येश्वरशतरुद्रसंख्यातयज्ञोपवीतधारणेन भुवनाध्वशुद्धिः, वर्णसंख्यातवक्षोमालया वर्णाध्वशुद्धिः, पदसंख्यातमणिबन्धबाहुकण्ठमालया पदाध्वशुद्धिः, षडङ्गपञ्चब्रह्मप्रणवमन्त्रसंख्यातकर्णाभरणेन मन्त्राध्वशुद्धिः, शिवशक्त्यात्मककर्णाभरणेन तत्त्वसंख्यातमस्तकमालया वा तत्त्वाध्वशुद्धिः, अष्टत्रिंशत्कलापूर्णसोमसूर्याग्निलक्षणशिरोरन्ध्रमालया कलाध्वशुद्धिः, एवंरूपषडध्वकारणीभूतपरशिवब्रह्ममयशिखागतैकरुद्राक्षधारणेन परशिवस्वरूप एव, "यो रुद्राक्षं धत्ते स सत्यं परमः शिवः स सत्यं परमः शिवः" इति श्रुतेः"[1] इति।

अस्यायं भावः—शुद्ध-मिश्र-संकीर्णभुवनानाम्, अष्टौ विद्येश्वराः शतरुद्राश्चेत्याहत्याष्टोत्तरशतसंख्याका भुवनाधीश्वरा भवन्ति। अष्टोत्तरशतसंख्यातरुद्राक्षमालाया यज्ञोपवीतवद्धारणेन शरीरे भुवनाध्वशुद्धिः। अकारादयः क्षकारान्ताः पञ्चाशद् वर्णा भवन्ति। तत्संख्यातवक्षोमालाधारणेन वर्णाध्वशुद्धिः। व्योमव्यापि-व्योमरूपादिपदानि[2] तावद् अष्टाशोतिसंख्याकानि भवन्ति। तत्र कण्ठ-बाहु-मणिबन्धेष्वाहत्य अष्टाशोतिरुद्राक्षाणां धारणेन पदाध्वशुद्धिः। षडक्षरमन्त्रः, पञ्चब्रह्ममन्त्रः, प्रणवश्चेति मन्त्राणां[3] द्वादशात्मकत्वात् कर्णयोर्द्वादशरुद्राक्षधारणेन मन्त्राध्वशुद्धिः। शिवादिभूम्यन्तानां तत्त्वानां षट्त्रिंशत्संख्यात्मकत्वात् तत्संख्यातरुद्राक्षमालाया शिरसि धारणेन तत्त्वाध्वशुद्धिः। सूर्ये द्वादश कलाः, चन्द्रमसि षोडश कलाः, अग्नौ च दश कला इत्याहत्याष्टत्रिंशत्कला भवन्ति। तत्र तावत् शिरसि धार्यमाणानि द्वि-त्रि-द्वादशवक्त्राणि त्रीणि रुद्राक्षाणि सूर्यचन्द्राग्निस्वरूपाणीति तद्धारणेन कलाध्वशुद्धिः। शिखायां धार्यमाण एकमुख एको रुद्राक्षस्तु सर्वाध्वकारणीभूतपरशिवस्वरूप इति तद्धारणेन "यो रुद्राक्षं धत्ते स सत्यं परमः शिवः स सत्यं परमः शिवः" इति श्रुत्या स साक्षात् परशिवस्वरूपो भवति। तदेवं शास्त्रोक्तविधिना रुद्राक्षधारणेन षडध्वशुद्धिः परशिवस्वरूपप्राप्तिश्च भवति।

---

१. सि. शि. ७।१०-१४, तत्त्वप्रदीपिकाव्याख्या, पृ. ११६; सो. प्र. १९०५ ई.।

२. सिद्धान्तशैवदर्शने पदानां संख्या एकाशीतिमिता निरूपिता (र. त्र. श्लो. ९३)।

३. सिद्धान्तशैवदर्शने मन्त्राणां संख्या एकादश प्रतिपादिता (त. या., पृ. २५)।

रुद्राक्षधारणेन पातकनिवृत्तिः

रुद्रनेत्रोत्पन्नानाम्, अत एव पावनानां रुद्राक्षाणां पूर्वोक्तेन शास्त्रीय-विधानेन परमया श्रद्धया च तत्तदङ्गेषु धारणेन तस्य सर्वविधानि पातकानि परिहृतानि भवन्ति[1]।

"पातयत्यधो गमयति दुष्क्रियाकारिणमिति पातकम्" इति व्युत्पत्त्याऽस्माभिः कृतान्येव दुष्कर्माण्यस्माकमधोगतेः कारणानि भवन्ति। तानि च—अतिपातक-महापातक-अनुपातक-उपपातक-सङ्करीकरण-अपात्रीकरण-जातिभ्रंश-करण-मलावह-प्रकीर्णकभेदेन नवधा भवन्ति।

तत्रातिशयितं पातकमतिपातकम्। तच्च मातृ-दुहितृ-स्नुषागमनात्मकं पुंसाम्, पुत्र-पितृ-श्वशुरगमनात्मकं च स्त्रीणामित्यवधेयम्। महच्च तत् पातकं महापातकम्। तच्च ब्रह्महत्या, सुरापानम्, स्तेयम्, गुरुपत्नीगमनम्, एतेषां संसर्गकर्ता चेति पञ्चप्रकारम्[2]।

उपर्युक्तमहापातकसमानानि पातकान्येवानुपातकानीत्युच्यन्ते। तत्रानृतं स्वजात्युत्कर्षभाषणम्, यथा ब्राह्मणोऽहमित्यब्राह्मणो ब्रवीति, पैशुनम्, गुरोरनृताभिशंसनमित्येतानि ब्रह्महत्यासमानानि। ब्रह्मोज्झता, अर्थाद् अधीतवेदस्यानभ्यासेन विस्मरणम्, वेदनिन्दा, साक्ष्ये मृषाभिभाषणम्, मित्रवधः, गर्हितलशुनादेर्भक्षणमित्येतानि सुरापानसमानानि। निक्षेपस्य मनुष्य-तुरग-रूप्य-भूमि-हीरकमणीनां च हरणं सुवर्णस्तेयतुल्यम्। सोदर्यभगिनीकुमारीचाण्डालीसखिपुत्रभार्यासु यो रेतःसेकः, स गुरुतल्पसमः[3]। इमान्यनुपातकानि।

तत्र गोहननम्, जातिकर्मदुष्टानां याजनम्, परस्त्रीगमनम्, आत्मविक्रयः, मातृपितृगुरूणां शुश्रूषाद्यकरणम्, सर्वदा ब्रह्मयज्ञत्यागः, सुतस्य संस्कारभरणाद्यकरणम्, कन्याया दूषणम्, तडागोद्यानभार्याऽपत्यानां विक्रयः, बान्धवानामननुवृत्तिः, प्रतिनियतवेतनग्रहणपूर्वकमध्यापनम्, प्रतिनियतवेतनप्रदानपूर्वकमध्ययनम्, अविक्रय्यादीनां तिलादीनां विक्रयः। भार्यादिस्त्रीणां वेश्यात्वं कृत्वा तदुपजीवनम्, श्येनादियज्ञेनानपराद्धस्य मारणम्, मन्त्रौषधिना वशीकरणम्, पाकादिदृष्टप्रयोजनार्थं वृक्षच्छेदनम्, अनातुरस्य देवपित्राद्युद्देशमन्तरा पाकाद्यनुष्ठानम्, निन्दितान्नस्य सकृदनिच्छया भक्षणम्, सत्यधिकारेऽ-

---

१. "रुद्राक्षधारणादेव मुच्यते सर्वपातकैः" (सि. शि. ७।५९)।

२. म. स्मृ. ११।५५

३. म. स्मृ. ११।५६-५९, कुल्लूकभट्टव्याख्या।

न्यानाधानम्, स्मृतिविरुद्धशास्त्रशिक्षणम्, धान्यताम्रलोहादेः पशूनां च चौर्यम्, पीतमद्यया स्त्रिया सह गमनमित्यादिकमुपपातकम्[1]।

तत्र दण्डहस्तादिना ब्राह्मणस्य पीडनम्, अनाघ्रेयलशुनमद्यादानामाघ्राणम्, कुटिलत्वम्, पुंसि च मुखादौ च मैथुनमिति प्रत्येकं जातिभ्रंशकरं भवति[2]।

गर्दभ-तुरग-उष्ट्र-मृग-हस्ति-च्छाग-मेष-मत्स्य-सर्प-महिषाणां प्रत्येकं वधः संकरीकरणं विज्ञेयम्[3]। "असङ्करः सङ्करः क्रियतेऽनेनेति सङ्करीकरणम्" इति विग्रहे च्विः। समासबलेन जातिसङ्करशून्यानामप्ययं जातिसङ्करः सम्पाद्यत इति सङ्करीकरणमस्य नाम।

अप्रतिग्राह्यधनेभ्यः प्रतिग्रहः, वाणिज्यम्, शूद्रस्य परिचर्या, अनृताभिधानमित्येतत् प्रत्येकमप्यपात्रीकरणं भवति[4]।

कृमीणां कीटानां पक्षिणां च वधः, मद्येन सहानीतस्य शाकादेर्भोजनम्, फल-काष्ठ-पुष्पाणां चौर्यम्, अल्पेऽप्यपचयेऽत्यन्तवैक्लव्यमित्येतत्सर्वं प्रत्येकं मलिनीकरणमित्युच्यते[5]।

एवमेवान्तिमं पातकं प्रकीर्णकम्। न्यायाधीशस्य राज्ञो वा शास्त्राधाररहितो यो निर्णयः, स एव प्रकीर्णकमित्युच्यते।

उपर्युक्तानामेतेषां पातकानां परिणामेन मनुष्यो हीनयोनिषु जायते, कर्मणामुपभोगं विनैव क्षयासम्भवात्।[6] अत एव शातातपीये कर्मविपाके—

महापातकजं चिह्नं सप्तजन्मसु जायते।
बाधते व्याधिरूपेण तस्य कृच्छ्रादिभिः समः॥

---

१. म. स्मृ. ११।६०-६७, कुल्लूकभट्टव्याख्या।

२. म. स्मृ. ११।६८, कुल्लूकभट्टव्याख्या।

३. म. स्मृ. ११।६९, ,, ,, ।

४. म. स्मृ. ११।७०, ,, ,, ।

५. म. स्मृ. ११।७१, ,, ,, ।

६. "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति पौष्करागमे (लु. सं., भा. २, उपो. पृ. १४८)

इति पातकानां परिणामेन जीवः सप्तजन्मपर्यन्तं पीड्यत इति निरूप्य तन्निवारणाय कृच्छ्रादिप्रायश्चित्तं विहितम् । मनुस्मृतेरेकादशाध्याये तत्तत्पातकप्रायश्चित्तानि प्रतिपादितानि, किन्त्वत्र सिद्धान्ते पूज्यपादा श्रीरेणुकाचार्याः—

ब्रह्महा मद्यपायी च स्वर्णहृद् गुरुतल्पगः ।
मातृहा पितृहा चैव भ्रूणहा कृतघातकः ॥
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ।[1]

इति रुद्राक्षधारणादेवोपर्युक्तानां सर्वपातकानां निवृत्तिं निरूपितवन्तः ।

रुद्राक्षजाबालोपनिषदि च—"तद्रुद्राक्षे वाग्विषये कृते दशगोप्रदानेन यत्फलमवाप्नोति तत्फलमश्नुते । तद्रुद्राक्षं करेण स्पृष्ट्वा धारणमात्रेण एकादशसहस्रगोप्रदानफलं भवति । तद्रुद्राक्षे शिरसि धार्यमाणे कोटिगोप्रदानफलं भवति । एतेषां स्थानानां कर्णयोः फलं वक्तुं न शक्यमिति होवाच" इति रुद्राक्षधारणफलमुक्त्वाऽन्ते—"य इमामुपनिषदं ब्राह्मणः सायमधीयानो दिवसकृतं पापं नाशयति । सायंप्रातः प्रयुञ्जानोऽनेकजन्मकृतं पापं नाशयति । षट्सहस्रलक्षगायत्रीजपफलमवाप्नोति । ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुदारगमनतत्संसर्गाख्यपातकेभ्यः पूतो भवति"[2] इति तदुपनिषदध्ययनेनापि पातकानां परिहार उपदिष्टः ।

तत्र तावत् शिवमहापुराणे भगवान् व्यासोऽपि—

यस्याङ्गे नास्ति रुद्राक्षस्त्रिपुण्ड्रं भालपट्टके ।
मुखे पञ्चाक्षरं नास्ति तमानय यमालयम् ॥[3]

इति भस्म-रुद्राक्षविरहितानां पञ्चाक्षरजपाभ्यासरहितानामेव यमालयगमनमिति व्यतिरेकेन तन्माहात्म्यमुपवर्णितवान् ।

तदेतत् पर्यालोचनेन ज्ञायते यद् रुद्राक्षधारणेन पातकानां निवृत्तिः, पुण्यप्राप्तिः, अन्ते रुद्रलोकप्राप्तिश्च भवतीति[4] ।

---

१. सि. शि. ७।५९

२. रु. जा. उ. २।१९, पृ. ४९५

३. शि. पु. विद्ये. २५।५१

४. मृतिकाले च रुद्राक्षं निष्पीड्य सह वारिणा ।
यः पिबेच्चिन्तयन् रुद्रं रुद्रलोकं स गच्छति ॥
भस्मोद्धूलितसर्वाङ्गा धृतरुद्राक्षमालिकाः ।
ये भवन्ति महात्मानो रुद्रास्ते नात्र संशयः ॥ (सि. शि. ७।६३-६४)

अतः श्रीमन्तो मरितोण्टदार्याः—"रुद्राक्षाणां धारणस्य साक्षात् परमेश्वरनयनजलबिन्दुसन्दोहप्रभवत्वेन, ब्रह्मविष्णुरुद्रादिसर्वदेवताधिष्ठातृत्वेन, तत्तत्संख्याविशिष्टतया तत्तत्स्थानधारणस्य शिवाभेदप्रापकत्वेन, नित्यनैमित्तिकादिधर्मानुष्ठानसमये धारणनैयत्यात् फलसाकल्यसम्पादकत्वेन, तद्व्यतिरेकेणानुष्ठितानां धर्माणां नैष्फल्यापादकत्वेन समस्तमहापातकोपपातकनिवर्तनद्वारा परिशुद्धिसम्पादकत्वेन, सर्वकर्मसमृद्धिसम्पादनद्वारा ब्रह्मविद्याङ्गत्वेन, पशुपाशविमोचकत्वेन च निःश्रेयससाधनत्वस्य प्रतिपादनाद् रुद्रादिसर्वदेवऋषिसेवितत्वेन, अनधिकारितान्त्रिकजनाविश्वसनीयत्वेन च रुद्राक्षधारणं मुमुक्षुभिरवश्यं कर्तव्यम्, तदकरणे प्रत्यवायश्रवणात्, करणे चाभ्युदयश्रवणान्नित्यत्वम्"[१] इति रुद्राक्षाणां माहात्म्यमुपवर्ण्य तद्धारणं च नित्यकर्मेति व्यवस्थापितवन्तः। अतः सर्वैर्वीरशैवैस्तथाऽन्यैरपि शिवभक्तैः स्वकीये नित्यकर्मानुष्ठाने पूर्वोक्तप्रकारेण रुद्राक्षधारणमवश्यमेव कर्तव्यम्।

रुद्राक्षधारणेन वैज्ञानिको लाभः

आयुर्वेदविज्ञाने रुद्राक्षोपचारेण बहुविधरोगोपशमः प्रतिपादित इत्यायुर्वेदविशारदो गुरुदेवशिवाचार्यो निरूपयति। तदनुसारं रुद्राक्षनिष्पीडितजले सैन्धवलवणस्य मिश्रणं कृत्वा रोगिणां मुखप्रक्षालनेन मुखशुद्धिः, कफज्वरबाधायां रुद्राक्षघृष्टितस्य गन्धस्य मधुना सह सेवनेन कफप्रकोपो न जायते। रुद्राक्षं हेमगर्भगुटिकां चार्द्रके रसे संघृष्य तस्य मधुना सह लेहनेन मरणासन्नावस्थायामवरुद्धा वाक् पुनः प्रवर्तते[२]।

आधुनिकवैज्ञानिकपरीक्षणेनाप्युपलब्धं यद् रुद्राक्षधारणेन रक्तस्य न्यूनाधिकप्रसार-हृदयदौर्बल्यादिरोगाणां वेग उपशाम्यतीति।

वनस्पतिषु रोगनिवारकशक्तिस्तु स्वाभाविकी। रुद्राक्षस्य श्रेष्ठवनस्पतित्वादस्त्येव तत्राप्यपारा शक्तिः। प्राचीनायुर्वेदग्रन्थाध्ययनेन वैज्ञानिकपरीक्षणेन च तेष्वितोऽप्यधिकस्य सामर्थ्यस्यान्वेषणं वैद्यानां वैज्ञानिकानां सस्यशास्त्रिणां च कर्तव्यम्। तस्माद् रुद्राक्षो न केवलं धार्मिकं चिह्नम्, किन्तूत्कृष्टो वनस्पतिः। अतो वर्णाश्रमविभेदं विनैव सर्वैरपि धार्यो भवति।

---

१. वी. आ. च., पृ. १६४

२. शि. त. द., पृ. ८५

रुद्राक्षधारणे वर्णाश्रमभेदनिरासः

ब्राह्मणो वान्त्यजो वापि मूर्खो वा पण्डितोऽपि वा ।
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ॥[1]

इत्याचार्योक्तौ रुद्राक्षधारणे मनुष्यमात्रस्याधिकारः सूचितः । अतो विनैव वर्णाश्रमभेदं सर्वैरपि मनुष्यैस्तद् धार्यम् । न केवलं ब्राह्मणादिजातिषु जन्ममात्रेण कोऽपि श्रेष्ठो भवति, किन्तूत्कृष्टकर्मणा । अतः शिवलाञ्छनयुक्तो सदाचारी पुरुष एव श्रेष्ठ इत्यवधेयम् ।

रुद्राक्षस्यावरणशब्दवाच्यत्वम्

तदेवमष्टावरणेषु सप्तमावरणत्वेन प्रतिपादितोऽयं रुद्राक्षो रुद्रनेत्रसमुत्पन्नत्वाद् रुद्रवत् पावनस्वरूपः । अस्य धारणेन दैहिकानां मानसिकानां च दोषाणां निवृत्तिरुभयविधं स्वास्थ्यं च लभ्यते । रुद्रभावनया निरन्तरमस्य धारणेन रुद्रदृष्टिश्च प्राप्यते । अयमेवान्तरङ्गरुद्राक्षः । अनेन मनुष्ये समतादृष्टिस्तेनैव च समाजे शान्तिस्थापना भवति । एवमन्तरङ्गबहिरङ्गाख्योऽयं रुद्राक्षो व्यक्तेः समाजस्य चोभयविधस्वास्थ्यसंरक्षकत्वादावरणशब्दवाच्यो भवतीति सिद्धम् ।

८. मन्त्रः

अष्टावरणेषु क्रमप्राप्तमष्टममावरणमेव मन्त्रः । इदं चान्तिममावरणम् । तस्मादत्र मन्त्रशब्दस्य कोऽर्थः ? कतिविधश्च सः ? किं तावत् पञ्चाक्षरमन्त्रस्वरूपम् ? तज्जपप्रकारश्च कीदृशः ? कथं स आवरणं भवतीत्यादिकं सर्वमत्र यथाशास्त्रं प्रपञ्च्यते ।

मन्त्रशब्दार्थः

"मन्त्र्यते गुप्तं परिभाष्यते", अथवा "मन्त्रयते गुप्तं भाषत इति मन्त्रः" इति व्युत्पत्त्या दीक्षासमये सद्गुरुणा निगूढमुपदिष्टं स्वेष्टदेवताया नामैवात्र मन्त्रशब्दार्थः । स्वेष्टदेवताया नाम्नः पुनः पुनर्मननेन स्वस्य त्राणम्, अर्थात् परिरक्षणं भवतीति—"मननात् त्रायते यस्मात् तस्मान्मन्त्रः प्रकीर्तितः" इत्युक्त्या भगवतो नाम मन्त्र इत्युच्यते । तदुक्तमुपनिषदि—

मननात् त्राणनाच्चैव मद्रूपस्यावबोधनात् ।
मन्त्रमित्युच्यते ब्रह्मन् मदधिष्ठानतोऽपि वा ॥[2] इति ।

---

१. सि. शि. ७।६१

२. यो. शि. उ. २।७-८

तस्मान्मन्त्रजपेन स्वस्य त्राणं मन्त्राधिष्ठातृदेवतायाश्च साक्षात्कारो जायते। अत एव मेदिनीकारेण—"मन्त्रो देवादीनां साधनम्" इत्युक्तम्। हिन्दू-समाजे देवानामाधिक्यान्मन्त्राधिक्यमपि। अतोऽत्र सप्तकोटिमन्त्राः प्रकीर्तिताः। तेष्वन्यतमः पञ्चाक्षरो मन्त्रः। वीरशैवैः शैवैश्चास्यैव मन्त्रस्योपदेशः स्वीक्रियते, स एव जप्यते च। तस्मादत्र प्रथमं तत्स्वरूपं तदुत्कृष्टत्वं च प्रस्तूयते।

पञ्चाक्षरमन्त्रस्वरूपम्

"नमः शिवाय" इति पञ्चभिरक्षरैर्युतोऽयं मन्त्रो पञ्चाक्षर इत्युच्यते। तत्र तावत् परमरहस्ये—

दान्तं बान्तं च यान्तं तु तृतीयस्वरभूषितम्।
लान्तयान्तसमायुक्तो मन्त्रः पञ्चाक्षरो भवेत्॥[1]

इति संकेतेन तत्स्वरूपमुपवर्णितम्। तदनुसारं दान्तमित्यनेन तवर्गस्यान्तिमो वर्णो नकारः, बान्तमित्यनेन पवर्गस्यान्तिमो वर्णो मकारः, यान्तमित्यनेन यकाराद् यः पञ्चमो वर्णः शकारः, स च तृतीयस्वरेण इकारेण भूषितः, अर्थात् शिकारः, लान्तमित्यनेन पूर्वोक्ताद् यकाराच्चतुर्थो वर्णो वकारः, एवमेव यान्तसमायुक्त इत्यनेनान्ते यकारयुक्त इति विवरणं जायते। अनेन पूर्वोक्त एव पञ्चाक्षरमन्त्रः स्फुटीभवति।

मन्त्रस्यास्य स्वरूपम्—"आदौ नमः प्रयोक्तव्यं शिवायेति ततः परम्"[2], "नमःशब्दं वदेत् पूर्वं शिवायेति ततः परम्"[3] इति चन्द्रज्ञानागमे सिद्धान्त-शिखामणौ च सुस्पष्टरीत्योपदिष्टम्। तस्मात् पूर्वोक्ताक्षरपञ्चकयुक्तो मन्त्रो हि पञ्चाक्षरः।

मन्त्रान्तरादस्य श्रेष्ठत्वम्

शिवतत्त्वात् परं नास्ति यथा तत्त्वान्तरं महत्।
तथा पञ्चाक्षरीमन्त्रान्नास्ति मन्त्रान्तरं महत्॥

सप्तकोटिषु मन्त्रेषु मन्त्रः पञ्चाक्षरो महान्।
ब्रह्मविष्ण्वादिदेवेषु यथा शम्भुर्महत्तरः॥[4]

---

१. प. र. ६।१५, पृ. ६२
२. च. ज्ञा., क्रि. ८।५
३. सि. शि. ८।७
४. सि. शि. ८।२, ४

इत्यत्र पूज्यपादा रेणुकाचार्याः शिववत् शिवमन्त्रस्यापि श्रेष्ठत्वमुपदिष्टवन्तः। तेषामयं भावः—शिव इत्यक्षरद्वयं सर्वश्रुतिसारसर्वस्वम्। तद्विशिष्टत्वादेवास्योत्कृष्टत्वम्। तदुक्तं पौराणिकैः—

विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ।
तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम्॥[१] इति।

अष्टादशविद्यास्थानमध्ये श्रुतिस्तु सर्वोत्कृष्टा वर्तते। तत्रापि "रुद्रैकादशिनीं जप्त्वा तत्क्षणादेव शुद्धयति"[२] इति धर्मशास्त्रप्रणेतृभिर्याज्ञवल्क्यादिभो रुद्रैकादशिन्या महापातकनिवर्तकप्रायश्चित्तत्वेन विधानात्, रुद्रैकादशिनो श्रुतावुत्कृष्टतरा। तत्राप्यष्टमाऽनुवाकपठिते "नमः शिवाय च शिवतराय च" इत्यत्र निर्दिष्टे पञ्चाक्षराख्ये मन्त्रे स्थितः शिव-शब्दस्तूत्कृष्टतम इति विज्ञेयम्।

"शिवमिच्छन्मनुष्याणां तस्माद् देवः शिवः स्मृतः"[३] इति महाभारतोक्त्या प्राणिमात्रस्य कल्याणमिच्छतो महादेवस्य शिव इति नाम जातम्। तदुक्तं तत्रैव भगवता शिवेन—

समा भवन्ति मे सर्वे दानवाश्चामराश्च ये।
शिवोऽस्मि सर्वभूतानां शिवत्वं तेन मे सुराः॥[४] इति।

अतः—"श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्"[५] इत्यमरकोशोक्त्या शिवशब्दस्य कल्याणाद्यर्था भवन्ति। तस्मात् "शिवं कल्याणमस्यास्तीति, करोतीति वा शिवः" इति व्युत्पत्त्या शिवस्य कल्याणगुणयुक्तत्वं प्राणिमात्रं प्रति कल्याणकरत्वं च सिद्धयति। "शिव एको ध्येयः शिवङ्करः"[६] इति श्रुतिरपि तत्र प्रमाणम्।

किञ्च, शिवाः शोभनाः सर्वज्ञत्वादयो गुणा अस्य सन्तीति शिव इत्युत्कृष्टगुणवत्त्वेनापि तस्य शिवशब्देन व्यपदेशः। तस्य तादृशगुणवत्त्वं तु पुराणप्रसिद्धमेव। तथाहि—

---

१. ब्र. सू. श्रीकण्ठ. शि. म. दी., पृ. ४
२. वी. आ. च., पृ. १७०
३. म. भा. ७।१७३।९०
४. म. भा. ८।२।३-४
५. अ. को. १।४।२५
६. अ. शिखो. ३

सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः।

अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥[1] इति।

यद्यपि—"शिवतत्त्वं महासेन निष्कलं चेति कीर्तितम्"[2] इति वातुलशुद्धागमवचने तस्य निष्कलत्वम्, अर्थान्निर्गुणत्वं प्रतिपादितम्, अथापि सृष्ट्यर्थं योगिनां पूजानिमित्तं च तदाश्रितपराशक्तिकल्पितगुणानादाय तथा व्यपदेशः।

अथवा "शोभनत्वात् शिवः" इति व्युत्पत्त्यापि शिवशब्दसिद्धिः। अत्र शोभनत्वं नाम शुद्धत्वम्, अर्थान्मलत्रयरहितत्वम्। तदुक्तम्—"शोभनत्वं च सर्वजीववर्त्याणवकार्ममायीयाख्यानादिमलत्रयाभावरूपनैर्मल्यलक्षणं शुद्धत्वम्"[3] इति। तत्र तावद् वायवीयसंहितायाम्—

अथवाऽशेषकल्याणगुणैकघन ईश्वरः।
शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः॥

अनादिमलसंश्लेषयोगाभावात् स्वभावतः।
अत्यन्तपरिशुद्धात्मेत्यतोऽयं शिव उच्यते ॥[4]

इति शिवस्य कल्याणगुणवत्त्वं मलत्रयसम्बन्धरहितत्वं च व्यपदिष्टम्।

अपि च, "वष्टीति शिवः" इति व्युत्पत्त्यापि शिवशब्दनिष्पत्तिः। इच्छाश्रय इति तदर्थः। अस्य व्युत्पत्तिरप्पय्यदीक्षितमहाभागैः—"वश कान्तौ" (१०८१ अदा०) इति धातोर्वर्णव्यत्ययेन सिद्धः शिवशब्दः पृषोदरादिः। तदाहुः—"हिंसिधातोः सिंहशब्दो वश कान्तौ शिवः स्मृतः। वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा॥" इति प्रदर्शिता। तेन शिवशब्दस्य इच्छावानित्यर्थलाभे, कस्मिन्निति तद्विषयाकाङ्क्षायां देवासुरमनुष्यादीनां शिवे विषय इत्ययमर्थः "शिवमिच्छन्मनुष्याणाम्" इत्यार्षवचनप्रामाण्याल्लभ्यते"[5] इति शिवस्य लोककल्याणेच्छाश्रयत्वं समर्थितम्।

---

१. वा. पु. १२।३१
२. वा. शु. त. १।१५
३. वी. आ. च., पृ. १७३
४. वी. आ. च., पृ. १७३
५. ब्र. सू. श्रीकण्ठ., शि. म. दी., पृ. ३

सा चेच्छा शिवस्य चिद्रूपायाः पराशक्तेरभिन्नैव, "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च"[1] इति श्रुतेः। वातुलशुद्धाख्यतन्त्रेऽपि शिवस्य शक्त्याश्रयत्वम्, अत एव तस्मात् तासामुत्पत्तिश्च प्रतिपादिता। तथाहि—

योगिनामुपकाराय स्वेच्छया चिन्त्यते शिवः।
तच्छिवे तु पराशक्तिः सहस्रांशेन जायते॥

तच्छक्तेस्तु सहस्रांशादादिशक्तिसमुद्भवः।
आदिशक्तिसहस्रांशाद इच्छाशक्तिसमुद्भवः॥
इच्छाशक्तिसहस्रांशाद ज्ञानशक्तिसमुद्भवः।
ज्ञानशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः॥[2] इति।

तदेवमनन्तशक्त्याश्रयस्य शिवस्य लोककल्याणेच्छाशक्त्याश्रयत्वं सुतरां सिद्धम्। किञ्च, "वश कान्तौ" इति धातोः "वष्टीति शिवः" इति व्युत्पत्त्या निष्पन्नेन शिवशब्देन तस्य स्वच्छप्रकाशरूपत्वम्, अर्थात् स्वप्रकाशत्वमपि सिद्ध्यति।

पुनश्च, "शेतेऽस्मिन् सर्वमिति शिवः" इति व्युत्पत्त्यापि शिवशब्दसिद्धिः। सर्वप्रपञ्चकारणीभूतचिच्छक्तेरप्याधारतया परमशिवस्यैव जगदाधारत्वं पर्यवस्यति। एवमेव "शाम्यतीति शिवः" इत्यपि शिवशब्दस्य व्युत्पत्तिर्भवितुमर्हति। अनेन शिवस्य निर्विकारित्वं प्रतिपादितं भवति, "निष्क्रियं निष्कलं शान्तम्" इति श्रुतेः।

तदेवं शिवशब्दव्युत्पत्तिपर्यालोचनेन प्राणिमात्रकल्याणकरम्, उत्कृष्टगुणविशिष्टम्, अनादिमलत्रयरहितम्, इच्छाद्यनन्तशक्त्याश्रयम्, सर्वजगदाधारम्, निर्विकारम्, स्वप्रकाशम्, परब्रह्मचैतन्यमेवात्र शिवशब्दार्थ इति निर्णीयते[3]।

एतादृशमहिमान्वितं चेदं शिवनाम महापातकपर्वतस्य दावाग्निः, संसाराब्धेस्तरणिः, संसारपादपस्य कुठारः, पापदावानलार्दितानां पीयूषधारा

---

१. श्वे. उ. ६।८

२. वा. शु. त. १।२४-२६

३. शेतेऽस्मिन् जगदीहते दिशति च श्रेयः प्रजानामसौ
शान्तिं याति समस्तमङ्गलगुणग्रामस्य सीमायते।
इच्छाशक्तिमुपैति निर्मलतरश्चास्ते प्रकृत्येति च
व्याचष्टे शिवनाम यस्य चरितं तस्मै परस्मै नमः॥ (वी. आ. च., पृ. १७५)

चेति महर्षिणा व्यासेन शिवमहापुराणे शिवनाममाहात्म्यमुपवर्णितम्[1]। तस्मादेतादृशमहिमान्वि-'तशिव'इत्यक्षरद्वययुक्तत्वादेवायं पञ्चाक्षरो मन्त्रो मन्त्रान्तरेभ्यो वैशिष्ट्येन विराजतेतराम्।

ननु—"शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः"[2] इत्यमरसिंहोक्त्या परशिवस्य बहूनां पर्यायनाम्नां विद्यमानत्वात् कथं शिवशब्दस्यैव परब्रह्मवाचकत्व-मित्युच्यते? इति चेन्न, मुख्यगौणवृत्त्या व्यवस्थापनात्। तथाहि—"अयं मे विश्वभेषजोऽयं मे शिवाभिमर्शनः"[3], "नमः शिवाय च शिवतराय च"[4], "अपि वा यश्चाण्डालः शिव इति वाचं वदेत् तेन सह संवदेत् तेन सह संवसेत् तेन सह भुञ्जीत"[5], "शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्याज्य"[6], "शिवं प्रशान्तममृतं ब्रह्मयोनिम्"[7], "शिवतत्त्वं महासेन निष्कलं चेति कीर्तितम्"[8], "महापातकविच्छित्यै शिव इत्यक्षरद्वयम्। अलं नमस्क्रियायुक्तो मुक्तये कल्पितो मनुः॥"[9], "सत्यज्ञानपरानन्दस्वरूपस्य शिवस्य तु। असंपृक्त्या शिवस्यायं शिवशब्दस्तु वाचकः॥ सर्वसम्बन्धवत्त्वेन सम्पूर्णः शिवसंज्ञितः। जीवेशत्वादि-रहितः स्वप्रभः केवलः शिवः॥"[10], "शिवनाम मुखे यस्य सदा शिव शिवेति च। पापानि न स्पृशन्त्येव खदिराङ्गारकं यथा॥", "श्रीशिवाय नमस्तुभ्यं मुखं व्याहरते यदा। तन्मुखं पावनं तीर्थं सर्वपापविनाशकम्॥"[11] इत्यादिश्रुत्यागम-स्मृतिपुराणवचननिचयप्रामाण्येन शिवशब्दस्य मुख्यवृत्त्या परब्रह्मवाचक-त्वम्, तदतिरिक्तभवादिशब्दानां तु सिंहो माणवक इत्यादिवद् गुणवृत्त्या परब्रह्मप्रकाशकत्वमित्यवधेयम्। तदुक्तमाचार्यवर्यैः—

शिव इत्यक्षरद्वन्द्वं परब्रह्मप्रकाशकम्।
मुख्यवृत्त्या तदन्येषां शब्दानां गौणवृत्तयः॥
तस्मान्मुख्यतरं नाम शिव इत्यक्षरद्वयम्।
सच्चिदानन्दरूपस्य शम्भोरमिततेजसः॥[12] इति।

तस्माच्छिव इत्यक्षरद्वयमपरिमितप्रकाशरूपस्य सच्चिदानन्दघनस्य पर-ब्रह्मणोऽत्यन्तं मुख्यं नाम। एतन्नामघटितत्वेनैव पञ्चाक्षरो मन्त्रस्तदभिधान-

---

१. शि. पु. विद्ये. २३।२३-४५
२. अ. को. १।१।३०
३. ऋ. १०।६०।१२
४. श्रीरुद्र., ८ अनुवाकः।
५. ब्र. सू. श्रीकण्ठ., शि. म. दी., पृ. ३
६. अ. शिखो. ३
७. कै. उ. ६
८. वा. शु. त. १।१५
९. सि. शि. ८।१०, ता. दी., पृ. ८६
१०. सि. शि. ८।१०, ता. दी., पृ. ८६
११. शि. पु. विद्ये. २३।६-७
१२. सि. शि. ८।१०-११

मित्युच्यते[१]। लोके कस्याश्चिद्व्यक्तेः सम्मुखीकरणे तदभिधानं यथा सहायकं भवति, तथा शिवाभिधानरूपोऽयं पञ्चाक्षरमन्त्रः शिवस्य सम्मुखीकरणसाधनम्, मन्त्राणां यजनीयदेवतानां प्रकाशकत्वात्। एवं शिवनामघटितोऽयं मन्त्रः शिववत् संसारमोचक इति मुमुक्षुभिः सर्वैरपि पञ्चाक्षरो जप्यः[२]।

एवं शिवाभिधानोऽयं मन्त्रः "तत्त्वमसि" इति महावाक्यवत् शिवजीवैक्यबोधकोऽपि भवति। तदुक्तं श्रीमता मरितोण्टदार्येण—"शिवजीवैक्यप्रकाशनार्थं" अत्र नमस्कारेण जीवत्वं शिवशब्देन परब्रह्मत्वम्, आयेत्यैक्यम् 'अय गतौ' इति धातोरिति भावः"[३] इति। अत्रेदं बोध्यम्—"नमः शिवाय" इति मन्त्रे यो नमःशब्दः स जीववाचकः, शिवशब्दश्च परब्रह्मवाचकः, तत्रत्यो यः 'अय'शब्दो वर्तते स उभयोरैक्यबोधकः। तदेवं पञ्चाक्षरमन्त्रो महावाक्यवत् शिवजीवैक्यबोधको भवति। अयमेवार्थो मायिदेवेनापि—

नमःपदं तत्खलु जीववाचि शिवःपदं तत्परमात्मवाचि।
अयेति तादात्म्यपदं तदेतद् नमः शिवायेति जगाद मन्त्रः॥

अङ्गं नमःपदमसौ शिव एव लिङ्गं
सम्बन्ध एष यदयेति पदं तदुक्तम्।
लिङ्गाङ्गसङ्गमपदत्रयबोधनार्थं
मन्त्रोऽयमेवमभिधास्यति मन्त्रराजः॥[४] इति।

तस्मादस्य मननेन संसारबन्धनिवृत्तिः, लिङ्गाङ्गसामरस्यरूपं निःश्रेयसं च प्राप्यते। एतादृशमहिमान्वितत्वादेवास्य मन्त्रान्तराद् वैशिष्ट्यम्।

पञ्चाक्षरस्य पञ्च नामानि

एतन्महिमाशालिनोऽस्य मन्त्रस्यागमादिशास्त्रेषु—मूलम्, विद्या, शिवः, शैवसूत्रम्, पञ्चाक्षर इति च पञ्च नामानि कीर्तितानि[५]। परशिवस्य

---

१. तस्याभिधानमन्त्रोऽयमभिधेयश्च स स्मृतः।
अभिधानाभिधेयत्वान्मन्त्रात् सिद्धः परः शिवः॥ (सि. शि. ८।६)

२. एतन्नामावलम्बेन मन्त्रः पञ्चाक्षरः स्मृतः।
यस्मादतः सदा जप्यो मोक्षकाङ्क्षिभिरादरात्॥
यथाऽनादिर्महादेवः सिद्धः संसारमोचकः।
तथा पञ्चाक्षरो मन्त्रः संसारक्षयकारकः॥ (सि. शि. ८।१२-१३)

३. सि. शि. ८।७, ता. दी. पृ. १२३

४. अ. सू. ६।४५-४६

५. मूलं विद्या शिवः शैवसूत्रं पञ्चाक्षरस्तथा।
एतानि पञ्च नामानि पञ्चाक्षरमहामनोः॥ (सि. शि. ८।२३)

सकलतत्त्वमूलकारणत्वात् तद्वाचकः पञ्चाक्षरोऽपि सकलप्रपञ्चस्य समस्त-वर्णसमाम्नायस्य च कारणं भवतीत्यस्य मूलमिति नाम। तस्मात् "नमः शिवाय" इत्यात्मकेभ्यः पञ्चाक्षरेभ्यः क्रमशः सद्योजातवामदेवाघोरतत्पुरुषे-शानाख्याः पञ्चब्रह्ममूर्तयः, गन्धरसरूपस्पर्शशब्दाख्याः पञ्चतन्मात्राः, पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्चमहाभूतानि, घ्राणजिह्वाचक्षुस्त्वक्श्रोत्रा-ख्यानि ज्ञानशक्तिरूपाणि पञ्चज्ञानेन्द्रियाणि, उपस्थपायुपादपाणिवागाख्यानि क्रियाशक्तिरूपाणि पञ्चकर्मेन्द्रियाणि समुद्भूतानि। एवमेव प्रपञ्चे पञ्चप्रकारेण यानि विशेषतः प्रसिद्धानि, तानि सर्वाण्यपि स्वर्णकुण्डलन्यायेन पञ्चाक्षरमयानि, अर्थात् तत्प्रकाश्यानीति विज्ञेयम्[1]। एवमेव सप्तकोटिसंख्याकानां मन्त्राणामुद्ग-मस्य विलयस्य चायमेव स्थानभूतम्। तदुक्तमागमे—

सप्तकोटिमहामन्त्रा रूपवक्त्रैरनेकधा।
पञ्चाक्षरे प्रलीयन्ते पुनस्तस्माद्विनिर्गताः॥[2] इति।

तदेवं प्रपञ्चस्य वर्णसमाम्नायस्य च कारणत्वादयं मूलं मूलमन्त्रमिति[3] वा कथ्यते। पञ्चाक्षरस्य सर्वकारणत्वं चन्द्रज्ञानागमे[4] विस्तरेण प्रपञ्चित-मस्ति। तद्विस्तरो जिज्ञासुभिस्तत्रैव द्रष्टव्यः।

पूर्वोक्तप्रकारेण शिवजीवयोरैक्यबोधकस्यास्य मन्त्रस्य मननेन शुद्ध-विद्याया उदयो भवति। एतादृशविद्याहेतुत्वादेवास्य विद्याशब्देन व्यपदेशः "आयुर्वै घृतम्" इतिवदवगन्तव्यः। एवमेवास्य मननेनानेककल्याणगुणपरम्पराणां प्राप्यमाणत्वादस्य शिव इति व्यवहारः। शिवसम्बन्धि सर्वमपि विषयजातं साररूपेणात्रैव निहितमिति, शिवस्य सूचकत्वाच्चायं शैवसूत्रमिति,[5] पूर्वोक्तैः

---

१. सि. शि. ८।१४-१६

२. च. ज्ञा., क्रि. ८।४५

३. मूलत्वात् सर्वमन्त्राणां मूलाधारसमुद्भवात्।
मूलस्वरूपलिङ्गत्वान्मूलमन्त्र इति स्मृतः॥ (यो. शि. उ. २।८-९)

४. च ज्ञा , क्रि. ८।१४-४१

५. सन्निधानात् समस्तेषु जन्तुष्वपि च सन्ततम्।
सूचकत्वाच्च रूपस्य सूत्रमित्यभिधीयते॥ (यो. शि. उ. २।१०-११)

पञ्चभिरक्षरैर्युक्तत्वाच्च पञ्चाक्षर इति कथ्यते। एवमस्य पञ्चभिर्हेतुभिः पञ्च नामानि संजातानि।

षडक्षरमन्त्रः

ॐ कारपूर्वो मन्त्रोऽयं पञ्चाक्षरमयः परः।
शैवागमेषु वेदेषु षडक्षर इति स्मृतः॥[१]

इत्याचार्योक्त्या पूर्वोक्तः पञ्चाक्षरमन्त्रो यदा प्रणवसम्बद्धो भवति, तदा स एव षडक्षर इत्युच्यते। प्रणवोऽपि शिवस्य वाचक एव। अतः—"तस्य वाचकः प्रणवः"[२] इति महर्षिणा पतञ्जलिनाप्युक्तम्। प्रपूर्वकात् "णू स्तवने" (तुदा० १४८९) इत्यस्माद्धातोर्निष्पन्नोऽयं प्रणवः शिवस्य विशेषस्तुतिपर आद्यो वर्णः। अतः "प्रकर्षेण नूयते स्तूयतेऽनेनेति, नौति स्तौतीति वा प्रणव ॐकारः"[३] इति भोजदेवोक्तव्युत्पत्त्या ॐकारेणैव शिवस्य विशिष्टा स्तुतिर्जायत इति विज्ञायते। महर्षिणा व्यासेन—

प्रो हि प्रकृतिजातस्य संसारस्य महोदधेः।
नवं नावान्तरमिति प्रणवं वै विदुर्बुधाः॥

प्रः प्रपञ्चो न नास्ति वो युष्माकं प्रणवं विदुः।
प्रकर्षेण नयेद् यस्मान्मोक्षं वा प्रणवं विदुः॥[४]

इति शिवमहापुराणे प्रणवजापकस्य प्रपञ्चो नास्तीति तदक्षरार्थं निरूप्य स एव संसाराब्धेस्तरणिरित्यपि समर्थितम्। अस्मादेव ॐकारात् पञ्चाक्षरस्याप्युत्पत्तिर्भवति। अतोऽयं पञ्चाक्षरकल्पतरोर्बीजभूतः[५]। प्रणवांशीभूताकारो

---

१. सि. शि ८।१७

२. यो. सू. १।२७

३. यो. सू. भो. वृ. १।२७

४. शि. पु. विद्ये. १७।४-५

५. प्रथमं तारकारूपं द्वितीयं दण्ड उच्यते।
तृतीयं कुण्डालाकारं चतुर्थं चार्धचन्द्रकम्॥
पञ्चमं दर्पणाकारं षष्ठं ज्योतिःस्वरूपकम्।
नकारस्तारकारूपं मकारो दण्ड उच्यते॥
शिकारः कुण्डलाकारो वकारश्चार्धचन्द्रकः।
यकारो दर्पणाकार ॐकारः पञ्चवर्णराट्॥ (सि. शि. ८।१८, तत्त्व., पृ. १२७)

कारमकाराणां सच्चिदानन्दवाचकत्वात् प्रणवेनैकवर्णेन सच्चिदानन्दलक्षणमद्वितीयं निष्प्रपञ्चकं परं ब्रह्म प्रकाश्यते[1]।

अत्रेदं बोद्धव्यम्—प्रकृत्या 'हंसः-हंसः' इति प्रवर्तनपरः श्वासः सद्गुरोरुपदेशेन यदा 'सोऽहम्' रूपेण परिवर्तते, तदा स परमात्मनो मन्त्रो भवति। अस्य च प्रतिदिनं षट्शताधिकमेकविंशतिसहस्रसंख्याको जपो जायते। तत्र वेद्यरूपस्य चन्द्रबीजस्य सकारस्य, वेदनरूपस्यार्कबीजस्य हकारस्य च त्यागाद् वृत्तिशून्यवेदकमात्रप्रकाशकरूप ॐकार एवावशिष्यते। तदेवं प्रणवो निष्प्रपञ्चब्रह्मप्रतिपादक इति निश्चीयते[2]।

अथर्वशिर उपनिषदि—"यो वै रुद्रः स भगवान्" इत्युपक्रम्य "य ओङ्कारः स प्रणवः, यः प्रणवः स सर्वव्यापी, यः सर्वव्यापी सोऽनन्तः, योऽनन्तस्तत् तारम्, यत् तारं तत्सूक्ष्मम्, यत्सूक्ष्मं तच्छुक्लम्, यच्छुक्लं तद् वैद्युतम्, यद् वैद्युतं तत्परं ब्रह्म, यत्परं ब्रह्म स एकः, य एकः स रुद्रः, यो रुद्रः स ईशानः, य ईशानः स भगवान् महेश्वरः"[3] इति प्रणव एव सच्चिदानन्दात्मकं परब्रह्मेत्युपदिष्टम्।

एवं षडक्षरमन्त्रस्थेन ॐकारेण परशिवस्य निष्कलस्वरूपम्, पञ्चाक्षरेण च सकलं पञ्चब्रह्मस्वरूपमभिव्यज्यत इति षडक्षरमन्त्रः परशिवस्य सकलनिष्कलोभयस्वरूपप्रतिपादक इति विज्ञेयम्। तदुक्तमाचार्यैः—

प्रणवेनैव मन्त्रेण बोध्यते निष्कलः शिवः।
पञ्चाक्षरेण मन्त्रेण पञ्चब्रह्मतनुस्तथा ॥
निष्कलः संविदाकारः सकलो विश्वमूर्तितः।
उभयात्मा शिवो मन्त्रे षडक्षरमये स्थितः ॥[4] इति।

---

१. प्रणवेनैकवर्णेन परब्रह्म प्रकाश्यते।
अद्वितीयं परानन्दं शिवाख्यं निष्प्रपञ्चकम् ॥ (सि. शि. ८।१९)

२. परमात्ममनुर्ज्ञेयः सोऽहंरूपः सनातनः।
जायते हंसयोर्लोपादोमित्येकाक्षरो मनुः ॥ (सि. शि. ८।२०)

३. अ. शिर. २।३

४. सि. शि. ८।२१-२२

तस्मादयं मन्त्रः शिवानुग्रहकारकः शिवकैवल्यप्रदायकश्च भवति[१]।

एतानि षडक्षराणि मूलाधार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्धि-आज्ञाख्येषु षट्चक्रेषु स्थितानामाचारलिङ्ग-गुरुलिङ्ग-शिवलिङ्ग-जङ्गमलिङ्ग-प्रसादलिङ्ग-महालिङ्गाख्यानां षड्लिङ्गानां बीजाक्षराणीति श्रीमन्तो मायिदेव-महोदया ऊचुः[२]।

अयं प्रणवसहितः पञ्चाक्षरमन्त्रो विभिन्नैर्बीजाक्षरैर्युक्तः सन् प्रसाद-पञ्चाक्षर-मायापञ्चाक्षर-सूक्ष्मपञ्चाक्षरस्थूलपञ्चाक्षर-मूलपञ्चाक्षरनामभिर्निगद्यते। एते च क्रमश एकादश-दश-नव-अष्ट-षडक्षरमया भवन्ति[३]।

मन्त्रजपाधिकारः

दीक्षापूर्वं गुरोर्लब्ध्वा मन्त्रमाज्ञां समाहितः।
सङ्कल्प्य च जपेन्नित्यं पुरश्चरणपूर्वकम् ॥[४]

इति चन्द्रज्ञानागमोक्त्यनुसारं विनैव मन्त्रदीक्षां न कोऽपि मन्त्रजपाधिकारी भवति। अतोऽत्र सिद्धान्ते पूर्वोक्ताचार्यः स्वगोत्रीयेभ्यः स्त्रीपुरुषेभ्यो मन्त्र-दीक्षावसरे तत्तदधिकारानुसार तत्तद्बीजाक्षरसमायुक्तं पञ्चाक्षरमहामन्त्रं निगूढं समुपदिश्य तद्देवताच्छन्दोन्यासादिकं निबोधयति। एवं गुरुकृतमन्त्रदीक्षा-सम्पन्न एव मन्त्रजपाधिकारीति विज्ञेयम्। अन्यथा—

पुस्तके लिखितान् मन्त्रानालोक्य प्रजपन्ति ये।
ब्रह्महत्यासमं तेषां पातकं परिकीर्तितम् ॥

इत्युक्त्यनुसारं दोषभाग् भवति। अतो मन्त्रजपात् पूर्वं सर्वैरपि मन्त्रदीक्षा परिग्रहीतव्या

---

१. ॐकारः सर्वमन्त्राणां मन्त्रराट् परिकीर्तितः।
पञ्चाक्षरयुतो देवि साक्षात् सायुज्यकारणम् ॥ (वी. आ. च., पृ. १६७)

२. श. सू. ६।४७-५२

३. ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं नमः शिवाय। (प्रसादपञ्चाक्षरः)
ॐ ह्रां ह्रीं ह्रूं ह्रैं नमः शिवाय। (मायापञ्चाक्षरः)
ॐ ह्रां ह्रीं ह्रूं नमः शिवाय। (सूक्ष्मपञ्चाक्षरः)
ॐ ह्रां ह्रीं नमः शिवाय। (स्थूलपञ्चाक्षरः)
ॐ नमः शिवायः। (मूलपञ्चाक्षर)

४. च. ज्ञा , क्रि. ८।४८

जपस्तत्प्रकारश्च

"तज्जपस्तदर्थभावनम्"[1] इति महर्षेः पतञ्जलेर्वचनानुसारमर्थानुसन्धानपूर्वकं मुहुर्मुहुर्मन्त्रोच्चारणमेव जपः। अत एव पूज्यपादा रेणुकाचार्याः—"जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा"[2] इत्यसकृदावृत्तिलक्षणाभ्यास एव जप इत्युपदिष्टवन्तः। निरन्तरं क्रियमाणोऽयमभ्यास एव 'जपयज्ञः' इत्यभिधीयते। वीरशैवीयेषु [3]पञ्चयज्ञेष्वन्यतमोऽयं जपयज्ञः। पशुहिंसादोषदूषितेभ्यः सोमयागादिभ्योऽस्य प्राशस्त्यम्। अत एव भगवता कृष्णेन—"यज्ञानां जपयज्ञोऽस्मि"[4] इत्युक्तम्। अयं जपो वाचिक-उपांशु-मानसिकभेदेन त्रिविधः। अत्र तत्तद्विधिना जपावसरे तन्त्रोक्तम्—

> अतिह्रस्वो व्याधिहेतुरतिदीर्घो वसुक्षयः।
> अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् ॥[5]

इत्युक्तिमनुसृत्य नातिह्रस्वो नातिदीर्घश्चोच्चारो यथा भवेत्तथोच्चारः कर्तव्यः।

वाचिकजपः

उदात्तानुदात्तस्वरितस्वरैः सुव्यक्तवर्णोच्चारवान् पार्श्वस्थानां सुस्पष्टतया श्रवणगोचरो मन्त्राभ्यासो वाचिको जप उच्यते। उपर्युक्तेषु त्रिविधेषु जपेषु कनिष्ठोऽप्ययं जपो मनोवाक्कायजानां पापानां प्रभञ्जको भवति[6]। अस्यानवरताभ्यासेनातिचपलमपि चित्तं समाहितं भवति। अतः प्रारम्भिकावस्थायां जपाभ्यासनिरतैरस्यैवावलम्बनं कर्तव्यम्।

---

१. यो. सू. १।२८

२. सि. शि. ९।२३

३. पञ्चधा कथ्यते सद्भिस्तदेव भजनं पुनः।
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकम् ॥ (सि. शि. ९।२१)

४. भ. गी. १०।२५

५. हि. वि. को., पृ. १७५

६. यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः।
मन्त्रमुच्चारयेद् वाचा वाचिकोऽयं जपः स्मृतः ॥ (च. ज्ञा., क्रि. ८।५७)
श्रूयते यस्तु पार्श्वस्थैर्यथा वर्णसमन्वयः।
वाचिकः स तु विज्ञेयः सर्वपापप्रभञ्जनः ॥ (सि. शि. ८।२७-२८)

उपांशुजपः

जिह्वाऽधरपुटपरिस्पन्देन ईषदुच्चरितः स्वयं शब्दग्रहणमात्रयोग्यः पार्श्वस्थैरश्रूयमाणो मन्त्राभ्यास उपांशुजपः[1]। वाचिकादुत्कृष्टो मानसिकान्निकृष्टश्चायं जपो मध्यमजप इत्युच्यते। अनेन जपेन शनैः शनैर्मनःस्थैर्यं संजायते।

मानसिकजपः

जिह्वोष्ठचालनमन्तरा शनैः शनैर्वर्णाद्वर्णं पदात्पदमर्थानुचिन्तनपुरःसरं मनसा क्रियमाणो मन्त्राभ्यासो हि मानसिको जपः[2]। अयं सर्वोत्कृष्टो जपः। तदुक्तमागमे—

वाचिकस्त्वेक एव स्यादुपांशुः शतमुच्यते।
सहस्रं मानसं प्रोक्तं सगर्भस्तच्छताधिकः ॥[3] इति।

मनुनाप्युक्तम्—

विधियज्ञाज्जपो यज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥[4] इति।

निरन्तरं क्रियमाणेनानेनैव मानसिकेन जपेन मनःशुद्धिः शिवजीवैक्यज्ञानं चोत्पद्यते, साधको मुक्तश्च भवति।

त्रिविधोऽप्ययं जपः पुनरगर्भ-सगर्भ-सध्यानभेदेन त्रिधा भवति। तत्र प्राणायामरहितोऽगर्भः,[5] प्राणायामसहितः सगर्भः,[6] शिवध्यानयुक्तश्च सध्यान-

---

१. जिह्वामात्रपरिस्पन्दादीषदुच्चारितोऽपि वा।
अपरैरश्रुतः स्वेन श्रुतश्चोपांशुरुच्यते ॥ (च. ज्ञा., क्रि. ८।५८)
ईषत्स्पृष्ट्वाऽधरपुटं यो मन्दमभिधीयते।
पार्श्वस्थैरश्रुतः सोऽयमुपांशुः परिकीर्तितः ॥ (सि. शि. ८।२८)

२. धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम्।
शब्दार्थचिन्तनं भूयः कथ्यते मानसो जपः ॥ (च. ज्ञा., क्रि. ८।५९)
अस्पृष्ट्वाऽधरमस्पन्दि जिह्वाग्रं योऽन्तरात्मना।
भाव्यते वर्णरूपेण स मानस इति स्मृतः ॥ (सि. शि. ८।२९)

३. च. ज्ञा., क्रि. ८।६०

४. म स्मृ. २।८५

५. प्राणायामेन रहितो ह्यगर्भो जप उच्यते। (च. ज्ञा., क्रि. ८।६१)

६. प्राणायामसमायुक्तः सगर्भो जप उच्यते। (च ज्ञा., क्रि. ८।६१)

जप इति विज्ञेयम् । सगर्भजपावसरे चत्वारिंशद्वारं पञ्चवारं त्रिवारं वा यथेच्छं प्राणायामं कृत्वा जपो विधेयः[1] । एतेष्वप्युत्तरोत्तरो बलीयान् । तदुक्तं चन्द्रज्ञानागमे—

अगर्भं वा सगर्भं वा सगर्भस्तु प्रशस्यते ।
सगर्भादपि साहस्रं सध्यानो जप उच्यते ॥[2] इति ।

अतः सगर्भः सध्यानश्च जपः कर्तव्यः ।

जपविधिः

विधिमुत्सृज्य यथाकथञ्चिज्जपेन समुचितो लाभो न स्यादित्यागमादिशास्त्रेषु स्थान-आसन-दिक्-प्राणायाम-न्यास-देवतादिकं सम्यगुपदिष्टम् । तदनुसारमत्र सारेण निरूप्यते ।

संसारार्णवभयनिवारकस्यास्य पञ्चाक्षरमहामन्त्रस्य वामदेव ऋषिः, पङ्क्तिश्छन्दः श्रीसदाशिवो देवता, ॐ बीजम्, उमा शक्तिः, शिव इति कीलकं विज्ञेयम् । तदुक्तमागमे—

वामदेव ऋषिश्चास्य पङ्क्तिश्छन्द उदाहृतम् ।
देवता स शिवः साक्षात् प्रणवो बीज उच्यते ॥
उमा शक्तिरिति प्रोक्ता न्यासश्चैव षडक्षरैः ।[3] इति ।

मन्त्रजपावसरे उपर्युक्त-ऋष्यादीनां स्वशरीरस्य विभिन्नस्थानेषु भावनमेव न्यास इत्युच्यते । तत्प्रकारो यथा—स्वदक्षिणहस्तस्य मुष्टिं बद्ध्वा तदङ्गुष्ठाग्रेण शिरः स्पृशन् तत्र मन्त्रद्रष्टारं महर्षिम्, मुष्टिं विसृज्य अङ्गुष्ठतर्जनीभ्यां मुखे छन्दः, अङ्गुष्ठमध्यमाभ्यां हृदये देवताम्, अङ्गुष्ठानामिकाभ्यां नाभौ बीजम्, अङ्गुष्ठकनिष्ठिकाभ्यां गुह्ये शक्तिम्, पुनर्द्वयोर्हस्तयोस्तर्जनीव्यतिरिक्तां मुष्टिं बद्ध्वा तर्जनीभ्यां मस्तकं परिक्रम्य पादयोः कीलकमित्येवंप्रकारेण ऋष्यादयः स्वाङ्गेषु भावनीयाः । तदुक्तम्—

---

१. चत्वारिंशत्समावृत्तिं प्राणायामं तु संस्मरेत् ।
मन्त्रं मन्त्रार्थविधिमानशक्तः शक्तितो जपेत् ।
पञ्चकं त्रिकमेकं वा प्राणायामं समाचरेत् ॥ (च. ज्ञा., क्रि. ८।६२-६३)

२. च. ज्ञा., क्रि. ८।६३-६४

३. च. ज्ञा., क्रि. ८।११

ऋषिं मूर्ध्नि मुखे च्छन्दः देवतां हृदि विन्यसेत् ।
आधारे बीजशक्तिं च पादयोः कीलकं न्यसेत् ॥[1] इति ।

अयं च करन्यास-देहन्यास-अङ्गन्यासभेदेन त्रिविधः। पुनरयमाश्रमभेदेन सृष्टिन्यासः, स्थितिन्यासः, संहारन्यासश्चेति विभज्यते। श्रीमन्तो नीलकण्ठ-शिवाचार्याः—"गृहस्थानां सृष्टिन्यासरूपम्, ब्रह्मचारिणां स्थितिन्यासरूपम्, यतिवनस्थानां संहाररूपम्, वीरशैवानां तु यथारुचि त्रयमपि"[2] इति वीरशैवानां विनैवाश्रमभेदं यथेच्छं न्यासः कर्तव्य इत्युपदिष्टवन्तः। अथाप्ये-तद्विषये मन्त्रदीक्षावसरे स्वस्वगुरूपदिष्टमार्गानुसरणमेव वरम्। एवं न्यासादि-पद्धतिं सम्यग् ज्ञात्वैव विधिवज्जपो विधेयः।

जपस्थानम्

चन्द्रज्ञानागमे जपार्थं विभिन्नानि स्थानानि प्रतिपादितानि। तदनुसारं गृहे, गोष्ठे, पुण्यारण्ये, आरामे, रम्ये पर्वते, नदीतीरे, देवालये, तत्रापि सूर्य-अग्नि-गुरु-इन्दु-दीप-जल-विप्र-गवां च सन्निधौ क्रियमाणो जपः क्रमशः शत-सहस्र-अयुत-लक्ष-कोटिगुणः फलदायको भवति[3]। पुनस्तत्रैव—

यदिष्टलिङ्गं संपश्यन् वामहस्तस्थितं परम्।
जपते तत्फलं वक्तुं न मया शक्यते गुरो ॥[4]

इत्युक्तत्वाद् उपर्युक्तस्थानेषु यत्र कुत्राप्युपविश्य स्ववामहस्तपीठस्थितस्य स्वेष्टलिङ्गस्य साक्षित्वे क्रियमाणो जपोऽनन्तफलदायक इति विज्ञायते। अतो वीरशैवैः सदा स्वेष्टलिङ्गसन्निधावेव जपो विधीयते।

जपोपयुक्तान्यासनानि दिशश्च

उपर्युक्तेष्वन्यतमस्थाने "कृष्णाजिन-व्याघ्रचर्म-कुशासन-कम्बलासनेष्वन्य-तममासनमास्तीर्य तदुपरि सुखासनेन सिद्धासनेन वा प्राङ्मुख उदङ्मुखो[6] वोपविश्य जपाभ्यासं कुर्यात्। इदमेव वर्तते शास्त्रीयं विधानम्।

---

१. लि. धा. च., पृ. २३४

२. अ. वि., पृ. ९५

३. च. ज्ञा., क्रि. ८।७२, ७३, ७५

४. च. ज्ञा., क्रि. ८।७४

५. कृष्णाजिने भवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्मणि ।
कुशासने ज्ञानसिद्धिः सर्वसिद्धिस्तु कम्बले ॥

६. प्राङ्मुखोदङ्मुखो वापि मौनी चैकाग्रमानसः ।

जपोपयुक्ता माला:

पञ्चाक्षरजपाभ्यासेऽङ्गुलिरेखा-पुत्रजीवि - शङ्खमणि - प्रवाल - स्फटिक-मौक्तिक-पद्माक्ष-सौवर्ण-कुशग्रन्थि-रुद्राक्षाणां च मालाः प्रशस्ताः। अत्रापि पूर्वपूर्वापेक्षयोत्तरोत्तरमालाः प्रशस्ततरा विज्ञेयाः। रुद्राक्षमाला तु प्रशस्ततमैव, यतो हि साऽनन्तफलप्रदायिका।

अत्रापि त्रिंशदक्षैः कृता माला धनदा, सप्तविंशतिसंख्याकैरक्षैः पुष्टिप्रदा, पञ्चविंशतिसंख्याकैरक्षैर्मुक्तिप्रदा, पञ्चदशभिरक्षैस्त्वभिचारफलप्रदा भवति।

एवमुपर्युक्तास्वन्यतमयाऽक्षमालया जपाभ्यासावसरेऽङ्गुष्ठेन जपकरणे मोक्षप्राप्तिः, तर्जन्या शत्रुनाशः, मध्यमया धनप्राप्तिः, अनामिकया शान्तिप्राप्तिः, कनिष्ठिकया चाकर्षणं भवति[1]। तस्मात् तत्तत्फलं विज्ञाय श्रेयःकाङ्क्षिभिरुपयुक्तया मालयोपयुक्तया चाङ्गुल्या जपः कर्तव्यः।

जपकाले पालनीया नियमाः

जपाभ्यासी साधकः कदाचिद् उष्णीषी, कञ्चुकी, नग्नः, मुक्तकेशः, गलावृतः, अपवित्रकरः, अशुद्धः, विलपंश्च जपं नैव कुर्यात्। एवं च जपकर्मणि क्रोधम्, मदम्, क्षुधाम्, तन्द्राम्, निष्ठीवनम्, विजृम्भणम्, श्वानादीनां दर्शनं च परिवर्जयेत्। प्रमादेनोपर्युक्तदोषसम्भवे तच्छान्त्यर्थमाचामेत्, साम्बं वा शिवं स्मरेत्, ज्योतींषि वा पश्येत्, प्राणायामं वा कुर्यात्।

किञ्च, अश्नन्, शयानः, गच्छन्, उत्तिष्ठन्, रथ्यायाम्, अशिवस्थाने च स्थितः कदापि न जपेत्। एवमेव प्रसारितपादः, रथ्याधिरूढः, चिन्ताव्याकुलो वा जपं न कुर्यात्[2]। अपि च, गुरूपदिष्टो मन्त्रः सर्वदा गोपनीयः, कदाचित् कस्यापि स न वाच्यः[3]। जपकालेऽक्षरलोपादिकं च यथा न भवेत्, तथा शुद्धोच्चारणपूर्वक एव पञ्चाक्षराभ्यासो विधेयः।

मन्त्रसम्बन्धिनो दोषाः

उपर्युक्ता जपकालीना नियमा सर्वैः सावधानं परिपालनीयाः। अन्यथा मूक-सुप्त-मृत-नग्न-वीर्यहीन-वृथाफल-भुजङ्ग-कीलित-शून्याख्या दोषाः

तत्पूर्वाभिमुखं वश्यं दक्षिणं चाभिचारिकम्।
पश्चिमं धनदं विद्यादुत्तरं शान्तिदं भवेत्॥ (च. ज्ञा., क्रि. ८।५३,७६)

१. च. ज्ञा., क्रि. ८।६५-७०

२. च. ज्ञा., क्रि. ८।७७-८१

३. च. ज्ञा., क्रि. ८।८२

सम्भवन्ति। तत्र न्यासं विना क्रियमाणो मूकः, विनैवासनं क्रियमाणः सुप्तः, नमः, स्वाहा, वषट्, वौषट्, हुं, फट्—इत्यादि पल्लवविरहितो नग्नः, प्रणवो हि मन्त्रस्य शिरः, अतस्तद्विरहितो मृतः, अधिकवर्णो वीर्यहीनः, गुरोरुपदेशं विना जप्यमानो वृथाफलः, ऋषि-देवता-छन्दोहीनो भुजङ्गः, मध्ये बीजाक्षरै रहितः कीलितः, जपकाले उच्चरितस्य मन्त्रस्यान्यश्रुतिगोचरे सति शून्य इत्येते दोषा भवन्ति[1]। अतो दुष्टानां विकलाङ्गानां च मन्त्राणां जपेन फलाभावात् साधकैः सावधानैर्भाव्यम्।

किञ्च, एतदतिरिक्तम् अभक्त-अक्षरभ्रान्त-लुप्त-छिन्न-ह्रस्व-दीर्घ-कथन-स्वप्नकथनाख्या दोषा अप्युच्यन्ते। तत्र मन्त्रे श्रद्धाराहित्येऽभक्तः, शिष्यस्य प्रमादेन मन्त्राक्षराणां वैपरीत्येऽक्षरभ्रान्तः, कस्यचिन्मन्त्राक्षरस्य लोपे लुप्तः, संयुक्ताक्षरे मन्त्रे कस्यचिद्वर्णस्य विश्लेषे छिन्नः, दीर्घस्य मन्त्राक्षरस्य ह्रस्वोच्चारणे ह्रस्वः, ह्रस्वस्य दीर्घोच्चारणे दीर्घः, गोपनीयस्य गुरुमन्त्रस्यान्यकथने कथनः, स्वप्ने च कथने स्वप्नकथन इति दोषा भवन्ति[2]।

उपर्युक्तेषु दोषेष्वक्षरभ्रान्तादिस्वप्नकथनान्तानां दोषाणां निवृत्त्यर्थं पुनर्गुरुद्वारा मन्त्रोपदेशो ग्राह्यो भवति। प्राथमिकोऽभक्तदोषस्तु स्वस्यैव श्रद्धातिशयेन निवर्तते। अत उपर्युक्तदोषदूषितानां विकलाङ्गानां च मन्त्राणां जपे फलोत्पत्त्यभावात् सर्वैरपि साधकैः शुद्धं सश्रद्धं च मन्त्रोच्चारणं कार्यम्।

पुरश्चरणं नित्यजपश्च

"पुरोऽग्रतश्चरणं पुरश्चरणम्" इति व्युत्पत्त्या स्वेष्टदेवतामन्त्रफलसिद्ध्यर्थं तद्देवतापूजापूर्वकं नियतसंख्यया तन्मन्त्रजप-होम-तर्पण-अभिषेक-ब्राह्मणभोजन-रूपपञ्चाङ्गकर्माचरणमेव पुरश्चरणम्। तद्विधानमुक्तं मुण्डमालायाम्—

---

१. न्यासं विना भवेन्मूकः सुप्तः स्यादासनं विना।
पल्लवेन विना मन्त्रो नग्नस्तु परिकीर्तितः॥
शिरोहीनो मृतः प्रोक्तो वृथा मन्त्रो गुरुं विना।
ऋषिदैवतच्छन्दोभिर्वर्जितस्तु भुजङ्गमः॥
मृतो दुष्टाय दत्तो यो निर्वीर्यश्चाधिकाक्षरः।
अन्तरं नैकबीजेन व्याप्तः कीलित उच्यते॥
यस्य जप्यं श्रृणोत्यन्यः स मन्त्रः शून्य उच्यते। (लि. धा. च., पृ. २३४-२३५)

२. वी. अ. वि., पृ. ६४

यस्य यावान् जपः प्रोक्तस्तद्दशांशमनुक्रमात् ।
तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्याद् दिने दिने ॥[1] इति ।

अस्यायं भावः—यस्य मन्त्रस्य यावान् जपो निर्दिष्टस्तज्जपानन्तरं तद्दशमांशेन होमः, होमदशांशेन तर्पणम्, तर्पणदशांशेनाभिषेकः, अभिषेकदशांशेन च ब्राह्मणभोजनमित्येवंरूपं पुरश्चरणं भवति । चन्द्रज्ञानागमे—

जपेदक्षरलक्षं वै चतुर्गुणितमादरात् ।
युक्ताशी संयमी यः स पौरश्चरणिकः स्मृतः ॥[2]

इति पञ्चाक्षरमन्त्रस्य पुरश्चरणीया जपसंख्या समुपदिष्टा । तदनुसारं पञ्चाक्षर-मन्त्रे पञ्चाक्षराणि सन्ति । एकैकस्याक्षरस्य लक्षलक्षसंख्याजपेन पञ्चलक्ष-जपो जायते । पुनस्तस्मिन् चतुर्गुणिते विंशतिलक्षसंख्याको जपो भवति । एवं गुरुदीक्षानन्तरं युक्ताशी संयमी च भूत्वा स्वगृहस्य पूजामन्दिरे, अथवा कुत्रापि शास्त्रोक्ते पवित्रे क्षेत्रे[3] उपविश्य स्वेष्टलिङ्गस्य साक्षित्वे उपर्युक्तप्रकारेण नियमेन विंशतिलक्षसंख्याको जपः पूरणीयः । जपानन्तरं तत्तद्दशांशेन क्रमशो होम-तर्पण-अभिषेक-भोजनादिकं च सम्पादनीयम् ।

उपर्युक्तप्रकारेण जपानन्तरं होमादिकरणे यदि कश्चनाऽसमर्थश्चेत्—"यद्यदङ्गं विहीनं स्यात् तत्संख्याद्विगुणो जपः । कुर्वीत त्रिचतुःपञ्च यथासंख्यं द्विजादयः ॥"[4] इति कुलार्णवतन्त्रोक्त्यनुसारं द्विजो द्विगुणजपेन, क्षत्रियस्त्रिगुणजपेन, वैश्यश्चतुर्गुणजपेन, शूद्रश्च पञ्चगुणजपेन पुरश्चरणफलं विन्दते । अतो दीक्षितैः सर्वैरेकवारं स्वेष्टदेवतामन्त्रपुरश्चरणमवश्यमनुष्ठेयम् । अन्यथा—

---

१. हि. वि. को., पृ. १७६
२. च. ज्ञा., क्रि. ८।५०
३. पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तकम् ।
तीर्थप्रदेशाः सिन्धूनां सङ्गमः पावनं वनम् ॥
उद्यानानि विविक्तानि बिल्वमूलं तटं गिरेः ।
तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् ॥
अश्वत्थामलकीमूलं गोशाला जलमध्यतः ।
देवतायतनं कूलं समुद्रस्य निजं गृहम् ॥
साधनेषु प्रशस्तानि स्थानान्येतानि मन्त्रिणाम् ।
अथवा निवसेत् तत्र यत्र चित्तं प्रसीदति ॥ (हि. वि. को., पृ. १७४)
४. हि. वि. को., पृ. १७६

जीवहीनो यथा देही सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्तितः ॥[१]

इति वचनानुसारं पुरश्चरणं विना जप्यमानो मन्त्रो निर्जीवदेहवन्निष्फलो भवति । तस्मात्—

यः पुरश्चरणं कृत्वा नित्यजापी भवेत् पुनः ।
तस्य नास्ति समो लोके स सिद्धः सिद्धिदो भवेत् ॥[२]

इति चन्द्रज्ञानागमोक्त्यनुसारं विध्युक्तं पुरश्चरणमनुष्ठाय मन्त्रं सिद्धं कृत्वा नित्यं जपं कुर्यात् । तत्र —

ध्यात्वा सम्पूज्य मनसि बाह्ये वा परमेश्वरम् ।
जपं कुर्यात् प्रयत्नेन ध्यायन् साम्बं त्रियम्बकम् ॥
सहस्रं वा तदर्धं वा शतं वाऽथ जपेन्मनुम् ।
एवं यः कुरुते नित्यं स शिवो हि न संशयः ॥....
यावज्जीवं जपेन्नित्यमष्टोत्तरसहस्रकम् ।
अनश्नंस्तत्परो भूत्वा स याति परमां गतिम् ॥[३]

इत्याद्यागमोक्तादेशानुसारं प्रतिदिनं शतम्, पञ्चशतम्, सहस्रमित्यधिकाधिकेन संख्याकेन जपेन मानसी शुद्धिर्भवति शिवसायुज्यं च प्राप्यते ।

पञ्चाक्षरो न कस्यापि रिपुः

प्रत्येकं मन्त्रस्तावत् सुसिद्धः, सिद्धः, साध्यः, रिपुरित्येवं चतुर्विधो भवतीत्यागमेषु प्रतिपाद्यते । किन्त्वयं पञ्चाक्षरो न कस्यापि रिपुः । तदुक्तमागमे—

न कदाचन कस्यापि रिपुरेष महामनुः ।
सिद्धो वाऽथ सुसिद्धो वा साध्यो वाऽथ भविष्यति ॥[४] इति ।

---

१. हि. वि. को., पृ. १७४
२. च. ज्ञा., क्रि. ८।५१
३. च. ज्ञा., क्रि. ८।१२-१३, ४९
४. च. ज्ञा., क्रि. ८।८८

अत्र पुरश्चरणसिद्धेन गुरुणोपदिष्टो मन्त्रः सुसिद्धः, पुरश्चरणावसरे तत्सिद्धेः पूर्वमेव गुरुणोपदिष्टो मन्त्रः सिद्धः, विनैव पुरश्चरणं गुरुणोपदिष्टो मन्त्रस्तु साध्यः। तदुक्तम्—

सिद्धेन गुरुणाऽऽदिष्टः सुसिद्ध इति कथ्यते।
असिद्धेनापि वा दत्तः सिद्धः साध्यस्तु केवलः ॥[1] इति।

एवमयं मन्त्रः सर्वेषां कृते सुसिद्धः, सिद्धः, साध्य एव भवति, न तु कस्यापि रिपुः। अत उपदेशकेन गुरुणा साधितो भवत्वसाधितो वा, श्रद्धायुक्तेन शिष्येण जप्यमानस्त्ववश्यमेव सिद्धो भविष्यति। तस्मान्मन्त्रान्तरांस्त्यक्त्वा हृद्या पञ्चाक्षरीविद्यैव सर्वैः समाश्रयणीया[2]।

विधिलोपेऽपि न नैष्फल्यम्

एतावत्पर्यन्तं जपकाले साधकेनानुष्ठेयानां नियमानां विश्लेषणं कृतम्। कदाचिद् विना नियमं जप्यमानोऽप्ययं पञ्चाक्षरो न निष्फलो भवति, किन्तु समुचितं फलं ददात्येव। तदुक्तमागमे—

गच्छतस्तिष्ठतो वापि स्वेच्छया कर्म कुर्वतः।
अशुचेर्वा शुचेर्वापि मन्त्रोऽयं न च निष्फलः ॥[3] इति।

तस्मात् सदाचारविहीनस्य पतितस्यान्त्यजस्य वा परित्राणार्थं पञ्चाक्षरादन्यो मन्त्रः कलौ नास्त्येव। अतः—

मन्त्रे तीर्थे द्विजे देवे दैवज्ञे भैषजे गुरौ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
गुरौ लिङ्गेऽक्षमालायां मन्त्रे भस्मनि पञ्चसु।
एतासु शिवमुद्रासु शिववद् भक्तिमाचरेत् ॥[4]

---

१. च. ज्ञा., क्रि. ८।८९

२. असाधितः साधितो वा सिद्ध्यत्येष न संशयः।
श्रद्धातिशययुक्तस्य शिवे मन्त्रे तथा गुरौ ॥
तस्मान्मन्त्रान्तरांस्त्यक्त्वा सापायानधिकारतः।
आश्रयेत् परमां विद्यां हृद्यां पञ्चाक्षरीं बुधः ॥ (च. ज्ञा., क्रि. ८।९०-९१)

३. च. ज्ञा., क्रि. ८।८४

४. वा. शु. त. १०।७-८

इत्याद्युक्त्यनुसारं श्रद्धार्हेषु मन्त्रादिषु यो यादृशीं भावनां करोति, तादृशमेव फलं तस्य जायते। अतोऽत्र विध्यपेक्षया श्रद्धैव मुख्यतया परिगण्यत इति श्रद्धावतां जपो विधेर्लोपेऽपि न निष्फलः। पूज्यपादाः श्रीजगद्गुरुरेणुकाचार्या अपि—

अन्येऽपि बह्वो मन्त्रा विद्यन्ते सकलागमे।
भूयो भूयः समभ्यासात् पुरुषार्थप्रदायिनः॥
एष मन्त्रो महाशक्तिरीश्वरप्रतिपादकः।
सकृदुच्चारणादेव सर्वसिद्धिप्रदायकः॥[1]

इति पुरश्चरणबाहुल्यात् पुरुषार्थप्रदायकेभ्यो मन्त्रान्तरेभ्यः सकृदुच्चारमात्रेण सर्वसिद्धिप्रदायकस्य, ईश्वरस्य विश्वमयविश्वोत्तीर्णसामरस्यलक्षणमाहात्म्यप्रतिपादकस्य, पञ्चाक्षरमहामन्त्रस्य वैशिष्ट्यं निरूप्य तच्छ्रेष्ठत्वं प्रतिष्ठापितवन्तः।

असकृज्जपेन मन्त्रपिण्डत्वप्राप्तिः

मातापित्रो रेतोरक्ताभ्यां समुत्पन्नोऽस्माकं स्थूलदेहो मांसपिण्ड इत्युच्यते। तिलस्थं तैलं मल्लिकादिपुष्पैः संस्क्रियमाणं सद् यथा तत्पुष्पगन्धयुक्तं भवति, तथा निरन्तरं क्रियमाणेन पञ्चाक्षरमन्त्रजपेनास्माकं स्थूलशरीरस्था रुधिरादिधातवोऽपि मन्त्रमया भवन्ति। तदाऽयं साधको मन्त्रपिण्ड इत्यभिधीयते। एतादृशमन्त्रपिण्डवान् साधकः साक्षात् शिवस्वरूप एव भवति। तदुक्तं मायिदेवेन—

नकारो रुधिरे स्थाति मकारो मांससंचये।
शिकारो मेदसि स्थाति वकारोऽस्थिषु तिष्ठति॥
यकारः स्थाति मज्जायां शुक्ले स्थाति षडात्मकः।
एवं षडक्षरमयं शिववन्मूर्तिसुस्थितम्।
देहं ममेति यो ध्यायेत् सोऽहमेव न संशयः॥[2] इति।

तदेवमयं मन्त्रः स्थूल-सूक्ष्म-कारणाख्यशरीरत्रयगतान् सकलान् दोषान् निवार्य जपकर्तारं परिमार्जयति।

---

१. सि. शि. ८।४०-४१

२. अ. सू. ६।५३-५५

पञ्चाक्षरस्य माहात्म्यम्

"अपारो महिमा शैवपञ्चाक्षरमहामनोः"[1] इति चन्द्रज्ञानागमे भगवता रुद्रेणैव प्रतिपादितत्वादस्य माहात्म्यं वर्णयितुं न शक्यत एव । अथाप्यत्र किञ्चिदुच्यते । पुरा शिवयोगनिष्ठः सानन्दगणेशः पञ्चाक्षरस्य सकृदुच्चारणेनैवाष्टाविंशतिकोटिनायकनरकस्थितान् पापिन उद्धारयामास । शतानन्दमहर्षिस्तु पञ्चाक्षरस्यैव सिद्धया नरकमपि स्वर्गमकरोत् । उपमन्युरस्यैव मन्त्रजपस्य महिम्ना शिवशास्त्राचार्यतां लब्धवान् । वसिष्ठवामदेवाद्या महर्षयोऽस्यैव जपमहिम्ना शापानुग्रहसमर्था अभवन् । ब्रह्मविष्णुरुद्रादिदेवानां विश्वसृष्टिस्थितिसंहारादिकर्मणि यत्सामर्थ्यं विद्यते, तदस्यैव मन्त्रस्य जपानुष्ठानेन लब्धमिति विज्ञेयम्[2] । किं बहुना, प्रणवसहितस्यास्य पञ्चाक्षरस्य जपेन, तत्कृतस्वेष्टलिङ्गपूजनेन च सर्वेऽपि विगतदुरितबन्धना मोक्षलक्ष्मीं प्रयान्ति । तदुक्तमाचार्यैः—

किमिह बहुभिरुक्तैर्मन्त्रमेवं महात्मा
प्रणवसहितमादौ यस्तु पञ्चाक्षराख्यम् ।
जपति परमभक्त्या पूजयन् देवदेवं
स गतदुरितबन्धो मोक्षलक्ष्मीं प्रयाति ॥ [3]इति ।

मन्त्रस्यावरणशब्दवाच्यत्वम्

तदेवं वीरशैवीयाष्टावरणेष्वष्टमावरणत्वेन परिगणितः प्रणवसहितः पञ्चाक्षरो मन्त्रः "जपतो नास्ति पातकम्" इत्युक्त्यनुसारेण पातकनिवर्तनेन परमुक्तिप्रदानेन च साधकं सांसारिकदुःखैः परिरक्षतीति मन्त्रोऽयमपि रक्षाकवचरूपावरणशब्दभाग् भवतीति विज्ञेयम् ।

अन्तरङ्गाष्टावरणानि

एतावत्पर्यन्तं प्रतिपादितानामष्टावरणानां स्थूल-सूक्ष्मभेदेन बहिरङ्गाऽऽन्तरङ्गभेदेन वा पुनर्द्विधा विभागः क्रियते । तत्र दीक्षया, शिक्षया, ज्ञानोपदेशेन चास्माकं दुर्मार्गात् परिरक्षकः स्वगोत्रीयो गुरुः स्थूलाष्टावरणे परिगण्यते ।

---

१. च. ज्ञा., क्रि. ४।९३

२. सि. शि. ८।४४-४८

३. सि. शि. ८।४९

तदुपदिष्टं नैतिकं ज्ञानमस्मदन्तरङ्गं दुर्वृत्तितः संरक्षतीति नैतिकं ज्ञानमन्तरङ्गस्य गुरुः। तस्मादन्तरङ्गाष्टावरणान्तर्गतं प्रथममावरणं नैतिकं ज्ञानमिति तदेव तद्‌गुरुरिति च विज्ञेयम्।

वीरशैवैरुपास्यमानेष्विष्टलिङ्ग-प्राणलिङ्ग-भावलिङ्गाख्येषु त्रिविधेषु लिङ्गेषु स्वेष्टलिङ्गं स्थूलशरीरे विद्यमानं सत् तद् रक्षतीति इष्टलिङ्गं स्थूलावरणान्तर्गतं द्वितीयमावरणम्। अवशिष्टे प्राणभावलिङ्गे क्रमशः साधकस्य मनसि बुद्धौ चाभिव्यक्ते दुर्वृत्तितो मनोबुद्धी परिरक्षत इति ते उभे अप्यन्तरङ्गावरणान्तर्गते द्वितीयावरणत्वेन परिगण्येते।

शिवज्ञानसम्पन्नो जङ्गमशब्दवाच्यो महापुरुषस्तत्त्वज्ञानोपदेशेन सत्सङ्गद्वारा यथास्माकं स्थूलशरीरं विषयेभ्यो व्यावर्त्य रक्षति, तथा तदुपदिष्टं ज्ञानमप्यस्माकं मनोबुद्धी शब्दादिसांसारिकविषयेभ्यः परिरक्षतीति तदुपदिष्टं तत्त्वज्ञानमन्तरङ्गावरणान्तर्गतं तृतीयमावरणम्, अर्थात् तत्त्वज्ञानमेवान्तरङ्गस्य जङ्गम इति बोध्यम्।

गुरोः, स्वेष्टलिङ्गस्य, जङ्गमस्य च चरणामृतं पादोदकमित्युच्यते। तस्य स्थूलरूपत्वात् तच्चतुर्थं बहिरङ्गमावरणम्। तत्पानेन स्थूलशरीरस्य शुद्धिर्जायत इति तत्स्थूलावरणम्। अन्तरङ्गपादोदकं तु परमानन्दज्ञानमेव। तदुक्तम्—

> परमानन्द एवोक्तः पादशब्देन निर्मलः।
> ज्ञानं चोदकशब्देन पादोदकमिति स्मृतम्॥[1] इति।

अत्र स्वात्मस्वरूपस्य परमात्मनो वा यो निर्मल आनन्दः, स पाद इति, तस्य यज्ज्ञानं तदुदकमिति। तदेवं स्वात्मनः परमात्मनो वाऽऽनन्दस्वरूपज्ञानमेव पादोदकम्। एतादृशस्य पादोदकस्य पानेनाऽन्तरङ्गस्य तृप्तिर्विषयेभ्यश्चास्य रक्षणं भवतीतीदं परमानन्दज्ञानमन्तरङ्गस्य चतुर्थमावरणमिति विज्ञेयम्।

स्वेष्टलिङ्गाय निवेदितम्, गुरुजङ्गमयोर्भुक्तावशिष्टं वाऽन्नं प्रसाद इत्युच्यते। अस्यापि स्थूलरूपत्वात् स्थूलशरीरशुद्धिकरत्वाच्चेदं पञ्चमं बहिरङ्गमावरणम्। "नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते"[2], "प्रसादस्तु

---

१. सि. शि. १९।७

२. सि. शि. ११।६

प्रसन्नता"[1] इत्याद्युक्त्यनुसारं मनसो निर्मलत्वम्, अत एव तत्प्रसन्नता च प्रसाद इत्यभिधीयते। मनसोऽयं प्रसादोऽन्तःकरणकृपेत्यप्युच्यते। चतुर्विधासु कृपास्वस्य महत्त्वातिशयो वर्तते। ईशकृपायाः, वेदकृपायाः गुरुकृपायाश्च सत्त्वेऽप्यन्तःकरणकृपाऽभावे न किञ्चिज्ज्ञानमुत्पद्यते। तस्मान्मनसः प्रसन्नताऽन्तरङ्गं पञ्चममावरणं विज्ञेयम्। अयं प्रसादो मनसश्चाञ्चल्यं दूरीकृत्य तत्स्थिरीकरणद्वारा तद्रक्षको भवतीत्यावरणशब्देनोच्यते।

गोमयविनिर्मिता विभूतिर्भस्म इत्यभिधीयते। स्थूलरूपस्यास्य धारणं स्थूलशरीरे तावत् क्रियते। अस्य धारणेनानुपानभेदेन सेवनेन च शरीरगतानां नानाविधानां व्याधीनामुपशमो भवतीति गोमयं भस्म बहिरङ्गं षष्ठमावरणमित्युच्यते।

"स एष भस्म ज्योतिः"[2], "भस्म ज्योतिः समाम्नातम्"[3], "भस्मेदं शाम्भवं ज्योतिः"[4] इत्यादिनिगमागमवचनप्रामाण्येन परशिवप्रकाशो भस्मशब्दस्य तात्त्विकोऽर्थः। परशिवो हि स्वयंज्योतिःस्वरूपः। तस्य स्वहृदये यदनुचिन्तनं तदेवान्तरङ्गभस्मधारणं निरुपाधिकभस्मधारणं वोच्यते। शिवप्रकाशचिन्तनरूपमिदं भस्मधारणमज्ञानान्धकारनिवारणद्वारा साधकस्यान्तरङ्गं परिरक्षतीतीदं षष्ठमन्तरङ्गमावरणमिति निश्चेयम्।

रुद्रनेत्रसमुत्पन्नो बीजविशेषो हि रुद्राक्षः। उत्कृष्टोऽयं वनस्पतिः। शरीरेऽस्य धारणेन तत्प्रक्षालितजलपानेन च रक्तस्य न्यूनाधिकप्रसारो हृदयदौर्बल्यमित्यादयो बहवो रोगा उपशमिता भवन्ति। अत इदं सप्तमं बहिरङ्गमावरणमित्युच्यते। "रुद्रस्य अक्षो रुद्राक्षः" इति व्युत्पत्त्या रुद्राक्षशब्दस्य रुद्रदृष्टिरित्यप्यर्थो भवति। "सर्वो ह्येष रुद्रः"[5], "एको हि रुद्रो न द्वितीयाय तस्थुः"[6] इत्यादिश्रुत्यनुसारेण चराचरात्मकस्य प्रपञ्चस्य रुद्ररूपेणावलोकनमेव रुद्रदृष्टिः। भगवता कृष्णेन—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥[7]

---

१. अ. को. १।३।१६
२. बृ. जा. उ. ७।२
३. च. ज्ञा., क्रि. ६।६४
४. च. ज्ञा., क्रि. ६।६६
५. महाना. १०।११
६. श्वे. उ. ३२
७. भ. गी. ५।१८

इत्यत्र तादृशरुद्रदृष्टेः स्वरूपमुपवर्णितम् । गुरुशास्त्रोपदेशश्रवणेन स्वकीयसाधनपरिश्रमेण च तादृशसमताभावनारूपरुद्रदृष्टेः प्राप्तिरेवान्तरङ्गरुद्राक्षधारणम् । अनेन साधकस्य भेदबुद्धेर्विनाशोऽद्वैतभावनाया परिरक्षा च भवतीतीदमन्तरङ्गं सप्तममावरणमिति बोद्धयम् ।

"मन्त्र्यते गुप्तं परिभाष्यते" इति व्युत्पत्त्या दीक्षासमये सद्गुरुणा निगूढमुपदिष्टं शिवस्य नामैव मन्त्र इत्युच्यते । सप्तकोटिमन्त्रेषु श्रेष्ठः 'नमः शिवाय' इति पञ्चाक्षररूपोऽयं वीरशैवानामिष्टमन्त्रः । अस्यासकृदावृत्तिरूपेण जपेन दुष्टशक्तितः साधकस्य संरक्षणं भवतीतीदमष्टमं बहिरङ्गमावरणमित्युच्यते । अस्य निरन्तरजपेन—

नमःपदं तत्खलु जीववाचि शिवःपदं तत्परमात्मवाचि ।
अयेति तादात्म्यपदं तदेतद् नमः शिवायेति जगाद मन्त्रः ॥[1]

इति मायिदेवोक्त्या साधकस्य मनसि शिवजीवयोरैक्यबोधो जायते । एतादृशमैक्यज्ञानमेवान्तरङ्गो मन्त्रः । निरन्तरमस्य मननेन शिवजीवयोर्भेदज्ञानस्य निवृत्तिः, तयोरभेदज्ञानस्य च रक्षणं भवतीतीदमष्टममन्तरङ्गमावरणमिति विज्ञेयम् ।

तदेवं स्थूलाष्टावरणानि बहिरङ्गस्य, सूक्ष्माष्टावरणान्यन्तरङ्गस्य च परिरक्षकाणि सन्ति साधकस्य मुक्तिमार्गे सहायकानि भवन्तीतीमान्यष्टावरणानि तत्त्वज्ञानोदये सहकारिसाधनत्वेन परिगणितानि ।

विनैव करचरणाद्यङ्गं यथा लौकिको व्यवहारो न सुचारुरूपेण प्रचलति, तथा विनैवाष्टावरणं साधकस्याध्यात्मिकोऽपि व्यवहारो न सम्यक् सम्पद्यत इतोमान्यावरणानि साधकस्याध्यात्मिकान्यङ्गानीत्युच्यन्ते ॥

---

१. अ. सू. ६।४६

चतुर्थः परिच्छेदः

पञ्चाचारमीमांसा

शक्तिविशिष्टाद्वैतापरपर्यायवीरशैवाध्वना निःश्रेयसप्राप्तये प्रवृत्तस्य साधकस्य पूर्वोक्तान्यष्टावरणानि यथा तद्गतदोषनिवारणद्वारा सहकारिसाधनानि भवन्ति, तथाऽत्रोच्यमानाः पञ्चविधा आचारा अपि त्रिकरणपरिशुद्धिद्वारा सहायका भवन्तीत्येतेऽप्यत्र सहकारिसाधनत्वेनोक्ताः। तदस्मिन् परिच्छेदे प्रथमत आचारस्वरूपं विमृश्य क्रमशस्तद्भेदाः प्रस्तूयन्ते।

आचारशब्दार्थः

आचारो नाम आचरणमनुष्ठानं वा। स च वेदस्मृत्यादिविहितो धर्मविशेष एव। "सतां सज्जनानामाचारः सदाचारः", "आचर्यत इत्याचारः, सद्भिः क्रियमाण आचारः सदाचारः", "सते सद्रूपपरमेश्वरप्राप्तये क्रियमाण आचारः सदाचारः" इत्यादिसदाचारशब्दयोगमर्यादया सात्त्विकैः सदाऽनुष्ठीयमानत्वादयं सदाचार इत्युच्यते। देशभेदेन, कुलभेदेन, पुरुषभेदेन तस्यानन्तत्वेऽपि श्रुतिस्मृत्यविरुद्धः सर्वोऽपि सदाचार एव। अयमेव धर्मस्य मूलम्। तदुक्तं न्यायसिद्धान्तमञ्जरीप्रकाशे लौगाक्षिभास्करेण—

विद्वेषरागरहिता अनुतिष्ठन्ति यं द्विजाः।
विद्वांसस्तं सदाचारं धर्ममूलं विदुर्बुधाः॥[1] इति।

एतद्विपरीतश्च कदाचार इति दुराचार इति वा कथ्यते।

आचारमाहात्म्यम्

आचारो हि मनुष्यस्योत्कृष्टमलौकिकमलङ्करणम्। वस्त्राभूषणाद्यपेक्षया आचारभूषणमेव वरम्। वस्त्रादिभिरलङ्कृतोऽप्याचारहीनो लोके निन्दितो भवति। वस्त्रादिविहीनोऽप्याचारवान् लोके पूज्यो भवति। एवमेव ज्ञानाचारयोस्तुलनायां क्रियमाणायां ज्ञानमुत्कृष्टतया प्रतिभाति। तदपि यद्याचारविहीनं चेत्, न तेन शिवानुग्रहः प्राप्यते। तस्मात् शिवानुग्रहप्रेप्सुभिर्ज्ञानिभिरादेहपातमाचारशीलैर्भाव्यम्। तदुक्तं चन्द्रज्ञानागमे—

---

१. वाच. पृ. ६३१

आचार एव सर्वेषामलङ्काराय कल्पते ।
आचारहीनः पुरुषो लोके भवति निन्दितः ॥
ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः ।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम् ॥
आचारः परमो धर्म आचारः परमं धनम् ।
ज्ञानमाचारहीनं चेन्न तद्भवति सिद्धये ॥[१] इति ।

तस्माल्लौकिके पारमार्थिके च जीवने आचारस्य वर्तते महती आवश्यकता ।

आचारशीलानामन्तरात्मा सदा प्रसन्नो भवति, देहस्वास्थ्यं विवर्धते, पुमान् पूर्णायुश्च भवति । दुराचाररतो लोके गर्हणीयः सञ्जायते, आधिव्याधिभिरभिभूयते, अल्पायुः सुदुःखभाक् च भवति । नैको वैदिको मन्त्रः, न शास्त्रम्, न श्रौतं कर्म, नापि गुरुर्दुराचारिणं पुनाति[२] । तस्मात् सर्वैरपि सदा सदाचारिभिर्भाव्यम् । सदाचारो ह्यस्माकं कल्पतरुः । तेनैव धर्मार्थकाममोक्षाख्यानां चतुर्विधपुरुषार्थानां सिद्धिश्च जायते[३] । अत एव वीरशैवसिद्धान्ते न केवलं ज्ञानं मुक्तिहेतुः, किन्त्वाचारसहितमित्यङ्गीकृत्य ज्ञानकर्मसमुच्चयवादोऽभ्युपगतः । तदत्र सिद्धान्ते ज्ञानोत्पत्तेः पूर्वं तत्पश्चाच्च सर्वैराचरणीयत्वेन पञ्चविधा आचारा निरूपिताः । तदुक्तं चन्द्रज्ञानागमे—

लिङ्गाचारः सदाचारः शिवाचारस्तथैव च ।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः ॥[४] इति ।

एते च पञ्चाचारा वीरशैवैः प्राणवत् परिपाल्यन्ते । तदत्र क्रमशस्तेषां स्वरूपं तदवान्तरभेदास्तदाचरणपद्धतयश्च मीमांस्यन्ते ।

---

१. च. ज्ञा., क्रि. ९।१६-१८

२. आचारहीनं न पुनन्ति वेदा ह्याचारहीनं न पुनाति शास्त्रम् ।
आचारहीनं नहि श्रौतकर्म ह्याचारहीनं न गुरुः पुनाति ॥
(ब्र. सू. श्री. ३।१।१०, पृ. १८१)

३. धर्मोऽस्य मूलं धनमस्य शाखा
पुष्पं च कामः फलमस्य मोक्षः ।
असौ सदाचारतरुः सुकेशिन्
संसेवितो येन स पुण्यभोक्ता ॥ (वाच., पृ. ६३१)

४. च. ज्ञा., क्रि. ९।५

१. लिङ्गाचारः

अङ्गस्य (जीवात्मनः) लिङ्गस्वरूपप्राप्तये उपदिष्ट आचारो लिङ्गाचारः। शरीरेण शिवलिङ्गपूजनम्, मनसा तच्चिन्तनम्, भावनया तस्यैव निदिध्यासनमेव लिङ्गाचार इत्युच्यते। तदुक्तमागमे—

गुरुणा दत्तलिङ्गाद् वै नास्ति दैवं महीतले।
इति भावानुसन्धानं लिङ्गाचारः स उच्यते ॥[१] इति।

अत्रेदमैदम्पर्यम्—वीरशैवसिद्धान्ते गुरुः क्रियादीक्षया 'इष्टलिङ्गम्' प्रददाति, मन्त्रदीक्षया 'प्राणलिङ्ग'-स्वरूपमुपदिशति, वेधादीक्षया च 'भावलिङ्गम्' बोधयतीति पूर्वतनपरिच्छेदेऽष्टावरणनिरूपणावसरे विस्तरेण प्रतिपादितमेव। एवं त्रिविधदीक्षया प्राप्तानामिष्ट-प्राण-भावाख्यानां लिङ्गत्रयाणां गुरोरुपदेशानुसारमर्चन-चिन्तन-निदिध्यासनादिष्वासक्तिरेव लिङ्गाचारः।

दीक्षासम्पन्नानां वीरशैवानां स्वेष्ट-प्राण-भावाख्यलिङ्गव्यतिरिक्तानामन्यदेवानामर्चनादिकं निषिद्धं वर्तते। अत एव श्रीरेणुकाचार्याः—

नार्चयेदन्यदेवांस्तु न स्मरेन्न च कीर्तयेत्।
न तन्नैवेद्यमश्नीयाच्छिवभक्तो दृढव्रतः ॥
यद् गृहेष्वन्यदेवोऽस्ति तद्गृहाणि परित्यजेत्।
नान्यदेवार्चकान् मर्त्यान् पूजाकाले निरीक्षयेत्।
सदा शिवैकनिष्ठानां वीरशैवाध्ववर्तिनाम्।
नहि स्थावरलिङ्गानां निर्माल्याद्युपयुज्यते ॥[२]

इति स्वेष्ट-प्राण-भावलिङ्गव्यतिरिक्तानां स्थावरलिङ्गानां तथान्यदेवानामर्चनादिकं निषिध्य लिङ्गनिष्ठाप्रतिपादनमुखेन लिङ्गाचारस्वरूपमुपवर्णितवन्तः।

अत्र निरूपितोऽन्यदेवार्चनादेर्निषेधो न तदपकृष्टत्वप्रतिपादनार्थम्, किन्तु "नहि निन्दा निन्दितुमीष्टे, अपि तु स्तुत्यमेव स्तौति" इति मीमांसान्यायानुसारं स्वसिद्धान्ताभिमतेष्टलिङ्गादिषु श्रद्धादाढ्यर्थमित्यवधेयम्।

किञ्च, वीरशैवीया इयं लिङ्गोपासना सती-पति-भावयुक्ता। साधकोऽत्र स्वेष्टलिङ्गं पतिमिति स्वात्मानं च तस्य सतीमिति भावयति। लोके पतिव्रता

१. च. ज्ञा., क्रि. ९।४
२. सि. शि. ९।३१-३३

सती स्वपतिव्यतिरिक्तान्यपुरुषप्रेम्णा यथा दोषभागिनी भवति, तथा भक्तोऽपि स्वेष्टलिङ्गव्यतिरिक्तान्यदेवोपासनया दोषभाग् भवतीत्यत्रान्यदेवोपासना निषिद्धेति बोद्धव्यम् ।

अस्य लिङ्गाचारस्य परिपालनेन साधकस्यैकदेवोपासनायां निष्ठा मनोदार्ढ्यं च सञ्जायते । अनेनैव मनोदार्ढ्येनान्तर्मुखो भूत्वा साधकोऽन्तर्लिङ्गानुसन्धाने समर्थो भवति ।

२. सदाचारः

वीरशैवीयपञ्चाचारेषु द्वितीयो ह्याचारः सदाचारः । शिवस्य शिवभक्तानां च सन्तोषप्रदत्वादयं सदाचार[1] इत्युच्यते । सज्जनानां सन्तोषप्रदस्यास्य स्वरूपमुक्तं चन्द्रज्ञानागमे—

धर्मार्जितेन द्रव्येण यत् सन्तर्पणमन्वहम् ।
गुरुलिङ्गजङ्गमानां सदाचार इति स्मृतः ॥[2] इति ।

अस्यायं भावः—वीरशैवधर्मदर्शने गुरुः, लिङ्गम्, जङ्गमश्चेति त्रयमाराध्यरूपेण स्वीकृतमिति त्वष्टावरणप्रकरणे निरूपितमेव । तेषामनुग्रहप्राप्तये धर्ममार्गेणार्थं सम्पाद्य यथाशक्ति गुरुलिङ्गजङ्गमानां सर्वैरपि सेवा कर्तव्येति नियमोऽस्ति । इयं च सेवा अन्न-वस्त्र-धनादीनां दानरूपेण कर्तव्या भवति ।

स्वोपभोग्यानामन्नादीनां विनैव दानमुपभोगेन "तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः"[3] इत्यादिस्मृतिप्रमाणेन मनुष्यः पापभाग् भवति । अतोऽध्वग-क्षीणवृत्ति-विद्यार्थि-गुरुपोषक-यति-ब्रह्मचारिषु षड्धर्मभिक्षुकेष्वन्यतमोऽन्वहमतिथिरूपेण भोजनीय इति वर्तते धर्मशास्त्रादेशः । तस्मात् पाकानन्तरं शुनाम्, पतितानाम्, श्वपचाम्, पापिनाम्, रोगिणाम्, काकानाम्, कृमीणां च कृते बहिः किञ्चिदन्नं विकीर्य, गोदोहमात्रकं कालमतिथिं प्रतीक्ष्यैव भोजनगृहं विशेद्[4] गृहस्थः, अन्यथा स दोषभाग् भवेत् ।

---

१. सज्जनः शिवभक्तश्च येन मार्गेण सर्वदा ।
तोष्यते च महादेवि सदाचारः स वै स्मृतः ॥ (सू. आ., क्रि. ८।७)

२. च. ज्ञा., क्रि. ९।६

३. भ. गी. ३।१२

४. इत्थं भूतबलिं दत्वा कालं गोदोहमात्रकम् ।
प्रतीक्ष्यातिथिमायान्तं विशेद् भोज्यगृहं ततः ॥ (वाच., पृ. ६३४)

इदं चान्नादिदानं विनैव फलोद्देशेन कर्तव्यभावनयैव विधेयम्। वीरशैव-सिद्धान्ते सोपाधि-निरुपाधि-सहजभेदेन दानस्य त्रैविध्यं प्रतिपादितम्। तत्र फलाभिसन्धिसंयुक्तं सोपाधिकम्, फलाभिसन्धिनिर्मुक्तमीश्वरार्पणबुद्ध्या च क्रियमाणं निरुपाधिकम्, आदातृ-दातृ-देयानां शिवत्वभावनया, स्वस्य चाकर्तृत्व-भावनया क्रियमाणं दानं सहजमिति बोध्यम्[१]।

"सहजं दानमुत्कृष्टं सर्वदानोत्तमोत्तमम्"[२] इत्युक्त्या त्रिविधेषु उत्कृष्टेन सहजेन दानेनाराध्यानां गुरुलिङ्गजङ्गमानामन्वहं सन्तर्पणमेव वीरशैवीयः सदाचारः। अयं सदाचारोऽष्टशीलाढ्यो वर्तते। तथा ह्युक्तम्—

सदाचारोऽष्टशीलाढ्यः सेवितः कल्पपादपः।
सद्भक्तानां सुमनसां ददातीष्टफलं महत्॥[3] इति।

अत्र १. अङ्कुरशीलम्, २. उत्पन्नशीलम्, ३. द्विदलशीलम्, ४. प्रवृद्ध-शीलम्, ५. सप्रकाण्डशीलम्, ६. सशाखशीलम्, ७. सपुष्पशीलम्, ८. सफल-शीलमितीमान्येवाष्टशीलानि। अत्र शिवतत्त्वस्य जिज्ञासा शिवध्यानैकतानता, शिवज्ञानैकनिष्ठता वा 'शीलम्'[४] इत्युच्यते।

तत्र गुरुकारुण्येन प्राप्तेन वेधामान्त्रीक्रियाख्येन दीक्षात्रयेण क्रमशः कारण-सूक्ष्म-स्थूलाख्यानि योगाङ्ग-भोगाङ्ग-त्यागाङ्गापरपर्यायाणि शरीरत्रयाणि संशोध्य, अत एव स्वात्मानमप्राकृतं च मत्वा, गुरूपदिष्टमार्गेण प्रत्यहं स्वेष्टलिङ्गपूजादि-

---

१. फलाभिसन्धिसंयुक्तं दानं यद्विहितं भवेत्।
तत्सोपाधिकमाख्यातं मुमुक्षुभिरनादृतम्॥
फलाभिसन्धिनिर्मुक्तमीश्वरार्पितकाङ्क्षितम्।
निरुपाधिकमाख्यातं दानं दानविशारदैः॥
आदातृदातृदेयानां शिवभावं विचिन्त्य हि।
आत्मनोऽकर्तृभावं च यद्दत्तं सहजं तु तत्॥ (सि. शि. ९।८१-८३)

२. सि. शि. ९।८४

३. च. ज्ञा., क्रि. ९।२२

४. जिज्ञासा शिवतत्त्वस्य शीलमित्युच्यते बुधैः॥
भावस्य स्थिरतायोगः शीलमित्युच्यते बुधैः।
शीलं शिवैकविज्ञानं शिवध्यानैकतानता॥ (सि. शि. १३।३०-३२)

करणमेवाङ्कुरशीलम्[१]। सदाचारप्रवृत्तस्येयं स्थितिः प्राथमिकीत्यङ्कुरशीलमित्युच्यते।

यथा दीक्षया स्वयं परिशुद्धस्तथा सती-पुत्र-पौत्राणामपि स्वगोत्रीयगुरुद्वारा दीक्षासंस्कारेण शुद्धीकरणम्, दीक्षासंस्कृतैरेव दारादिभिः सहवासकरणमुत्पन्नशीलम्[२]।

नित्यं शरीरे धारणीयत्वेन विहितानामिष्टलिङ्ग-भस्म-रुद्राक्षादीनां वीरशैवलाञ्छनानामप्रमादेन स्वशरीरे सर्वदा धारणं द्विदलं शीलम्[३]।

शिवमाहात्म्यस्य प्रत्यहं श्रवणम्, श्रुतस्यैव तस्य मननेन निदिध्यासनेन च मनसि सदा विभावनमेव प्रवृद्धशीलम्। एतादृशं मननादिकं शिवभक्तिवृद्धौ सहायकं भवतीत्यस्य प्रवृद्धशीलमिति नाम जातम्[४]।

वीरशैवीयनित्यकर्मभूतस्य स्वेष्टलिङ्गार्चनस्य नियमेन सम्पादनम्, कदाचित् तस्य लोपेऽन्नजलादीनामप्यग्रहणं सप्रकाण्डशीलम्[५]।

इष्टलिङ्गानर्पितस्य भक्ष्यभोज्यादिपदार्थजातस्याग्रहणं सशाखाख्यं हि शीलम्। अतः सर्वदा वीरशैवैर्लिङ्गभोगोपभोगिभिर्भाव्यम्[६]।

---

१. गुरुकारुण्यकलितषडध्वन्यासशोधिता।
तनुः स्वीयाऽप्राकृतेति भावोऽङ्कुर इतीर्यते ॥ (च. ज्ञा., क्रि. ९।२३)

२. दीक्षितैरेव दाराद्यैः सहवासो य आत्मनः।
शीलमुत्पन्नमित्युक्तं ग्राह्यमेतद् विचक्षणैः ॥ (च. ज्ञा., क्रि. ९।२४)

३. लाञ्छनानां हि शैवानां भस्मादीनामनारतम्।
धारणं त्वप्रमादेन द्विदलं शीलमुच्यते ॥ (तत्रैव, ९।२५)

४. यन्नित्यं शिवधर्माणां माहात्म्यस्य विभावनम्।
प्रवृद्धं शीलमित्युक्तं भक्तेर्वृद्धिकरं श्रुतम् ॥ (तत्रैव, ९।२६)

५. इष्टलिङ्गमनभ्यर्चा स्थीयते यदभोजनम्।
सप्रकाण्डमिदं शीलं विज्ञेयं भक्तिसाधनम् ॥ (तत्रैव, ९।२७)

६. इष्टलिङ्गानर्पितस्य द्रव्यस्याग्रहणं हि यत्।
शीलं सशाखमित्युक्तमवर्ज्यं भक्तितत्परैः ॥ (तत्रैव, ९।२८)

स्वेष्टलिङ्गार्पितस्य अत एव प्रसादरूपस्य भक्ष्यादिपदार्थस्यापरित्यजनं सपुष्पं शीलम्। शिवलिङ्गनिष्ठावद्भिर्भक्तैः शिवप्रसादस्यावज्ञा कदापि न कार्येति तात्पर्यम्[१]।

वीरशैवसिद्धान्ते पूजनीयत्वेन स्वीकृतेषु गुरु-लिङ्ग-जङ्गमेषु भेदबुद्धिं परित्यज्य "एकमूर्तिस्त्रयो भागा गुर्लिङ्गं तु जङ्गमः" इति प्रामाणिकोक्त्या त्रयाणामपि शिवस्वरूपत्वं परिभाव्य तदर्चनं सफलशीलम्[२]। एवमेतदष्टशीलाढ्य एव सदाचारः।

एतादृशाष्टशीलाढ्यस्य सदाचारस्याचरणेन शिवानुग्रहो मनोरथसिद्धिश्च जायते। तदुक्तम्—

यः सदाचारमष्टाङ्गं भक्तिनिष्ठो निषेवते।
स सद्यः सिद्धिमाप्नोति परां शम्भोरनुग्रहात् ॥[३] इति।

अपि च,

सदाचारप्रियः शम्भुः सदाचारेण पूज्यते।
सदाचारं विना तस्य प्रसादो नैव जायते ॥[४]

इत्याचार्योक्त्याऽयं सदाचारः शिवानुग्रहप्रापको वर्तते। अस्य निष्ठापूर्वकं परिपालनमेव शिवाराधनमित्यवगन्तव्यम्। अनेन लोकादरः शिवानुग्रहश्चेत्यैहिकामुष्मिकं फलद्वयमपि प्राप्नोति साधकः। अत एवास्य सर्वैरपि समादरः करणीयः।

३. शिवाचारः

शिव एव परं ब्रह्म पञ्चकृत्यपरायणः।
न ततोऽन्या गतिरिति शिवाचारो हि कीर्तितः ॥[५]

---

१. शिवार्पितप्रसादस्य यत्परित्यागवर्जनम्।
सपुष्पं शीलमित्युक्तं विज्ञेयं चैतदुत्तमम् ॥ (तत्रैव, ९।२९)

२. गुरुजङ्गमलिङ्गानां यदेकत्वेन भावनम्।
सफलं शीलमित्युक्तं सद्यः सिद्धिकरं परम् ॥ (च. ज्ञा., क्रि. ९।३०)

३. च. ज्ञा., क्रि. ९।३१

४. सि. शि. १६।६६

५. च. ज्ञा., क्रि. ९।७

इत्यागमोक्त्या सृष्टि-स्थिति-संहार-निग्रह-अनुग्रहाख्यानां पञ्चकृत्यानां कर्ता यः शिवो वर्तते, स एव ममानन्यपरिरक्षक इति भावनैव शिवाचारः। अत एव श्रीजगद्गुरुरेणुकाचार्याः—

शिवभक्तो महातेजा शिवभक्तिपराङ्मुखान्।
न स्पृशेन्नैव वीक्षेत न तैः सह वसेत् क्वचित्॥[1]

इति शिवभक्तस्य शिवस्यानन्यशरणागतित्वप्रतिपादनमुखेन शिवाचारं बोधयामासुः। अनयाऽनन्यभावनया क्रियमाणया शिवशरणागत्या शनैः शनैः शिवभावो दृढीभवति, सर्वत्र च शिवदृष्टिः संजायते। अनया शिवदृष्ट्या साधकस्य संकुचिता बुद्धिर्निवर्तते, "सर्वं शिवमयं जगत्" इति विशालभावना च समुदेति। तदाऽयं न कमपि द्वेष्टि न कस्मादपि जुगुप्सते। एतादृशेन शिवाचारेण व्यक्तेर्विकासः समाजस्य समुन्नतिश्च संजायते।

भावशुद्धिं विना शिवाचारो नोत्पद्यत इति भावशुद्ध्यर्थमुपभोग्यानां पदार्थानां शुद्धिरावश्यकीत्यस्मिन् शिवाचारे द्रव्य-क्षेत्र-गृह-भाण्ड-तृण-काष्ठ-वीटिका-पाक-रस-भव-भूत-भाव-मार्ग-काल-वाक्-जनाख्यषोडशपदार्थानां शिव-शास्त्रोक्तमार्गेण शुद्धीकरणप्रक्रिया ह्यागमशास्त्रे निरूपिता। तथाहि—

द्रव्यक्षेत्रगृहादीनां षोडशानां विशोधनम्।
शिवशास्त्रोक्तमार्गेण शिवाचार इति स्मृतः॥[2] इति।

तदत्र क्रमशस्तेषां शुद्धिप्रक्रियाऽऽगमशास्त्ररीत्या प्रस्तूयते। तत्र १. शिवभक्तेन प्राप्तानां फलमूलादीनां ग्रहणम्, अथवाऽन्यैः प्राप्तानामपि तेषां समन्त्रभस्मप्रोक्षणेन शुद्धीकरणं द्रव्यशुद्धिः,[3] २. क्षेत्रस्य चतुष्कोणे नन्दि-मुद्राङ्कितशिलान्यासकरणं क्षेत्रशुद्धिः,[4] ३. शिवभक्तैर्विनिर्मितस्याथवा महाद्वारे शिवलिङ्गाङ्कितस्य वेश्मनः परिग्रहणं गृहशुद्धिः,[5] ४. शिवभक्तेन

---

१. सि. शि. ९।२७

२. च. ज्ञा., क्रि. ९।३२

३. भक्तहस्तगतं वापि भस्मना वा विशोधितम्।
फलमूलादिकं ग्राह्यं द्रव्यशुद्धिरियं मता॥ (च. ज्ञा., क्रि. ९।३३)

४. नन्दिमुद्राङ्कितशिलादार्वादिपरिशोधनम्।
क्षेत्रं भक्तिपरैर्ग्राह्यं क्षेत्रशुद्धिः प्रकीर्तिता॥ (च. ज्ञा., क्रि. ९।३४)

५. भक्तैस्तु निर्मितं वापि शिवलिङ्गाङ्कितं तु वा।
वेश्म भक्तैः परिग्राह्यं गृहशुद्धिः समीरिता॥ (च. ज्ञा., क्रि. ९।३५)

निर्मितस्य शिवलिङ्गाङ्कितस्य वा भाण्डजातस्यैव ग्रहणं भाण्डशुद्धिः,[1] ५. शिवभक्तसमानीतस्य गवां भक्ष्यभूतस्य तृणस्य ग्रहणम्, अन्याऽऽनीतस्य भस्मप्रोक्षणेन शुद्धीकरणं तृणशुद्धिः[2], ६. शिवभक्तसमानीतस्य विभूत्या संस्कृतस्य वा काष्ठस्यैव परिग्रहणं काष्ठशुद्धिः[3], ७. शिवभक्तेन निर्मितस्य भस्मसंस्कृतस्य वा ताम्बूलस्यैव ग्रहणं वीटिकाशुद्धिः[4], ८. शिवदीक्षासम्पन्नैः पाचितस्याऽभक्तेनानवलोकितस्यैव भोज्यस्य परिग्रहणं पाकशुद्धिः[5], ९. महिष्यादि-घृत-दधि-पयस्तक्रादिकं परित्यज्य सर्वदा गव्यं तु ग्राह्यमिति रसशुद्धिः[6], १०. काम्यकर्मपरित्यागेन निष्कामकर्मद्वाराऽन्तःकरणं निर्मलं विधाय तत्त्वज्ञानप्राप्त्या पुनर्जन्मराहित्यस्थितिसम्पादनं भवशुद्धिः,[7] ११. भूतदूषणराहित्यम्, सर्वभूतदयालुत्वं च भूतशुद्धिः[8], १२. सर्वान् कामान् परित्यज्य सर्वदा शिवभावानुभावनं भावशुद्धिः,[9] १३. पङ्क्त्यां पिपीलिकादीनां हिंसनं यथा न

---

१. भक्तेन निर्मितं वापि शिवलिङ्गाङ्कितं तु वा।
भाण्डजातं परिग्राह्यं भाण्डशुद्धिः प्रकीर्तिता ॥ (च. ज्ञा. क्रि. ९।३६)

२. भक्तलोकसमानीतं भस्मना संस्कृतं तु वा।
तृणादिकं परिग्राह्यं तृणशुद्धिरितीरिता ॥ (च. ज्ञा., क्रि. ९.३७)

३. भक्तियुक्तसमानीतं विभूत्या संस्कृतं तु वा।
काष्ठं व्रतस्थैः संग्राह्यं काष्ठशुद्धिः समीरिता ॥ (च. ज्ञा., क्रि. ९।३८)

४. भक्तारामे समुत्पन्नैर्भस्मना संस्कृतैस्तु वा।
भक्तैस्तु साधितेनापि विभूत्या संस्कृतेन वा ॥
नागवल्लीदलैः पूगैश्चूर्णेन च समन्वितम्।
ग्राह्यं भक्तैर्हि ताम्बूलं वीटिकाशुद्धिरीतिता ॥ (च. ज्ञा., क्रि. ९।३९-४०)

५. शिवदीक्षान्वितैः पक्वमभक्तानवलोकितम्।
भोज्यं भक्तैः परिग्राह्यं पाकशुद्धिरियं मता ॥ (च. ज्ञा., क्रि. ९।४१)

६. घृतं दधि पयस्तक्रं माहिषं चाविकं त्यजेत्।
गव्यं तु सर्वदा ग्राह्यं रसशुद्धिरियं मता ॥ (च. ज्ञा., क्रि. ९।४२)

७. पुनर्भवनिदानोक्ता काम्यकर्मविसर्जनात्।
जन्मराहित्यसम्पत्तिर्भवशुद्धिर्निगद्यते ॥ (च. ज्ञा., क्रि. ९।४३)

८. सर्वभूतदयालुत्वं पाञ्चभौतिकसंस्कृतिः।
भूतदूषणराहित्यं भूतशुद्धिः समीरिता ॥ (च. ज्ञा., क्रि. ९।४४)

९. सर्वकामान् समुज्झित्य शिवभावानुभावनम्।
चेतसा यत्सर्वकालं भावशुद्धिः समीरिता ॥ (च. ज्ञा , क्रि. ९।४५)

भवेत् तथा सावधानेन गमनं मार्गशुद्धिः,[1] १४. शास्त्रसंचोदिते निःशब्दे मनोरमे प्रातःकालीने सायंकालीने च सन्ध्यासमये शिवलिङ्गाराधनं कालशुद्धिः,[2] १५. अनृत-परुष-बीभत्स-दाम्भिकवचसः सर्वदा परित्यागो वाक्शुद्धिः,[3] १६. आसने, शयने, याने, गोष्ठ्यां सर्वत्र सर्वदा सद्भक्तजनसाङ्गत्यं जनशुद्धिः[4]। तदेवं स्वव्यवहारे सर्वैरुपर्युक्तानां षोडशपदार्थानां परिशोधनरूपस्य शिवाचारस्य परिपालनेन व्यक्तेः समाजस्य च स्वास्थ्यसिद्धिः, साधकानां शिवसायुज्यप्राप्तिश्च जायते। तदुक्तमागमे—

विद्धन्नयं शिवाचारः सर्वशास्त्रेषु गोपितः।
एतदाचरणान्मर्त्यः शिवसायुज्यमश्नुते ॥[5] इति।

४. गणाचारः

"अनुष्ठितो भक्तगणैर्गणाचार इतोरितः"[6] इत्यागमोक्त्या शिवभक्तगणैरनुष्ठीयमान आचारो गणाचारः। स्वेष्टदेवे, स्वगुरौ, स्वकीयधर्मग्रन्थादिषु श्रद्धातिशयेन व्यवहरिष्यमाणसमये कदाचित् केनचिदधार्मिकेण पुरुषेण निन्दादिना तदवहेलनासम्भवे, सामोपायेन दण्डोपायेन वा तत्प्रतिक्रियाचरणेनाधार्मिकस्य धार्मिककरणाचार एव गणाचारः। शिवगणैः, अर्थात् शिवभक्तैरस्य दृढतापूर्वकं परिपालनं क्रियते। समाजे व्यक्तौ च वर्तमानानां दुर्गुणानां दूरीकरणमेवास्य मुख्यं प्रयोजनम्। निन्दा तु दुर्गुणेषु निकृष्टतमत्वेन परिगणिता। निन्दको यादृग् दोषभाग् भवति, तच्छ्रोताऽपि तादृग् दोषभाग् भवत्येव। अतः शिवभक्तेन कदापि शिवनिन्दा न श्रोतव्या। तस्मात्—

---

१. पङ्क्त्यां पिपीलिकादीनां न यथा हिंसनं भवेत्।
गमनं हि परिग्राह्यं मार्गशुद्धिरियं मता ॥ (च. ज्ञा., क्रि. ९।४६)

२. शास्त्रसंचोदिते काले निःशब्दे च मनोरमे।
शिवलिङ्गाराधनं यत् कालशुद्धिरिहोदिता ॥ (च. ज्ञा., क्रि. ९।४७)

३. अनृतं परुषं कुत्सं बीभत्सं दाम्भिकं च यत्।
विसर्जनं तद्वचसो वाक्शुद्धिरिति कथ्यते ॥ (च. ज्ञा., क्रि. ९।४८)

४. आसने शयने याने गोष्ठ्यां सर्वत्र सर्वदा।
सद्भक्तजनसाङ्गत्यं जनशुद्धिः समीरिता ॥ (च. ज्ञा., क्रि. ९।४९)

५. च. ज्ञा., क्रि. ९।५०

६. च. ज्ञा., क्रि ९।५१

शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च।
न शृणोति च यो निन्दां स गणाचार उच्यते ॥[1]

इत्यागमोक्तौ शिवस्य शिवभक्तानां शिवधर्मस्य वा कदापि निन्दाया अश्रवणमेव गणाचार इत्युक्तम्। अत एव श्रीरेणुकाचार्या अपि—

यत्र चाचारनिन्दाऽस्ति कदाचित्तत्र न व्रजेत्।
यद्गृहे शिवनिन्दाऽस्ति तद्गृहं सम्परित्यजेत् ॥

शिवनिन्दाकरं दृष्ट्वा घातयेदथवा शपेत्।
स्थानं वा तत्परित्यज्य गच्छेद् यद्यक्षमो भवेत् ॥[2]

इत्यत्र क्षमश्चेत् शिवनिन्दकं घातयेत्, अक्षमश्चेत् तत्स्थानं परित्यज्य गच्छेदिति शिवनिन्दाया अश्रवणमेवास्मिन्नाचारे प्रधानतयोपदिष्टवन्तः। अत्र यद् घातनमुक्तं तन्न शरीरघातनपरम्, किन्तु दुर्बुद्धिघातनपरमित्यवधेयम्। नहि शरीरघातेन मनुष्यस्य बुद्धिः शुद्ध्यति, बुद्धिशुद्ध्यैव मनुष्यः परिशुद्ध्यति। तस्मात् सदुपदेशेन तदीयदुर्बुद्धिघातनमेवात्र मुख्यो घातनशब्दार्थः। तदेवं गणाचारनिरतः साधकः स्वदुर्गुणान् परित्यज्य स्वनिकटवर्तिनां जनानामपि दुर्गुणान् सदुपदेशेन कदाचिद् दण्डेन च दूरीकरणाय प्रयत्नशीलो भवति।

अस्मिन् गणाचारे कायिक-वाचिक-मानसिकभेदेनाहत्य चतुःषष्टिः शीलानि प्रतिपादितानि सन्ति। तदुक्तमागमे—

सर्वोत्तमे गणाचारे सद्यः सिद्धिकरे परे।
शीलानि तु चतुःषष्टिर्वर्तन्ते तानि संशृणु ॥[3] इति।

तेषां चतुःषष्टिशीलानां स्वरूपं तावत् संक्षेपेण निरूप्यते—

सप्तविधं वाचिकं शीलम्—१. यथार्थभाषणम्, २. सत्यं प्रियं हितं च भाषणम्, ३. प्रत्यहं वेदागमादिसच्छास्त्रपठनम्, ४ शिवस्य शिवभक्तानां गुरोश्च प्रशंसनम्, ५. स्वेष्टदेवादन्यदेवानां सामान्यमनुष्याणां वा प्रशंसावर्जनम्,

---

१. च. ज्ञा., क्रि. ९।८

२. सि. शि. ९।३६,३८

३. च. ज्ञा., क्रि. ९।५२

६. कदाचित् कुत्रचिदप्यात्मस्तुत्यकरणम्, ७. परगर्हाविसर्जनं चेति सप्तविधं वाचिकं शीलमित्युच्यते[1]।

पाणिगतं पञ्चविधं शीलम्—८. गुरुजङ्गमलिङ्गानां नमस्कृतिः, ९. पूजापरिकराणां सम्पादनम्, १०. रुद्राक्षमालया मूलमन्त्रस्यान्वहं जपः, ११. गुरुजङ्गमलिङ्गानां प्रत्यहमाराधनम्, १२. गुरवे, जङ्गमेभ्यः, शिवधर्माय च यथाशक्तिदानमित्येतत्पञ्चविधं शीलं पाणिसम्बद्धमीरितम्[2]।

---

१. भक्तिनिष्ठेन यद्वाचा यथार्थस्यैव भाषणम्।
तत्सत्यं सर्वशास्त्रेषु प्रथमं शीलमुच्यते॥
न वाच्यमप्रियं सत्यं नासत्यं च प्रियं वदेत्।
ब्रूयात् प्रियं च यत्सत्यं द्वितीयं शीलमुच्यते॥
वेदागमपुराणानां धर्मज्ञानैकबोधिनाम्।
पठनं प्रत्यहं यत्तत् तृतीयं शीलमीरितम्॥
शिवस्य शिवभक्तानां गुरोरपि विशेषतः।
प्रशंसनं यदश्रान्तं चतुर्थं शीलमुच्यते॥
अन्येषां चैव देवानां मानुषाणां च जातुचित्।
प्रशंसावर्जनं यत्तत् पञ्चमं शीलमुच्यते॥
कदाचित् कुत्रचिद्वा यदात्मस्तुतिविसर्जनम्।
तत् षष्ठं शीलमित्युक्तं सर्वशास्त्रैकसम्मतम्॥
देवतानां मनुष्याणां निर्गुणानां च जातुचित्।
गर्हाविसर्जनं यत्तत् सप्तमं शीलमुच्यते॥ (च. ज्ञा., क्रि. ९।५३-५९)

२. गुरुजङ्गमलिङ्गानां क्रियते या नमस्कृतिः।
शीलमष्टममित्युक्तमखिलागमबोधितम्॥
पूजापरिकराणां यत् सम्पादनमहर्निशम्।
शीलं नवममित्युक्तं शिवप्रीत्येककारणम्॥
रुद्राक्षमालया नित्यं मूलमन्त्रजपोऽन्वहम्।
दशमं शीलमित्युक्तमखिलाघविशोधनम्॥
गुरोर्माहेश्वराणां च भवानीवल्लभस्य च।
आराधनं प्रत्यहं तच्छीलमेकादशं स्मृतम्॥
गुरवे जङ्गमेभ्यश्च शिवधर्माय भक्तितः।
यथाशक्ति कृतं दानं द्वादशं शीलमुच्यते॥ (च. ज्ञा., क्रि. ९।६१-६५)

पादगतं चतुर्विधं शीलम्—१३. गुरोर्माहेश्वरस्य चाभिगमनम्, १४. गुरोः माहेश्वरस्य च प्रदक्षिणीकरणम्, १५. पूजापरिकराणां सम्पादनाय गमनम्, १६. इष्टलिङ्गपूजार्थं गुरुपादपूजार्थं वा स्थिरमासनं चेति पादगतं चतुर्विधं शीलमुक्तम्[1]।

त्वक्सम्बद्धं द्विविधं शीलम्—१७. स्वेष्टलिङ्गस्यावियोगतो नित्यं स्पर्शनम्, १८. स्वेष्टलिङ्गस्पर्शजन्यरोमाञ्चसमलङ्कृतिश्चेति द्विविधं त्वक्सम्बद्धं शीलं परिकीर्तितम्[2]।

चक्षुर्गतं द्विविधं शीलम्—१९. अश्रान्तं सानुरागमिष्टलिङ्गनिरीक्षणम्, २०. स्वेष्टलिङ्गेक्षणसमुद्भूतानन्दबाष्पसमुद्गतिश्चेति द्विविधं शीलं चक्षुःसम्बद्धमीरितम्[3]।

जिह्वागतमेकं शीलम्—२१. अन्वहं शिवाय विनिवेदितप्रसादीयरसास्वादो जिह्वागतमेकं शीलमिति विज्ञेयम्[4]।

---

१. गुरोर्माहेश्वरस्याभिगमनं क्रियते हि यत्।
तत् त्रयोदशमित्युक्तं शम्भुना सर्ववेदिना॥
गुरोर्माहेश्वरस्यापि क्रियते यत्प्रदक्षिणम्।
भक्तिभावयुतेनैव गदितं तच्चतुर्दशम्॥
पूजापरिकराणां हि सम्पादनचिकीर्षया।
भक्तेन गम्यते नित्यं तत् पञ्चदशकं मतम्॥
गुरोरपीष्टलिङ्गस्य पूजार्थं स्थिरमासनम्।
तत् षोडशकमित्युक्तं देवदेवेन शूलिना॥ (च. ज्ञा., क्रि. ९१६७-७०)

२. नित्यं यदिष्टलिङ्गस्य स्पर्शनं त्ववियोगतः।
तत् सप्तदशकं प्रोक्तं वपुःसार्थकतास्पदम्॥
इष्टलिङ्गस्पर्शजन्यरोमाञ्चसमलङ्कृतिः।
अष्टादशं शीलमिति कथितं भवनाशकम्॥ (च. ज्ञा., क्रि. ९१७२-७३)

३. अश्रान्तं सानुरागं यदिष्टलिङ्गनिरीक्षणम्।
एकोनविंशकं शीलमुक्तं भवभयापहम्॥
इष्टलिङ्गेक्षणोद्भूतानन्दबाष्पसमुद्गमः।
विंशं शीलं विनिर्दिष्टं स्पष्टं चन्द्रार्धमौलिना॥ (च. ज्ञा., क्रि. ९१७५-७६)

४. निवेदितप्रसादीयरसास्वादो यदन्वहम्।
एकविंशकमित्युक्तमथ घ्राणगतं शृणु॥ (च. ज्ञा. क्रि. ९१७८)

घ्राणगतमेकं शीलम्—२२. शिवनिर्माल्यानां गन्धपुष्पादीनां प्रतिदिनं सौरभाघ्राणनं घ्राणगतमेकं शीलमुच्यते[1]।

श्रोत्रगतं शीलद्वयम्—२३. गुरोः, शिवस्य, शिवभक्तानां च स्तोत्राकर्णनम्, २४. गुरोः, शिवस्य, शिवभक्तानां च निन्दानाकर्णनं चेति द्विविधं श्रोत्रगतं शीलम्[2]।

पञ्चविधं कायशोधनशीलम्—२५. गुरोः, स्वेष्टलिङ्गस्य, जङ्गमस्य च प्रसादतः कायसंशोधनम्, २६. निषिद्धविषयेभ्य इन्द्रियनिग्रहः, २७. अस्पृश्यवस्तुसंस्पर्शे जलेन भस्मना वा स्नानम्, २८. आसने, शयने, याने, गोष्ठ्यां भविसम्बन्धवर्जनम्, (अत्र भविर्नाम वीरशैवीयदीक्षाशून्यः प्राकृतो मनुष्य इति बोध्यम्), २९. विभूति-रुद्राक्ष-इष्टलिङ्गानां शरीरे सर्वदा धारणमित्येतत् पञ्चविधं कायशोधनशीलमित्युच्यते[3]।

पञ्चत्रिंशद्विधं मानसिकं शीलम्—३०. निषिद्धभोगविषये सङ्कल्पराहित्यरूपं ब्रह्मचर्यम्, ३१. भक्तिरतौ कामो न विषयेषु, ३२. अधर्मे क्रोधो

---

१. निर्माल्यगन्धपुष्पादिसौरभाघ्राणनं परम् ।
द्वाविंशकं समाख्यातमतः श्रोत्रगतं शृणु ॥ (च. ज्ञा., क्रि. ९।७९)

२. गुरोः शिवस्य भक्तानां श्रोत्राकर्णनमन्वहम् ।
तत्त्रयोविंशकं प्रोक्तं मोक्षसम्प्राप्तिकारणम् ॥
गुरोः शिवस्य भक्तानां निन्दाऽनाकर्णनं हि यत् ।
तच्चतुर्विंशकं प्रोक्तं कायिकं तु ततः शृणु ॥ (च. ज्ञा., क्रि. ९।८०-८१)

३. गुरोरपीष्टलिङ्गस्य चरस्यैव प्रसादतः ।
कायशोधनमेतद्धि शीलं स्यात् पञ्चविंशकम् ॥
निषिद्धविषयेभ्यश्च यदिन्द्रियविनिग्रहः ।
षड्विंशं शीलमित्युक्तं भवदोषनिवारणम् ॥
अस्पृश्यवस्तुसंस्पर्शे स्नानं नीरेण भस्मना ।
शौचं हि सप्तविंशं स्याच्छीलं दोषनिवारणम् ॥
आसने शयने गोष्ठ्यां भविसम्बन्धवर्जनम् ।
अष्टाविंशमिदं शीलं निर्दिष्टं शौचसाधनम् ॥
भूतिरुद्राक्षलिङ्गानां शरीरे धारणं सदा ।
एकोनत्रिंशकं शीलं मोक्षमार्गैकसाधनम् ॥
कायिकं पञ्चधा प्रोक्तं मुक्तिप्राप्त्येकसाधनम् । (च. ज्ञा., क्रि. ९।८२-८७)

न वैरिषु, ३३. शिवस्याराधने लोभो न धनादिषु, ३४. भक्तजने मोहो न कान्तादिविषयेषु, ३५. करणेष्वेव मात्सर्यं न जनेषु, ३६. मायाजये मदो न धर्मे नापि सम्पदि, ३७. गुरौ जङ्गमे वा गुणागुणविमर्शत्यागः, ३८. प्राणिनोऽहिंसा, ३९. प्राणिदुःखवीक्षायां दया, ४०. क्रियायां वचने च ह्रीः, अर्थाद् विनीतत्वम्, ४१. रिपौ निजसुते वापि वैषम्यराहित्यम्, ४२. गुरूपदिष्टेषु निगमागमवचनेषु विश्वासः, ४३. महदापत्सम्भवेऽपि धर्मस्यावर्जनरूपा धृतिः, ४४. अपकारिष्वपि वैरिजनेष्वदूषणरूपा क्षमा, ४५. मनसि भोगासक्तिराहित्यम्, ४६. क्रियायां वचनेऽपि च प्रमादशून्या बुद्धिस्थितिः, ४७. शिवादन्यवस्तूनां प्राप्तिसङ्कल्पवर्जनरूपो दमः, ४८. परद्रव्यापरिग्रहरूपमस्तेयम्, ४९. अप्राप्तवस्तुविषयव्यसनाभावरूपा सन्तुष्टिः, ५०. नित्यं परमेश्वरनामरूपयोः स्मरणम्, ५१. शम्भोर्नामरूपगुणादीनामनवरतं चिन्तनम्, ५२. सदा शम्भोः पादसंवाहनभावनम्, ५३. शम्भोरावाहनादिना मानसिकमर्चनम्, ५४ नित्यं शिवस्य पादाब्जयोर्मानसिकः प्रणामः, ५५. मनसा शिवस्य कैङ्कर्यकरणरूपं दास्यम्, ५६. मङ्गलस्वरूपस्य शिवस्य सखिभावरूपं सख्यम्, ५७. कृत्स्नस्य स्वकीयबन्धविमोचनभारस्येश्वरे समर्पणरूपमात्मसमर्पणम्, ५८. मूलमन्त्रस्य सदा मानसिको जपः, ५९. शम्भोर्दिव्यरूपानुसन्धानरूपं ध्यानम्, ६०. तैलधारावदविच्छिन्नं शिवमूर्तेर्मनसि धारणम्, ६१. निवातदीपवद् ध्याने चेतसः स्थितिरूपः समाधिः, ६२. सोऽहंभावेन ध्यानपूर्वकं कार्यकरणम्, ६३. महेशितुरपरिच्छिन्नरूपानुसन्धानम्, ६४. अनन्तरूपस्य देवस्य निजरूपतो भावनमित्येतत् पञ्चविंशविधं मानसिकं शीलमुच्यते[1]। तदेवं त्रिकरणेष्वाहृत्य चतुःषष्टिः

---

१. अथ मानसिकं वक्ष्ये शीलमेकमनाः शृणु ॥
निषिद्धभोगविषये यत् सङ्कल्पविवर्जनम् ।
ब्रह्मचर्यं हि तच्छीलं त्रिंशमीश्वरचोदितम् ॥
कामं भक्तिरसौ कुर्याद् विषयेषु न जातुचित् ।
एकत्रिंशमिदं शीलं निष्कामत्वं प्रकीर्तितम् ॥
वहेत् क्रोधमधर्मे तु न वैरिषु कदाचन ।
द्वात्रिंशकमिदं शीलमक्रोधं मुक्तिसाधनम् ॥
न धनादौ वहेल्लोभं शिवस्याराधने वहेत् ।
अलोभाख्यमिदं शीलं त्रयस्त्रिंशं समीरितम् ॥
मोहं भक्तजने कुर्यान्न कान्तायां सुतेषु वा ।
अमोहाख्यमिदं शीलं चतुस्त्रिंशं प्रकीर्तितम् ॥

शीलान्युक्तानि। चतुःषष्टिशीलाढ्येऽस्मिन् गणाचारे काम-क्रोध-लोभ-मोह-मद-मात्सर्याख्यानां षडरिवर्गाणां निवृत्तिप्रकारः, श्रवण-कीर्तन-स्मरण-पादसेवन-

---

मात्सर्यं करणेष्वेव न जनेषु वहेत् क्वचित्।
अमात्सर्यमिदं शीलं पञ्चत्रिंशं समीरितम्॥
मदं मायाजये कुर्यान्न धर्मे नाऽपि सम्पदि।
अमदाख्यमिदं शीलं षट्त्रिंशमिति कीर्तितम्॥
गुणागुणविमर्शस्य त्यागो यस्तु गुरौ चरे।
सप्तत्रिंशं समाख्यातं शीलं पुण्यफलप्रदम्॥
प्राणिनो यस्य कस्यापि न बाधाकरणं हि यत्।
अहिंसाख्यमिदं शीलमष्टत्रिंशं समीरितम्॥
प्राणिदुःखस्य वीक्षायामक्षमत्वं दयाभिधम्।
शीलं प्रसिद्धमेकोनचत्वारिंशं प्रकीर्तितम्॥
क्रियायां वचने वापि यत्परस्मात् स्वतोऽपि वा।
ह्रीर्या शीलमिदं प्रोक्तं चत्वारिंशं त्रिशूलिना॥
रिपौ निजसुते वापि यद्वैषम्यविवर्जनम्।
आर्जवाख्यं शीलमेकचत्वारिंशमुदाहृतम्॥
आगमे निगमे चैव विश्वासो यद् गुरूदिते।
श्रद्धाख्यं शीलमेतद् द्विचत्वारिंशं समीरितम्॥
आपद्यपि दुरन्तायां धर्मस्य यदवर्जनम्।
धृत्याख्यं शीलमेतत् त्रिचत्वारिंशं प्रकीर्तितम्॥
अदूषणं वैरिजनेष्वपकारपरेष्वपि।
शीलं क्षमाभिधं चतुश्चत्वारिंशं समीरितम्॥
भोगप्रयुक्तवाञ्छाया राहित्यं यद्धि मानसे।
भोगासक्तिच्युतिः पञ्चचत्वारिंशं समीरितम्॥
क्रियायां वचने वापि प्रमादरहितस्थितिः।
धीर्या शीलं तदिह षट्चत्वारिंशं विनिश्चितम्॥
शिवान्यवस्तुविषयसङ्कल्पपरिवर्जनम्।
शीलं दमाभिधं सप्तचत्वारिंशं प्रकीर्तितम्॥
अन्यूनधर्मानुष्ठानं परद्रव्यापरिग्रहः।
अस्तेयाख्यं शीलमष्टचत्वारिंशमुदाहृतम्॥
अलब्धवस्तुविषयव्यसनाभावसुस्थितिः।
सन्तुष्टिः शीलमेकोनपञ्चाशत्कं विनिश्चितु॥

अर्चन-वन्दन-दास्य-सख्य-आत्मनिवेदनाख्यानां नवविधानाम् भक्तीनाम्, शम-दम-श्रद्धा-समाधान-उपरति-तितिक्षाख्यानां षट्सम्पत्तीनाम्, यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाध्याख्यानामष्टाङ्गयोगानां च प्राप्तिप्रकारः सङ्केतितः। तस्मादस्य निष्ठया परिपालनेन शिवसायुज्यं प्राप्यते। तथा ह्युक्तम्—

पारमेश्वरयोर्नित्यं स्मरणं नामरूपयोः।
जीवन्मुक्तिप्रदं शीलं पञ्चाशत्कं समीरितम्॥
शम्भुनामगुणादीनां चिन्तनं यदनारतम्।
शीलं पाशहरं त्वेकपञ्चाशत्कं प्रकीर्तितम्॥
भाव्यमानं सदा शम्भोः पादसंवाहनादिकम्।
पादसेवनमेतद् द्विपञ्चाशत्कमुदाहृतम्॥
अर्चनं मानसं यत् स्याच्छम्भोरावाहनादिना।
शीलं त्विदं गोष्पते त्रिपञ्चाशत्कमुदाहृतम्॥
शम्भुपादाब्जयोर्नित्यं प्रणामो मानसो हि यत्।
शीलमेतत् किल चतुःपञ्चाशं सम्प्रकीर्तितम्॥
कैङ्कर्यकरणं शम्भोर्मनसा सर्वदा हि यत्।
दास्यं शीलमिदं पञ्चपञ्चाशमिति भाषितम्॥
शम्भोः कल्याणरूपस्य सखिताभावनं हि यत्।
सख्याख्यं शीलमेतत्षट्पञ्चाशमिति निश्चितम्॥
बन्धमोचनभारस्य कृत्स्नस्येशे समर्पणम्।
आत्मार्पणमिदं सप्तपञ्चाशं सम्प्रचोदितम्॥
यज्जपो मूलमन्त्रस्य मनसा क्रियते सदा।
शीलमेतत् सेव्यमष्टपञ्चाशमवधारितम्॥
शम्भोर्यद् दिव्यरूपानुसन्धानं क्रियते हृदि।
ध्यानाख्यं शीलमेकोनषष्टिकं परिकीर्तितम्॥
ध्रियते तैलधारावदविच्छिन्नं तदेव यत्।
धारणाख्यं शीलमिदं षष्टिकं समुदाहृतम्॥
निवातदीपवद् ध्याने चेतसो यदवस्थितिः।
समाध्याख्यं शीलमेकषष्टिकं सम्प्रचोदितम्॥
सोऽहंभावेन विश्वेशं ध्यायन् कृत्यानि सर्वतः।
तदिन्द्रियमुखेनैव क्रियमाणानि भावयन्॥

यश्चतुःषष्टिशीलाढ्यः शिव एव न चापरः ।
एतदभ्यासयोगेन शिवसायुज्यमश्नुते ॥[१] इति ।

५. भृत्याचारः

शिवभक्तजनाः सर्वे वरिष्ठाः पृथिवीतले ।
तेषां भृत्योऽहमिति यद् भृत्याचार इति स्मृतः ॥[२]

इत्यागमोक्त्या स्वात्मानं शिवस्य शिवभक्तानां च भृत्यं मत्वा निष्ठापूर्वकं तदीयसेवाकरणमेव भृत्याचारः । उक्तं च श्री. ज. रेणुकाचार्यैः—

शिवयोगी शिवः साक्षादिति कैङ्कर्यभक्तितः ।
पूजयेदादरेणैव यथा लिङ्गं यथा गुरुः ॥[३] इति ।

अयं भृत्याचारो भृत्यभावः, वीरभृत्यभाव इति द्विधा भवति । तत्र गुरुलिङ्गजङ्गमानां कैङ्कर्यभक्तितोऽर्चनं भृत्यभाव इत्युच्यते। पुनर्यदा भक्तः समुत्कर्षेण गुरवे तनुम्, स्वेष्टलिङ्गाय मनः, जङ्गमाय च स्वाखिलं सर्वस्वं प्रदाय पारलौकिकसुखेष्वपि निःस्पृहो भूत्वा मोक्षमात्राभिलाषुकस्तिष्ठति तदा वीरभृत्य इत्युच्यते । एतादृशवीरभृत्यभावनयैव भक्तः शिवानुग्रहमाप्नोति । तथा ह्युक्तम्—

देशिकाय तनुं चित्तं शम्भवे च धनं तथा ।
जङ्गमाय समर्प्यैवं महोत्साहसमन्वितः ॥
मुक्तिमेव परां काङ्क्षमाणो यदवतिष्ठते ।
तन्मतं वीरभृत्यत्वं शिवानुग्रहसाधनम् ॥[४] इति ।

यदाचरति तच्छीलं द्विषष्टिकमुदाहृतम् ।
अपरिच्छिन्नरूपानुसन्धानं यन्महेशितुः ॥
शीलमुक्तं सुराचार्य त्रिषष्टिकमुदाहृतम् ।
अनन्तरूपं देवस्य भावयन् निजरूपतः ॥
शिवानन्दवशाद् विश्वमात्मानं विस्मरन्नपि ।
यस्तिष्ठत्यचलः शीलं चतुःषष्टिकमीरितम् ॥ (च. ज्ञा., क्रि. ९।८७-१२२)

१. च. ज्ञा., क्रि ९।१२३

२. च. ज्ञा., क्रि. ९।९

३. सि. शि. ९।६६

४. च. ज्ञा , क्रि. ९।१२५-१२६

वीरशैवीयोऽयं भृत्याचारो विनयगुणप्रधानो भवति। अहङ्कारेण पतनं विनयेन चौन्नत्यप्राप्तिरिति तु शास्त्रप्रमाणेन लोकानुभवेन च प्रसिद्धम्। पूर्वोक्तानां लिङ्गाचार-सदाचार-शिवाचार-गणाचाराणां निष्ठापूर्वकं परिपालनेन कदाचित् साधके मादृश आचारशीलः कोऽस्ति ? इत्याकारकस्याभिमानस्य वर्तते समुदयप्रसङ्गः। प्राप्ते च तादृशेऽभिमाने भक्तस्य पतनं विनिश्चितम्। अत उत्कृष्टस्य साधकस्य पतनं मा भूदिति शैवागमे भृत्याचारोऽन्तत उपदिष्टः। भृत्यभावसत्त्व एव पूर्वोक्तानामाचाराणां फलं प्राप्यते। अनया भृत्यभावनयैव समाजे समतावादस्य शान्तेश्च प्रतिष्ठापनं कर्तुं शक्यते। अन्यथा सर्वैष्वहङ्कारभरितेषु सुन्दोपसुन्दन्यायेन तेषां विनाशो निश्चित एव। तस्मादयं भृत्यभावो न केवलं निम्नकोटिकानां साधकानामेव, किन्तूच्चतमसाधकानामप्यावश्यक इति विज्ञेयम्। तथा सत्येव समाजे सर्वतोमुखेन शान्तिः प्रसरेत्।

तदेवमुपर्युक्ताः पञ्चविधा आचाराः पञ्चाचारा इति कथ्यन्ते। वीरशैवपरम्परायां प्रायः सर्वेऽप्येतदाचरणशीला भवन्ति। एतादृशाचाराणां परिपालनेन सर्वेषां व्यावहारिकं जीवनं सुचारुरूपेण प्रचलति। आचारहीनः पुरुषस्तत्त्वज्ञानसम्पन्नोऽपि लोके निन्दाभाग् भवति। तस्मादज्ञानां कृते यथाचाराणां परिपालनमावश्यकम्, तथा तत्त्वज्ञानामपि कृते तदावश्यकमेव। तस्माद् वीरशैवा उपर्युक्तान् पञ्चाचारान् स्वकीयपञ्चप्राणानिव संरक्षन्ति।

तदेवमष्टावरणाङ्कः पञ्चाचारप्राणकश्च वीरशैवसाधको भक्त-माहेश्वर-प्रसादि-प्राणलिङ्गि-शरण-ऐक्याख्यषट्स्थलमार्गमवलम्ब्य शिवसायुज्यमाप्नोतीति वीरशैवापरपर्याये शक्तिविशिष्टाद्वैतवेदान्ते मोक्षस्य सहकारिकारणभूतानामष्टावरणपञ्चाचाराणामतीव माहात्म्यं वर्तते। अत एव क्रियासारे श्रीनीलकण्ठशिवाचार्याः—

अष्टावरणविज्ञानी पञ्चाचारपरायणः।
वैदिकं कर्म कुर्वीत ज्ञानैकफलसाधनम् ॥
न कुर्यात् पाशवं कर्म वीरशैवः कदाचन।

इति वीरशैवानां कृतेऽष्टावरण-पञ्चाचाराणामावश्यकतां प्रतिपादयामासुः। तदेवमुक्ता एते आचारा न केवलं वीरशैवानामेव, किन्तु समस्तमानवसमाजस्य परिष्कारका वर्तन्ते। अतः सर्वैरपि यथाशक्ति एतेषामाचाराणां परिपालनं कर्तव्यम् ॥

●

पञ्चमः परिच्छेदः

षट्स्थलसोपानक्रमः

वीरशैवसिद्धान्ते लिङ्गस्थलशब्दवाच्येन परशिवेन साकमङ्गस्थलशब्दवाच्यस्य जीवात्मनः समरसभावो मुक्तिरित्यभिधीयते । अयं समरसभावः षड्विधानां भक्तीनां विकासक्रमेण भवति। स क्रम एव षट्स्थलसोपानक्रमः। अस्मिन् मार्गक्रमे पूर्वोक्तान्यष्टावरणानि, पञ्चाचाराश्च सहायका भवन्तीति तेषां सहकारिकारणत्वमभ्युपगम्यते । तदेवमष्टावरणाङ्कः पञ्चाचारप्राणश्चाङ्गस्थलशब्दवाच्यः साधको भक्त-माहेश्वर-प्रसादि-प्राणलिङ्गि-शरण-ऐक्याख्यान् षट्स्थलान् क्रमेणारुह्यैक्यस्थले जले जलमिव लिङ्गस्थलशब्दवाच्येन परशिवेन साकं समरसो भवति। एवं साधकस्यात्र षडवस्था निरूपिताः सन्ति। तदुक्तमाचार्यैः—

आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरस्थलम्।
प्रसादिस्थलमन्यत्तु प्राणलिङ्गिस्थलं ततः॥
शरणस्थलमाख्यातं षष्ठमैक्यस्थलं मतम्॥[1] इति।

अत्रोक्तौ लिङ्गस्थलाङ्गस्थलावेकस्यैव स्थलरूपपरशिवस्य स्वरूपद्वयम्। सृष्टिकाले उपास्योपासकलीलार्थं तत्स्थलं स्वशक्तिक्षोभमात्रेण लिङ्गस्थलमङ्गस्थलं चेति द्विधा भवति। एवं शक्तिक्षोभेण वियुक्तयोस्तयोर्भक्तिमहिम्नाऽत्र पुनः सामरस्यं स्वीक्रियते। तदत्र स्थलस्वरूपम्, तद्विभेदिकायाः शक्तेः स्वरूपम्, तयोः सामरस्यप्रापिकाया भक्तेः स्वरूपं च प्रथमतः संक्षेपेण निरूप्य तदनन्तरं क्रमशस्तदुपासनक्रमः प्रस्तूयते।

स्थलम्

एकमेव परं ब्रह्म सच्चिदानन्दलक्षणम्।
शिवतत्त्वं शिवाचार्याः स्थलमित्याहुरादरात्॥[2]

इति मायिदेवोक्त्या सच्चिदानन्दलक्षणं परशिवब्रह्मैवात्र स्थलशब्देन व्यवह्रियते। सर्वेषां महदादितत्त्वानामाविर्भावस्य लयस्य च स्थानभूतत्वादस्य

---

१. सि. शि. ५।२३

२. अ. सू. २।२

स्थलसंज्ञा सार्थिकैव प्रतिभाति। स्थलशब्दे विद्यमानः स्थकारः स्थानवाची, लकारश्च लयवाचकः, इत्यक्षरार्थप्रतिपादनपुरःसरं श्रीमायिदेवः स्थलतत्त्वमेव स्थावरस्य चरस्य च जगतोऽधिष्ठानमिति; सर्वासां शक्तीनाम्, सर्वविधानां ज्योतिषाम्, अखिलात्मनां चाधारमिति; सर्वभूतानाम्, सर्वलोकानाम्, सर्व-सम्पदां चालय इति; परनिर्वाणनिष्ठानामपोदमेव परमं पदमिति च प्रतिपाद्य स्थलतत्त्वस्य स्वरूपं विस्तरेण विवेचितवान्[1]।

अयं स्थलाख्यः परशिवो विमर्शशक्तिविशिष्टः। इयं विमर्शशक्तिरपि परशिववत् सच्चिदानन्दस्वरूपा भवति[2]।

स्थलशक्त्योर्लीलाविभागः

विमर्शशक्तिविशिष्टं तत्स्थलं स्वेच्छया उपास्योपासकलीलार्थं लिङ्ग-स्थलमङ्गस्थलं चेति स्वयमेव द्विधा भवति। नाशिवस्य शिवोपास्तिः कदापि घटते, किन्तु शिवस्यैव शिवोपास्तीति रहस्यबोधनार्थमेवेयं लीलेति विज्ञेयम्। अत्र शिवो लिङ्गमिति, जीवश्चाङ्गमिति कथ्यते। "यथा स्थलं द्विधाभूतं तथा शक्तिर्द्विधा भवेत्"[3] इति मायिदेवोक्त्या स्थलनिष्ठा तत्सहधर्मिणीऽप्रतिमा सा चिच्छक्तिरपि स्वस्वातन्त्र्यबलेन द्विधा विभक्ता। तत्रैका लिङ्गस्थलमाश्रिता,

१. स्थकारः स्थानवाची स्याल्लकारो लयवाचकः।
तयोः कारणभूतं यत् तदेव स्थलमुच्यते ॥

अधिष्ठानं समस्तस्य स्थावरस्य चरस्य च।
जगतो यद्भवेत् तत्त्वं तद्धि वै स्थलमुच्यते ॥

आधारं सर्वशक्तीनां ज्योतिषामखिलात्मनाम्।
यत् तत्त्वं भवति प्राज्ञैः स्थलं तत्परिगीयते ॥

आलयः सर्वभूतानां लोकानां सर्वसम्पदाम्।
यद्भवेत् परमं ब्रह्म स्थलं तत्प्राहुरक्षरम् ॥

परनिर्वाणनिष्ठानां यद्भवेत् परमं पदम्।
तदाहुः स्थलमद्वैतं शिवज्ञानैकतत्पराः ॥ (अ. सू. २।५-९)

२. तदीया परमा शक्तिः सच्चिदानन्दलक्षणा। (सि. शि. २।१२)

३. अ. सू. २।१९

अपरा चाङ्गस्थलं समाश्रिता। लिङ्गस्थलाश्रया शक्तिः कलेति, अङ्गस्थलाश्रया शक्तिश्च भक्तिरिति कथ्यते[1]।

कलाभक्त्योः स्वरूपविमर्शः

लिङ्गस्थलाश्रया कलारूपा शक्तिः प्रवृत्तिरूपा। अत एव तत्साहाय्येन परशिवः सृष्टिं विधास्यति। शक्तिमहिम्ना नीरूपोऽपि परशिवः सरूपो भवति। तस्मात् प्रपञ्चवृद्ध्यपेक्षत्वम्, अधोमुखत्वम्, मायामयत्वम्, उपास्यत्वं चेत्येते लिङ्गस्थलाश्रितायाः कलाशक्तेः स्वाभाविका गुणाः।

अङ्गस्थलाश्रिता या भक्तिरूपा शक्तिर्वर्तते, सा त्वेतद्विपरीता। अत एवेयं निवृत्तिरूपा। अस्या महिम्ना सरूपोऽपि नीरूपतामापद्यते। तस्मात् प्रपञ्चसंक्षयापेक्षत्वम्, ऊर्ध्वमुखत्वम्, निर्मायत्वम्, उपासकत्वं चेत्येतेऽङ्गस्थलाश्रिताया भक्तिरूपशक्तेः स्वाभाविका गुणाः[2]। एवं विचार्यमाणे मुमुक्षूणां कृते भक्तिरेव महत्तरा प्रतिभाति। वस्तुतस्तु सा एकैव। लोके यथा माता पत्युः संसर्गेण पुत्रोत्पत्तौ कारणीभूता, उत्पन्नानां पुत्राणां स्वपितुः परिज्ञाने च सहायिका भवति; तथेयं शक्तिः परशिवसम्बन्धेन प्रपञ्चोत्पत्तौ कारणीभूताऽपि पुनर्भक्तिरूपेण जीवात्मनो मुक्तौ सहायिका भवति। तस्मादत्र षट्स्थलोपासनायां षड्विधानामेव भक्तीनां साहाय्येनाङ्गस्य लिङ्गरूपत्वप्राप्तिरभ्युपगम्यते। भक्तितत्त्वमतीव व्यापकम्। सर्वेष्वपि सम्प्रदायेषु तस्य समादरो वर्तते। तदत्र संक्षेपेण निरूप्यते।

---

१. लिङ्गस्थलाश्रया काचित् काचिदङ्गस्थलाश्रया।
लिङ्गस्थलाश्रया शक्तिः कलारूपा प्रकीर्तिता॥
अङ्गस्थलाश्रया शक्तिर्भक्तिरूपा भवापहा।
(अ. सू. २।२२-२३)

२. तस्मात् सवासना शक्तिर्भक्तिर्निर्वासना मता।
शक्तिः प्रवृत्तिराख्याता निवृत्तिर्भक्तिरीरिता॥
शक्त्या प्रपञ्चसृष्टिः स्याद्भक्त्या तद्विलयो मतः।
शक्तिवैचित्र्यतो रूपं नीरूपमपि याति हि।
भक्तिवैचित्र्यतो रूपमपि नीरूपतामियात्॥
प्रपञ्चवृद्ध्यपेक्षा हि शक्तेः स्वाभाविको गुणः।
प्रपञ्चसंक्षयापेक्षा भक्तेः स्वाभाविको गुणः॥

विभिन्नसम्प्रदायेषु भक्तिः

शब्दशास्त्रदृष्ट्या भजनं रसनं भक्तिः, भज्यतेऽनया भक्तिः, भजन्त्यनयेति भक्तिर्वेति रीत्या भावे करणे वा 'भज् सेवायाम्' इति धातोः क्तिन्प्रत्यये सति भक्तिशब्दो[1] निष्पद्यते। यद्यपि शास्त्रेषु भक्तिशब्दः सेवायाम्, आराधनायाम्, उपासनायाम्, तदेकतानतायाम्, चित्तवृत्तिभेदे, विभागे, गौण्यां वृत्तौ, उपचारे, अवयवे, श्रद्धायाम्, रचनायामन्येषु च बहुष्वर्थेषु प्रयुज्यते, किन्तु भक्तिशास्त्रे सर्वत्र सामान्यतो भगवत्प्रीत्यनुकूलव्यापारेष्वेव प्रयुज्यतेऽयं भक्तिशब्दः[2]।

श्रद्धा-विश्वास-प्रेमपरिप्लावितभक्तहृदयस्य मधुरमनोराग एव भक्तिः। भक्तिरियमुपास्योपासकयोर्भावात्मकसम्बन्धविशेषो वर्तते। स चोपासनया एव स्थाप्यते। अत एव उपोपसर्गपूर्वकाद् 'आस् उपवेशने' इति धातोर्निष्पन्नस्य उपासनशब्दस्य समीपमुपवेशनमित्यर्थो भवति। तेन भगवतो नैकट्येन प्राप्ति-रेवोपासनायास्तात्पर्यमिति गम्यते। उपास्यं प्रत्युपासकस्यानुरागोऽयं लौकिकानुरागसदृशो मलिनो न विद्यते, अपि तु प्रतिक्षणं प्रवर्धमानः परम-निर्मलोऽस्ति। तादृशीं प्रेमोपासनां विना जप-तपो-ज्ञानादिकं तथैव वृथा वर्तते, यथा वरं विना विवाहोद्यमः। वरिवस्या, शुश्रूषा, परिचर्या, आराधना, सेवा, भक्तिश्चेत्यादयस्तस्योपासनाशब्दस्यापरपर्यायाः सन्ति[3]। भक्तिशास्त्रानुसारी उपासनाशब्दार्थस्तु विधिपूर्वकमुपास्यविषयिका तैलधारावदविच्छिन्नरूपेण दीर्घकालिकचित्तैकाग्रयपूर्विकाऽतिशयिता प्रीतिरेव। एवं भक्त्युपासनाशब्दयोः स्वरूपभेदेऽपि तयोरर्थभेदो नास्तीति विज्ञेयम्।

भक्तिरसस्य मूलं स्रोतो भक्तिशास्त्रमेव। यद्यपि भक्तिरसस्य बीजं वैदिकवाङ्मयेऽपि समुपलभ्यते, किन्तु तस्य स्पष्टं स्वरूपं भक्तिशास्त्रेऽ्वेव

अधोमुखी भवेच्छक्तिर्भक्तिरूर्ध्वंमुखो भवेत्।
समाया शक्तिराख्याता निर्माया भक्तिरीरिता॥
उपास्यत्वं भवेच्छक्त्या भक्त्योपासकता भवेत्।
(अ. सू. २।२५,२७-३२)

१. भज्धातोस्तु सेवार्थः प्रेम क्तिन्प्रत्ययस्य च।
स्नेहेन भगवत्सेवा भक्तिरित्युच्यते बुधैः॥
(भ. र. वि., पृ. २९)

२. वाच०, पृ. ४६१८; श. क., भा. ३, पृ. ४६३

३. पूजा नमस्यापचितिः सपर्याचार्हणाः समाः।
वरिवस्या तु शुश्रूषा परिचर्याप्युपासना॥ (अ. को. २।७।३४-३५)

परिलक्ष्यते। आचार्यभेदेन भक्तिशास्त्रमपि विभिन्नेषु सम्प्रदायेषु विभक्तम्। सर्वेषु सम्प्रदायेषु भक्तिस्वरूपविषये क्वचिदंशे साम्येऽप्यांशिको भेदः परिदृश्यत एव।

भक्तेः शास्त्रीयं विवेचनं प्रथमतः शाण्डिल्यभक्तिसूत्रे, नारदभक्तिसूत्रे च समुपलभ्यते। तत्रादौ शाण्डिल्यमतेऽखिलब्रह्माण्डनायके परमात्मनि भगवति सर्वोत्कृष्टानुरक्तिरेव भक्तिरिति[1]। सैव भगवत्प्राप्त्यर्थं सर्वोत्तमोपायभूता सर्वजनसुलभा च। तत्राबालवृद्धानां स्त्रीशूद्रादीनां च सर्वेषां समानाधिकारो वर्तते[2]। तया स्वल्पया भक्त्याऽपि जन्मजन्मान्तरीयदुष्कृतान्यनायासेन विनश्यन्ति[3]। नारदीयसूत्रानुसारं शाण्डिल्यमते स्वात्मरत्यनुकूलविषये स्नेहाधिक्यमेव भक्तिर्गीयते[4]। एवं च शाण्डिल्यमते भगवद्रतिरूपा भक्ती रसस्वरूपैव विद्यते। इत्थं चाऽऽचार्यशाण्डिल्यः कथयति यत् सर्वात्मना तैलधारावदविच्छिन्ना परमेश्वरे या प्रेमपरिष्वक्ता निष्कामा चित्तवृत्तिः, सैव भक्तिर्निगद्यत इति।

नारदस्तु परमेश्वरं प्रति परमानुराग एव भक्तिरिति कथयति[5]। भक्तिरमृतस्वरूपा विद्यते। भगवति सर्वतोभावेन स्वात्मसमर्पणम्, तद्विरहे सति परमव्याकुलत्वमेव भक्तिरिति नारदाभिप्रायः[6]। तन्मते तस्याश्च साधनं विषयसंसर्गस्य त्यागः, अखण्डभजनम्, भगवद्गुणश्रवणम्, कीर्तनम्, मुख्यतया भक्तमहापुरुषाणां भगवतश्च कृपाप्राप्तिश्चेति[7]। अपि च, तन्मते गौणी भक्तिः सत्त्वरजस्तमोभेदेन भक्तस्याऽऽर्तजिज्ञास्वर्थार्थिभेदेन वा त्रिविधा। प्रेमा भक्तिरेका सत्यपि एकादशधा भवति[8]। सा च परमप्रेमस्वरूपानिर्वचनीयैव। अपि च, मूकस्य सितास्वादवद् वर्णनातीतैव। एवं च सा प्रेमाभक्तिः कतिपयैर्विरल-

---

१. "सा परानुरक्तिरीश्वरे" (शा. भ. सू. २)
२. "अनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत्" (शा. भ. सू. २२)
३. "लघ्वपि भक्ताधिकारे महत्क्षेमकमपरसर्वहानात्" (शा. भ. सू. ७८)
४. "आत्मरत्यविरोधेनेति शाण्डिल्यः" (ना. भ. सू. १८)
५. "सा त्वस्मिन् परमप्रेमरूपा" (ना. भ सू. २)
६. "तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलता" (ना. भ. सू. १९)
७. ना. भ. सू ३५-३८
८. ना. भ. सू ५६-८२

साधकैरेव प्राप्यते। सा च कर्मज्ञानयोगादिभ्यः श्रेष्ठतमा स्वयं फलरूपा च वर्तते[१]।

नारदभक्तिसूत्राध्ययनेन तत्र व्यासगर्गाचार्ययोर्भक्तिविषयकमभिमतमप्युपलभ्यते। नारदीयभक्तिसूत्रानुसारं व्यासमते आचार्येषु स्नेह एव भक्तिः, गार्ग्यमते भगवत्कथादिष्वनन्यानुराग एव भक्तिरिति कथ्यते[२]। एवं च नारदशाण्डिलययोर्मते भक्तिस्वरूपविषये नास्ति विशेषभेदः, यत उभयोर्मतस्य भगवति परमानुराग एव भक्तिरिति सारभूतोंऽशः। अपि चात्मरतेर्विषयः परमेश्वर एव, स एव सर्वैः सेवनीयः।

नारदपाञ्चरात्रे भीष्मप्रह्लादादिमतानुसारं लौकिकविषयेभ्यः पराङ्मुखीभूय भगवन्तं प्रत्यनन्यभावेन प्रीतिपूर्विका ममतैव भक्तिरिति प्रतिपादितम्[३]।

बृहन्नारदीये प्रतिपादितं यद् भगवद्भक्तियुक्तश्चाण्डालोऽपि ब्राह्मणेभ्यः श्रेष्ठः, किन्तु भक्तिविहीना ब्राह्मणा अपि चाण्डालतुल्या भवन्तीति[४]। तन्मतानुसारं सा च भक्तिर्ज्ञानादिभ्यः श्रेष्ठा, यतो हि ज्ञानेन मुक्तिः, यज्ञादिना स्वर्गभोगश्च सुलभतया प्राप्यते, परन्तु भक्तिस्तु सहस्राधिकसाधनैरपि भगवदनुग्रहं विना दुष्प्रापैव[५]।

भक्तिशास्त्रातिरिक्तं वाल्मीकीये रामायणे, अध्यात्मरामायणे, महाभारते, गीतायाम्, पुराणेषु, श्रीमद्भागवते च प्रसङ्गानुसारं भक्तेः स्वरूपं तत्प्रभेदाश्च निरूपिताः सन्ति।

प्रायः सर्वेष्वपि भारतीयदर्शनेषु भक्तिर्मुक्तेः परम्परया साक्षाद्वा साधनत्वेन परिगृहीतैव। न्यायदर्शने महर्षिणा गोतमेन मोक्षप्राप्तौ श्रवणादिना

---

१. ना. भ. सू. ५१-५५

२. ना. भ. सू. १६-१७

३. अनन्यममता विष्णौ ममता प्रेमसंज्ञिता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः॥ (भ. र. वि., पृ. ३०)

४. चाण्डालोऽपि मुनिश्रेष्ठा विष्णुभक्तो द्विजाधिकः।
विष्णुभक्तिविहीनश्च द्विजोऽपि श्वपचाधिकः॥ (बृ. ना. पु. ३२।३९)

५. ज्ञानतः सुलभा मुक्तिः स्वर्गो यज्ञादिपुण्यतः।
सेयं साधनसाहस्रैर्हरिभक्तिः सुदुर्लभा॥ (भ. रि. वि., पृ. ३१)

साकं यमाद्यष्टाङ्गयोगश्चावश्यक इति प्रतिपाद्यते[१]। नैयायिको भासर्वज्ञो महर्ष्युक्ताऽष्टाङ्गयोगेनाऽनभिरतिसंज्ञस्य परवैराग्यस्योदयः, ततो महेश्वरे परा भक्तिः, तद्भक्त्या च शिवसाक्षात्कारः, ततः शिवाऽनुग्रहेण च मोक्ष इति प्रतिपादयन् तदर्थम्—

यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः।
तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥[२]

इति श्रुतिं प्रमाणत्वेनोपस्थापयति[३]।

वैशेषिकदर्शने महर्षिणा कणादेन—"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः"[४], "धर्मविशेषप्रसूताद्.... तत्त्वज्ञानान्निःश्रेयसम्"[५] इत्यादिसूत्रैर्निवृत्तिलक्षणधर्मेण पदार्थानां साधर्म्य-वैधर्म्यतत्त्वज्ञानोदयः, ततश्च मोक्ष इति समादिष्टम्। किन्तु भाष्यकारेण प्रशस्तपादाचार्येण—"तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव"[६] इति, श्रीधरभट्टेन च—"धर्मोऽपि तावन्न निःश्रेयसं करोति यावदीश्वरेच्छया नाऽनुगृह्यते"[७] इतीश्वरेच्छाविशेषेण कार्यारम्भाभिमुखीकृताद् धर्मात् तत्त्वज्ञानम्, ततश्च निःश्रेयसमिति व्यवस्थापितम्। अतो वैशेषिकदर्शनेऽपि मोक्षप्राप्तावीश्वरानुग्रहोऽपेक्षितः। स चानुग्रहो भक्त्या समुपलभ्यत इत्यत्रापि भक्तिरपेक्ष्यत एव।

योगदर्शने महर्षिणा पतञ्जलिना—"समाधिसिद्धिरीश्वरप्रणिधानात्"[८] इति सूत्रेण समाधिफलस्य कैवल्यस्य प्राप्तिरीश्वरानुग्रहेण भवतीति स्पष्टमभिहितम्। अत्र प्रणिधानशब्दार्थो भक्तिविशेष इति बोद्धव्यम्।

मीमांसादर्शने प्राचीनाचार्यैरीश्वरनिरासेऽप्यर्वाचीनाभ्यामापदेव-लौगाक्षिभास्कराभ्यामीश्वरो यज्ञपतित्वेनाङ्गीकृतः, स्वर्गसाधनानां दर्शपूर्णमासादियागाना-

---

१. न्या. सू. ४।२।३८,४२,४६
२. श्वे. उ. ६।२०
३. न्या. सा., पृ. ३०
४. वै. सू. १।१।२
५. वै. सू. १।१।४
६. प्र. पा. भा., पृ. १८
७. न्या. क., पृ. १९
८. यो. सू. २।४५

मीश्वरार्पणबुद्ध्या करणेन च तदनुग्रहबलाद् निःश्रेयसावाप्तिरित्यभिहितम्[१]। तस्मादत्रापीश्वरार्पणबुद्ध्या कर्मकर्तृत्वरूपा भक्तिर्निःश्रेयसहेतुत्वेनाङ्गीकृतैव।

एवमेव सर्वेष्वपि वेदान्तसम्प्रदायेषु भक्तेः समादरो दरीदृश्यते। तत्राद्वैतमतस्थापनाचार्याः श्रीमच्छङ्कराचार्या विशुद्धज्ञानमार्गिण आसन्। तैरपि महदादरेण भक्तिः स्वीकृता। तन्मतेऽपि मोक्षप्राप्तिसाधनेषु भक्तिरेव सर्वोत्तमं साधनमुपपादितम्[२]। यथा मलिनं वस्त्रं क्षारीयजलं (फेनिलं) विना शुभ्रं न भवति, तथैव मलिनान्तःकरणमपि भक्तिं विना न शुद्ध्यतीति तेषामाशयः[३]। एतन्मतानुसारं भक्तिर्नाम भगवच्चरणारविन्दानुचिन्तनम्[४], स्वस्वरूपानुसन्धानं च[५]। एवं च केवलाद्वैतसमर्थकानां भगवत्पादानां मतेऽपि भक्तेर्महत्त्वं वर्तत एव।

वैष्णववेदान्तेषु श्रीरामानुजाचार्येण—"स्नेहपूर्वमनुध्यानं भक्तिरित्युच्यते बुधैः"[६] इति परमप्रीतिपूर्वकं तैलधारावदनवच्छिन्नवृत्त्या स्वेष्टस्य परमात्मनश्चिन्तनमेव भक्तिरिति प्रतिपाद्यते। सम्प्रदायेऽस्मिन् परमानुरागात्मिका धीरेव भक्तिः, सैव मोक्षस्य साधनम्। तत्प्राप्तौ सत्यां वर्णकर्माद्यभिमानरहितः सन् साधको भगवदितरवाञ्छाविनिर्मुक्तो जायते। सैव शास्त्रेषु ज्ञानध्यानादिशब्दैरपि प्रतिपाद्यते।

श्रीमता रामानन्दाचार्येण—अनन्यभावेन परमात्मनि तैलधारावदनवच्छिन्नानुरक्तिरेव भक्तित्वेनाभिहिता। तस्याश्च विवेकादिसप्तभूमिकाः, यमाद्यष्टावयवाश्च भवन्ति। सैव मुक्तिप्रदायिनी वर्तत इत्यङ्गीकृतम्[७]।

---

१. मी. प्र., पृ. २७७-२७८; अ. सं., पृ. १६२

२. "मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी" (वि. चू. ३२)।

३. शुद्ध्यति हि नान्तरात्मा कृष्णपदाम्भोजभक्तिमृते।
वसनमिव क्षारोदैर्भक्त्या प्रक्षाल्यते चेतः॥ (प्र. सु. १६७ श्लो.)

४. अङ्कोलं निजबीजसन्ततिरयस्कान्तोपलं सूचिका
साध्वी नैजविभुं लता क्षितिरुहं सिन्धुः सरिद्वल्लभम्।
प्राप्नोतीह यथा तथा पशुपतेः पादारविन्दद्वयं
चेतोवृत्तिरुपेत्य तिष्ठति सदा सा भक्तिरित्युच्यते॥ (शि. ल.)

५. "स्वस्वरूपानुसन्धानं भक्तिरित्यभिधीयते" (वि. चू. ३२)

६. भ. गी, ७ अ. अवतरणिकाभाष्यम्।

७. वै. भा., पृ. ६५

श्रीवल्लभाचार्येण—पुत्रवनिताद्यपेक्षया माहात्म्यज्ञानपूर्विका भगवति प्रगाढप्रीतिरेव भक्तिरित्युक्ता। तन्मते तयैव मुक्तिः प्राप्यते नान्यथेति स्वीक्रियते। "विना ज्ञानं कुतो भक्तिः कुतो भक्ति विना च तत्"[१] इति श्रीवल्लभाचार्योक्त्यनुसारं तन्मते भगवतो माहात्म्यज्ञानपूर्विका भक्तिरेव भगवत्प्राप्तिसाधनमिति निश्चीयते। अयं भक्तिमार्गः पुष्टिमार्ग इत्युच्यते।

परमद्वैतवादिना मध्वाचार्येण—"मुक्तिर्नैजसुखानुभूतिः" इत्यङ्गीकृतम्। तत्रापि तादृशमोक्षार्थं विष्णोरनन्यभक्तिरेव विहिता। श्रीनिम्बार्काचार्यो दैन्यादिगुणगणसमन्वितां प्रेमरूपां भक्तिं मोक्षसाधनत्वेनाङ्गीकरोति। तन्मते साधनभक्तिः, साध्यभक्तिश्चेति भक्तिर्द्विविधा भवति[२]।

एवमेवागमसम्प्रदायप्रसिद्धेषु द्वैत-द्वैताद्वैत-अद्वैतप्रतिपादकेषु शैवदर्शनेष्वपि योग-ज्ञान-भक्तीनां सुन्दरः समन्वयो वर्तत एव। तदेवं वेदागमसम्मतेषु सर्वेष्वपि सम्प्रदायेषु भक्तेरङ्गीकारो वर्तते।

भक्तेः प्रभेदाः

महर्षेः शाण्डिल्यस्य[३], महर्षेर्नारदस्य च[४] मतेन गौणीमुख्याभेदेन सामान्यतो भक्तिर्द्विविधा। पुनर्नारदस्तु भक्तेरेकादशविधत्वं प्रतिपादयामास। तदनुसारम्—१. गुणमाहात्म्यासक्तिः, २. रूपासक्तिः, ३. पूजासक्तिः, ४. स्मरणासक्तिः, ५. दास्यासक्तिः, ६. सख्यासक्तिः, ७. कान्तासक्तिः, ८. वात्सल्यासक्तिः, ९. आत्मनिवेदनासक्तिः, १०. तन्मयतासक्तिः, ११. परमविरहासक्तिश्चेति भक्तेरेकादशप्रकारा[५] भवन्ति।

श्रीमद्भागवतमहापुराणे[६] श्रवणाद्यात्मनिवेदनान्ता भक्तेर्नव भेदाः प्रपञ्चिताः। तत्र परमात्मनश्चरितश्रवणे परीक्षितः, तस्य गुणगणकीर्तने शुकदेवः, स्मरणे प्रह्लादः, पादसेवने लक्ष्मीः, अर्चने पृथुः, वन्दनेऽक्रूरः, दास्ये हनूमान्,

---

१. भ. र. वि., पृ. ३४

२. भ. र. वि, पृ. ३३

३. शा. भ. सू. ७२

४. ना. भ. सू. ५४-६९

५. ना. भ. सू. ८२-८३

६. श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ (भागव. १।५।२३)

सख्येऽर्जुनः, आत्मनिवेदने च बलिरिति नवभेदात्मिकाया भक्तेः परमात्मनो नव भक्ता वर्णिताः सन्ति। एते सर्वे भक्ता भगवतः समानरूपेण प्रियाः सन्ति। भक्तेरेते नव भेदा अध्यात्मरामायणे, रामचरितमानसे च वर्णिताः सन्ति।

प्रोक्तविवेचनानुसारं नारदभक्तिसूत्रोक्तानां श्रीमद्भागवतोक्तानां च भक्तीनां तत्त्वतः किमपि वैलक्षण्यं न प्रतीयते। यतो हि एकमेव तत्त्वमुभयत्र नामान्तरेण प्रतिपादितम्। तथाहि—नारदभक्तिसूत्रस्य स्मरणासक्तिर्दास्यासक्तिः सख्यासक्तिश्च भागवतस्य स्मरण-दास्य-सख्यभक्तिषु, पूजासक्तिः पादसेवनार्चनवन्दनरूपभक्तिषु, गुणमाहात्म्यासक्ती रूपासक्तिश्च श्रवण-कीर्तनयोः, आत्मनिवेदनासक्तिः, तन्मयतासक्तिः, कान्तासक्तिः, वात्सल्यासक्तिः, परमविरहासक्तिश्च भागवतप्रतिपादिताऽऽत्मनिवेदनरूपभक्तौ समाविशन्ति। एवं च भागवत-नारदसूत्रयोरात्मनिवेदनरूपा भक्तिरेव सर्वश्रेष्ठा भक्तिर्विद्यत इत्यायाति। यतो हि तत्रैवाराध्याराधकयोश्चानन्यभावः समुत्पद्यते, यो हि भक्तिरसस्य प्राणभूत एवास्ति। तत्रैवोपासक उपास्ये लीनो भवति।

वोपदेवेन भागवतमनुसृत्य स्वीये मुक्ताफले कामजा, द्वेषजा, भयजा, स्नेहजा चेति तस्याश्चत्वारो भेदाः, तासां च भक्तीनां क्रमशो गोपीजनाः, कंसप्रभृतयः, चैद्यादिनृपाः, कृष्णसम्बन्धिनश्चेति चत्वारोऽधिकारिणश्च प्रदर्शिताः[१]।

श्रीमद्भगवद्गीतायाम्[२]—आर्त-जिज्ञासु-अर्थार्थि-ज्ञानीति भक्तानां चातुर्विध्यं प्रतिपाद्य भक्तेरपि चतुर्विधत्वं निरूपितम्। अत्र ज्ञानिनो भक्तस्य माहात्म्यमधिकं वर्तते। इत्थं च भगवद्भक्ता भगवद्भक्तियोगेनैव सर्वं लभन्ते। एवं च कर्मज्ञानोपासनेषु मुक्तिसाधनेषु भक्तियोग एव परमोत्कृष्टतमो मुक्तेरुपाय इति भक्तिशास्त्रतात्पर्यम्।

वीरशैवसिद्धान्ते भक्तिः, तत्प्रभेदाश्च

वीरशैवसिद्धान्ते "साङ्गान्यूना च या सेवा सा भक्तिरिति कथ्यते" इत्याचार्योक्त्या परशिवस्य प्रीतिपूर्विका सेवा भक्तिरित्यभ्युपगम्यते। इयं करणत्रयेणाभिव्यज्यते। तत्र कायेन स्वेष्टलिङ्गस्यान्वहं पूजनम्, वचसा पञ्चाक्षरमहामनोर्जपः, मनसा च प्राणलिङ्गभावलिङ्गयोरनुसन्धानमिति हि

१. भ. र. वि., पृ. ४६
२. भ. गी. ७।१६

वर्तते करणत्रयात्मिका भक्तिः[1]। अत्रापि पूर्वोक्तानां श्रवणाद्यात्मनिवेदनान्तानां नवविधानां भक्तीनामङ्गीकारो वर्तत एव[2]। एतादृशभक्तियुक्तो म्लेच्छोऽपि शिवानुग्रहार्हः, न तु भक्तिवर्जितो विप्र इति वीरशैवराद्धान्तः[3]।

इयं भक्तिरत्र बाह्या, आभ्यन्तरा, बाह्याभ्यन्तरा चेति पुनस्त्रिधा विभज्यते। तत्र परदृष्टिगोचरीभूतं शिवपूजादिकं कर्म बाह्यमिति, परदृष्टिश्रुत्यगोचरत्वेन स्वमात्रगोचरमाभ्यन्तरम्, काकाक्षिगोलकन्यायेन मनसो बाह्ये आभ्यन्तरे च संचरणशीलं बाह्याभ्यन्तरमिति ज्ञेयम्[4]।

अत्रोक्तेषु भक्तित्रयेषु प्राणलिङ्ग-भावलिङ्गानुसन्धानपराऽऽभ्यन्तरा भक्तिरेव श्रेष्ठतमा। "सा यस्मिन् वर्तते तस्य जीवनं भ्रष्टबीजवत्"[5] इत्याचार्यादेशानुसारं तादृशभक्तियुक्तस्य भर्जितबीजवत् पुनर्जन्म न भवत्येव।

मुक्तिविधायिनी इयमाभ्यन्तरा भक्तिर्न सर्वजनसुलभा, किन्त्वनेकजन्मकृतशिवध्यानशिवपूजादिना परिशुद्धचित्तानां श्रुतिस्मृत्युक्तनित्यनैमित्तिककर्मानुष्ठानवतां काम्यकर्मनिस्पृहाणाम्, अत एव शिवानुग्रहवतां सुज्ञानिनामेव सुलभा। तदुक्तम्—

प्रसादादेव सा भक्तिः प्रसादो भक्तिसम्भवः।
यथैवाङ्कुरतो बीजं बीजतो वा यथाङ्कुरः॥
प्रसादपूर्विका येयं भक्तिर्मुक्तिविधायिनो।
नैव सा शक्यते प्राप्तुं नरैरेकेन जन्मना॥
अनेकजन्मशुद्धानां श्रौतस्मार्तानुवर्तिनाम्।
विरक्तानां प्रबुद्धानां प्रसीदति महेश्वरः॥
प्रसन्ने सति मुक्तोऽभून्मुक्तः शिवसमो भवेत्।[6] इति।

---

१. सि. शि. ९।१५-१६
२. सि. शि. ९।२-३
३. भक्तिः स्थिरीकृता यस्मिन् म्लेच्छे वा द्विजसत्तमे।
शम्भोः प्रियः स विप्रश्च न प्रियो भक्तिवर्जितः॥ (सि. शि. ९।५)
४. सि. शि. ९।१७
५. सि. शि. ९।९
६. सि. सि. ९।११-१३

अत्र सिद्धान्ते शिवसायुज्यप्राप्तये भक्ताद्यैक्यान्तानां षट्स्थलानां स्वीकारात्, भक्त्यैव तेषां स्थलानां क्रमशोऽर्ज्यमाणत्वाद् एकैकस्य स्थलस्य एकैकभक्तिभेदेन श्रीमायिदेवः श्रद्धा-निष्ठा-अवधान-अनुभव-आनन्द-समरसाख्यानां षड्विधानां भक्तीनां निरूपणमकरोत्[1]। तदत्र तत्तद्भक्तिस्वरूपनिरूपणपुरःसरं षट्स्थलोपासनायाः क्रमस्तावद्विमृश्यते ।

१. भक्तस्थलं भक्तश्च

शिवे भक्तिः समुत्पन्ना यस्यासौ भक्त उच्यते ।
तस्यानुष्ठेयधर्माणामुक्तिर्भक्तस्थलं मतम् ॥[2]

इत्याचार्योक्त्या भक्तस्थले प्रतिपादितानामाचाराणामाचरणशीलः शिवे श्रद्धावांश्च साधको भक्त इत्युच्यते । "श्रद्धादरे च काङ्क्षायाम्", "श्रद्धा संप्रत्ययः स्पृहा"[3] इति मेदिन्याः, अमरकोशस्य च प्रामाण्येन श्रद्धानाम समादरः, आकाङ्क्षा चेत्यर्थो भवति । तस्माद्वीरशैवधर्मोक्तानामष्टावरणानां पञ्चाचाराणां च समादरेण निरतिशयप्रेम्णा चाकाङ्क्षणमेव श्रद्धाभक्तिरिति विज्ञेया । एतादृशभक्तिविशिष्टः साधक एव भक्तस्थलीयो भक्तः ।

षट्स्थलस्य प्रथमसोपानभूतेऽस्मिन् भक्तस्थले पञ्चदशावान्तरस्थलानि[4] भवन्ति । तेषु भक्तानुष्ठेयधर्माः प्रतिपादिताः सन्ति । तदनुसारमनेकजन्मार्जित-

---

१. षड्विधाकारतो भिन्ना भक्तिः साक्षाच्छिवात्मिका ।
षण्णामैक्यादिभक्तान्तस्थलानां वर्तते पदे ॥
भक्तिः समरसाकारा प्रथमा परिगीयते ।
आनन्दाकारतो भाति द्वितीया भक्तिरुत्तमा ॥
तृतीयाऽनुभवाकारा भक्तिर्भवविनाशिनी ।
चतुर्थी परमा भक्तिरवधानात्मिका मता ॥
पञ्चमी नैष्ठिकी भक्तिः षष्ठी सद्भक्तिरीरिता । (अ. सू. ४।२३, २५-२७)

२. सि. शि. ५।२६

३. अ. को. ३।३।१०२

४. अवान्तरस्थलान्यत्र प्राहुः पञ्चदशोत्तमाः ।
पिण्डता पिण्डविज्ञानं संसारगुणहेयता ॥
दीक्षा लिङ्गधृतिश्चैव विभूतेरपि धारणम् ।
रुद्राक्षधारणं पश्चात् पञ्चाक्षरजपस्तथा ॥

निष्कामकर्मप्रभावेण शुद्धान्तःकरणः संसारमसारं मन्यमानो यो गुरोः शरणं गत्वा दीक्षात्रयेण इष्ट-प्राण-भावलिङ्गत्रयं प्राप्य यथाविधि भस्मरुद्राक्षादीन् धारयित्वा शिवपञ्चाक्षरीं जपन् सोपाधि-निरुपाधि-सहजाख्यदानत्रयं च कुर्वन्, गुरु-लिङ्ग-जङ्गमेषु श्रद्धान्वितः सन् शिवपञ्चयज्ञरतो भवति, स एव भक्त इति।

अत्र तपः, कर्म, जपः, ध्यानम्, ज्ञानं चेति शिवयज्ञः पञ्चप्रकारः समुपदिष्टः[1]। तपो नाम शरीरसंशोषः। स च न कृच्छ्रचान्द्रायणादिव्रतैः, किन्तु शिवपूजासामग्रीसम्पादनजन्यः। एतेन कृच्छ्रचान्द्रायणादिना देहशोषो वीरशैवानां न सम्मत इति ज्ञायते। कर्म नाम न यज्ञादिरूपम्, किन्तु स्वेष्ट-लिङ्गस्य पूजैव, तत्फलस्य शाश्वतत्वात्। ज्योतिष्टोमादियागानां बहुवित्तव्यया-याससाध्यत्वेऽपि नश्वरफलत्वात् तेषां निषेधः कृतो वीरशैवाचार्यैः। जपो नाम पञ्चाक्षरमहामन्त्रस्य, प्रणवस्य, श्रीरुद्राध्यायस्य वा पुनः पुनरावृत्तिलक्षणो-ऽभ्यासः। एतदतिरिक्तस्य वेदभागस्याध्ययनमनपेक्षितमत्र सिद्धान्ते। शिवस्य सगुणनिर्गुणोभयरूपयोश्चिन्तनमेव ध्यानम्, न तु परिमितशरीरेन्द्रियाद्युपाधि-संवलिताहमात्मकचिन्तनम्। एवमेव ज्ञानं नाम न सांख्याद्यन्यतमशास्त्रार्थ-ज्ञानम्, किन्तु शिवागमार्थविज्ञानमेव ज्ञानमित्युच्यते। एवं भक्तस्थले प्रति-पादितशिवपञ्चयज्ञरतो हि साधको भक्तः[2]। एवं पञ्चयज्ञरतोऽयं साधको भक्त-स्थलोक्तान् विधेयाविधेयानपि श्रद्धया परिपालयति।

भक्तमार्गक्रिया चैव गुरोर्लिङ्गस्य चार्चनम्।
जङ्गमस्य तथा ह्येषां प्रसादस्वीकृतिस्तथा॥
अत्र दानत्रयं प्रोक्तमुपाधिनिरुपाधिनी।
सहजं चेति निर्दिष्टं समस्तागमपारगैः॥
एतानि शिवभक्तस्य कर्तव्यानि प्रयत्नतः।
(सि. शि. ५।२७-३०)

१. पञ्चधा कथ्यते सद्भिस्तदेव भजनं पुनः।
तपः कर्म जपो ध्यानं ज्ञानं चेत्यनुपूर्वकम्॥ (सि. शि. ९।२१)

२. शिवार्थे देहसंशोषस्तपः कृच्छ्रादि नो मतम्।
शिवार्चा कर्म विज्ञेयं बाह्यं यागादि नोच्यते॥
जपः पञ्चाक्षराभ्यासः प्रणवाभ्यास एव वा।
रुद्राध्यायादिकाभ्यासो न वेदाध्ययनादिकम्॥

भक्तस्य विधेयाविधेयनियमाः

महातेजस्वी शिवभक्तः शिवभक्तिपराङ्मुखानां दर्शनस्पर्शनसहवासादिकं सकृदपि न कुर्यात्। अन्यथा तत्तेजो मन्दीभविष्यति। "शिवोक्तां जाति-मर्यादां योऽतीत्य भुवि वर्तते। स चाण्डाल इति ज्ञेयः" इत्यादिवचनप्रामाण्याद् वीरशैवमतोचिताचारनिष्ठानां स्वजातिसंभवानां भक्तमाहेश्वराणामालयेषु तेषां पङ्क्तौ च भुञ्जीयात्, नान्यत्र कुत्रापि। दृढतरशिवव्रती शिवभक्तः स्वेष्टलिङ्गा-दन्यदेवान् हस्ताभ्यां नार्चयेत्, वाचा न कीर्तयेत्, मनसापि न ध्यायेत्, तदर्पिता-न्नादिद्रव्यं च न भुञ्जीयात्, अन्यथा व्यभिचारदोषप्रसक्तिः। यत्र शिवदेवाल-यानां शिवभक्तानामपायो प्रवर्तते, तत्र स्वप्राणान् विहायापि तन्निवारणं कुर्यात्। एवं प्राणत्यागेन न दुर्मरणजन्या दुर्गतिः, किन्तु शिवार्थं प्राणपरित्यागात् शिव-सायुज्यमेव प्राप्यते। शिवस्य शिवाचारस्य च यत्र निन्दा प्रवर्तते, सति सम्भवे वीरभद्रवद् वीरवृत्त्या तन्निरोधः कर्तव्यः, अथवा तत्स्थानं परित्यज्य गच्छेत्। पञ्चाक्षरमहामन्त्रजपशीलोऽयं साधकः स्वजिह्वया कदापि नरस्तुतिं न कुर्यात्। एवमेव चर्मपात्रे जलं वा तैलं वा न ग्रहीतव्यम्, अन्यथा नरकप्राप्तिरेव भविष्यति।

षडध्वशुद्धिपूर्वकं शिवदीक्षासम्पन्नानां वीरशैव-स्त्री-पुरुषाणां भक्तानां स्वेष्टलिङ्गपूजायां जनन-मरण-रजःसूतकानि न प्रतिबन्धकानि भवन्ति। अतः सत्यपि सूतके नित्यकर्मणो लोपो न कर्तव्यः। शिवोपासकोऽयं नैमित्तिकेषु प्रसङ्गेषु शिवक्षेत्रयात्रामपि कुर्यात्, तथा तादृशयात्रार्थिनां कृते स्वशक्त्यनुसारं मार्गेऽन्नोदकदानं च कर्तव्यम्। यतो हि सर्वविधदानेषु तस्योत्कृष्टत्वमुच्यते। तदुक्तम्—

नान्नतोयसमं दानं न चाहिंसापरं तपः।
तस्मान्माहेश्वरो नित्यमन्नतोयप्रदो भवेत् ॥[1] इति।

ध्यानं शिवस्य रूपादिचिन्ता नात्मादिचिन्तनम्।
शिवागमार्थविज्ञानं ज्ञानं नान्यार्थवेदनम् ॥

इति पञ्चप्रकारोऽयं शिवयज्ञः प्रकीर्तितः।
अनेन पञ्चयज्ञेन यः पूजयति शङ्करम् ॥

भक्त्या परमया युक्तः स वै भक्त इतीरितः। (सि. शि. ९।२२-२५)

१. सि. शि. ९।४८

एवं कन्यादानग्रहणप्रसङ्गेऽपि शिवभक्तः स्वमार्गाचारवर्तिभ्यः स्वजातीय-शिवभक्तेभ्यो दद्यात्, तेभ्य एव समादद्याच्च। एतत्सर्वं भक्तमार्गक्रियास्थल-मित्युच्यते[१]।

एवं लोकमर्यादया व्यवहरन्, आराध्येषु गुरु-लिङ्ग-जङ्गमेषु श्रद्धातिशयेन वर्तयन् तत्पूजाफलरूपेण प्राप्तौ पादोदक-प्रसादौ नित्यं गृह्णीयात्[२]। तथा सत्येव तन्मनसो नैर्मल्यं सम्पद्यते। एतादृशविशुद्धाचरणेन निर्मलस्वान्तः शिवभक्तः फलाभिसन्धियुक्तेन सोपाधिकेन दानेन, फलाभिसन्धिनिर्मुक्तेन निरुपाधिकेन दानेन, आदातृ-दातृ-देयाख्यानां त्रिपुटीनां भेदं विना सम्पद्यमानेन सहजेन दानेन च शिवयोगिनः सदा सन्तोषयेत्। शिवयोगिनः शिवस्वरूपत्वात् तत्तोषेण शिवस्य सन्तृप्तिः, तत्तृप्त्या च चराचरस्यापि तृप्तिः संभवति[३]।

एवमेतावत्पर्यन्तमुक्तानां सर्वेषामपि नियमानां श्रद्धया परिपालनपरः साधक एव वीरशैवीयषट्स्थलसिद्धान्ते 'भक्तः' इत्यभिधीयते। लिङ्गाङ्गसाम-रस्याख्यमुक्तिमार्गे प्रवृत्तस्य तस्येदं प्रथमं सोपानम्। साधकस्यास्य प्रथमसोपाना-रोहणे श्रद्धाभक्तिरेव सहायिकेति विज्ञेया। तस्मात् श्रद्धाभक्तियुक्तः साधक एव 'भक्तः' इति संक्षेपेण वक्तुं शक्यते। तदुक्तं मायिदेवेन—

अस्याः स्वरूपसद्भावात् सद्भक्तिरिति कीर्तिता।
तद्भक्त्यैव तथा चास्य भक्तस्थलमुपागतम् ॥[४] इति।

२. माहेश्वरस्थलं माहेश्वरश्च

माहेश्वरस्थलं षट्स्थलोपासनायां द्वितीयं सोपानम्। भक्तस्थलस्य भक्ताभिधस्य साधकस्य स्वेष्टलिङ्गादिषु विद्यमाना हि श्रद्धा, सलिलमुक्ता-न्यायवत्, अर्थात् स्वात्यां सागरशुक्तिमध्यपतितं जलं घनीभूय यथा मुक्ताफलं भवति, तथा दृढीभूय यदा निष्ठारूपमादत्ते, तदा स भक्त एव 'माहेश्वरः' इत्यभिधीयते। साधकोऽयं भक्तेः समुत्कर्षेण दृढवैराग्येण च महेश्वरे (द्वि.वे)

---

१. सि. शि. ९।१-४९

२. तस्माद् गुरुं महादेवं शिवयोगिनमेव च।
पूजयेत् तत्प्रसादान्नं भुञ्जीयात् प्रतिवासरम् ॥ (सि. शि. ९।७८)

३. शिवयोगिनि सन्तृप्ते तृप्तो भवति शङ्करः।
तत्तृप्त्या तन्मयं विश्वं तृप्तिमेति चराचरम् ॥ (सि. शि. ९।९१)

४. अ. सू. ५।७१

अत्यन्तनिष्ठासम्पन्न इति माहेश्वर[1] इत्युच्यते। माहेश्वरो ब्रह्मादिसर्वदेवापेक्षया महेश्वर एव श्रेष्ठतमः, स एव मोक्षप्रदश्चेति निष्ठावान् भवति। तदुक्तम्—

विश्वस्मादधिको रुद्रो विश्वानुग्रहकारकः।
इति यस्य स्थिरा बुद्धिः स वै माहेश्वरः स्मृतः॥
ईश्वरः सर्वभूतानां ब्रह्मादीनां महानिति।
बुद्धियोगात् तदासक्तो भक्तो माहेश्वरः स्मृतः॥
अनादिमुक्तो भगवानेक एव महेश्वरः।
मुक्तिदश्चेति यो वेद स वै माहेश्वरः स्मृतः॥[2] इति।

षट्स्थलस्य द्वितीयसोपानभूतेऽस्मिन् माहेश्वरस्थले—माहेश्वरप्रशंसा-स्थलम्, लिङ्गनिष्ठास्थलम्, पूर्वाश्रयनिरसनस्थलम्, अद्वैतनिरसनस्थलम्, आह्वाननिरसनस्थलम्, अष्टमूर्तिनिरसनस्थलम्, सर्वगत्वनिरसनस्थलम्, शिव-जगन्मयस्थलम्, भक्तदेहिकलिङ्गस्थलं चेति नव अवान्तरस्थलान्युक्तानि[3]। एषु नवस्थलेषु माहेश्वरेणानुष्ठेया धर्मा निरूपिताः सन्ति। एतेषां निष्ठयाऽऽ-चरणेनैव माहेश्वरस्थितिः प्राप्यते।

भक्तस्थलोक्तेषु त्रिविधेषु दानेषु केवले सहजे दाने निष्णातो भक्त एव माहेश्वरो[4] भवति। निर्मलान्तःकरणत्वादयं नित्यानित्यवस्तुविवेकवान्, इहा-मुत्रार्थफलभोगेषु विरक्तश्च भवति। एतादृशदृढवैराग्ययुक्तत्वादयं वीरमाहेश्वर[5] इत्यभिधीयते।

अयं वीरमाहेश्वरः परस्त्रीसंगनिर्मुक्तः, परद्रव्यपराङ्मुखः, शिवागम-परायणः, शिवस्तुतिरसास्वादमोदमानमनाः, शुचिः, निर्ममः, निरहङ्कारः,

---

१. भक्तेर्यदा समुत्कर्षो भवेद् वैराग्यगौरवात्।
तदा माहेश्वरः प्रोक्तो भक्तः स्थिरविवेकवान्॥ (सि. शि. १०।३)

२. सि. शि. १०।८, १०,१२

३. सि. शि. १०।४-६

४. केवले सहजे दाने निष्णातः शिवतत्परः।
ब्रह्मादिस्थानविमुखो भक्तो माहेश्वरः स्मृतः॥ (सि. शि. १०।२)

५. क्षयातिशयसंयुक्ता ब्रह्मविष्ण्वादिसम्पदः।
तृणवन्मन्यते युक्त्या वीरमाहेश्वरः सदा॥
शब्दस्पर्शादिसम्पन्ने सुखलेशे तु निस्पृहः।
शिवानन्दे समुत्कण्ठो वीरमाहेश्वरो भवेत्॥ (सि. शि. १०।१३-१४)

निरस्तक्लेशपञ्जरः, अस्पृष्टमदसम्बन्धः, मात्सर्यावेशवर्जितः, निरस्तमदनोन्मेषः, निर्धूतक्रोधविप्लवः, सदा सन्तुष्टहृदयः, सर्वप्राणिहिते रतः, शिवैकनिष्ठश्च भवतीति तद्योग्यता प्रपञ्चिता[1]। इदमेव माहेश्वरप्रशंसास्थलम्।

भवेत् प्राणपरित्यागश्छेदनं शिरसोऽपि वा।
न त्वनभ्यर्च्य भुञ्जीयाद् भगवन्तं त्रियम्बकम्॥

अपगच्छतु सर्वस्वं शिरश्छेदनमस्तु वा।
माहेश्वरो न मुञ्चेत लिङ्गपूजामहाव्रतम्॥[2]

इति शिवधर्मस्य सिद्धान्तशिखामणेश्च वचनानुसारं माहेश्वरः स्वेष्टलिङ्गेऽत्यन्तं निष्ठावान् भवति। प्राणसङ्कटे प्राप्ते सत्यपि स्वेष्टलिङ्गपूजारूपं नित्यं कर्म कदाप्ययं न परित्यजति। शिवलिङ्गार्चनात्मकोऽयं धर्मः साक्षान्मोक्षप्रद इति दृढभावनावानयं कुत्सितार्थप्रदायकेभ्यो धर्मकलिलेभ्यो विमुखो भवति। तस्मादस्य हस्ताविष्टलिङ्गार्चनपरौ, वाग् लिङ्गस्तुतिपरा, मनश्च सदा लिङ्गानुसन्धानपरं भवति। अयं यदा इष्टलिङ्गार्पितमेवान्नमुपभुञ्जानो तद्व्यतिरिक्तं चास्पृशन् स्वदेहवृत्तिं यापयति, तदा 'महामाहेश्वरः'[3] इति कथ्यते। तदेतदाचरणप्रतिपादकमिदं माहेश्वरस्य लिङ्गनिष्ठास्थलमित्युच्यते[4]।

तदेवं शिवलिङ्गनिष्ठैकचित्तो माहेश्वरः "गुरुसंस्कृतभावः सन् गुरुनिर्मितदेहवान्। विस्मृत्य पूर्वदुर्भावं तदधीनः समाचरेत्॥"[5] इति योगजागमवचनानुसारं स्वाचाररोधकान् पूर्वाश्रमनिष्ठान् प्राकृताचारान्, अर्थाद् लिङ्गनिष्ठाप्रतिकूलान् जातप्रेताशौचादीन् त्यजेत्। अत्रेदं विज्ञेयम्—इह वर्णाश्रमादिधर्माणां व्यवस्था द्विधा प्रोक्ता। तत्रैका शिवेन निर्दिष्टा, अपरा ब्रह्मणा प्रतिपादिता। शिवदीक्षादिसंस्कारेण ये विशुद्धाः, तेषां कृते शिवोक्तवर्णाश्रमपरिपालनम्, तद्विपरीतानां प्राकृतानां कृते पैतामहोक्तवर्णाश्रमपरिपालनमिति नियमः। वीरशैवसिद्धान्ते शिवोक्तधर्माणां परिपाल्यमानत्वात्, तत्र च स्वेष्टलिङ्गपूजादौ जात-प्रेतादिसूतकानामबाधकत्वं स्वीकृतम्। तस्मात् शिवदीक्षायाः

---

१. सि. शि. १०।१५-२०

२. सि. शि. १०।२, पृ. १७३

३. अर्पितेनान्नपानेन लिङ्गे नियमपूजिते।
ये देहवृत्तिं कुर्वन्ति महामाहेश्वरा हि ते॥ (सि. शि. १०।२५)

४. सि. शि. १०।२१-२९

५. सि. शि. १०।१ अवतरणिका, पृ. १७५, सोलापुरप्रकाशनम्, १९०५ ई.।

पूर्वं परिपाल्यमानानां पैतामहोक्तधर्माणां शिवदीक्षोत्तरं परित्यागे न कोऽपि दोषः, शिवशासनत्वात्। तदुक्तमाचार्यैः—

शिवसंस्कारयोगेन विशुद्धानां महात्मनाम्।
किं पूर्वकालिकैर्धर्मैः प्राक्तनानां हि ते मताः ॥[१] इति।

तदेवं शिवशासनेन सद्गुरोराज्ञया च माहेश्वरः प्राक्तनधर्माचारान् परित्यजतीत्ययं पूर्वाश्रयनिरासक इत्युच्यते। इदमेव तस्य पूर्वाश्रयनिरसन-स्थलम्[२]।

लिङ्गनिष्ठाविरोधाद् माहेश्वरो यथा पूर्वाश्रयनिरासकस्तथा सर्वाद्वैत-निरासकोऽपि भवति। माहेश्वरावस्था हि क्रियाप्रधाना। पूज्यपूजकयोः शिव-लिङ्गभक्तयोर्भेदाभावे पूजाकर्म न संभवत्येव। तस्मात् शिवलिङ्गपूजादि-कर्मनिष्ठो माहेश्वरः—"यावदायुस्त्रयो वन्द्या वेदान्तो गुरुरीश्वरः" इति वेदान्त-वचनात्, "क्रियाद्वैतं न कर्तव्यम्" इति सिद्धान्तवचनाच्च सर्वाद्वैतनिरासको भवति। तदुक्तम्—

पूज्यपूजकयोर्लिङ्गजीवयोर्भेदवर्जने।
पूजाकर्माद्यसम्पत्तेर्लिङ्गनिष्ठाविरोधतः ॥

सर्वाद्वैतविचारस्य ज्ञानाभावे व्यवस्थितेः।
भवेन्माहेश्वरः कर्मी सर्वाद्वैतनिरासकः ॥[३] इति।

अयं माहेश्वरः परमात्मानं पतिमिति, स्वात्मानं च तस्य पशुम्, अर्थात् सेवकमिति मत्वा स्वामिभृत्यभावेन प्रेर्यप्रेरकभावेन च स्वेष्टलिङ्गं पूजयति[४]। भावोऽयं भेदं विना न संभवति, तस्मान्माहेश्वरावस्था भेदबुद्धिप्रधाना। इदमेवास्य सर्वाद्वैतनिरसनस्थलम्।[५]

---

१. सि. शि. १०।३२

२. सि. शि. १०।३०-३६

३. सि. शि. १०।३७-३८

४. प्रेरकं शङ्करं बुद्ध्वा प्रेर्यमात्मानमेव च।
भेदात्तं पूजयेन्नित्यं न चाद्वैतपरो भवेत् ॥
पतिः साक्षान्महादेवः पशुरेष तदाश्रयः।
अनयोः स्वामिभृत्यत्वमभेदे कथमिष्यते ॥ (सि. शि. १०।३९-४०)

५. सि. शि. १०।३७-४२

लिङ्गनिष्ठाविरोधादेवायमाह्वाननिरासकोऽपि भवति। अत्रेदं रहस्यम्—मृच्छिलादिनिर्मितेषु देवताविग्रहेषु मन्त्रादिभिस्तत्तद्विग्रहेषु तत्तद्देवाः पूजार्थमावाह्यन्ते, पूजान्ते विसर्ज्यन्ते च। वीरशैवसिद्धान्ते दीक्षाकाले सद्गुरुणा संस्कृत्य दत्ते शिवलिङ्गे शिवस्य सन्निधिः सार्वकालिकी। अत्रोऽत्र न प्रतिदिनमावाहनं विसर्जनं वा क्रियते। तदुक्तमाचार्यैः—

यदा शिवकलायुक्तं लिङ्गं दद्यान्महागुरुः।
तदारभ्य शिवस्तत्र तिष्ठत्याह्वानमत्र किम्॥

नाह्वानं न विसर्गं च स्वेष्टलिङ्गे तु कारयेत्।
लिङ्गनिष्ठापरो नित्यमिति शास्त्रस्य निश्चयः॥[1] इति।

उपास्ये स्वेष्टलिङ्गे शिवस्य सदा सन्निहितत्वभावनाया सत्त्वादेवोपासकस्य निष्ठा तत्र प्रवर्धते इत्यत्राह्वान-विसर्जनयोर्निरास उपदिष्टः। तदुपदेशानुसारमयं माहेश्वर आह्वाननिरासको भवति, अर्थात् स्वेष्टलिङ्गे सदाशिवसान्निध्यमनुभवति। इदमेवास्याह्वाननिरसनस्थलम्।

आह्वाननिरसनानन्तरं माहेश्वरस्याष्टमूर्तिनिरसनस्थितिरायाति। इदमत्रावधेयम्—शास्त्रेषु पृथिव्यादिपञ्चमहाभूतानि, सूर्याचन्द्रमसौ, आत्मा चेत्यष्टौ शिवस्य मूर्तय इति स अष्टमूर्तिरिति व्यवह्रियते। तदुक्तम्—

द्वयमुष्णं द्वयं शीतमनुष्णाशीतलं द्वयम्।
द्वयमस्पर्शमित्यष्टौ पान्तु वो हरमूर्तयः[2]॥ इति।

एवमन्यत्रापि द्रष्टव्यम्[3]। अत एव पञ्चमहाभूतानि, सूर्याचन्द्रमसौ च भगवानिवाराध्यन्ते हि लोके। माहेश्वरस्थलीयस्य साधकस्य स्वेष्टलिङ्गे निष्ठादार्ढ्यार्थमन्यत्र कुत्राप्याराधनं न विहितम्। एतन्नियमपरिपालकोऽयं माहेश्वरः पृथिव्याद्यात्मपर्यन्तमष्टौ न साक्षात् शिवमूर्तय इति तन्निरासयति।

---

१. सि. शि. १०।४५, ४७
२. सि शि. १०।२, तत्त्वप्रदीपिकाव्याख्या, पृ. १८२
३. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥
(अभि. शा. १।१)

"यस्य पृथ्वी शरीरम्"[१] इत्यारभ्य "यस्यात्मा शरीरम्" इत्यन्तं बृहदारण्यकश्रुतिप्रोक्ताष्टमूर्तित्वं तदधिष्ठातृत्वेन प्रकीर्तितम्, "विश्वं महेश्वर भवानधितिष्ठतीति विश्वात्मतामुपचरन्ति यदागमास्ते" इत्यभियुक्तोक्तेः। यथा स्तनस्तन्ययोर्भेदेऽपि स्तनं पिबतीति व्यवहारः, तथा पृथिव्यादिभिरभेदव्यवहार औपचारिकः।

किञ्च, पृथिव्यादेः कार्यकोटिप्रविष्टत्वात् शिवस्य कारणरूपत्वात् कार्यरूपभूम्यादेः कारणरूपस्य शिवस्य चाभेदो घटादेः कुलालस्येव न संभवति। भूम्यादेर्जडत्वाद् आत्मन अग्निहोत्रिणो यजमानस्याज्ञत्वात् शिवस्य चेतनत्वात् सर्वज्ञत्वाच्च न तयोरैक्यं संभवति, विरुद्धधर्मवत्त्वात्। तदुक्तमाचार्यैः—

पृथिव्याद्यष्टमूर्तित्वमीश्वरस्य प्रकीर्तितम्।
तदधिष्ठातृभावेन न साक्षादेकभावतः॥
पृथ्व्यादिकमिदं सर्वं कार्यं कर्ता महेश्वरः।
नैतत्साक्षान्महेशोऽयं कुलालो कलशो यथा॥
अचेतनत्वात् पृथ्व्यादेरज्ञत्वादात्मनस्तथा।
सर्वज्ञस्य महेशस्य नैकरूपत्वमिष्यते[२]॥ इति।

एवमाचार्योक्त्यनुसारेण व्यवहरणशीलोऽयं माहेश्वरोऽष्टमूर्तिनिरासक इत्युच्यते। इदमेव तस्याष्टमूर्तिनिरसनस्थलम्।

अष्टमूर्तिनिरासकवन्माहेश्वरः सर्वगत्वनिरासकोऽपि भवति, अर्थात् शिवस्य सर्वत्र स्थितिं नायमभ्युपगच्छति। शिवस्य सर्वगत्वे सर्वत्र तदाराधनप्रसक्तिः, तथा सति स्वेष्टलिङ्गे निष्ठा न संभवतीति माहेश्वरेण तन्निरस्यते। तदुक्तम्—

सर्वगत्वे महेशस्य सर्वत्राराधनं भवेत्।
न लिङ्गमात्रे तन्निष्ठो न शिवं सर्वगं स्मरेत्॥[३] इति।

ननु "सर्वं खल्विदं ब्रह्म"[४], "सर्वो ह्येष रुद्रः"[५] इत्यादौ परशिवस्य सर्वत्र व्यापकत्वप्रतिपादनात् कथमिष्टलिङ्गमात्रे शिवभावना कर्तव्येत्युच्यते? इति

---

१. सुबालो. ७।१
२. सि. शि. १०।४९-५०, ५३
३. सि. शि १०।५५
४. छा. उ. ३।१४।१
५. महाना १०।११

चेन्न, यद्यपि शिवः सर्वगत एव, अथापि यथा सर्वत्र व्याप्तोऽप्यग्निः शमीगर्भे विशेषेण व्यज्यते, तथा शिवोऽपि स्वाधारेष्टलिङ्गे विशेषेण निवसतीति माहेश्वरस्येष्टलिङ्गमात्रे शिवभावना विहिता[1]। तदुक्तमाचार्यैः—

तस्मात् सर्वप्रयत्नेन सर्वस्थानपराङ्मुखः।
स्वेष्टलिङ्गे महादेवं पूजयेत् पूजकोत्तमः[2] ॥ इति।

एतदाचार्योक्त्यनुसारमाचरणशीलो माहेश्वरः सर्वगत्वनिरासक इति तदाचारप्रतिपादकमिदं स्थलं सर्वगत्वनिरसनस्थलमित्यभिधीयते।

वस्तुतस्तु—"आकाशवत् सर्वगतं सुसूक्ष्मम्"[3] इति श्रुतिबलात् परशिवस्तु सर्वगत एव, अथापि माहेश्वरस्य बाह्यप्रवृत्तिनियन्त्रणार्थं तदिष्टलिङ्गमात्रे तत्पूजा विहिता। एकत्र निहिता हि निष्ठा शीघ्रफलदायिनी भवति। तस्या बहुमुखीत्वे चतुर्दिक्षु समानबलैरश्वैराकृष्यमाणस्य रथस्येव कुत्रापि प्रगतिर्न स्यादेव।

एवं स्वेष्टलिङ्गे शिवं पूजयन्नपि माहेश्वरः परशिवस्य सर्वगत्वमपि विभावयेदित्याचार्यादेशोऽस्ति। तथाहि—

पूजादौ हि नियम्यत्वाल्लिङ्गमात्रे स्थितं शिवम्।
पूजयन्नपि देवस्य सर्वगत्वं विभावयेत् ॥[4] इति।

जगदिदं शिवात् समुत्पन्नम्। स चास्याभिन्ननिमित्तोपादानमिति स्वीक्रियते। तस्मान्मृदः कुम्भादिकम्, सिन्धोः फेनबुद्बुदादिः, तन्तोश्च पटो यथा न भिद्यते, तथा शिवादिदं जगदपि न भिद्यते। अतः—"रज्ज्वां गोधूमवर्णताशक्त्या सर्पत्ववत्, शुक्तौ धावल्यशक्त्या रजतत्ववत्, स्थाणौ दीर्घताशक्त्या पुरुषत्ववत्, मरीच्यां स्वच्छतोद्रेकशक्त्या जलत्ववत्, कालशक्त्या व्योम्नि गन्धर्वनगरवद् निरस्तसमस्तप्रापञ्चिकभेदवति निर्विकारे सच्चिदानन्दस्वरूपे परशिवब्रह्मणि तत्समवेतविमर्शशक्तिप्रतिस्फुरणायमानमायाशक्त्या विश्वं

---

१. शिवः सर्वगतश्चापि स्वाधारे व्यज्यते भृशम्।
शमीगर्भे यथा वह्निर्विशेषेण विभाव्यते ॥ सि. शि. १०।५७)

२. सि. शि. १०।५९

३. शाण्डि. २।१।३

४. सि. शि. १०।६१

तदभिन्नतया भातीत्यर्थः"[1] इति बहुविधदृष्टान्तेन श्रीमता मरितोण्टदार्येण जगतः परशिवाभिन्नत्वं समर्थितम्। पूज्यपादैः श्रीरेणुकाचार्यैरपि—

पत्रशाखादिरूपेण यथा तिष्ठति पादपः।
तथा भूम्यादिरूपेण शिव एको विराजते[2] ॥

इति शिवस्य जगन्मयत्वमुपदिष्टम्। इदमेव माहेश्वरस्य शिवजगन्मयस्थलम्। एतेन ज्ञायते यन्माहेश्वरः प्रपञ्चे सर्वत्र शिवं भावयन्नपि तद्बाह्यपूजां तु स्वेष्टलिङ्ग एव निर्वर्तयतीति।

माहेश्वरस्थलस्यान्तिमं स्थलं भक्तदैहिकलिङ्गस्थलम्। अत्र हि समस्तजगदात्मनः परशिवस्य भक्तानां हृदयेऽभिव्यक्तिः प्रतिपाद्यते[3]। "भक्तभावपरानन्दो भक्तभावैकगोचरः"[4] इति योगजागमवचनानुसारम्,

नित्यं भाति त्वदीयेषु या ते रुद्र शिवा तनुः।
अघोराऽपापकाशीति श्रुतिराह सनातनी ॥[5]

इत्याचार्योपदेशाच्च विशुद्धानां भक्तानां हृदये शिवस्य विशेषाभिव्यक्तिर्विज्ञायते। माहेश्वरस्थलीयस्य साधकस्य निर्धूतकलमषत्वात्, विषयविरक्तत्वात्, सन्तुष्टचित्तत्वात्, शिवनिष्ठत्वाच्च तद्धृदये निर्मलदर्पणे मुखादेरिव शिवः स्फुटतया प्रतिभाति।

तदेवं सदा सहजदाने निष्णातः, प्राकृताचाररहितः, शिवजीवयोः पतिपशुभावयुक्तः, स्वेष्टलिङ्गे सदा शिवसान्निध्यं भावयमानः, पृथिव्याद्यात्मपर्यन्तास्वष्टतनुषु शिवाधिष्ठितत्वं परिभावयन्, शिवजगन्मयत्वं भावयन्नपि स्वेष्टलिङ्गनिष्ठया पूजयन्, स्वहृदये तं ध्यायंश्च साधको माहेश्वर इति कथ्यते। माहेश्वर-

---

१. सि. शि. १०।८, तत्त्वप्रदीपिकाव्याख्या, पृ १८९

२. सि. शि. १०।६६

३. समस्तजगदात्मापि शङ्करः परमेश्वरः।
भक्तानां हृदयाम्भोजे विशेषेण विराजते ॥
कैलासे मन्दरे चैव हिमाद्रौ कनकाचले।
हृदयेषु च भक्तानां विशेषेण शिवः स्थितः ॥ (सि. शि. १०।६७-६८)

४. सि. शि. १०।१, अवतरणिका, पृ. १९०

५. सि. शि. १०।७०

स्यैतादृशयोग्यताया मूलं तदीया निष्ठाभक्तिरेव। तस्मान्निष्ठाभक्तियुक्तः साधक एव माहेश्वर इति संक्षेपेण वक्तुं शक्यते। तदुक्तं मायिदेवेन—

नैष्ठिकी भक्तिरित्येव कीर्तिता भक्तितत्परैः।
तया माहेश्वरं नाम स्थलमस्य स्वरूपतः[१]॥ इति।

३. प्रसादिस्थलं प्रसादी च

प्रसादिस्थलं षट्स्थलोपासनायास्तृतीयं सोपानम्। अत्रोक्ताचारशीलः साधक एव 'प्रसादी' इति कथ्यते। पूर्वस्थलोक्तो माहेश्वराभिधः साधको "शिवात्मकं विश्वमिदं विबुध्यन् माहेश्वरोऽसौ भवति प्रसादी"[२] इत्याचार्योक्त्या भासमानं प्रपञ्चं यदा शिवमयं जानाति, तदा स माहेश्वर एव 'प्रसादी' इत्याख्यायते। साधकेऽस्मिन् विद्यमाना भक्तिः 'अवधानभक्तिः' इति व्यपदिश्यते। 'अनलकाष्ठन्यायेन' इयमवधानभक्तिर्मनसि प्रसादगुणमुत्पादयति। काष्ठं प्रविष्टोऽग्निः सर्वाकारेण काष्ठमभिव्याप्य यथा काष्ठं निर्दहति, तथैव ऐश्वरं प्रेम अवधानात्मना एकीभूय साधकान्तःकरणं सर्वात्मनाऽभिव्याप्य तत्रस्थान् सर्वान् शब्दस्पर्शादिविषयान् निर्दह्य प्रसादरूपानापादयति। तादृशप्रसादसेवनेनैव तस्य मनसि प्रसादः सञ्जायते। 'प्रसादोऽस्यास्तीति प्रसादी' इति व्युत्पत्त्या प्रसादगुणयुक्तमनस्क एव प्रसादी। तदुक्तम्—"मनःप्रसादयोगेन प्रसादीत्येष कथ्यते"[३] इति।

षट्स्थलस्य तृतीयसोपानभूतेऽस्मिन् स्थले—प्रसादिस्थलम्, गुरुमाहात्म्यस्थलम्, लिङ्गमाहात्म्यस्थलम्, जङ्गममाहात्म्यस्थलम्, भक्तमाहात्म्यस्थलम्, शरणमाहात्म्यस्थलम्, शिवप्रसादमाहात्म्यस्थलं चेति सप्तावान्तरस्थलानि भवन्ति[४]। एतेषु तस्यानुष्ठेयधर्मा निरूपिताः सन्ति। एतेषामवधानेन परिपालनेन प्रसादिस्थितिः प्राप्यते।

"अन्नमयं हि सोम्य मनः"[५] इति श्रुतौ अन्नस्याणुभागत्वं मनस इति प्रतिपादितम्। तस्माद् यादृशं ह्यन्नं भुङ्क्ते तस्य मनोऽपि तादृशमेव भवति।

---

१. अ. सू. ५।७३
२. सि. शि. १०।७३
३. सि. शि. ११।२
४. सि. शि. ११।३-५
५. छा. उ. ६।५।४

अतो मनःशुद्धिरावश्यकी। शिवार्पितस्यैवान्नस्य शुद्धिराख्यायते। तस्मात् शिवार्पितान्नसेवनेनैव मनःशुद्धिरिति पर्यवस्यति। तदुक्तं श्रीरेणुकभगवत्पादैः—

अन्नशुद्ध्या हि सर्वेषां तत्त्वशुद्धिरुदाहृता।
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम् ॥[१] इति।

एतत्प्रसादविषयकं विस्तृतं विवेचनं तृतीयपरिच्छेदे द्रष्टव्यम्। साधकोऽयं स्वेष्टलिङ्गार्पितप्रसादमिव गुरुजङ्गमयोरपि प्रसादमवधानभक्त्या स्वीकरोति। एवं गुरु-लिङ्ग-जङ्गमानां प्रसादं प्रतिदिनं स्वीकुर्वन् तत्प्रसादमहिम्ना मनःप्रसादमुपलभ्य सर्वमपि विश्वं शिवात्मकं पश्यति[२]। एतादृशशिवमयप्रसन्नमनस्को हि साधकः प्रसादी। तदेवं स्वाहारादिकं गुरुलिङ्गजङ्गमेभ्यः समर्प्यान्विहं तदीयप्रसादरूपेण तस्य सेवनमेवास्य प्रथमो नियमः। इदमेव प्रसादिस्थलान्तर्गतं प्रसादिस्थलम्[३]।

गुरुमाहात्म्यस्थलमस्य द्वितीयमवान्तरं स्थलम्। अत्र लोके भोगमोक्षलक्षणसकलसिद्धिप्रदकर्मणां गुरुरेव कारणम्। तत्र—"न गुरोरधिकं न गुरोरधिकम्" इति शिवरहस्यवचनमेव प्रमाणम्। गुरुस्तु मानवदेहधारी परमेश्वर एव। हस्तपादादिसाम्येन तं सामान्यमनुष्यं न मन्येत; तस्य प्राकृतजनसाम्योक्तौ साधकस्य निःश्रेयसप्राप्तिर्विहन्यते। तस्मात्—

गुरुभक्तिविहीनस्य शिवभक्तिर्न जायते।
ततः शिवे यथा भक्तिस्तथा भक्तिर्गुरावपि ॥[४]

इति श्रीरेणुकोक्त्या शिवस्यानन्यभक्तिवद् गुरोरपि कर्तव्या। गुरुतत्त्वविषयकं विस्तृतं विवेचनं तृतीयपरिच्छेदे द्रष्टव्यम्।

लिङ्गमाहात्म्यस्थलमस्य तृतीयमवान्तरं स्थलम्। वीरशैवैरर्च्यमानमिदमिष्टलिङ्गं सर्वकारणस्य शिवस्य प्रतिरूपम्। इदमेव सर्वलोकानां सर्ववेदानामपि कारणम्। जन्मवारिधेस्तरणमपीदमेव। इदमेव लिङ्गतत्त्वं योगिनां

---

१. सि. शि. ११।९

२. प्रसादे शाम्भवे सिद्धे परमानन्दकारणे।
सर्वं शिवमयं विश्वं दृश्यते नात्र संशयः ॥
(सि. शि. ११।७२)

३. सि. शि. ११।६-१७

४. सि. शि. ११।२४

हृदये ज्योतिर्लिङ्गरूपेण विभाति। चराचरप्रपञ्चस्य विश्वस्याधिपत्यमस्य स्वतः सिद्धम्। प्रसादिस्थलीयः साधक एवं स्वाराध्यस्य लिङ्गस्य माहात्म्यं ज्ञात्वा—"शिवशक्तिसमायोगं विश्वं लिङ्गं तदुच्यते"[१] इत्याचार्योक्त्या विश्वमेव लिङ्गरूपेण भावयति । इयमस्य व्यापिका लिङ्गदृष्टिः, अर्थात् शिवदृष्टिः। लिङ्गतत्त्वविषयकं विस्तृतं विवेचनं तृतीयपरिच्छेदेऽवलोकनीयम्।

जङ्गममाहात्म्यस्थलमस्य चतुर्थमवान्तरस्थलम् । शिवज्ञानसम्पन्नाः शिवयोगिन एव जङ्गमा इत्युच्यन्ते। जङ्गमतत्त्वस्य विवेचनं तृतीयपरिच्छेदे द्रष्टव्यम्। प्रसादिस्थलस्य साधके यथा गुरोः स्वेष्टलिङ्गस्य च माहात्म्यं ज्ञात्वा ते अवधानभक्त्या पूजयति, तथा जङ्गमेऽपि व्यवहर्तव्यम्। यतो हि दुर्लभा एव तादृशाः शिवयोगिनः। तदुक्तम्—

दुर्लभं हि शिवज्ञानं दुर्लभं शिवचिन्तनम्।
येषामेतद्द्वयं चास्ति ते हि साक्षाच्छिवात्मकाः॥[२] इति।

एवं सुदुर्लभशिवज्ञानसम्पन्नानां शिवयोगिनां सत्संगेन, तत्सेवया, तदीयज्ञानोपदेशश्रवणेन च सर्वपापप्रशमनम्, मुक्तिसाधनं शिवज्ञानम्, सर्वाश्च सिद्धयः सहजतया प्राप्यन्ते[३]। तस्मात् प्रसादिस्थलसाधकेन जङ्गमसेवाऽपि कर्तव्येति बोधनार्थं जङ्गममाहात्म्यस्थलमुपदिष्टम्।

भक्तमाहात्म्यस्थलमस्य पञ्चममवान्तरस्थलम्। कर्मणा वाचा मनसा च येऽव्ययं परमात्मानं भजन्ति, त एव भक्ताः। शिवभक्तिस्तु संसारभयतारिणी भवति। शिवभक्तिविहीनानां वेदाध्ययनम्, शास्त्राध्ययनम्, यज्ञाः, तपांसि च निष्फलानि भवन्ति। रवेर्वाजिनां यथान्धकारप्रयुक्ता भीर्न भवति, तथा शिवभक्तानां कर्मबन्धनभीतिर्न भवत्येव। शिवभक्तिसम्पन्नो ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः, अन्त्यजो वा भवतु, स शिववन्मान्य एव। अग्निदग्धेष्विन्धनेषु यथा

---

१. सि. शि. ११।३२

२. सि. शि. ११।४१

३. सर्वसिद्धिकरं पुंसां दर्शनं शिवयोगिनाम्।
स्पर्शनं पापशमनं पूजनं मुक्तिसाधनम्॥
किं वा फलं हि नो सिद्धयेत् सम्पर्काच्छिवयोगिनाम्।
(सि. शि. ११।४३-४४)

नास्ति जातिभेदः, तथा शिवभक्तिसमावेशे जातिपरिकल्पना नास्त्येव[1]। तदेवं शिवभक्तेषु जातिभेदं त्यक्त्वा सर्वेषु समभावेन वर्तितव्यमिति बोधनार्थमेवात्र भक्तमाहात्म्यस्थलमुपदिष्टम्। तस्मात् प्रसादिस्थलसाधकः—

ब्राह्मणः क्षत्रियो वाऽपि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः॥[2]

एतदाचार्योपदेशानुसारं सर्वजातीयशिवभक्तेषु समादरेण व्यवहरति। इदमेवास्य भक्तमाहात्म्यस्थलम्।

प्रसादिस्थलस्य षष्ठमवान्तरस्थलं शरणमाहात्म्यस्थलम्। "शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य" इति श्रुतिवचनानुसारं शिवं यः प्रपन्नत्वेनाश्रयते, स एव शरणः। प्रपन्नपारिजातस्य परमात्मनः प्रपत्तिः सर्वाभीष्टप्रदा भवति। तस्मात् शिवप्रपन्नानां जन्मैव सफलं जन्म, अन्येषां तु वृथेति मन्तव्यम्। शिवे विलीनचित्तानां कुलमेव पवित्रम्[3]। तदेवं शिवप्रपत्तेः फलं ज्ञात्वाऽनन्यभावेन शिवशरणागतिप्राप्तिरेव प्रसादिनः शरणमाहात्म्यस्थलम्।

---

१. ये भजन्ति महादेवं परमात्मानमव्ययम्।
कर्मणा मनसा वाचा ते भक्ता इति कीर्तिताः॥
किं वेदैः किं ततः शास्त्रैः किं यज्ञैः किं तपोव्रतैः।
नास्ति चेच्छाङ्करी भक्तिर्देहिनां जन्मरोगिणाम्॥
शिवाश्रितानां जन्तूनां कर्मणा नास्ति संगमः।
वाजिनां दिननाथस्य कथं तिमिरजं भयम्॥
शिवभक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते॥
(सि. शि. ११।४६,४८,५२,५५)

२. सि शि. ११।१०, पृ. २०९

३. सर्वात्मना शिवापत्तिः शरणस्थलमुच्यते।
प्रपद्यते शिवं यत्तु शरणं तदुदाहृतम्॥
प्रपन्नपारिजातस्य शिवस्य परमात्मनः।
प्रपन्नानां महादेवं परिपक्वान्तरात्मनाम्।
जन्मैव जन्म नान्येषां बृथा जननसंगिनाम्॥
तत्कुलं हि सदा शुद्धं सफलं तस्य जीवितम्।
यस्य चित्तं शिवे साक्षाद् विलीनमबहिर्मुखम्॥ (सि.शि. ११।५५-५६,६१,६२-६४)

प्रसादिस्थलस्य सप्तमं तथान्तिमं स्थलं प्रसादमाहात्म्यस्थलम्। शिवानुग्रहोऽत्र प्रसादशब्दार्थः। शिवे भक्तिवर्धने शिवप्रसाद एव मूलम्। ब्रह्मादयः सर्वे देवाः शिवप्रसादेनैव स्वस्वस्थानमवापुः। शिवप्रसादेनैव सर्वं विश्वं शिवमयं विभाति। गर्भस्थः, जायमानः, ब्राह्मणः, अन्त्यजो वापि शिवप्रसादेनैव मुच्यते। तस्मात् प्रपञ्चेऽस्मिन् शिवप्रसादादधिकस्तत्समो वा किञ्चिदपि नास्ति[१]। एतादृशशिवप्रसादस्य प्राप्तिरेव प्रसादिस्थलसाधकस्य चरमं लक्ष्यम्। तत्प्रसादप्राप्तावेवायं 'प्रसादी' इति कथ्यते।

तदेवं गुरुलिङ्गजङ्गमानां महिमानं ज्ञात्वा तान् संपूज्य अन्नादिना परितोष्य च तदवशिष्टप्रसादान्नभोजनशीलः, शिवभक्तेषु जातिभेदं परित्यज्य समानरूपेण समादरणशीलः, शिवशरणागतेः शिवप्रसादस्य च माहात्म्यं विदित्वाऽनन्यभावेन शिवमेव शरणं गतः, शिवानुग्रहरूपं प्रसादं च प्राप्तः साधक एव प्रसादी। एतादृशशिवप्रसादप्राप्तेर्मूलं तदीयाऽवधानभक्तिरेव। तस्मादवधानभक्तियुतः साधक एव प्रसादीति संक्षेपेण वक्तुं शक्यते। तदुक्तं मायिदेवेन—

अवधानात्मिका भक्तिरिति प्रोक्ता महात्मभिः।
भक्त्या तयास्य जीवस्य प्रसादिस्थलमागतम्॥[२] इति।

अवधानभक्त्या शिवप्रसादं प्राप्य, समस्तविश्वमेव शिवरूपेण पश्यन् सदा प्रसन्नचित्तोऽयं साधकः पद्मपत्रमिव संसारे वर्तमानोऽपि निर्लिप्तो भवति।

४. प्राणलिङ्गिस्थलं प्राणलिङ्गी च

प्राणलिङ्गिस्थलं षट्स्थलोपासनायां चतुर्थं सोपानम्। पूर्वोक्तः शिवदृष्टिसम्पन्नः प्रसादी एव यदा स्वहृदये ज्योतीरूपेण विद्यमानस्य प्राणलिङ्गस्योपासको भवति, तदा 'प्राणलिङ्गी' इति कथ्यते। साधकेऽस्मिन् विद्यमाना भक्तिः

---

१. प्रसादमूला सर्वेषां भक्तिरव्यभिचारिणी।
शिवप्रसादहीनस्य भक्तिश्चापि न सिद्ध्यति॥
गर्भस्थो जायमानो वा जातो वा ब्राह्मणोऽथवा।
अन्त्यजो वापि मुच्येत प्रसादे सति शाङ्करे॥ (सि. शि. ११।६९-७०)

२. अ. सू. ५।७५

'अनुभवभक्तिः' इत्याख्यायते । अनया भक्त्या 'भ्रमरकीटन्यायेन' साधकस्त्यक्तजीवभ्रमः शिवानुभवी भवति[1] ।

षट्स्थलस्य चतुर्थसोपानभूतेऽस्मिन् स्थले प्राणलिङ्गिस्थलम्, प्राणलिङ्गार्चनम्, शिवयोगसमाधिः, लिङ्गनिजस्थलम्, अङ्गलिङ्गिस्थलं चेति पञ्चावान्तरस्थलानि भवन्ति[2] । एतेषु प्राणलिङ्गिना परिपाल्यमाना धर्माः प्रतिपादिताः ।

स्वमूलाधारचक्रस्थितेनापानवायुना साकं गुरूपदिष्टमार्गेण प्राणवायोर्यदा संघट्टनं भवति, तदैकं दिव्यज्योतिरुदितं भवति । मूलाधारादुत्पन्नमिदं ज्योतिः सुषुम्नामार्गेण प्रस्थाय कुण्डलिनीमूर्ध्वमुखीं कुर्वद् हृदयस्थाऽनाहतचक्रे, अर्थाद् द्वादशदलकमलकर्णिकायां स्थिरं भवति । ज्योतिरिदमङ्गुष्ठपरिमाणं विद्रुमवर्णं च भवतीति शिवयोगिनो वर्णयन्ति । भास्करोदये यथा तुहिनकणास्तत्प्रकाशे लयं यान्ति, तथाऽस्मिन् ज्योतिषि प्राणवायोर्लयो भवतीति प्राणशक्तिविशिष्टमिदं ज्योतिः प्राणलिङ्गमिति वीरशैवाचार्यैः प्रतिपाद्यते[3] ।

शिवयोग-शिवज्ञानयुक्तानामेव हृदये इदं प्राणलिङ्गं दीपवत् परिस्फुरति । गुरूपदेशरहितैः प्राकृतैरिदं कथमपि न परिभाव्यते[4] । विश्वमिदं मायिकगुणभेदसञ्जातमत एव हेयमिति सञ्चिन्त्य सच्चिदानन्दरूपे संविल्लिङ्गे, अर्थात् प्राणलिङ्गे सदा विलीनचित्तवृत्तिः साधक एव प्राणलिङ्गी । तदुक्तम्—

संविल्लिङ्गपरामर्शी बाह्यवस्तुपराङ्मुखः ।
यः सदा वर्तते योगी प्राणलिङ्गी स उच्यते ॥
मायाविकल्पजं विश्वं हेयं सञ्चित्य नित्यशः ।
चिदानन्दमये लिङ्गे विलीनः प्राणलिङ्गवान्[5] ॥ इति ।

---

१. कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम् ।
मानवः शिवयोगेन शिवो भवति निश्चयम् ॥ (लि. पु. उ. २१।९५)

२. प्राणलिङ्गिस्थलं चैतत् पञ्चस्थलसमन्वितम् ।
प्राणलिङ्गिस्थलं चादौ प्राणलिङ्गार्चनं ततः ॥
शिवयोगसमाधिश्च ततो लिङ्गनिजस्थलम् ।
अङ्गलिङ्गिस्थलं चाथ क्रमादेषां भिदोच्यते ॥ (सि. शि १२।४-५)

३. सि. शि १२।६-७, वी. आ. च , पृ ४५६

४. सि शि १२।८

५. सि. शि. १२।१०-११

पूर्वोक्तानि भक्त-माहेश्वर-प्रसाद्याख्यानि त्रिस्थलानि क्रियाप्रधानानि सन्ति। चतुर्थमिदं स्थलं योगप्रधानं ज्ञानप्रधानं च वर्तते। अस्मिन्नेव स्थले साधकस्य स्वकीयचिद्रूपस्य, अर्थात् प्राणलिङ्गस्य बोधो जायते। एतादृशज्ञानयोगवानेव प्राणलिङ्गीति कथ्यते[1]।

अयं च प्राणलिङ्गो भ्रमरकीटन्यायेन सदा स्वान्तःस्थं संविल्लिङ्गं भावनामयपदार्थैः प्रपूजयति। तत्र क्षमा ह्यभिषेकजलम्, नित्यानित्यवस्तुविवेको वस्त्रम्, सत्यभाषणमेवाभरणम्, वैराग्यमेव पुष्पमालिका, श्रद्धा हि धूपः, मौनमेव घण्टानादः, बुद्धेश्चिद्रूपलिङ्गरूपत्वमेव नमस्कारक्रियेति प्राणलिङ्गार्चनायाः पदार्थाः प्रतिपादिताः सन्ति[2]। प्राणलिङ्गस्य तदर्चनापद्धतेश्च विशेषविवरणं तृतीयपरिच्छेदे द्रष्टव्यम्।

एवं भावनामयपदार्थैः प्राणलिङ्गार्चनासक्तस्य प्राणलिङ्गिनः समाधिस्थितिः प्राप्यते। सैव शिवयोगसमाधिस्थलम्। तदुक्तम्—

अन्तःक्रियारतस्यास्य प्राणलिङ्गार्चनक्रमैः।
शिवात्मध्यानसम्पत्तिः समाधिरिति कथ्यते[3] ॥ इति।

अत्र प्राणो नाम जीवः, लिङ्गं नाम शिवः, तयोरैक्यानुसन्धानमेव समाधिः। तदर्थं शिवयोगसिद्धस्य सद्गुरोरुपदेशानुसारं स्वसूक्ष्मशरीरे मूलाधारतो भ्रूमध्यपर्यन्तमाधार-स्वाधिष्ठान-मणिपूरक-अनाहत-विशुद्धि-आज्ञाख्यानि षट्चक्राणि भावयेत्। एवमेव भ्रूमध्यादूर्ध्वभागे ब्रह्मरन्ध्रे सहस्रदलमम्बुजं भावयेत्। तत्कमलमध्ये विमलं चन्द्रबिम्बम्, तन्मध्ये सूक्ष्मं रन्ध्रं कैलाससंज्ञकं भावयेत्। तत्र सर्वकारणकारणं शिवं स्वात्माभेदेन ध्यायीत। एतादृशध्यानस्य पूर्णस्थितिरेव शिवयोगसमाधिः[4]।

---

१. भक्तो माहेश्वरश्चेति प्रसादीति च कीर्तितः।
कर्मप्राधान्ययोगेन ज्ञानयोगोऽस्य कथ्यते ॥
लिङ्गं चिदात्मकं ब्रह्म तच्छक्तिः प्राणरूपिणी।
तद्रूपलिङ्गविज्ञानी प्राणलिङ्गीति कथ्यते ॥ (सि. शि. १३।२-३)

२. सि. शि. १२।१३-२०

३. सि. शि. १२।२१

४. अन्तः षट्चक्ररूपाणि पङ्कजानि विभावयेत्।
ब्रह्मादिस्थानभूतानि भ्रूमध्यान्तानि मूलतः ॥

एतादृशसमाधिसिद्धौ साधकस्य सर्वदा शिवानन्दानुभूतिरेव जायते। आत्मारणिसमुत्थेनानेन शिवाभेदज्ञानाग्निना मलमायादिपाशसमूहो भस्मीभवति। धर्माधर्मलक्षणकर्ममूलस्य, अविद्यादिपञ्चक्लेशलक्षणपर्णवतः, जननमरणलक्षण-संसारवृक्षस्य छेदने एतादृशशिवध्यानमेव परशुः। शिवध्यानं तु निबिडतर-संसारान्धकारस्य चण्डभास्कर एव[1]। प्राणलिङ्गिस्थलस्य साधक एतादृशान्त-र्लिङ्गानुसन्धाने सदा निमग्नः सन् शिवानन्देन सन्तृप्तो भवति।

शिवयोगसमाधिनिष्ठस्य प्राणलिङ्गिनोऽवस्थान्तरमेव लिङ्गनिजस्थलम्। परात्परस्य शिवलिङ्गस्य निजस्वरूपेण, अर्थात् स्वात्मरूपेण प्रत्यक्षानुभव एव लिङ्गनिजस्थलमित्युच्यते। तदुक्तम्—

स्वान्तस्थशिवलिङ्गस्य प्रत्यक्षानुभवस्थितिः।
यस्यैव परलिङ्गस्य निजमित्युच्यते बुधैः॥
तस्माल्लिङ्गं परं ब्रह्म सच्चिदानन्दलक्षणम्।
निजरूपमिति ध्यानात् तदवस्था प्रजायते[2]॥ इति।

अत्र लिङ्गपदेन जगत उत्पत्तेः, स्थितेः, लयस्य च कारणीभूतं सच्चिदानन्दरूपं स्वयंप्रकाशं शिवाभिधं परं ब्रह्मोच्यते[3]। एतत्स्थलीयः साधक-स्तादृशं परमतत्त्वं शिवयोगसमाधिद्वारा स्वात्मरूपेण साक्षात्करोति।

भ्रूमध्यादूर्ध्वभागे तु सहस्रदलमम्बुजम्।
भावयेत् तत्र विमलं चन्द्रबिम्बं तदन्तरे॥
सूक्ष्मरन्ध्रं विजानीयात् तत्कैलासपदं विदुः।
तत्रस्थं भावयेच्छम्भुं सर्वकारणकारणम्॥ (सि. शि. १२।२७-२९)

१. बहिर्वासनया विश्वं विकल्पार्थं प्रकाशते।
अन्तर्वासितचित्तानामात्मानन्दः प्रकाशते॥
आत्मारणिसमुत्थेन प्रमोदमथनात् सुधीः।
ज्ञानाग्निना दहेत् सर्वं पाशजालं जगन्मयम्॥
संसारविषवृक्षस्य पञ्चक्लेशपलाशिनः।
छेदने कर्ममूलस्य परशुः शिवभावना॥
अज्ञानराक्षसोन्मेषकारिणः संहृतात्मनः।
शिवध्यानं तु संसारतमसश्चण्डभास्करः॥ (सि. शि. १२।२३-२६)

२. सि. शि. १२।३२,४०

३. चिदानन्दमयः साक्षाच्छिव एव निरञ्जनः।
लिङ्गमित्युच्यते नान्यद् यतः स्याद् विश्वसंभवः॥

प्राणलिङ्गिनोऽन्तिमा स्थितिरङ्गलिङ्गस्थलम्। अङ्गे, अर्थाद् जीवात्मनि लिङ्गं शिवम्, लिङ्गे शिवे अङ्गं जीवात्मानमित्येवंरूपेण परस्परं सामरस्यानुसन्धानमेवाङ्गलिङ्गस्थलम्[१]। स्थलेऽस्मिन् प्राणलिङ्गिनो हृदये शिव-जीवयोरैक्यानुभवः सञ्जायते।

तदेवं शिवयोगमहिम्ना स्वहृदये कृतप्राणलिङ्गसाक्षात्कारः, क्षमाविवेकादिसद्गुणरूपपदार्थैः प्राणलिङ्गार्चनतत्परः, शिवयोगसमाधिना मस्तकस्थितसहस्रदलकमले साक्षात्कृतपरशिवतत्त्वः, जगदाधारभूतं लिङ्गतत्त्वं स्वात्मरूपेणानुभवमानः, लिङ्गाङ्गयोः सामरस्यज्ञानसम्पन्नश्च साधकः प्राणलिङ्गीति कथ्यते। तस्यैतादृशयोग्यताया मूलं तदीयाऽनुभवभक्तिरेव। तस्मादनुभवभक्तियुक्तः साधक एव प्राणलिङ्गीति संक्षेपेण वक्तुं शक्यते। तदुक्तं मायिदेवेन—

स्वानुभूतिनिबन्धेन कीर्तिताऽनुभवात्मिका।
प्राणलिङ्गिस्थलं चास्य तया भक्त्या समागतम्[२] ॥ इति।

षट्स्थलोपासनाया चतुर्थसोपानभूतेऽस्मिन् स्थले शिवयोगसमाधिमहिम्ना तत्त्वसाक्षात्कारः शिवानुभवश्चास्य सम्पद्यते।

५. शरणस्थलं शरणश्च

शरणस्थलं षट्स्थलोपासनायां पञ्चमं सोपानम्। पूर्वोक्तः शिवस्य चिद्रूपानुभववान् प्राणलिङ्गी यदा शिवानन्दमनुभवति, तदा स एव 'शरणः' इत्याख्यायते। शरणनामकेऽस्मिन् साधके विद्यमाना भक्तिः 'आनन्दभक्तिः' इत्युच्यते। अनया भक्त्या स 'सतीपतिन्यायेन' अलौकिकमानन्दमनुभवति। दाम्पत्यस्नेह एव एकत्वस्थापनस्य पूर्णत्वप्राप्तिवाञ्छाया वा महानाश्रयो वर्तते, यत्र द्वैतमद्वैते परिणमते। मानवजीवने परस्परं यावन्तः सम्बन्धाः सन्ति, तेषूत्कृष्टः सम्बन्धो दाम्पत्यरूप एव। तस्य सात्त्विकचरमविकासा-

---

बहुनात्र किमुक्तेन लिङ्गमित्युच्यते बुधैः।
शिवाभिधं परं ब्रह्म चिद्रूपं जगदास्पदम् ॥ (सि. शि. १२।३४,३६)

१. अङ्गे लिङ्गं समारूढं लिङ्गे चाङ्गमुपस्थितम्।
एतदस्ति द्वयं यस्य स भवेदङ्गलिङ्गवान्।
ज्ञात्वा यः सततं लिङ्गं स्वान्तःस्थं ज्योतिरात्मकम्।
पूजयन्भावयेन्नित्यं तं विद्यादङ्गलिङ्गिनम् ॥ (सि. शि. १२।४२-४३)

२. अ. सू. ५।७७

वस्थैव भक्तिरिति स्वीकृता। जीवात्मपरमात्मनोस्तादात्म्यभावस्य लौकिकं रूपमेव दाम्पत्यभावः। अत एव भारतीयदर्शने भक्तिसम्प्रदाये सर्वत्र परमात्मा पतिरूपेण जीवात्मा च सतीरूपेण परिकल्पितः। मनोविज्ञान-दृष्ट्या दाम्पत्यभावस्याऽऽध्यात्मिकरूपमेव भक्तिरसस्योद्गमस्थली वर्तते[१]। अत एव बृहदारण्यकोपनिषदि—"तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्"[२] इति लौकिकसतीपतिदृष्टान्तेन भक्तस्यानन्दानुभूति-र्वर्णिता। यथा स्वप्रियतमाया गाढालिङ्गने आबद्धः पुरुषो बाह्यमाभ्यन्तरं च सर्वं विस्मरति, तस्मिन् काले स मधुरानन्दमहोदधौ विचरति; तथैव परमात्मा-ऽऽबद्धहृदयो जीवस्तदतिरिक्तं किमपि नावलोकयति, आत्मानं च विस्मरति। तस्मिन् काले तस्य सर्वाः कामना वाञ्छा वा समाप्यन्ते।

एवं शिवं स्वस्य पतिं मत्वा तमेवानन्यभावेन शरणं गतः साधको वीरशैवसिद्धान्ते 'शरणः' इत्युच्यते। तदुक्तमाचार्यचरणैः श्रीरेणुकाचार्यैः—

अङ्गलिङ्गी ज्ञानरूपः सती ज्ञेयः शिवः पतिः।
यत्सौख्यं तत्समावेशे तद्वान् शरणनामवान्॥
सतीव रमणे यस्तु शिवे शक्तिं विभावयन्।
तदन्यविमुखः सोऽयं ज्ञातः शरणनामवान्॥[३] इति।

अङ्गलिङ्गयोः सामरस्यज्ञानवान् पूर्वोक्तः प्राणलिङ्ग्यत्र अङ्गलिङ्गी-त्युक्तः। सः स्वान्तस्थं चिदानन्दमयं ज्योतिर्लिङ्गरूपं परशिवं स्वपतिं विभाव्य ततोऽनन्तसुखं प्राप्यानन्यमना मोदते।

षट्स्थलोपासनायाः पञ्चमसोपानभूतेऽस्मिन् स्थले—शरणस्थलम्, तामसनिरसनस्थलम्, निर्देशस्थलम्, शीलसम्पादनस्थलं चेति चत्वार्यवान्तर-स्थलान्युक्तानि[४]। एतेषु साधकस्य क्रमिकाऽऽध्यात्मिकप्रगतिरुपदिष्टा। तत्र यथा महन्निधानं प्राप्तोऽन्यस्मात् काचं न याचते, प्राप्तगङ्गोदकस्तृष्णानिवृत्तये मरीचिकाजलं नाभिकाङ्क्षति, तृषितश्चकोरश्चन्द्रमसं विहाय तारका वा न

१. भ. र. वि., पृ. ६२, ६७-६८
२. बृ. उ. ४।३।२१
३. सि. शि. १३।२,५
४. सि. शि. १३।३-४

पश्यति, तथा संसारतिमिरभास्करमानन्दघनं परशिवं विहायान्यत्र विमुखीभूतः साधक एव शरणः, तस्य तादृशी स्थितिरेव शरणस्थलम्[१]।

एवमनन्यभावेन शिवं शरणं गते शरणाख्ये साधके कदाचित् तमोविकारभूताहङ्कारादीनामुदयो मा भूदिति तामसनिरसनस्थलमत्रोपदिष्टम्। तमोगुणेन ज्ञानस्य गतिरवरुध्यते। तदुक्तम्—

यस्य ज्ञानं तमोमिश्रं न तस्य गतिरिष्यते।
सत्त्वं हि ज्ञानयोगस्य नैर्मल्यं विदुरुत्तमाः॥[२] इति।

अत्रोक्तस्तमोगुण उपलक्षणम्। तस्मात् शरणाख्येन साधकेन सत्त्वविवृद्ध्यर्थं रजस्तमसोरुभयोरपि निरासः कर्तव्यः। रागद्वेषाद्यरिषड्वर्गा मोहभ्रान्त्यादयश्च रजस्तमसोः कार्यभूताः। अतो यत्र कुत्रापि व्यक्तौ वस्तुनि वा द्वेषादिसम्भवे स शिवद्वेषीत्युच्यते, सर्वस्यापि प्रपञ्चस्य शिवरूपत्वात्। अतः क्वचिदपि द्वेषादिभावनानामुदयो यथा न भवेत्, तथा वर्तितव्यम्। तदर्थं शमः, दमः, विवेकः, विषयविरक्तिः, अखण्डध्यानम्, क्षमा, भूतदया, विश्वासः, शिवभक्तिः, उत्कृष्टशिवाचारश्चेत्यादिकाः सात्त्विका गुणाः स्वायत्तीकर्तव्याः। एते च दश सात्त्विका गुणा शिवज्ञानस्य बान्धवाः। तदुक्तमाचार्यवर्यैः—

शमो दमो विवेकश्च वैराग्यं पूर्णभावना।
क्षान्तिः कारुण्यसम्पत्तिः श्रद्धा सत्यसमुद्भवा॥

शिवभक्तिः परो धर्मः शिवज्ञानस्य बान्धवाः।
एतैर्युक्तो महायोगी सात्त्विकः परिकीर्तितः॥[३] इति।

एतादृशगुणसमन्वितशिवज्ञानसम्पन्नस्यैव साधकस्य रजस्तमोविकारा निवर्तन्ते[४]। तस्मात् शरणाख्येन साधकेन सात्त्विकेन भाव्यम्। इदमेवात्र तामसनिरसनस्थलस्य तात्पर्यम्।

---

१. सि. शि. १३।५-१२

२. सि. शि. १३।१४

३. सि. शि. १३।१५-१६

४. कामक्रोधमहामोहमदमात्सर्यवारणाः।
शिवज्ञानमृगेन्द्रस्य कथं तिष्ठन्ति सन्निधौ॥
शिवज्ञाने समुत्पन्ने सहस्रादित्यसन्निभे।
कुतस्तमोविकाराः स्युर्महतां शिवयोगिनाम्॥ (सि. शि. १३।१७,२१)

शरणस्थलस्य तृतीयमवान्तरस्थलं निर्देशस्थलं नाम। रजस्तमोविकार-शून्यं सत्त्वसम्पुटितं यज्ज्ञानमुपदिश्यते, तदेव निर्देशस्थलम्। तदुक्तम्—

निराकृत्य तमोभागं संसारस्य प्रवर्तकम्।
निर्दिश्यते तु यज्ज्ञानं स निर्देश इति स्मृतः ॥[1] इति।

संसारनिवर्तकमात्मस्वरूपनिदर्शकं च यज्ज्ञानं सद्गुरुणा उपदिश्यते, तादृश उपदेश एव निर्देश इति तात्पर्यम्। एतादृशश्च निर्देशः शिवाद्वैतज्ञान-सम्पन्नस्य सद्गुरोर्विना न सम्भवतीति तादृशगुरोर्माहात्म्यं वैशिष्ट्यं चात्र वर्णितम्[2]। शिवज्ञानोपदेशकोऽयं गुरुः सिन्धूनां क्षीराब्धिरिव, भूभृतां सुमेरुरिव, ग्रहाणां तिग्मांशुरिव, मणीनां कौस्तुभ इव, वृक्षाणां चन्दनमिव, देवानां च शङ्कर इव प्राकृतगुरुभ्यः श्रेष्ठः[3]। तस्मात् तमोगुणनिवर्तनाभिलाषिणा शरणाख्येन साधकेनैतादृशसद्गुरोः सहवासः कर्तव्य इति निर्देशस्थलस्य तात्पर्यम्।

शरणस्थलस्य चतुर्थमन्तिमं चावान्तरस्थलं शीलसम्पादनाख्यम्। शिवैकविज्ञानम्, शिवध्यानैकतानता, शिवप्राप्तिसमुत्कण्ठा च शीलमित्युच्यते[4]। तस्य प्राप्तिरेव शीलसम्पादनम्। यथा पतिपरायणा पतिव्रता स्त्री लोके शीलवतीत्युच्यते, तथान्यदेवताविमुखः शिवमात्रपरायणोऽयं साधकः सुशीलः शीलवान् वेत्युच्यते। तदुक्तं पूज्यपादैः श्रीरेणुकाचार्यैः—

पतिव्रताया यच्छीलं पतिरागात् प्रशस्यते।
तथा शिवानुरागेण सुशीलो भक्त उच्यते ॥

---

१. सि. शि. १३।२२

२. गुरुरेव परं तत्त्वं प्रकाशयति देहिनाम्।
को वा सूर्यं विना लोके तमसो विनिवर्तकः ॥
अन्तरेण गुरुं सिद्धं कथं संसारनिष्कृतिः।
निदानज्ञं विना वैद्यं किं वा रोगो निवर्तते ॥
अज्ञानमलिनं चित्तदर्पणं यो विशोधयेत्।
प्रज्ञाविभूतियोगेन तमाहुर्गुरुसत्तमम् ॥
कैवल्यकल्पतरवो गुरवः करुणालयाः।
दुर्लभा हि जगत्यस्मिन् शिवाद्वैतपरायणाः ॥
(सि. शि. १३।२३-२५,२७)

३. सि. शि. १३।२८-२९

४. शीलं शिवैकविज्ञानं शिवध्यानैकतानता।
शिवप्राप्तिसमुत्कण्ठा .... ॥ (सि. शि. १३।३२)

पतिं विना यथा स्त्रीणां सेवान्यस्य तु गर्हणा ।
शिवं विना तथान्येषां सेवा निन्दा कृतात्मनाम् ॥
बहुनात्र किमुक्तेन शिवज्ञानैकनिष्ठता ।
शीलमित्युच्यते सद्भिः शीलवांस्तत्परो मतः ॥[1] इति ।

शरणस्थले यः सतीपतिन्याय उक्तः, सोऽत्र पराकाष्ठां प्राप्त इति विज्ञेयम् ।

तदेवं सतीपतिन्यायेन, अनन्यभावेन च शिवं शरणं गतः, सत्त्वगुण-सम्पुटितशिवज्ञानसम्पन्नः, शिवैक्यज्ञानसम्पन्नस्य सद्गुरोरनुचरीभूतः, सुशीलः साधक एव शरण इति विज्ञेयम् । एतस्य सर्वस्य मूलं तदीयाऽऽनन्दभक्तिरेव । तस्मादानन्दभक्तियुक्तः साधकः शरण इति कथ्यते । तदुक्तं मायिदेवेन—

प्रोक्ताऽऽनन्दात्मिका भक्तिरिति वेदान्तवेदिभिः ।
अस्यात्मनस्तया भक्त्या शरणस्थलमागतम् ॥[2] इति ।

६ ऐक्यस्थलमैक्यश्च

ऐक्यस्थलं षट्स्थलोपासनायां षष्ठं सोपानम् । इदमन्तिमं सोपानम् । "एकस्य भाव ऐक्यम्" इति व्युत्पत्त्या पूर्वोक्तः शरणाख्यः साधको यदा परशिवेन साकं समरसो भवति, तदा स एवैक्य इत्युच्यते । साधकेऽस्मिन् विद्यमाना भक्तिः 'समरसभक्तिः' इत्यभिधीयते । अनया भक्त्या शिखिकर्पूरन्यायेनायं परशिवेन साकं समरसभावमापद्यते । यथा शिखिसंयुक्तः कर्पूरः शिखिस्वरूपो भवति, तथा शरणाभिधो जीवः समरसभक्त्या विमुक्तकिञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वभावः, अभिव्यक्तसर्वज्ञत्वसर्वकर्तृत्वको नदीसमुद्रन्यायेन परशिवेन समरसो भवति ।

षष्ठसोपानभूतेऽस्मिन् स्थले—ऐक्यम्, आचारसम्पत्तिः, एकभाजनम्, सहभोजनं चेति चत्वार्यवान्तरस्थलानि भवन्ति[3] । विषयानन्दकणिकानिस्पृहः, निर्मलाशयः, निर्धूतमलसम्बन्धश्चायं साधको यदा 'शिवोऽहम्' इति भावनायां निरूढो भवति, तदा ऐक्य इत्युच्यते । एतदैक्यस्थितिं प्राप्तस्यास्य प्राक्तनः पशु-पतिभावः, सती-पतिभावश्च पूर्णरूपेण निवर्तते । अद्वैतभावनायां यत्सुखं वर्तते न

---

१. सि. शि. १३।३४-३६
२. अ. सू. ५।७९
३. सि. शि. १४।३

तद्द्वैतभावनायां कदापि भवितुमर्हति[१]। तस्मादयं साधकः सर्वविधां भेदबुद्धि परित्यज्य—

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते ॥[२]

इति रेणुकभगवत्पादोक्त्या परशिव ऐक्यमाप्नोति।

एवमैक्यभावमापन्नस्याचारप्रतिपादकं स्थलमेवाचारसम्पत्तिस्थलम्। इदमस्य द्वितीयमवान्तरस्थलम्।

यथा रविः सर्वरसान् प्रभुङ्क्ते
हुताशनश्चापि हि सर्वभक्षकः।
तथैव योगी विषयान् प्रभुङ्क्ते
न लिप्यते कर्मशुभाशुभैश्च ॥[३]

इति शिवरहस्यवचनानुसारमस्याचारविषये विधिर्वा निषेधो वा न सम्भवति। समलोष्टाश्मकाञ्चनः शिवैक्यभावमापन्नोऽयं पुण्यपापरूपं कर्म समाचरन्नपि न तत्फलभोगेन लिप्यते। निर्मलशिवसंविद्वह्निना दग्धपुण्यपाप-लक्षणकर्मबीजवतः शिवज्ञानिनो देहयात्रा तु दग्धपटन्यायेन विदेहकैवल्यपर्यन्त-मनुवर्तते। तस्मादयं पद्मपत्रमिव स्वकर्मणा न लिप्यते। "यथा वायुः सुशीघ्रोऽपि मुक्त्वाकाशं न गच्छति"[४] इति निश्वासकारिकानुसारं शिवैक्यमापन्नस्य तस्य सर्वा अपि क्रियाः शिवलिङ्गपूजारूपा भवन्ति[५]। तदुक्तमभियुक्तैः—

---

१. विषयानन्दकणिकानिस्पृहो निर्मलाशयः।
शिवानन्दमहासिन्धुमज्जनादैक्यमुच्यते ॥
निर्धूतमलसम्बन्धो निष्कलङ्कमनोगतः।
शिवोऽहमिति भावेन निरूढो हि शिवैकताम् ॥
पशुत्वं च पतित्वं च मायामोहविकल्पितम्।
तस्मिन् प्रलयमापन्ने कः पशुः को नु वा पतिः ॥ (सि. शि. १४।४-५,९)

२. सि. शि. २०।६१

३. सि. शि. १४।१, अवतरणिका, पृ. ३६

४. सि. शि. १४।८, अवतरणिका, पृ. ३८

५. शिवाद्वैतपरिज्ञाने स्थिते सति मनस्विनाम्।
कर्मणा किं नु भाव्यं स्यादकृतेन कृतेन वा ॥

आत्मा त्वं गिरिजा मतिः परिचराः प्राणाः शरीरं गृहं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
सञ्चारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गिरो
यद्यत्कर्म करोमि तत्तदखिलं शम्भो तवाराधनम् ॥[1] इति।

तदेवमैक्यस्थलस्य साधकस्य विहितकर्मकरणे न पुण्योत्पत्तिः, तदकरणे च न प्रत्यवायोत्पत्तिः। इदमेवास्याचारसम्पत्तिस्थलम्।

ऐक्यस्थलस्य तृतीयमवान्तरस्थलमेकभाजनं नाम। सर्वत्रैकदृष्टिप्राप्तिरेवैकभाजनम्। अस्यामवस्थायां स्वात्मनि प्रपञ्चे च शिवमेव पश्यति। शिवे विश्वं विश्वस्मिंश्च शिवमित्याधाराधेयभावेन शिवस्य जगतश्च सामरस्यमनुभूयते। एवमन्तरङ्गे बहिरङ्गे च शिवस्वरूपमनुभूयमानोऽयं शिवयोगी जीवन्मुक्त एव[2]।

शम्भोरेकत्र भावेन सर्वत्र समदर्शनः।
कुर्वन्नपि महाकर्म न तत्फलमवाप्नुयात् ॥
निर्दग्धकर्मबीजस्य निर्मलज्ञानवह्निना।
देहवद्भासमानस्य देहयात्रा तु लौकिकी ॥
शिवज्ञानसमापन्नस्थिरवैराग्यलक्षणः।
स्वकर्मणा न लिप्येत पद्मपत्रमिवाम्भसा ॥
यद्यच्चिन्तयते योगी मनसा शुद्धभावनः।
तत्तच्छिवमयत्नेन शिवध्यानमुदाहृतम् ॥
यत्किञ्चिद्भाषितं लोके स्वेच्छया शिवयोगिना।
शिवस्तोत्रमिदं सर्वं यस्मात् सर्वात्मकः शिवः ॥
या या चेष्टा समुत्पन्ना जायते शिवयोगिनाम्।
सा सा पूजा महेशस्य सर्वदा तद्गतात्मनाम् ॥
(सि. शि. १४।१७-१८,२१-२२,२५-२७)

१. सि. शि. १४।१०, अवतरणिका, पृ. ३९

२. विश्वं शिवमयं चेति सदा भावयतो धिया।
शिवैकभाजनात्मत्वादेकभाजनमुच्यते ॥
शिवे विश्वमिदं सर्वं शिवः सर्वत्र भासते।
आधाराधेयभावेन शिवस्य जगतः स्थितिः ॥
वृत्तिशून्ये स्वहृदये शिवलीने निराकुले।
यः सदा वर्तते योगी स मुक्तो नात्र संशयः ॥
(सि. शि. १४।२८,३०,३३)

ऐक्यस्थलस्यान्तिममवान्तरं स्थलं वर्तते सहभोजनं नाम। स्थलेऽस्मिन् गुरौ, शिष्ये, शिवे, जगति च स्वात्मस्वरूपत्वमेवोपदिश्यते, अर्थात् सर्वथा भेदभावो निरस्यते[1]। तदुक्तम्—

गुरोः शिवस्य शिष्यस्य स्वस्वरूपतया स्मृतिः।
सहभोजनमाख्यातं सर्वग्रासात्मभावतः॥

शिवं विश्वं गुरुं साक्षाद् योजयेन्नित्यमात्मनि।
एकत्वेन चिदाकारे तदिदं सहभोजनम्॥

अहं भृत्यः शिवः स्वामी शिष्योऽहं गुरुरेष वै।
इति यस्य मतिर्नास्ति स चाद्वैतपदे स्थितः॥[2] इति।

पराहन्तामये स्वात्मपावके इदन्तारूपहवनद्रव्येणायं होमं करोतीति शिवोऽहम्, गुरुरहम्, चराचरं विश्वं चाहमिति पूर्णाहन्ताभावेनावतिष्ठते। तस्मादस्य कुत्रापीदमिति बोधो न भवति, सर्वत्राहंबोध एव सञ्जायते।

तदेवमैक्यनामकोऽङ्गोऽयं समरसभक्तिमहिम्ना निवारितजननमरणादिक्लेशे चिदाकाशस्वरूपे महालिङ्गे जले जलमिव सजातीयसमानसमरसभावेन लीनो भवति[3]। इदमेव लिङ्गाङ्गसामरस्याख्यं परमं निःश्रेयसम्।

एवं शिखिकर्पूरन्यायेन नदीसमुद्रन्यायेन वा शिवेन समरसभावमापन्नः, विधिनिषेधप्रतिबन्धकशून्यः सर्वविधभेदराहित्येन पूर्णाहन्ताभावयुक्तो मुक्तो महापुरुष एवैक्य इत्युच्यते। एतादृशैक्यस्थितिप्राप्तौ तदीया समरसा भक्तिरेव मूलभूता। तस्मात् समरसभक्तियुक्तः साधक एवैक्य इति संक्षेपेणाभिधीयते। तदुक्तं मायिदेवेन—

सामरस्यप्रभावेण प्रोक्ता समरसात्मिका।
ऐक्यस्थलं तया चास्य चेतनस्य समागतम्॥[4] इति।

---

१. "शिवगुर्वात्मनामैक्यानुसन्धानात्" (२।४९) "....चक्रदेवतयोरपि॥ विद्यागुर्वात्मनामैक्यम्" (२।५१-५२) इति च योगिनीहृदयेऽपि शिवगुर्वात्मनाम्, चक्रदेवताविद्यागुर्वात्मनां चैक्यं प्रतिपाद्यते।

२. सि. शि. १४।३४-३५,३७

३. सि. शि. १४।३८-३९,४२

४. अ. सू ५।८१

तदेवं प्रकारेण श्रद्धाभक्त्या भक्त इति, निष्ठाभक्त्या माहेश्वर इति, अवधानभक्त्या प्रसादीति, अनुभवभक्त्या प्राणलिङ्गीति, आनन्दभक्त्या शरण इति, समरसभक्त्या ऐक्य इति नाम्नाऽयमङ्गः षड्विधानां भक्तीनामेव साहाय्येन षट्स्थलसोपानमारुह्य स्वमूलरूपे लिङ्गे समरसो भवति। अयमेव लिङ्गाङ्गसंयोगाख्यो लिङ्गाङ्गसामरस्याख्यो वा वीरशैवीयः षट्स्थलसोपानक्रमः।

लिङ्गाङ्गसंयोगविधिः

दर्शनान्तरेषु यत् शिवजीवैक्यमित्युच्यते, तदेवात्र लिङ्गाङ्गसंयोग इति लिङ्गाङ्गसामरस्यमिति वा कथ्यते। तयोरयं संयोगः सायुज्यमुक्तिरूपः। तदुक्तं मायिदेवेन—

सम्यग् योगो हि संयोगो भवेल्लिङ्गाङ्गयोः सदा।
संयोग एव सायुज्यरूपा मुक्तिर्न चापरा[1] ॥ इति।

उपासकाख्यमङ्गस्थलं यथात्र भक्त-माहेश्वर-प्रसादि-प्राणलिङ्गी-शरण-ऐक्येति षट्प्रकारेणोक्तम्, तथोपास्याख्यं लिङ्गस्थलमपि—आचारलिङ्गं गुरुलिङ्गं शिवलिङ्गं जङ्गमलिङ्गं प्रसादलिङ्गं महालिङ्गं चेति षट्प्रकारेणोच्यते[2]। अङ्गस्थलं यथा श्रद्धादिसमरसान्तषड्विधभक्तियुक्तम्, तथा लिङ्गस्थलमपि क्रमशो निवृत्ति-प्रतिष्ठा-विद्या-शान्ति-शान्त्यतीत-शान्त्यतीतोत्तराख्य-षट्कलोपेतं भवति।

एताश्च कलाः क्रमशः क्रियाशक्ति-ज्ञानशक्ति-इच्छाशक्ति-आदिशक्ति-पराशक्ति-चिच्छक्त्याख्यानां षट्शक्तीनां पर्यायपराः[3]।

---

१. अ. सू. ५।१५

२. महालिङ्गं प्रसादाख्यलिङ्गं च चरलिङ्गकम्।
शिवलिङ्गं तथा चैव गुरुलिङ्गं ततः परम्॥
आचारलिङ्गमित्येव लिङ्गं षड्विधमुच्यते॥ (अ. सू. ३।२१-२२)

३. शक्तयः षड्विधा ज्ञेयाः षट्स्थलेषु समाहिताः।
शान्त्यतीतोत्तरा नाम चिच्छक्तिरिति कीर्तिता॥
शान्त्यतीता पराशक्तिः शान्तिरेवादिसंज्ञिता।
इच्छाशक्तिश्च विद्या स्यात् प्रतिष्ठा ज्ञानरूपिणी॥
निवृत्तिः स्यात् क्रियाशक्तिरिति पर्यायसङ्गतिः। (अ. सू. ३।२३-२६)

श्रीमायिदेव एतच्छक्तियुक्तानां षड्लिङ्गानामन्तरङ्गेऽभिव्यक्तिस्थानान्याधाराद्याज्ञान्तानि षट्चक्राणीत्युपवर्णयति। तदनुसारं मूलाधारमाचारलिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गं क्रियाशक्त्यपरपर्यायनिवृत्तिकलयोपेतं 'न'कारमन्त्रस्याधिष्ठानम्। स्वाधिष्ठानं गुरुलिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गं ज्ञानशक्त्यपरपर्यायप्रतिष्ठाकलयोपेतं 'म'कारमन्त्रस्याधिष्ठानम्। मणिपूरकं शिवलिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गमिच्छाशक्त्यपरपर्यायविद्याकलयोपेतं 'शि'कारमन्त्रस्याधिष्ठानम्। अनाहतं जङ्गमलिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गमादिशक्त्यपरपर्यायशान्तिकलयोपेतं 'वा'कारमन्त्रस्याधिष्ठानम्। विशुद्धिः प्रसादलिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गं पराशक्त्यपरपर्यायशान्त्यतीतकलयोपेतं 'य'कारमन्त्रस्याधिष्ठानम्। आज्ञाचक्रं महालिङ्गाभिव्यक्तेः स्थानम्। तच्च लिङ्गं चिच्छक्त्यपरपर्यायशान्त्यतीतोत्तराकलयोपेतं 'ॐ'कारमन्त्रस्याधिष्ठानं भवति[1]।

उपर्युक्तानां षड्लिङ्गानां स्थानानि षट्चक्राण्येवेति श्रीनीलकण्ठशिवाचार्यैरप्युक्तम्। तथाहि—"अत्र शरीरे महालिङ्गादिषड्विधलिङ्गानां स्थानान्याज्ञाचक्रादिषड्विधचक्राण्येव, तत्तच्चक्रेष्वेव तेषां प्रत्यक्षयोग्यत्वात्"[2] इति।

यद्यपि परशिवब्रह्मरूपं लिङ्गं सर्वव्यापकम्, अथाप्युपासनार्थमन्तःस्थत्वेन परिच्छिन्नमित्यवधेयम्। तदुक्तमाचार्यैः—

अपरिच्छिन्नमव्यक्तं लिङ्गं ब्रह्म सनातनम्।
उपासनार्थमन्तःस्थं परिच्छिन्नं स्वमायया ॥[3] इति।

आधारादिचक्रेषु ज्योतिर्लिङ्गानुसन्धानं न सामान्यजनसुलभम्। तदर्थं योगशास्त्रेऽष्टाङ्गयोगोऽभिहितः। तत्रापि प्राणायामस्य मुद्रासाधनस्य च

---

१. मूलाधारे नकाराख्या संस्थिता पारमेश्वरी।
स्वाधिष्ठाने मकारः स्याच्छिकारो मणिपूरके।
अनाहते वकाराख्या सदा शैवी व्यवस्थिता ॥
विशुद्धौ तु यकाराख्या साक्षाद् विश्वेश्वरी स्थिता ॥
आज्ञाचक्रे महादेवी ताराख्या समुपस्थिता।
आचाराख्यं नकारः स्यान्मकारो गुरुलिङ्गकम् ॥
शिकारः शिवलिङ्गं स्याद् वाकारश्चरलिङ्गकम्।
यकारः स्यात् प्रसादाख्यमोङ्कारो महदुच्यते ॥ (अ. सू. ६।४७-५०)

२. शि. प., पृ. ४८

३. सि शि ६।६५

प्रामुख्यम्। प्राणायामेन तत्तच्चक्रस्थितमावरणरूपं मालिन्यमपसार्यते,[१] शाम्भवी-उन्मनी-शक्ति-चालिन्यादिमुद्राभिर्मनस्तत्र स्थिरीक्रियते च। एवं स्थिरचेतसामेव योगिनां तज्ज्योतिः-साक्षात्कारो भवति। अयमेव वीरशैवीयशिवयोगिभिरन्तर्लिङ्गधारणमित्युच्यते[२]। अन्तर्लिङ्गानुसन्धानं मोक्षसामग्रीषु प्रमुखम्[३]। अत एव श्रीरेणुकाचार्याः—

आधारे कनकप्रख्यं हृदये विद्रुमप्रभम्।
भ्रूमध्ये स्फटिकच्छायं लिङ्गं योगी विभावयेत्॥[४]

इत्यन्तर्लिङ्गानुसन्धानमुपदिष्टवन्तः।

एतदाचार्योपदेशानुसारं भक्तस्थलस्य भक्ताभिधः साधको गुरूपदिष्टमार्गेण सुखासन उपविश्य, स्ववामहस्तपीठमक्ष्णोः समक्षं द्वादशाङ्गुलान्तरे निधाय, तदुपरि स्वेष्टलिङ्गं प्रतिष्ठाप्य, अर्धनिमीलिताभ्यां निर्निमेषाभ्यां लोचनाभ्यां तदिष्टलिङ्गमवलोकयन्, दृढसङ्कल्पेन स्वमनोवृत्तिं मूलाधारे स्थिरीकृत्य, नकारमन्त्रमनुस्मरन् प्राणायामप्रक्रियया यदा पुनः पुनः प्राणापानयोः संघट्टनं करोति, तदा मूलाधारे दिव्यज्योतिरुत्पद्यते। एतदर्थं शक्तिचालिनीमुद्रायाः, अश्विनीमुद्रायाश्चोपयोगः क्रियते। प्राणायामविषयकं मुद्राविषयकं च विशिष्टं ज्ञानं गुरुमुखादेवावगन्तव्यम्।

एवं मूलाधारे समुत्पन्नमिदं ज्योतिर्वीरशैवशिवयोगिभिराचारलिङ्गमित्यभिधीयते। अस्य निरन्तरानुसन्धानेन भक्ताख्यमङ्गस्थलमाचाराख्यलिङ्गस्वरूपं भवति। आचारलिङ्गस्य क्रियाशक्तियुक्तत्वात् तदुपासकनिष्ठा श्रद्धाभक्तिरपि क्रियाशक्तिरूपेण परिणमते। इदमेव भक्ताङ्गाचारलिङ्गयोः सामरस्यम्।

भक्ताङ्गस्याचारलिङ्गोपासकत्वप्रतिपादन इदमैदम्पर्यम्—साधकोऽयं चतुर्थपरिच्छेदोक्तान् पञ्चविधानाचारान् श्रद्धया परिपालयति। गच्छता कालेन

---

१. "ततः क्षीयते प्रकाशावरणम्" (यो. सू. २।५२)।

२. आधारे हृदये वापि भ्रूमध्ये वा निरन्तरम्।
ज्योतिर्लिङ्गानुसन्धानमान्तरं लिङ्गधारणम्॥ (सि. शि. ६।३८)

३. अन्तर्लिङ्गानुसन्धानमात्मविद्यापरिश्रमः।
गुरूपासनशक्तिश्च कारणं मोक्षसम्पदाम्॥ (सि. शि. ६।४२)

४. सि. शि. ६।३९

श्रद्धातिशयेन च स्वेनाचरणीयमानेष्वाचारेषु भगवद्रूपमनुसन्धत्ते। एवम् "आचार एव लिङ्गम् आचारलिङ्गम्, आचारलिङ्गस्य उपासक आचारलिङ्गोपासकः" इति व्युत्पत्त्या पूर्वोक्तानाचारान् श्रद्धातिशयेन शिवलिङ्गपूजावत् परिपालयतीत्ययं भक्तस्थलस्य साधक आचारलिङ्गोपासक इत्युच्यते। एवमाचरणशीलोऽयमहमाचरामीत्यभिमानं परित्यज्य यदाऽऽचारे तन्मयो भवति, तदाऽयमाचारलिङ्गस्वरूपो जायते। एवं श्रेष्ठक्रियाशीलत्वादयं क्रियाशक्तियुक्त इत्यप्युच्यते। अत एवायं कर्मयोगो भवति। तदेवं श्रेष्ठाऽऽचारशीलत्वं लोकहितकर्मकारित्वं वाचारलिङ्गोपासकस्य, तल्लिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति वक्तुं शक्यते। इदमेव भक्त-आचारलिङ्गयोः सामरस्यम्।

माहेश्वरस्थलस्य माहेश्वराभिधः साधकोऽपि पूर्वोक्तशिवयोगप्रक्रियया सुखासन उपविश्य, पूर्वोक्तानुसारेण स्वेष्टलिङ्गमवलोकयन् दृढसङ्कल्पेन स्वमनोवृत्तिं स्वाधिष्ठानचक्रे स्थिरीकृत्य मकारमन्त्रमनुस्मरन् तिष्ठति। पूर्वोक्तप्राणायामेन चित्तस्थैर्येण चास्य स्वाधिष्ठानचक्रे ज्योतिषः साक्षात्कारो भवति। तज्ज्योतिर्वीरशैवाचार्यैर्गुरुलिङ्गमित्युच्यते। अस्य ज्योतिर्लिङ्गस्य निष्ठया निरन्तरानुसन्धानेन माहेश्वरो गुरुलिङ्गस्वरूपो भवति। गुरुलिङ्गस्य ज्ञानशक्तियुक्तत्वात् तदुपासकस्य निष्ठाभक्तिरपि ज्ञानशक्तिरूपेण परिणमते। तदेवमुपासनाबलेन निष्ठाभक्तियुक्तो माहेश्वरोऽधुना ज्ञानशक्तियुक्तगुरुलिङ्गस्वरूपो जायते। इदमेव माहेश्वराङ्ग-गुरुलिङ्गयोः सामरस्यम्।

अत्रेदमैदम्पर्यम्—तात्त्विकदृष्ट्या गुरुशब्दस्य ज्ञानमित्यर्थो[1] भवति। तस्मात् "गुरुरेव लिङ्गं = गुरुलिङ्गम्" इति व्युत्पत्त्या सद्गुरुणोपदिष्टं यन्नैतिकं ज्ञानं तदेव लिङ्गमिति निष्ठयोपास्यमानः साधक एव गुरुलिङ्गोपासकः। एवं ज्ञाननिष्ठोऽयं ज्ञानशक्तियुक्तोऽपि भवति। ज्ञानरहित आचारोऽन्धाचारो भवति। अतोऽत्रायं ज्ञानशक्तियुक्त इत्युच्यते। एवमयं यद्यदाचरति तत्सर्वस्यापि वास्तविकज्ञानवांश्च भवति। तदेवमाचारविषयकज्ञानसम्पन्नत्वमेव गुरुलिङ्गोपासकस्य तल्लिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति।

प्रसादिस्थलस्य प्रसाद्याख्यः साधकोऽपि पूर्वोक्तशिवयोगप्रक्रियया दृढसङ्कल्पेन च स्वमनोवृत्तिं मणिपूरकचक्रे स्थिरीकृत्य यदा शिकारमन्त्रमनुस्मरन् तिष्ठति, तदा तच्चक्रेऽस्य ज्योतिषः साक्षात्कारो भवति। तज्ज्योतिर्वीरशैवा-

---

१. गुकारस्तैलवर्तिश्च रुकारो ज्वलनस्तथा।
द्वयोर्योगप्रभावेण स्वयंज्योतिर्गुरुः स्मृतः॥ (वी. चि., पृ. १२)

चार्यैः शिवलिङ्गमित्युच्यते । अस्यावधानेन निरन्तरानुसन्धानेन प्रसादी शिवलिङ्गस्वरूपो भवति । शिवलिङ्गस्येच्छाशक्तियुक्तत्वात् तदुपासकस्यावधानभक्तिरपीच्छाशक्तिरूपेण परिणमते। तदेवमुपासनाबलेनावधानभक्तियुक्तः प्रसाद्याख्यः साधक इच्छाशक्तियुक्तशिवलिङ्गस्वरूपो भवति । इदमेव प्रसादि-शिवलिङ्गयोः सामरस्यम् ।

अस्यायं भावः—शिवशब्दस्य भद्रं मङ्गलं कल्याणमित्याद्यर्था[1] भवन्ति । तस्मात् "शिवमेव लिङ्गं=शिवलिङ्गम्" इति व्युत्पत्त्या शिवभावनैवात्र शिवलिङ्गमिति । अतः—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥

इत्युक्त्यनुसारेण प्राणिमात्रस्य कल्याणचिन्तनमेव शिवलिङ्गानुसन्धानम् । शिवलिङ्गस्येच्छाशक्तियुक्तत्वात् साधकोऽयं लोककल्याणेच्छाशक्तिसम्पन्नो भवति । शिवाचार-शिवज्ञानयोः साकं शिवेच्छाप्यावश्यकीति विज्ञेयम् । तदेवं लोककल्याणेच्छायुक्तत्वमेव शिवलिङ्गोपासकस्य शिवलिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति ।

प्राणलिङ्गिस्थलस्य प्राणलिङ्ग्याख्यः साधकोऽपि पूर्वोक्तशिवयोगप्रक्रियया दृढसङ्कल्पेन च स्वमनोवृत्तिमनाहतचक्रे शाम्भवीमुद्रया स्थिरीकृत्य यदा वाकारमन्त्रमनुस्मरन् तिष्ठति, तदा हृदयस्थानाहतचक्रे दिव्यज्योतिषः साक्षात्कारो भवति । तज्ज्योतिरत्र सिद्धान्ते जङ्गमलिङ्गमित्युच्यते । अस्यानुभवभक्त्या निरन्तरानुसन्धानेन प्राणलिङ्गी जङ्गमलिङ्गस्वरूपो भवति । जङ्गमलिङ्गस्यादिशक्तियुक्तत्वात् तदुपासकस्यानुभवभक्तिरप्यादिशक्तिरूपेण परिणमते । तदेवमुपासनाबलेनानुभवभक्तियुक्तः प्राणलिङ्ग्याख्यः साधक आदिशक्तियुक्तजङ्गमलिङ्गस्वरूपो भवति । इदमेव प्राणलिङ्गि-जङ्गमलिङ्गयोः सामरस्यम् ।

इदमत्रावधेयम्—शिवज्ञानसम्पन्नो महापुरुषो जङ्गमशब्देन[2] व्यपदिश्यते । तस्मात् "जङ्गम एव लिङ्गं=जङ्गमलिङ्गम्" इति व्युत्पत्त्या ये ये

---

१. "श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्" (अ. को. १।४।२५) ।

२. जानन्त्यतिशयाद्ये तु शिवं विश्वप्रकाशकम् ।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः ॥ (सि. शि. ११।३६)

शिवज्ञानिनस्ते सर्वे शिवस्वरूपा इत्यनुचिन्तनमेव जङ्गमलिङ्गानुसन्धानम्। जङ्गमलिङ्गस्यादिशक्तियुक्तत्वात् साधकोऽयमादिशक्तिसम्पन्नो भवति। पूर्वोक्तानां शिवाचार-शिवज्ञान-शिवेच्छानामुत्पत्तिस्थानभूतत्वादियं शक्तिरादि-शक्तिरित्युच्यते। तदेवं शिवज्ञानसम्पन्नेषु महापुरुषेषु जङ्गमेषु लिङ्गभाव-युक्तत्वमेव जङ्गमलिङ्गोपासकस्य जङ्गमलिङ्गभूतस्य च साधकस्य लक्षणमिति।

शरणस्थलस्य शरणाख्यः साधकोऽपि पूर्वोक्तशिवयोगप्रक्रियया दृढ-सङ्कल्पेन च स्वमनोवृत्तिं विशुद्धिचक्रे स्थिरीकृत्य यदा यकारमन्त्रमनुस्मरन् तिष्ठति, तदा कण्ठस्थे विशुद्धिचक्रे ज्योतिःसाक्षात्कारो भवति। तज्ज्योतिः प्रसादलिङ्गमित्यभिधीयते। अस्याऽऽनन्दभक्त्या निरन्तरानुसन्धानेन शरणः प्रसादलिङ्गस्वरूपो भवति। प्रसादलिङ्गस्य पराशक्तियुक्तत्वात् तदुपासक-स्याऽऽनन्दभक्तिरपि पराशक्तिरूपेण परिणमते। तदेवमुपासनाबलेनानन्दभक्ति-युक्तः शरणाख्यः साधकः पराशक्तियुक्तप्रसादलिङ्गस्वरूपो भवति। इदमेव शरण-प्रसादलिङ्गयोः सामरस्यम्।

इदमत्र रहस्यम्—प्रसादो नाम मनसो नैर्मल्यं[1] प्रसन्नता वा। तस्मात् "प्रसाद एव लिङ्गं=प्रसादलिङ्गम्" इति व्युत्पत्त्या सदा प्रसन्नमनस्कत्वमेव प्रसादलिङ्गानुसन्धानम्। प्रसादलिङ्गस्य पराशक्तियुक्तत्वात् साधकोऽपि पराशक्तिसम्पन्नो भवति। तदेवं सुख-दुःखादिद्वन्द्वेषु सदा सन्तुष्टचित्तत्वमेव प्रसादलिङ्गोपासकस्य प्रसादलिङ्गस्वरूपभूतस्य च साधकस्य लक्षणमिति।

ऐक्यस्थलस्य ऐक्याख्यः साधकोऽपि पूर्वोक्तशिवयोगप्रक्रियया दृढ-सङ्कल्पेन च स्वमनोवृत्तिमाज्ञाचक्रे उन्मनीमुद्रया स्थिरीकृत्य यदा ॐकारमन्त्र-मनुस्मरन् तिष्ठति, तदा भ्रूमध्यस्थ आज्ञाचक्रे स्फटिकवच्छुभ्रज्योतिषः साक्षात्कारो भवति। तज्ज्योतिरत्र सिद्धान्ते महालिङ्गमित्यभिधीयते। अस्य समरसभक्त्या निरन्तरानुसन्धानेन ऐक्यो महालिङ्गस्वरूपो भवति। महा-लिङ्गस्य चिच्छक्तियुक्तत्वात् तदुपासकस्य समरसभक्तिरपि चिच्छक्तिरूपेण परिणमते। तदेवमुपासनाबलेन समरसभक्तियुक्त ऐक्याख्यः साधकश्चिच्छक्ति-युक्तमहालिङ्गस्वरूपो भवति। इदमेवैक्य-महालिङ्गयोः सामरस्यम्।

अत्रेदं बोध्यम्—"महच्च तल्लिङ्गं=महालिङ्गम्" इति व्युत्पत्त्या चरा-चरस्याधिष्ठानभूतं परमतत्त्वमेव महालिङ्गमित्यभिधीयते। अतः "सर्वं

---

१. "नैर्मल्यं मनसो लिङ्गं प्रसाद इति कथ्यते" (सि. शि. ११।६)।

लिङ्गमयं जगत्" इति भावनया सर्वत्र लिङ्गदृष्टिसम्पादनमेव महालिङ्गानुसन्धानम्। महालिङ्गस्य चिच्छक्तियुक्तत्वात् साधकोऽपि चिच्छक्तिसम्पन्नो भवति। तदेवं सर्वत्र शिवलिङ्गदृष्टिप्राप्तिरेव महालिङ्गोपासकस्य महालिङ्गे समरसीभूतस्य च साधकस्य लक्षणमिति।

अत्रानुग्राहकत्वाल्लिङ्गस्थलमुपास्यम्, अनुग्राह्यत्वादङ्गस्थलमुपासकं भवति। उपासनाया द्वैतभावनिवृत्तिहेतुत्वादुपास्योपासकभावापन्नयोर्लिङ्गाङ्गयोर्भ्रमरकीटन्यायेनाभेद एव स्यास्यति। लिङ्गमहापुराणे—

कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम्।
मानवः शिवयोगेन शिवो भवति निश्चयम्॥[1]

इति शिवयोगेनैव मानवः शिवो भवतीति भ्रमरकीटदृष्टान्तमुदाहरन् महर्षिर्व्यास आचारादिलिङ्गानां भक्ताद्यङ्गैरुपास्यमानत्वमप्युक्तवान्। तथाहि—

आचारलिङ्गं प्रथमं गुरुलिङ्गं द्वितीयकम्।
शिवलिङ्गं तृतीयं स्याच्चरलिङ्गं चतुर्थकम्॥

प्रसादं पञ्चमं लिङ्गं महालिङ्गं तु षष्ठकम्।
भक्तो माहेश्वरश्चैव प्रसादिप्राणलिङ्गकः॥

शरणैक्यस्थलैः षड्भिः क्रमाल्लिङ्गमुदाहृतम्।[2] इति।

तदेवं शिवयोगमहिम्ना भक्त आचारलिङ्गे, माहेश्वरो गुरुलिङ्गे, प्रसादी शिवलिङ्गे, प्राणलिङ्गी जङ्गमलिङ्गे, शरणः प्रसादलिङ्गे, ऐक्यो महालिङ्गे च समरसो भवति। यथाऽङ्गस्थलानि लिङ्गस्थलेषु समरसीभूतानि, तथाऽङ्गस्थलाश्रिता भक्तयो लिङ्गस्थलाश्रितशक्तिषु समरसीभवन्ति। तद्यथा—श्रद्धाभक्तिः क्रियाशक्तौ, निष्ठाभक्तिर्ज्ञानशक्तौ, अवधानभक्तिरिच्छाशक्तौ, अनुभवभक्तिरादिशक्तौ, आनन्दभक्तिः पराशक्तौ, समरसभक्तिश्च चिच्छक्ताविति। अयमेव लिङ्गाङ्गसंयोगविधिः।

एवमङ्गस्य लिङ्गस्वरूपप्राप्तिर्वीरशैवीया जीवन्मुक्तिः। सिद्धान्तशिखामणौ जीवन्मुक्तिपराणां षड्लिङ्गस्थलानाम्, तदवान्तरभूतानां गुर्वादि-

---

१. लि पु. उ. भा. २१।९५

२. लि. पु., उ. भा. २१।१२२-१२४

ज्ञानशून्यान्तानां सप्तोत्तरपञ्चाशल्लिङ्गस्थलानां च विस्तृतं विवेचनं वर्तते। जिज्ञासुभिस्तदीयपञ्चदशपरिच्छेदाद्विंशतिपरिच्छेदपर्यन्तो भागोऽवलोकनीयः। ग्रन्थगौरवभयान्नात्र विस्तारितः।

एवमङ्गस्थलेन समरसभावमापन्नानि षड्लिङ्गस्थलान्यपि पुनः पूर्व-पूर्वस्थलान्युत्तरोत्तरस्थलेषु समरसभावं यान्ति। तद्यथा—आचारलिङ्गं गुरुलिङ्गे, गुरुलिङ्गं शिवलिङ्गे, शिवलिङ्गं जङ्गमलिङ्गे, जङ्गमलिङ्गं प्रसादलिङ्गे, प्रसादलिङ्गं महालिङ्गे, महालिङ्गं च सर्वाधिष्ठानभूते स्थलाख्ये घनलिङ्ग इति[1]।

अनेन प्रकारेणाङ्गपदवाच्यो जीवो लिङ्गपदवाच्येन शिवेन साकं षट्स्थलोपासनामार्गेणाभेदं चिन्तयन् ऐक्यस्थले महालिङ्गेन साकम्—

> जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
> परे ब्रह्मणि लीनात्मा विभागेन न दृश्यते ॥[2]

इत्याचार्योक्त्यनुसारेणाद्वैतरूपेण समरसो भवति। इदमेव वीरशैवीयं लिङ्गाङ्ग-सामरस्याख्यं शिवजीवैक्यमिति विज्ञेयम्। तदेवमत्र दर्शने क्रियादिशक्तीनां सङ्कोचेन जीवत्वप्राप्तिः, पुनरुपासनाबलेन तासामेव शक्तीनां विकासे सति शिवत्वप्राप्तिरिति शक्तीनां सङ्कोचविकासभावेन बन्ध-मोक्षौ व्यवस्थाप्येते[3]।

एवं लिङ्गाङ्गसामरस्याख्यजीवन्मुक्ति प्राप्तोऽयं महापुरुषः स्वान्तरङ्गे षड्विधचक्रेषु साक्षात्कृतानाचारादिषड्लिङ्गान् षडिन्द्रियाधिष्ठितान् भावयित्वा तत्तदिन्द्रियविषयान् तत्तल्लिङ्गाय समर्प्य तत्तत्प्रसादमुपभुञ्जत इति संसारे वर्तमानोऽपि पद्मपत्रमिव निर्लिप्तः सदा सुखी च भवति।

अस्यायं भावः—भक्तः स्वोपास्यमाचारलिङ्गं घ्राणेन्द्रियाधिष्ठितं भावयित्वा गन्धविषयं तल्लिङ्गार्पितं च कृत्वा तत्प्रसादोपभोगेन आनन्दीभवति। माहेश्वरः स्वोपास्यं गुरुलिङ्गं जिह्वेन्द्रियाधिष्ठितं भावयित्वा रसविषयं तल्लिङ्गार्पितं च कृत्वा तत्प्रसादोपभोगेन आनन्दीभवति। प्रसादी स्वोपास्यं शिवलिङ्गं नेत्रयो-रधिष्ठितं भावयित्वा रूपविषयं तल्लिङ्गार्पितं च कृत्वा तत्प्रसादोपभोगेन आनन्दी-भवति। प्राणलिङ्गी स्वोपास्यं जङ्गमलिङ्गं त्वगिन्द्रियाधिष्ठितं भावयित्वा

---

१. शि. प., पृ. ५१-५२

२. सि. शि. २०।६१

३. "शक्तिविकासरूपशिवत्वप्राप्तिर्मोक्षः" (ई. उ., शा. व्या., पृ. २४)।

स्पर्शविषयं तल्लिङ्गार्पितं च कृत्वा तत्प्रसादोपभोगेन आनन्दीभवति। शरणः स्वोपास्यं प्रसादलिङ्गं श्रोत्रयोरधिष्ठितं भावयित्वा शब्दविषयं तल्लिङ्गार्पितं च कृत्वा तत्प्रसादोपभोगेन आनन्दीभवति। ऐक्यः स्वोपास्यं महालिङ्गं मनोऽधिष्ठितं भावयित्वा सर्वेन्द्रियविषयान् तल्लिङ्गार्पितांश्च कृत्वा तत्प्रसादोपभोगेन आनन्दीभवति। एवमेवाचारादिप्रसादलिङ्गान्तानि पञ्चलिङ्गानि क्रमशः पायु-उपस्थ-पाद-पाणि-वागाख्यानां पञ्चकर्मेन्द्रियाणामप्यधिष्ठानानीति बोध्यम्[1]। एवं वीरशैवीयजीवन्मुक्तः सर्वाङ्गलिङ्गी लिङ्गभोगोपभोगी च भवतीत्यस्य निर्लिप्तत्वं सम्भाव्यते।

ननु जीवन्मुक्तस्यास्य लौकिकप्रवृत्तेर्दृश्यमानत्वात् सोऽपि तज्जन्यदोषभाग् भवेदेवेति चेन्न, पूर्वोक्तप्रकारेण शिवार्पितैरेव काय-करण-भावैर्व्यवहरतीति[2] नायं त्रिकरणजन्यदोषभाग् भवति। तदुक्तमाचार्यैः—

---

१. आचारलिङ्गं घ्राणाख्यं भक्तस्थलसमाश्रयम्।
निवृत्तिकलयोपेतं गन्धग्रहणसाधनम्॥
गुरुलिङ्गं तु जिह्वाख्यं माहेशस्थलसंश्रयम्।
प्रतिष्ठाकलयोपेतं रसग्रहणसाधनम्॥
शिवलिङ्गं तु नेत्राख्यं प्रसादिस्थलसंश्रितम्।
विद्यया कलयोपेतं रूपग्रहणसाधनम्॥
त्वगाख्यं चरलिङ्गं तु प्राणलिङ्गिस्थलाश्रयम्।
शान्त्याख्यकलयोपेतं स्पर्शग्रहणसाधनम्॥
प्रसादलिङ्गं श्रोत्राख्यं शरणस्थलसंश्रयम्।
शान्त्यतीतकलोपेतं शब्दग्रहणसाधनम्॥
मानसं तु महालिङ्गमैक्यस्थलसमाश्रयम्।
शान्त्यतीतोत्तरोपेतं सर्वग्रहणसाधनम्॥
एवं कर्मेन्द्रियाङ्गेषु क्रमाल्लिङ्गस्य योजनम्।
(शि. द., पृ. ४६; क्रि. सा., भा. ३, पृ. ११३)

२. शिवस्य पररूपस्य सर्वाऽनुग्राहिणोऽर्चने।
त्यागो देहाभिमानस्य कायार्पितमुदाहृतम्॥ ...
यद्यत्करणमालम्ब्य भुङ्क्ते विषयजं सुखम्।
तत्तच्छिवे समर्प्यैष करणार्पक उच्यते॥ ...

दर्शनात् स्पर्शनाद् भुक्तेः श्रवणाद् घ्राणनादपि ।
विषयेभ्यो यदुत्पन्नं शिवे तत्सुखमर्पयेत् ॥
इन्द्रियैरेव जायन्ते पापानि सुकृतानि च ।
तेषां समर्पणादीशे कुतः कर्मनिबन्धनम् ॥
इन्द्रियाणि समस्तानि शरीरं भोगसाधनम् ।
शिवपूजाङ्गभावेन भावयन् मुक्तिमाप्नुयात् ॥[1] इति ।

एवं सर्वेन्द्रियैः शिवप्रसादोपभोगिनो न सांसारिकदोषप्रसक्तिरिति जीवन्मुक्तस्य सर्वव्यवहारं कुर्वतोऽपि न दोषप्रसक्तिसम्भवः ।

नन्वेवं शिवभावमापन्नस्य ज्ञानिन आगामिकर्माभावेऽपि सञ्चितस्य कर्मणः का गतिरिति जिज्ञासायाम्—

ज्ञानिनो यानि कर्माणि तानि नो जन्महेतवः ।
अग्निदग्धानि बीजानि यथा नाङ्कुरकारणम् ॥[2]

इति भर्जितबीजवत् शिवोऽहमिति ज्ञानेन दग्धसञ्चितकर्मणः शिवयोगिनो नोत्तरजन्मप्राप्तिरित्याचार्यैरुपदिष्टम् ।

एवं शिवोऽहमिति शिवेन सह स्वात्मन ऐक्यं भावयतः शिवयोगिनः शिवोऽहंभावना यदा दृढा भवति, तदा तादृशवृत्तिज्ञानस्यापि विलये शिवयोगी शिव एव भवतीति शिवयोगिन इयमवस्था ज्ञानशून्यावस्थेत्युच्यते । तदानीं ज्ञातृ-ज्ञान-ज्ञेयानां त्रिपुटीनामभावो जायते । जीवन्मुक्तस्येयं ज्ञानशून्यावस्था जीवन्मुक्तेर्हि पराकाष्ठा । अत एवोक्तम्—

सर्वात्मनि परे तत्त्वे भेदशङ्काविवर्जिते ।
ज्ञात्रादिव्यवहारोत्थं कुतो ज्ञानं विभाव्यते ॥
ज्योतिर्लिङ्गे चिदाकारे स्वप्रकाशे निरुत्तरे ।
एकीभावमुपेतस्य कथं ज्ञानस्य सम्भवः ॥

शिवे निश्चलभावेन भावानां यत्समर्पणम् ।
भावार्पितमिदं प्रोक्तं शिवसद्भाववेदिभिः ॥ ...
भाव एव हि जन्तूनां कारणं बन्धमोक्षयोः ।
भावशुद्धौ भवेन्मुक्तिर्विपरीते तु संसृतिः ॥ (सि. शि. १७।३०,३६,४६,४८)

१. सि. शि. १७।३३,४१,४५

२. सि. शि. १९।२९

यस्य कार्यदशा नास्ति कारणत्वमथापि वा ।
शेषत्वं नैव शेषित्वं स मुक्तः पर उच्यते ॥ इति ।

तदेवं वीरशैवदर्शने स्थलाख्यपरशिवब्रह्मणोंऽशभूताङ्गस्थलाख्यो जीवः स्वोपास्यं लिङ्गस्थलं श्रद्धा-निष्ठा-अवधान-अनुभव-आनन्द-समरसाख्यषड्विध-भक्तिभिरुपास्य क्रमशः क्रियाशक्ति-ज्ञानशक्ति-इच्छाशक्ति-आदिशक्ति-पराशक्ति-चिच्छक्तिप्राप्तिपुरःसरमाचारादिलिङ्गक्रमेणान्ते महालिङ्गस्वरूपो भवति। तच्च महालिङ्गं स्थलाख्ये घनलिङ्गे समरसीभवति। एतदर्थमत्र आपिण्डादि-ज्ञानशून्यान्तमेकोत्तरशतस्थलगर्भितानि षट्स्थलानि पूज्यपादैः श्रीजगद्गुरुरेणुकाचार्यैरुपदिष्टानि सिद्धान्तशिखामण्याख्ये ग्रन्थे। अयमेव लिङ्गाङ्गसामरस्याख्यः शिवजीवैक्यप्रतिपादनपरो वीरशैवीयः षट्स्थलसोपानक्रमः।

अत्रोक्तेषु षट्स्थलेषु भक्त-माहेश्वराख्यौ क्रियाप्रधानौ भेदघटितौ च, प्रसादि-प्राणलिङ्गिनौ क्रियासहितज्ञानयोगप्रधानौ भेदाभेदघटितौ च, शरण-ऐक्याख्यौ ज्ञानप्रधानावभेदघटितौ चेति ज्ञेयम्। अत एवात्र सिद्धान्ते कर्मोपासनाज्ञानाख्यत्रिविधसाधनानाम्, द्वैत-द्वैताद्वैत-अद्वैतश्रुतीनां च सुन्दरः समन्वयः साधकस्योपर्युक्तावस्थाभेदेन व्यवस्थाप्यत इति वीरशैवसिद्धान्तः सर्व-सिद्धान्तसमन्वयात्मक इति ध्येयम् ॥

उपसंहारः

उपक्रमोपसंहाराभ्यां हि शास्त्रकारैः शास्त्रस्य तात्पर्यं निर्णीयते। अत एव तात्पर्यनिर्णायकेषु षट्सु लिङ्गेषु—

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

इति कारिकोक्तेषूपक्रमोपसंहारौ मिलित्वा एकत्वेनैव गण्येते। तत्र तावद् गौड-ब्रह्मानन्दस्वामिनोऽपि—"उपक्रमोपसंहाराभ्यां विचार्यमाणवाक्यस्याद्यन्तभागयो-रेकार्थपर्यवसानं लक्ष्यते। ""तत्राद्यस्यैकार्थतात्पर्यनिर्णायकत्वेन लिङ्गत्वम्; तात्पर्यविषयत्वेन सन्दिग्धानां बहूनां मध्ये यस्मिन्नर्थे आद्यन्तभागयोः पर्यवसानम्, तस्मिन्नेव तात्पर्यनिर्णयात्, अन्यथा तस्य वैयर्थ्यात्"[1] इत्यादिना ग्रन्थसन्दर्भेणोप-क्रमोपसंहारयोरेकलिङ्गत्वं निरूपितवन्तः।

प्रकृते त्विदं वक्तव्यं वर्तते यद् एतत्प्रमाणवाक्यदर्शनेनोपक्रमोपसंहारयो-रेकार्थकत्वेनैवैक्यादेकार्थत्वं निश्चितम्। तथा च—"शक्तिविशिष्टाद्वैत(वीरशैव)-सम्मततत्त्वत्रयविमर्शः" इति नामकेऽस्मिन् शोधप्रबन्धे उपक्रमेऽस्माभिर्यन्नि-रूपितं तदेवोपसंहारेऽपि वक्तव्यम्। युक्तं चैतत्। यतो हि द्वयोरपि तात्पर्य-ग्रहणोपाययोरेकार्थकत्वं वर्तते। किन्त्वत्र महती बाधेयं भवति यदुपक्रमे प्रति-पादितमेवात्रापि निगद्यते चेत्, तर्हि पुनरुक्तिदोष आपतति; अन्यदुच्यते चेत्तर्हि भिन्नार्थनिरूपणेन विरुद्धार्थापत्तिरित्युभयतःपाशा रज्जुः। तर्हि कं पन्थान-माश्रित्योपसंहरणीयम्, येन तद्दोषापत्तेरवसरोऽपि न भवेदिति विचारे समाधान-मिदं स्फुरति यद् यथा पञ्चावयवात्मकस्य न्यायप्रयोगस्य प्रतिज्ञावाक्यार्थ-मात्रावगाहित्वेऽपि निगमनस्य न वैय्यर्थ्यम्, किन्तु शङ्कान्तरनिराकरणमुखेन पोषकत्वमेव, तथैव प्रकृतेऽप्युपक्रमोपलब्धार्थावगाहित्वेऽप्युपसंहारस्य न दोषः।

किञ्च, यदा परमात्मस्वरूपोपलब्धये श्रुतिर्नववारमुपदिशति "तत्त्वमसि श्वेतकेतो"[2] इत्यादिवाक्यैः, तदा उपक्रमोपसंहारयोरेकार्थकत्वे कथं पुनरुक्तिः?

---

१. अ., सि. ल., पृ. ४२५

२. छा, उ. ६।८।७

कथं वा सिद्धसाधनम्? तथा चोपक्रमेणोक्तस्योपसंहारे संक्षेपेण निरूपणं भवतीति किञ्चिदत्र प्रस्तूयते।

इह खलु भारते देशे सन्ति भूयांसि दर्शनानि। तेषां च दर्शनानां वैदिकम्, तान्त्रिकम्, वैदिकतान्त्रिकम्, तान्त्रिकवैदिकं चेति चतुर्धा विभागः क्रियते। तत्र वेदोक्तकर्ममात्रानुष्ठानपरं यत् तद्वैदिकम्। केवलागमोक्तकर्मानुष्ठानघटितं यत् तत्तान्त्रिकम्। यत्र पुनर्वेदोक्तानां कर्मणां प्राधान्यमागमोक्तानामप्राधान्यं तद् वैदिकतान्त्रिकम्। यत्र त्वागमोक्तकर्माण्यनुष्ठाय तदविरुद्धानां वैदिककर्मणामनुष्ठानं तत् तान्त्रिकवैदिकं चेति विज्ञेयम्।

अत्रोक्तेषु यदन्तिमं तान्त्रिकवैदिकं तदेव शक्तिविशिष्टाद्वैतापरपर्यायं वीरशैवदर्शनम्। वीरशैवदर्शनस्य मूलं स्रोतस्तु[1] सिद्धान्ताख्यशैवागमानामुत्तरभाग[2] एव। एते च सिद्धान्तागमा वेदबाह्यविरोधिन एव, न तु वेदधर्मविरोधिनः। तस्माद् वेदानां सिद्धान्तागमानां चैकार्थप्रतिपादनपरत्वात् तयोरैक्यमिति वीरशैवाचार्याणामभिप्रायः। तदुक्तम्—

वेदधर्माभिधायित्वात् सिद्धान्ताख्यः शिवागमः।
वेदबाह्यविरोधित्वाद् वेदसम्मत उच्यते॥

वेदसिद्धान्तयोरैक्यम् एकार्थप्रतिपादनात्।
प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोः सदा॥[3] इति।

तस्माद्वीरशैवदर्शनं वेदागमोभयसम्मतमिति निश्चप्रचम्। अत एवास्य वेदान्तशाखासु शक्तिविशिष्टाद्वैतवेदान्त इति, शैवागमशाखासु वीरशैवमिति च परिगणना दृश्यते।

"शैवमतमैतिहासिकदृष्ट्या दार्शनिकदृष्ट्या चातीव महत्त्वपूर्णम्। प्राचीनतमादष्टसहस्रवर्षपूर्वं प्रचलिताद् जरथुष्ट्रमतादपीदं प्राचीनतरम्"[4] इति डॉ. कान्तिचन्द्रपाण्डेयमहोदया निरूपयन्ति। शैवाः शैवागमानां प्रामाण्यं

---

१. "सिद्धान्तशब्दः पङ्कजादिशब्दवद्योगरूढ्या शिवप्रणीतेषु कामिकादिषु दशाष्टादशतन्त्रेषु प्रसिद्धः" (र. त्र., श्लो. १० टीका)।

२. सिद्धान्ताख्ये महातन्त्रे कामिकाद्ये शिवोदिते।
निर्दिष्टमुत्तरे भागे वीरशैवमतं परम्॥ (सि. शि. ५।१४)

३. सि. शि ५।१२-१३

४. शै. द. बि. प्रा., पृ. क।

तेषामनादित्वं तथैव स्वीकुर्वन्ति, यथा वेदानुयायिनो वेदानाम्। अद्यतनसमये साहित्यस्य लुप्तत्वाद् बहूनि शैवमतानि नाममात्रावशेषाणि सन्ति। शैवमतेषु द्वैत-द्वैताद्वैत-अद्वैतभेदेन त्रिधा विभागः क्रियते। तत्र पाशुपत-सिद्धान्तशैवदर्शने द्वैतपरे, लकुलीशपाशुपत-श्रीकण्ठविशिष्टाद्वैत-वीरशैव-रसेश्वरदर्शनानि द्वैताद्वैतपराणि, नन्दिकेश्वरदर्शन-प्रत्यभिज्ञा-क्रम-कुलदर्शनानि चाद्वैतपराणीति[१]।

इदं द्वैताद्वैतयोः समन्वयात्मकं दर्शनम्। "विरोधरहितं शैवं वीरशैवं विदुर्बुधाः"[२] इत्युक्त्या विरोधरहितानां वीरशैवानां सर्वलोकानुरागित्वमभिव्यज्यते। एतद्दर्शनग्रन्थोक्तस्य 'वीरशैव'शब्दस्य व्युत्पत्तेः पर्यालोचनया ज्ञायते यद् दीक्षायां श्रीगुरुणा प्रदत्तमिष्टलिङ्गं स्ववक्षःस्थले सदा सावधानं धारयन् प्रसङ्गे सति परशिवार्थं स्वप्राणत्यागरूपं वीरव्रतं च परिपालयन् यः शिवजीवैक्यबोधिकायां विद्यायां रमते स वीर इति, तादृशवीरविशेषणविशिष्टः शैव एव वीरशैव[३] इति च।

वीरशैवदर्शनस्य विशेषाद्वैत-शिवाद्वैत-शक्तिविशिष्टाद्वैतादीनि सन्ति बहूनि पर्यायनामानि[४]। एतेषां नाम्नामाचार्योक्तानां व्युत्पत्तीनामवलोकनेन संसारावस्थायां वस्तुतो भिन्नयोः शिवजीवयोर्मुक्तावस्थायां वास्तविकाभेदप्रतिपादनपरमिदं दर्शनमिति विज्ञायते। एतेषु पर्यायनामसु 'शक्तिविशिष्टाद्वैतम्' इति नामैव व्यवहारेऽधिकं प्रचलदस्ति।

दार्शनिकतत्त्वविमर्शः

वीरशैवदर्शने 'स्थलम्', 'लिङ्गम्' इत्यादिशब्दैर्व्यवह्रियमाणं परशिवब्रह्माख्यमेकमेव मुख्यं तत्त्वम्। इदं च सच्चिदानन्दरूपविमर्शशक्तिविशिष्टं भवति। सृष्टिलीलाव्यवहारसमये तन्निष्ठा विमर्शशक्तिर्त्रिभागपरामर्शदशामापन्ना सती गुणत्रयात्मिका 'माया' इत्याख्यायते। तदा शुद्धसत्त्वगुणोपाधिना ईश्वर इति, मिश्रोपाधिना जीवः (पशुः) इति, तामसोपाधिना च जगदिति तदेव परमतत्त्वं परिणमते। अत्रेश्वरः प्रेरयितेति, जीवो भोक्तेति, जगच्च

१. शै. द. बि. प्रा, पृ. ख।

२. क्रि. सा., भा. १, पृ. ११

३. सि. शि. ५।२५-२७.; च. ज्ञा., क्रि. १०।३३-३४; वा. शु त. १०।२७-२९

४. सि. शि. स., पृ. १६-१७

भोज्यमिति कथ्यते[1]। इमान्येव तत्त्वत्रयाणि पदार्थशब्देनाप्युच्यन्ते। अत्रोक्तोऽयं परिणामोऽविकृतपरिणामवादः। एतदर्थमत्र पटनिर्मित[2]कुटीदृष्टान्त उपपाद्यते। यथा पटो विलक्षणप्रसारणेन कुटीभावमापद्यते, तत्सङ्कोचेन च पटरूपेणावतिष्ठते, न चाभ्यां सङ्कोच-विकासाभ्यां पटस्य स्वरूपे विक्रिया जायते, तथा शिवोऽपि स्वात्मशक्तिविकासेन विश्वात्मना तिष्ठन् न विक्रियते। एवं परशिवतत्त्वमेवेश्वर-जीव-जगद्रूपेण परिणतमिति तेषां त्रयाणामपि[3] सत्यत्वमेवाभ्युपगम्यते। एतत्सृष्टिलीलायां शक्तिविशिष्टस्य शिवस्याभिन्ननिमित्तोपादानकरणत्वमङ्गीक्रियते। एतज्जगज्जन्मादिकारणत्वं शिवस्य तटस्थलक्षणम्। तस्य स्वरूपलक्षणं तु सच्चिदानन्दरूपत्वमिति बोध्यम्। विमर्शशक्तिविशिष्टः सच्चिदानन्दरूपः परशिवो विश्वोत्तीर्णः, मायाशक्तिविशिष्टो महेश्वरो विश्वमय इत्यभ्युपगम्यते वीरशैवैः।

अद्वैतवादिनः काश्मीरशैवा अपि परशिव एक एव परमं तत्त्वमित्यभ्युपगच्छन्ति। शिवोऽपि विमर्शशक्तिविशिष्टः। शिवः प्रकाशरूपः, शक्तिस्तद्विमर्शरूपिणीति तयोरद्वैतमेभिरुररीक्रियते। "शिवः परमकारणम्"[4] इत्यभिनवगुप्तोक्त्यनुसारं सिद्धान्तेऽस्मिन् जगदुत्पत्तौ शिवो योगिन इव स्वेच्छातिरिक्तं किञ्चिदपि नापेक्षते। सागरतरङ्गन्यायेन विश्वोत्तीर्णः परशिव एव स्वस्वातन्त्र्यबलेन विश्वरूपेणावभासत[5] इत्याभासवादेन सृष्टिर्व्यवस्थाप्यतेऽत्र। "शक्तयोऽस्य जगत्कृत्स्नं

---

१. भोक्ता भोज्यं प्रेरयिता वस्तुत्रयमिदं स्मृतम्।
अत्र प्रेरयिता शम्भुः शुद्धोपाधिर्महेश्वरः॥
सम्मिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः।
भोज्यमव्यक्तमित्युक्तं शुद्धतामसरूपकम्॥ (सि. शि. ५।३७-३८)

२. सि. शि. १०।६५

३. ब्र. सू. श्री. २।३।४०

४. तन्त्रा. १।८८

५. प्रत्यभिज्ञाहृदयाष्टमसूत्रव्याख्यायां क्षेमराजो वक्ति—"विश्वोत्तीर्णमात्मतत्त्वमिति तान्त्रिकाः, विश्वमयमिति कुलाद्याम्नायनिविष्टाः, विश्वोत्तीर्णं विश्वमयं चेति त्रिकादिदर्शनविदः" इति। अत्र त्रिकादीत्यादिपदेन त्रैपुरवीरशैवदर्शनयोरपि ग्रहणं कर्तव्यम्। योगिनीहृदये च —
अतीतं तु परं तेजः स्वसंविदुदयात्मकम्।
स्वेच्छाविश्वमयोल्लेखखचितं विश्वरूपकम्॥ (१।४९-५०)

शक्तिमांस्तु महेश्वरः" इत्युक्त्यनुसारमत्रापि वीरशैवदर्शनवत् शक्तिविकासेनैव सृष्टिरिति प्रतिपाद्यते। किन्त्वयमत्र विशेषो यत् क्रीडाव्यापारो बालानां यथा स्वभावस्तथा पञ्चकृत्यमपि शिवस्य स्वभावः। स सदा कृत्यपञ्चकैः क्रीडन्नेव तिष्ठति। तस्मात् काश्मीरशैवसिद्धान्तानुसारं जगज्जन्मादिकारणत्वं शिवस्य स्वरूपलक्षणमिति वक्तुं शक्यते। वीरशैवैरिदं तटस्थलक्षणमुच्यते। सृष्टिः शक्तेविलासः, शिवशक्त्योरभिन्नत्वात् शक्तिविशिष्टः शिवोऽत्राभिन्ननिमित्तोपादानकारणम्, प्रपञ्चचित्रस्य शिव एवाधारभित्तिरूप[1] इत्येतद्विषये वीरशैवकाश्मीरशैवयोर्मतैक्यं विद्यते।

भेदवादिनि सिद्धान्तशैवदर्शने पति-पशु-पाशाख्यानि तत्त्वत्रयाण्यभ्युपगतानि। अत्रापि शिवश्चिच्छक्तिविशिष्टः। तयोः सम्बन्धो भेदाभेदात्मकः। सत्कार्यवादिभिरेभिः शिवस्याभिन्ननिमित्तोपादानकारणत्वं नाङ्गीक्रियते। एतत्सिद्धान्तानुसारं शुद्धाशुद्धभेदेन सृष्टिर्द्विविधा। शुद्धसृष्टौ शिवो निमित्तकारणं बिन्दुरुपादानकारणम्। बिन्दोश्चात्र माहामायेत्यपरं नाम। अशुद्धसृष्टौ बैन्दवशरीरिणो विद्येशानन्तादयो निमित्तकारणम्, माया चोपादानकारणम्, सृज्यप्राणिनां कर्म तु सहकारिकारणम्। अयस्कान्तशक्त्याऽयसि क्रियोत्पत्तिवत् चिच्छक्तिविशिष्टस्य शिवस्य सान्निध्येन बिन्दौ क्रियावेशो भवतीत्यघोरशिवाचार्यो निरूपयति[2]। चिच्छक्तिविशिष्टः शिवोऽत्र निर्गुणः, मायाशक्तिविशिष्टश्च सगुणः। सद्योजातादिपञ्चशक्तिविशिष्टः पञ्चमन्त्रतनुः शिवोऽत्र सिद्धान्ते उपास्य इत्यङ्गीक्रियते। अत्रापि चिच्छक्तिविशिष्टः शिवो विश्वोत्तीर्णोऽनादिमुक्तश्च, महामायाविशिष्टो मायाविशिष्टश्च विश्वमयः।

निष्कले परमे सूक्ष्मे निर्लक्ष्ये भाववर्जिते।
व्योमातीते परे तत्त्वे प्रकाशानन्दविग्रहे।
विश्वोत्तीर्णे विश्वमये तत्त्वे स्वात्मनि योजनम्॥ (२१७३-७४)
इत्येवं विश्वोत्तीर्णं विश्वमयं च तत्त्वं प्रतिपाद्यते।

१. त्रैलोक्यसम्पदालेख्यसमुल्लेखनभित्तये।
सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः॥ (सि. शि. १।१)
निरुपादानसम्भारमभित्तावेव तन्वते।
जगच्चित्रं नमस्तस्मै कलानाथाय शूलिने॥ (स. द. सं., पृ. १९६-१९७)

२. "ततश्चायस्कान्तशक्तेरिवायसि शिवशक्तेः सन्निधिमात्रेण बिन्दावेव क्रियाविशेषः" (र. त्र. टी., श्लो. २२)।

वीरशैवाः प्रपञ्चोत्पत्तौ घृतकाठिन्यन्यायम्, सिद्धान्तशैवाश्च घृतकीटन्यायमुपस्थापयन्ति। घृतकाठिन्यं नामापरिमितस्य द्रवीभूतस्य घृतस्यैकदेशे घनीभावरूपावस्थान्तरप्राप्तिः। घृतकीटन्यायो नामापरिमितस्य घृतस्यैकदेशे कीटं परितः संजातो विजातीयपरिणामः। तदेतेन वीरशैवसिद्धान्ते सृष्टिर्नाम शक्तिविशिष्टस्य शिवस्य विकारमन्तरैकदेशावस्थान्तरप्राप्तिरिति, सिद्धान्तशैवदर्शने च महामायायाः, मायाया वैकदेशे विजातीयपरिणाम इति विज्ञायते। एतेन सृष्टिप्रक्रियाविषय उभयोर्वैलक्षण्यं सुस्पष्टमेव।

वीरशैवदर्शने सिद्धान्तशैवदर्शने च सृष्टिः शिवस्य लीलारूपा। तद्वैचित्र्ये सृज्यप्राणिनां कर्माणि सहकारिकारणानीति न शिवो वैषम्यनैर्घृण्यदोषभाग् भवति। सृष्टिरचनायां शिवस्य स्वकीयप्रयोजनाभावेऽपि भूतानुग्रह एवात्र प्रयोजनम्। अनुग्रहशब्देनात्र भोग-मोक्षावभिप्रेतौ। अत्र संसारनिवृत्त्यात्मकापवर्गप्रदानमेव मुख्योऽनुग्रहो न भोगप्रदानम्, तथापि जात्यायुर्भोगानां कारणीभूतानामनादिकर्मणां फलभोगं विना नाशासम्भवात्, तन्नाशं विना निःश्रेयसानुपपत्तेस्तदर्थमेव भोगप्रदानम्। तस्मादनादिमलरहितः, अत एव रागद्वेषविवर्जितः शिव आत्मनां योग्यतानुसारं पक्वमलानां मोक्षयोग्यानां मोक्षं करोति, अपक्वमलानां बन्धनयोग्यानां तत्पाकार्थं बन्धं करोतीत्यविरोधः। एवं भोगमोक्षावुभावपि शिवस्यानुग्रहावेव। एतद्विषये वीरशैव-सिद्धान्तशैवयोर्मतैक्यमिति वेद्यम्। बन्धमोक्षादिवैषम्यव्यवहारे प्राणिनां कर्मसापेक्षत्वे शिवस्य स्वातन्त्र्यहानिरिति काश्मीरशैवसिद्धान्ते तत्स्वातन्त्र्यवादेनैव सर्वं समाधीयते। न च कर्मापेक्षायामीश्वरस्य ऐश्वर्यव्याघातः। नहि सेवादिकर्मभेदापेक्षः फलप्रदः प्रभुरप्रभुर्भवतीति वीरशैवसिद्धान्तशैवानामाशयः।

शिवशक्त्योर्लीलारूपमिदं जगत् शिवादिभूम्यन्तं षट्त्रिंशत्तत्त्वात्मकमिति त्रिविधेष्वपि दर्शनेष्वभ्युपगम्यते। अत्र तत्त्वसंख्याविषये, तेषां शुद्ध-शुद्धाशुद्ध-अशुद्धभेदेन भागत्रयविषये, शिवादिशुद्धविद्यापर्यन्तं शुद्धतत्त्वानि पञ्च, मायादिपुरुषान्तानि सप्त तत्त्वानि शुद्धाशुद्धानि, प्रकृत्यादिपृथ्वीतत्त्वपर्यन्तान्यशुद्धतत्त्वानि चेत्यादिविषये त्रिविधदार्शनिकानां मतैक्यं विद्यते, किन्तु शुद्धाशुद्धाख्यसप्ततत्त्वानां क्रमविषये काश्मीरशैववीरशैवयोरेकरूपत्वेऽपि सिद्धान्तशैवदर्शनीयः क्रमो भिन्नः। तत्र माया, कालः, कला, विद्या, नियतिः, रागश्चेत्ययं क्रमः सिद्धान्तशैवानामभिमतः। वीरशैवास्तु माया, कला, विद्या, रागः, कालः, नियतिश्चेति क्रममुपस्थापयन्ति। अयमेव क्रमस्त्रिकक्रमदर्शने[1]-

१. म. म. प., पृ. ४८

योरप्यभिमतः। अत्र शुद्धाशुद्धतत्त्वक्रमे बहूनि मतमतान्तराणि सन्ति, तानि च तन्त्रालोके नवमाह्निके द्रष्टव्यानि।

आगमानुयायिषु त्रिष्वपि दर्शनेषु जीवः पाशबद्धत्वात् 'पशुरित्युच्यते। वीरशैवदर्शने काश्मीरशैवदर्शने चाणव-मायीय-कार्मभेदेन पाशानां त्रैविध्यम्, सिद्धान्तशैवदर्शने—मलः, तिरोधानशक्तिः, महामाया, माया, कर्म चेति पाशानां पञ्चविधत्वं प्रतिपाद्यते। अत्र तिरोधानशक्तिर्गौण्या वृत्त्या पाशेषु गण्यते, तस्याः परमेश्वरशक्तित्वात्। परमेश्वरः स्वकीयया निरोधशक्त्या प्राणिनो नियम्य स्वभोग्यभोगान् प्रति नयति। तस्मान्निरोधशक्तिर्न मुख्यः पाशः, किन्त्वौपचारिकः। एवमेव—"महामाया शुद्धसृष्टेरुपादानभूता। तस्या बिन्दुरित्यपरं नामधेयम्। मायाकर्मोभयपाशविमुक्ता ध्वस्यमानाद्यवस्थावशिष्टाणवमलाः क्रमशोऽनुभूतविद्या-ईश्वर-सदाशिवतत्त्वाः पशवो मायीयलोकोर्ध्वोर्ध्ववर्तिषु त्रिषु लोकेषु क्रमशो निवसन्ति। ते च क्रमशो मन्त्र-मन्त्रेश-मन्त्रमहेशशब्दैरभिधीयन्ते। एषां शरीराद्युपादानकारणं बिन्दुः। एवं चैतादृशप्रकरणेषु बिन्दुरुपादानस्वरूपत्वेन व्याख्यायते, परन्तु यतो हि यावद्बिन्दुकारणकाच्छरीरान्मुक्तिर्न भवति, न तावत् परमोक्षः, अतो बिन्दुर्मलत्वेनाप्युच्यते"[2] इति श्रीकान्तिचन्द्रपाण्डेयमहोदया अभिप्रयन्ति। तस्मात् सिद्धान्तशैवदर्शनेऽपि मुख्यरूपेणाणव-मायीय-कार्माख्यस्त्रिविध एव पाश इति विज्ञेयम्।

अत्राणुत्वापादक आणवमलः, ममत्वादिमोहकारको मायीयमलः, शुभाशुभवासनारूपश्च कार्ममलः। आणवमलावरणेन जीवः स्वस्वरूपं विस्मरति। अत एव वीरशैवसिद्धान्तेऽस्याविद्येति नाम। इयमनादिरूपा। अस्या आवरणेन जीवः परशिवस्यांश[3] इत्युच्यते। आणवमलेन प्राप्तमिदमणुत्वं वास्तविकमिति मत्वा वीरशैवाचार्या जीवात्मानोऽणुपरिमाणा इत्यभ्युपगच्छन्ति।

काश्मीरशैवसिद्धान्ते—"अख्यातिरूपमाणवं मलम्"[4] इत्याणवमलस्य लक्षणमभिधीयते। अर्थात् आत्मानात्मनोरन्यथाभिमानस्वभावमपूर्णं ज्ञान-

---

१. "संमिश्रोपाधयः सर्वे भोक्तारः पशवः स्मृताः" (सि. शि. ५।३८)।
"चिदचिद्रूपताभासी पुद्गलः क्षेत्रवित् पशुः" (तन्त्रा. ९।१४४)।
"ते पाशबद्धाः पशवः" (त. प्र. ता., श्लो. ५, पृ. १७)।

२. शै. द. बि., पृ. २१

३. "अनाद्यविद्यासम्बन्धात्तदंशो जीवनामकः" (सि. शि. ५।३३)।

४. प. सा. वि., पृ. ४५

मेवाणवमलमिति विज्ञेयम्। अस्यावरणेनास्य ज्ञानशक्तिः सङ्कुचिता भवति, स्वात्मानमपूर्णं मन्यते च जीवः। सिद्धान्तशैवदार्शनिकैः—"मलमज्ञानमिच्छन्ति संसाराङ्कुरकारणम्"[1] इति स्वरूपाज्ञानमेवाणवमलमित्युच्यते। जीवात्मन आणवमलावृतत्वमभ्युपगच्छन्तोऽपि काश्मीरशैवाः सिद्धान्तशैवाश्च तस्याणुभावमङ्गीकुर्वन्ति, न त्वणुरूपत्वम्। तेषां मते त्वात्मा विभुपरिमाण एव। जनन-मरण-गमनागमन-बन्ध-मोक्षादीनां व्यवस्थार्थं विभुपरिमाणानामनेकात्मनां स्वीकारापेक्षयाऽणुरूपाऽनेकात्मवाद एव वरीयान् प्रतिभाति।

एवमाणवमलावरणेनाणुत्वमापन्नः, अणुभावमापन्नो वा जीवो मायीयमलावरणेन देहाद्यनात्मपदार्थेष्वहमिति, सती-पुत्र-गृहादिषु ममेत्यभिमन्यमानः शुभाशुभवासनाख्यकार्ममलप्रेरितः सन् धर्माधर्ममनुतिष्ठन् संसारचक्रे नानायोनिषु परिभ्रमति।

मलानां द्रव्यरूपत्वात् तेषां निवृत्तिर्न ज्ञानोपदेशमात्रेण भवतीत्यागमिकदार्शनिकैः सर्वैरपि तदर्थं दीक्षाविधिरङ्गीकृतः। पाशनाशकः शिवज्ञानप्रदायकश्च संस्कारविशेष एव दीक्षा[2]। शिवानुग्रहरूपशक्तिपातचिह्नानि परीक्ष्य सद्गुरुस्तत्संस्कारं विधत्ते[3]। यथा चक्षुःपटलगतदोषनिवृत्तिर्वैद्यव्यापारमपेक्षते, वैद्यव्यापारश्च चक्षुःपटलगतदोषपरिपाकमपेक्षते, तथा वैद्यरूपो गुरुर्दीक्षार्थं शिवानुग्रहरूपं शक्तिपातमपेक्षते, शक्तिपातश्च मलपरिपाकमपेक्षते। तदुक्तं पूज्यपादैः श्रीरेणुकाचार्यैः—

स्वकर्मपरिपाकेन प्रक्षीणमलवासनः।
शिवप्रसादाज्जीवोऽयं जायते शुद्धमानसः॥

शुद्धान्तःकरणे जीवे शुद्धकर्मविपाकतः।
जायते शिवकारुण्यात् प्रस्फुटा भक्तिरैश्वरी॥[4] इति।

---

१. मा. वि. १।२३

२. दीयते च शिवज्ञानं क्षीयते पाशबन्धनम्।
यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः॥ (सि. शि. ५।११)

३. (क) परिपक्वमला ये तानुत्सादनहेतुशक्तिपातेन।
योजयति परे तत्त्वे स दीक्षयाऽऽचार्यमूर्तिस्थः॥ (त. प्र., श्लो. १५)
(ख) शक्तिपातं समालोक्य दीक्षया योजयेदमुम् (सि. शि. ६।१०)।

४. सि. शि. ५।४८-४९

एवं जीवोऽनेकजन्मार्जितसुकृतजन्यस्वकर्मपरिपाकवशेन विनष्टमलवासनो नित्याऽनुष्ठितशिवार्चनशिवाचारादिजनितशिवप्रसादप्रभावेण शुद्धान्तःकरणो यदा जायते, तदाऽस्य जीवस्य किञ्चिज्ज्ञत्व-किञ्चित्कर्तृत्वादिशक्तयो भक्तिरूपेण परिणमन्ते। तदाऽयं जीवः पिण्ड[1] इत्युच्यते। एतादृशशुद्धान्तःकरणस्यैव साधकस्यात्मानात्मविवेकः संजायते। तद्विवेकबलेनैव संसारे हेयबुद्धिर्जायते। एवं संसार उत्पन्नहेयबुद्धेः, शिवे समुत्पन्नभक्तेः साधकस्य—

> आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रियाः ।
> यथा स्यात् कम्परोमाञ्चस्वरनेत्राङ्गविक्रियाः ॥[2]

इत्युक्तानि शक्तिपातचिह्नानि परीक्ष्य तदनुरूपां दीक्षां विधत्ते गुरुः। काश्मीरशैवसिद्धान्ते सिद्धान्तशैवदर्शने च पाशनिवृत्त्यर्थं दीक्षासंस्कारोऽङ्गीकृतः। तत्र जीवात्मनो मलपरिपाकमनपेक्ष्यैव शिवोऽनुगृह्णातीति काश्मीरशैवाः शिवस्वातन्त्र्यवादमनुलक्ष्य निरूपयन्ति। सिद्धान्तशैवास्तु शैवागमोपदिष्टक्रियाचर्यायोगानुष्ठानसाध्यमलपरिपाकसापेक्षः शिवानुग्रहरूपः शक्तिपात इति प्रतिपादयन्ति। एतद्विषये वीरशैव-सिद्धान्तशैवयोर्मतैक्यमिति बोध्यम्।

वीरशैवाचार्या जीवात्मनः कारणशरीर आणवमलः, सूक्ष्मशरीरे मायीयमलः, स्थूलशरीरे च कार्ममलो निवसतीत्यङ्गीकृत्य तन्निवारणार्थं त्रिविधां दीक्षामत्र विहितवन्तः। तदुक्तं मायिदेवेन—

> तनुत्रयगतानादिमलत्रयमसौ गुरुः ॥
> दीक्षात्रयेण निर्दग्ध्वा लिङ्गत्रयमुपादिशत्।
> यथा पुरत्रयं दग्धं युगपत् पुरवैरिणा ॥
> तथा मलत्रयं दग्धं युगपद् देशिकात्मना।
> वेध-मनु-क्रियाकारा दीक्षा शैवी त्रिधा मता ॥[3] इति।

अत्र श्रीगुरुर्वेधदीक्षाविधानेन कारणशरीरे भावलिङ्गम्, मान्त्रीदीक्षाबलेन च सूक्ष्मशरीरे प्राणलिङ्गस्वरूपमुपदिश्य, क्रियादीक्षया च स्थूलशरीरे

१. बहुजन्मकृतैः पुण्यैः प्रक्षीणे पापपञ्जरे।
शुद्धान्तःकरणो देही पिण्डशब्देन गीयते ॥ (सि. शि. ५।३०)

२. क्रि. सा, भा. २, पृ. १९५

३. अ. सू. ५।५२-५४

सुसंस्कृतमिष्टलिङ्गमनुगृह्णातीतीदं दीक्षाविधानमन्यशैवदर्शनाभिमतदीक्षाविधानेन पूर्णतया भिन्नमिति विज्ञेयम्।

किञ्च, एतादृशदीक्षायां यावानधिकारः पुरुषस्य, तावानेव स्त्रीणामपीतीदमत्र वैशिष्ट्यम्। स्वेष्टलिङ्गपूजाया यावज्जीवं कर्तव्यत्वनियमाद् ऋतुकाले सूतकप्राप्तौ स्त्रीणामिष्टलिङ्गपूजाया लोपो मा भूदिति यथाऽकरस्पर्शयोग्याऽपि जिह्वा मन्त्रोच्चारणे सदा सुनिर्मला, तथा ऋतुमत्यपि नारी यद्यपि स्पर्शायोग्या, तथापि स्वेष्टलिङ्गपूजामात्रार्थं सुनिर्मला भवतीति स्वेष्टलिङ्गैकपूजायामशौचं निषिध्य ऋतुमत्या अपि लिङ्गपूजाधिकारं प्रदाय वीरशैवाचार्या धार्मिकजीवने स्त्रीपुरुषयोर्भेदं निराकृत्य साम्यवादं प्रतिष्ठापयामासुः। एवमेव—

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव वा।
अन्त्यजो वा शिवे भक्तः शिववन्मान्य एव सः॥

शिवभक्तिसमावेशे क्व जातिपरिकल्पना।
इन्धनेष्वग्निदग्धेषु को वा भेदः प्रकीर्त्यते॥[1]

इत्याचार्योक्त्यनुसारमत्र दीक्षासम्पन्नेषु शिवभक्तेषु वर्णाश्रमवैषम्यं परित्यज्य सर्वैः सह समताव्यवहारः क्रियते।

इदानीन्तनसर्वकारेण स्त्रीपुरुषभेदस्य, जातिभेदस्य च निर्मूलनाय प्रयासः क्रियते। प्रयासोऽयं बहुकालात् पूर्वमेव वीरशैवाचार्यैर्दीक्षामाध्यमेन साधितः, तत्र साफल्यं च प्राप्तमिति प्रमोदविषयः। तस्माद् विनैव वर्णाश्रमभेदं सर्वेऽपि मानवाः सच्चारित्र्येण हृदयशुद्धया च स्वेष्टलिङ्गार्चनाधिकृताः सन्त इह जन्मन्येव शिवसायुज्यं वीरशैवधर्मानुयायिनो भूत्वा साधयितुं प्रभवन्ति। दीक्षात्रयाणां विस्तृतं विवरणं तृतीयपरिच्छेदेऽवलोकनीयम्।

अत्र दीक्षासंस्कारहीनो जीवो बद्ध इति, दीक्षया सुसंस्कृतः शुद्ध इति, भ्रमरकीटन्यायेन सदाऽनुष्ठीयमानशिवयोगमहिम्ना परशिवे विलीनवृत्तिस्तु मुक्त इति च जीवस्यावस्थाभेदेन तत्त्रैविध्यमुच्यते वीरशैवाचार्यैः[2]। सिद्धान्तशैवदर्शनेऽपि केवल-सकल-अमलभेदेन पशोरवस्थात्रैविध्यमङ्गीक्रियते। अत्र वीरशैवोक्तो मुक्तजीवः, सिद्धान्तशैवोक्तोऽमलपशुश्चोभावपि मुक्तावेव, अथापि मुक्तिस्वरूपविषये वैलक्षण्यं वर्तते। शिवेन सह सामरस्यात्मिका मुक्तिर्वीरशैवैः

---

१. सि. शि. ११।१०-११, पृ. २०९

२. ब्र. सू. श्री. २।३।४६

प्रतिपाद्यते, सिद्धान्तशैवैस्तु द्वैतदर्शनमनुसरद्भिः शिवसाम्यरूपा मुक्तिरुच्यते, न तु सामरस्यात्मिका।

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्॥

ज्ञाने सिद्धेऽपि विदुषां कर्मापि विनियुज्यते।
फलाभिसन्धिरहितं तस्मात्कर्म न सन्त्यजेत्॥'[1]

इत्याचार्योक्त्यनुसारमत्र सिद्धान्ते मोक्षसाधनत्वेन ज्ञानकर्मणोः समसमुच्चयवादोऽभ्युपगतः। अत्रोच्यमानं कर्म स्वेष्टलिङ्गपूजारूपं नित्यं कर्माभिप्रेतम्। तच्चात्र पतिकर्मेत्युच्यते। फलापेक्षया क्रियमाणानि यज्ञयागादीनि जीवात्मनो मुक्तौ सहायकानि न भवन्तीति वीरशैवाचार्यैस्तेषां पशुकर्मसंज्ञां दत्त्वा तैः सह ज्ञानस्य समुच्चये विरोधे सत्यपि मोक्षसहायकानां स्वेष्टलिङ्गपूजादिरूपाणां वीरशैवीयनित्यकर्मणां पतिकर्मत्वमभिधाय तेषां ज्ञानेन समुच्चयः समर्थितः। ज्ञानेन सह नित्यकर्मणः समुच्चयवादं प्रतिपादयतां वीरशैवाचार्याणामयमाशयो यद् ज्ञानिभिः स्वैराचारिभिर्न भाव्यम्, लोकसंग्रहश्च सम्यक् करणीय इति।

ज्ञानकर्मसमुच्चयवादिभिर्वीरशैवाचार्यैर्मोक्षप्राप्तये प्रवृत्तस्य साधकस्य सांसारिकविघ्नबाधानिवारणार्थमष्टविधान्यावरणानि, पञ्चविधा आचाराश्च निरूपिताः। एभिरावरणैराचारैश्च युक्तः साधकः षट्स्थलमार्गेण शिवसायुज्यं प्राप्नोति। अष्टावरण-पञ्चाचार-षट्स्थलाख्यानि तत्त्वत्रयाण्यन्यशैवदर्शनेष्वनभ्युपगतानि वीरशैवीयान्यनन्यसाधारणतत्त्वानीति तेषां स्वरूपविमर्शो विस्तरेण विहितोऽस्ति प्रबन्धे।

कस्यापि प्राणिनः पूर्णता अङ्ग-प्राण-आत्माश्रितैव। अत्र वीरशैवाचार्या अष्टावरणान्यङ्गत्वेन, पञ्चाचारान् प्राणत्वेन, षट्स्थलानि चात्मत्वेन परिकल्प्य साधकस्याध्यात्मिकीमुन्नतिं तदाधारां कल्पयन्ति। कस्यापि प्राणिनः स्वकीयेऽङ्गे, प्राणे, आत्मनि च प्रेमातिशयो वर्तते। "न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति, आत्मनस्तु कामाय सर्वं प्रियं भवति"[2] इति किल समुपदिशति याज्ञवल्क्यो मैत्रेयीम्। एवं च यदि कोऽपि साधकः स्वाङ्गप्राणात्मकल्पानष्टावरणादीन्

---

१. सि. शि. १६।११-१२

२. बृ. उ. २।४।५

शास्त्रोक्तपद्धत्या प्रत्यहं समुपास्ते, सत्यं तस्याध्यात्मिकी समुन्नतिर्निराबाधा। को नु नाम स्वाङ्गादिकल्पेष्वेषु सुदृढमनुरागं नादधीतेति सरलतमोऽयं मार्ग आध्यात्मिकपथपथिकानां मुमुक्षूणां कृते समुपदिष्ट इति तस्य प्रकरणस्य अष्टावरण–पञ्चाचार-षट्स्थलप्रतिपादकस्य निष्कृष्टोऽर्थोऽत्र संक्षेपेण क्रमशः समुपस्थाप्यते।

आवरणशब्दो ह्यत्र रक्षाकवचार्थकः। साधकः स्वेष्टदेवतासमाराधनात् पूर्वं यथा कवचपाठेन स्वात्मानं परितः संरक्षति, तथैव वीरशैवसाधको न केवलं पाठमात्रेणापि तु बाह्यानामान्तराणां चावरणानां कण्टकावरणं विधाय स्वीयं स्थूलं सूक्ष्मं च शरीरं संरक्षति। युद्धभूमौ योद्धा शत्रूणां शस्त्रास्त्रप्रहरणैः स्वशरीरपरिरक्षणाय यथा कवचेन शरीरमावृणोति, तथैभिरष्टभिरावरणैः शिवभक्तः कामक्रोधादिभिररिषड्वर्गैराधिव्याध्यादिभिः स्वात्मानं परिरक्षतीतीमान्यष्टावरणानीत्युच्यन्ते। तेष्वष्टावरणेषु गुरुः, लिङ्गम्, जङ्गमश्चेति त्रय आराध्याः; विभूतिः, रुद्राक्षः, मन्त्रश्चेति त्रयः पूजासामग्रीरूपाः, पादोदकप्रसादौ पूजायाः फलरूपाविति विज्ञेयम्।

इमान्यावरणानि साधकस्याध्यात्मिकान्यङ्गानीत्यप्युच्यन्ते। लोके यथा करचरणादिसर्वावयवयुक्तात् शरीराल्लौकिकव्यवहारः सुचारुरूपेण संपद्यते, तथोक्तेष्वष्टस्वावरणाख्येषु सत्स्वेव साधकस्याध्यात्मिको व्यवहारः सम्यक् सम्पद्यत इति तानि साधकस्याङ्गानीति प्रतिपाद्यन्ते। एतेष्वेकस्याप्यभावे साधकस्य लक्ष्यप्राप्तिर्न सम्भवति।

उपर्युक्तानामष्टावरणानां बहिरङ्गान्तरङ्गभेदेन स्थूलसूक्ष्मभेदेन वा पुनर्द्विधा विभागः क्रियते। तत्र बहिरङ्गाष्टावरणैः साधकस्य स्थूलशरीरम्, अन्तरङ्गाष्टावरणैः सूक्ष्मशरीरं च परिरक्षितं भवति। अतो न केवलं वीरशैवैः, किन्तु सर्वैरपि साधकैरुभयविधावरणैः स्वकीयस्थूलसूक्ष्मशरीरयोर्गोपनं कर्तव्यम्। साधकस्य स्थूलसूक्ष्मशरीरयोः शब्दादिविषयेभ्यः संरक्षणाभावे स स्वलक्ष्यं परमतत्त्वं प्राप्तुं न कथमपि समर्थो भवति। अत एव दर्शनान्तरेषु दमेन बहिरिन्द्रियाणाम्, अर्थात् स्थूलशरीरस्य, शमेनान्तरिन्द्रियस्य, अर्थात् सूक्ष्मशरीरस्य विषयेभ्यः संगोपनमुपदिष्टम्। कष्टसाध्याभ्यां शमदमाभ्यां यत् प्रयोजनं प्राप्यते साधकेन, तदत्रान्तरङ्गबहिरङ्गाष्टावरणैः सहजतया प्राप्यते।

किञ्च, योगशास्त्रे महर्षिणा पतञ्जलिना चित्तशुद्धिद्वारा निर्बीजाख्यसम्प्रज्ञातसमाधिलाभार्थं यमनियमाऽऽसनप्राणायामप्रत्याहारधारणाध्यान-

समाध्याख्यान्यष्टौ योगाङ्गानि प्रतिपादितानि। इमान्यपि साधकस्य देह-मनो-बुद्धयादीनां दुर्वृत्तितो परिरक्षकाणि भवन्ति, अथापीमानि कष्टसाध्यानि न सर्वजनसुलभानि। अत एव वीरशैवाचार्या उपर्युक्ताष्टावरणरूपसर्वजनसुलभाष्टाङ्गयुक्तं शिवयोगमार्गं समुपदिष्टवन्तः। तस्मादिमान्यष्टावरणानि शिवयोगस्याष्टाङ्गानीत्युच्यन्ते।

अपि च, शिवयोगस्याङ्गान्यष्टावरणानि शिवयोगसाधकस्याऽऽध्यात्मिकान्यङ्गानीत्यप्युच्यन्ते। लोके यथा करचरणादिसर्वावयवयुक्तात् शरीराल्लौकिकव्यवहारः सुचारुरूपेण संपद्यते, तथोक्ताष्टावरणेषु सत्स्वेव साधकस्य पारमार्थिको शिवयोगाख्यो व्यवहारः सम्यक् सम्पद्यत इति तानि साधकस्याङ्गानीति व्यवहृतानि।

अत्राभ्युपगतेष्वावरणेषु गुरुः प्रथममावरणम्। शिष्यस्य योगक्षेमनिर्वाहको गुरुरेव। अतः स त्रिविधदीक्षासंस्कारेण मलत्रयाणि दूरीकृत्य, त्रिकरणानि परिशोध्य, उपासनार्थमिष्टलिङ्गमनुगृह्णाति। एवमेव सूक्ष्मसूक्ष्मतमयोः प्राणभावलिङ्गयोः स्वरूपमुपदिश्य तदुपासनापद्धतिं च बोधयति। सद्गुरुणा संस्कृतः शिष्यस्तदुपदेशानुसारं शरीरेण स्वेष्टलिङ्गपूजाम्, मनसा प्राणलिङ्गार्चनम्, बुद्धया (भावनया) भावलिङ्गानुसन्धानं च कुर्वन् संसाराटव्यामटन्नपि कामक्रोधादिहिंस्रपशुभिर्न व्यापाद्यते। दुःसंस्कारेण दुर्जनसहवासेन च मनुष्यो दुर्मार्गगामी भूत्वा कामक्रोधादिभिर्ग्रस्तो जन्मजन्मान्तरेषु दुःखमनुभवन्नेव वर्तते। यो हि प्राक्तनसुकृतवशेन सद्गुरोः शरणमागच्छति, स तत्कृतसंस्कारेण तदुपदेशेन च दृढमनस्को भूत्वा न कामादीनां वशगो भवति। एवं संस्कारेण शिष्यं दुर्मार्गतः परिरक्षतीति गुरुः प्रथममावरणम्। तदुपदिष्टं नैतिकं च ज्ञानमन्तरङ्गं दुर्विचारतः संरक्षतीति नैतिकं ज्ञानमन्तरङ्गस्य गुरुः, तदेव तदावरणं च। अन्तरिन्द्रियसंयमनं विना क्रियमाणो बहिरिन्द्रियसंयमो मिथ्याचारो भवति। तदुक्तं भगवता—

> कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
> इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते[१]॥ इति।

तस्मादात्मसुधारकेण पुरुषेणोभयविधेन्द्रियसंयमिना भाव्यम्। गुरुसन्निधौ सम्भवेऽपीन्द्रियसंयमे दृढज्ञानं विना मनःसंयमो न सम्भवति। तस्मात्

१. भ. गी. ३।६

स्वसन्निधानेन गुरुः स्थूलशरीरस्य परिरक्षकः, तदुपदिष्टं दृढं नैतिकज्ञानं च मनोबुद्धीनां रक्षकमिति निष्कर्षः।

सद्गुरुणा संस्कृत्य प्राणप्रतिष्ठापनद्वारा प्रदत्तमिष्टलिङ्गम्, यद् दीक्षासम्पन्नैर्वीरशैवै सदा स्ववक्षस्थले धार्यते, तेनापि साधकस्य दुर्मार्गतो रक्षा भवतीति तदत्र द्वितीयावरणत्वेन परिगण्यते। अत्रेदमाकूतम्—निषिद्धविषयाभिमुखप्रवृत्तिर्नाम मनुष्यस्य सहजः स्वभावः। दुःशीलो मनुष्यः स्वकीयं दुर्व्यवहारं छद्मरूपेण कर्तुं वाञ्छति खलु। तत्रेदमेव कारणं यत् स्वकीयस्य दुराचारस्य प्राकट्ये सामाजिकजीवनेऽप्रतिष्ठा स्यादिति। तस्माल्लौकिकप्रतिष्ठाभिरक्षणाय छद्मरूपेणैव तत्क्रियते। अन्येभ्यस्तदीयदुराचारापरिज्ञानेऽपि स्वकीयं दुराचारं स्वयं वेत्ति खलु। नाद्यावधि तादृशो दुराचारी प्रादुर्बभूव, येनाचरितो दुराचारस्तदीयं मनो न जानाति। यदा मनसा सह छद्मव्यवहारो न प्रचलति चेत्, विश्वव्यापिना भगवता कथं तत् प्रच्छन्नीकर्तुं शक्यते। वीरशैवैः शरीरे धार्यमाणमिष्टलिङ्गं तस्यैव भगवतः प्रतिकृतिरूपम्। लोके मनुष्यो मनुष्यान्तरसमक्षं दुराचारं कर्तुं नेच्छति, तर्हि भगवत्सन्निधौ साधकः कथं शास्त्रनिषिद्धविषयसेवनाय प्रवर्तेत ?

किञ्च, अस्माकं प्रकटरूपयोर्गुप्तरूपयोश्च सदाचारदुराचारयोः पञ्चमहाभूतानि सूर्याचन्द्रमसौ दिशो दिक्पालाः सर्वत्र व्याप्तो भगवांश्च—इत्येते साक्षिणो भवन्ति। अस्य परिज्ञानाभावान्मदीयं दुराचारं कोऽपि न जानातीति मत्वा मुहुर्मुहुर्दुराचारे प्रवर्तमानो मनुष्यः पतितः संजायते खलु।

सन्निधानकर्तृत्वं सङ्कल्पकर्तृत्वं चेति भगवतः सामर्थ्यद्वयं वर्ण्यते शास्त्रेषु। सन्निधानमात्रेण कार्यसम्पादकत्वं सन्निधानकर्तृत्वम्,[1] सङ्कल्पेन कार्यसम्पादकत्वं च सङ्कल्पकर्तृत्वम्[2]। सूर्यस्य सन्निधानेन कमलं विकसति, कर्दमश्च विशुष्यति। अत्र कमलस्य विकसने पङ्कस्य शोषणे च न सूर्यसङ्कल्पः कारणम्, किन्तु तत्सन्निधानमात्रेण सर्वं सम्भवति।

चन्द्रकान्ते यथा तोयं सूर्यकान्ते यथाऽनलः।
बीजे यथाऽङ्कुरः सिद्धस्तथाऽऽत्मनि शिवः स्थितः॥[3]

१. सांख्यसिद्धान्ते सन्निधानकर्तृत्वमङ्गीक्रियते। तत्र पुरुषसन्निधानमात्रेण प्रकृतिरेव सृष्ट्यादिकं निर्वहति।

२. ''तदैक्षत बहु स्यां प्रजायेय'' (छा. उ. ६।२।३)।

३. सि. शि. ५।३-४

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥[1]

इत्यादिप्रमाणवाक्यैर्मनुष्यहृदये भगवतः सान्निध्यं प्रतिपाद्यते। अत्रेयं जिज्ञासा जागर्ति यद् हृदये सत्यपि भगवत्सन्निधाने मनुष्यस्य दुष्प्रवृत्तिः कथं न निवर्तत इति। अत्रेदं विज्ञेयम्—इह जगति जडचेतनभेदेन पदार्थद्वयं विद्यते। तत्र स्वपरज्ञप्तिशून्यो जडः, तद्विपरीतश्च चेतनः। जडपदार्थानां पुरुषार्थशून्यत्वात् तेषु परिवर्तनं प्रकृत्यैव भवति। मनुष्यश्चेतनः पुरुषार्थी च वर्तते। अतो मनुष्ये परिवर्तनार्थं तदीयः प्रयत्नोऽप्यपेक्ष्यते।

यथा प्राथमिकविद्यालयेषु शिक्षकस्यानुपस्थितौ बालाः परस्परं कलहायमाना दृश्यन्ते। तस्मिन् समये समागतोऽपि शिक्षको यदि विद्यालये प्रच्छन्नरूपेण तिष्ठति, तदा तत्सान्निध्यस्यापरिज्ञानान्न बालाः कलहाद् विरमन्ते। यदा तु शिक्षकः प्रकटो भवति, तदानीं तत्सान्निध्यज्ञानवन्तो बालास्तत्क्षणमेव कलहं विहाय तूष्णींभावेन तिष्ठन्ति। एतेन ज्ञायते यच्चेतनेषु परिवर्तनार्थं न सान्निध्यमात्रमलम्, किन्तु सान्निध्यज्ञानमप्यावश्यकम्। तस्मात् सर्वेषामपि मनुष्याणां हृदयेषु भगवतः सान्निध्यस्य समानरूपेण विद्यमानत्वेऽपि ये तदस्तित्वज्ञानवन्तः, ते तद्भीत्या दुर्मार्गेण निवृत्ता भवन्ति। ये तन्न जानन्ति, ते भीत्यभावात् पुनः पुनर्दुर्मार्गगामिनो भवन्ति।

अत एव वीरशैवाचार्याः साधकेभ्य इष्टलिङ्गं प्रदाय, हृदयोपरि तद्धारणं चादिश्य हृदयस्थस्य भगवतः परिज्ञानं कारयन्ति। एवं बाह्ये धार्यमाणमिदमिष्टलिङ्गं प्रतिक्षणं हृदयस्थस्य भगवतः सान्निध्यं ज्ञापयत् सत् साधकं तद्भीतिमुखेन सदा दुर्मार्गतः परिरक्षतीतीदं बाह्यं द्वितीयमावरणं भवति। एवमत्रोक्तेन स्वेष्टलिङ्गोपासनेन नेत्रयोः, प्राणलिङ्गोपासनेन मनसः, भावलिङ्गोपासनेन बुद्धेश्च पावित्र्यं सम्पाद्य साधकस्त्रिभिः करणैः परिशुद्धो भवति। इन्द्रिय-मनो-बुद्धीनां नैर्मल्यकारणीभूतानि स्वेष्टलिङ्ग-प्राणलिङ्ग-भावलिङ्गानि सांसारिकविषयेभ्यः साधकस्य परिरक्षकाणि भवन्तीतीमानि रक्षाकवचरूपावरणशब्दवाच्यानीत्यवधेयम्। तत्रापि स्वेष्टलिङ्गं स्थूलशरीरस्य, प्राणलिङ्गं सूक्ष्मशरीरस्य, भावलिङ्गं कारणशरीरस्यावरणमिति विज्ञेयम्।

---

१. भ. गी. १८।६१

साधकस्य तृतीयमावरणं जङ्गम इत्युच्यते। जङ्गमो[1] नाम वीरमाहेश्वरवंशोत्पन्नः शिवज्ञानसम्पन्नः स्वय-चरं-परेत्यवस्थात्रयवान् कस्मिंश्चिद् वीरशैवगुरुवर्गमठे चरपट्टाधिकारित्वेनाभिषिक्तो जीवन्मुक्तो महापुरुषः। अयं च सर्वत्र संचरन् भक्तेभ्यो मुमुक्षुभ्यश्चाचारज्ञानं शिवज्ञानं चोपदिश्य कामक्रोधाद्यरिषड्वर्गेभ्यस्तान् परिरक्षतोत्ययमप्यावरणत्वेन परिगणितः। लोककल्याणार्थं संचरणशील एष साक्षात् शिवस्वरूप[2] इति वीरशैवानां भावना। ज्ञानेषु तत्त्वज्ञानमेव श्रेष्ठम्। अत एवोक्तम्—"अध्यात्मविद्या विद्यानाम्"[3] इति। तत्त्वज्ञानेनैव मनुष्यः पूर्णो भवति, शोकसागरं च तरति[4]। एवं ज्ञानामृतेन तृप्तं तत्त्वज्ञं विषयमृगतृष्णा न भ्रमयति। एतादृशतत्त्वनिष्ठो हि जङ्गमो मुमुक्षुः साधकेभ्यस्तत्त्वज्ञानम्, भक्तसाधकेभ्य आचारज्ञानं च समुपदिशति। ज्ञानं विना क्रियमाण आचारः कदाचिन्निष्फलो भवति। यथा निर्मलेन जलेन स्नापिता महिषमहिष्यादयः पशवस्तत्परिज्ञानाभावात् पुनः पङ्कलिप्ता भवन्ति, तथाऽऽचाररहस्यमपरिजानन्तो भक्ताः कदाचिद् दुर्व्यवहारेण पापपङ्कनिमग्ना भवन्ति खलु। अतः समाजे भक्तेभ्य आचारज्ञानोपदेशाय, मुमुक्षुभ्यश्च तत्त्वज्ञानोपदेशायाऽऽचारवतस्तत्त्वज्ञस्यावश्यकता वर्तते। वीरशैवसमाजे तत्कार्यं जङ्गमो निर्वहति। साधनमार्गे प्रवृत्तो हि साधक आरूढपतितो मा भूदिति करुणयाऽयं जङ्गमः —

कामः क्रोधश्च लोभश्च देहे तिष्ठन्ति तस्कराः।
ज्ञानरत्नापहाराय तस्माज्जाग्रत जाग्रत॥

इत्यादिरूपेण भक्तजनान्, [5]तत्त्वमस्यादिमहावाक्यैश्च मुमुक्षून् बोधयन्नरिषड्वर्गेभ्योऽज्ञानाच्च तान् संरक्षतीति बोध्यम्।

अष्टावरणेषु चतुर्थावरणत्वेनाङ्गीकृतं पादोदकं गुरुपादपूजया लब्धं गुरुपादोदकमिति, जङ्गमपादपूजया लब्धं जङ्गमपादोदकमिति, स्वेष्टलिङ्गपूजया

---

१. जानन्त्यतिशयाद् ये तु शिवं विश्वप्रकाशकम्।
स्वस्वरूपतया ते तु जङ्गमा इति कीर्तिताः॥ (सि. शि. ११।३६)

२. सर्वलोकोपकाराय यो देवः परमेश्वरः।
चरत्यतिथिरूपेण नमस्ते जङ्गमात्मने॥ (वी. चि. ३।३)

३. भ. गी. १०।३२

४. "तरति शोकमात्मवित्" (छा. उ. ७।१।३)।

५. छा. उ. ६।८।७

च लब्धं लिङ्गपादोदकमिति त्रिविधं भवति। परमपावनानां त्रिविधपादोदकानां साक्षादाचारेण सम्बन्धाचारेण वा प्रतिदिनं सेवनेन स्थूल-सूक्ष्म-कारणाख्यानि शरीराणि परिशुद्धानि भवन्ति। एवं शरीरेन्द्रियमनोबुद्धीनां परिशुद्धया तदधिष्ठितो हि जीवात्मा न कदापि दुर्मार्गे प्रवृत्तो भवति। एवं पादोदकं[1] मानसिकानिष्टचिन्तनरूपदोषाणां पूर्वकृतदुष्कर्मणां च विनाशकतया जन्ममरण-रूपसंसारदाहकतया परमज्ञानप्रदानेन च शिवभक्तं सर्वदा परिरक्षति। मानवानां दुर्भेद्योऽप्यहङ्कारः पादोदकपानेन सहजतया निवर्तते।

अत्रेदं रहस्यम्—अभिमानो हि मनुष्यस्याधःपतनकारणम्। अत एवाभिमानं सुरापानमित्युक्तम्। यथा सुरापानरतो मनुष्यो वीथ्यां चलन् क्षणे क्षणे निपतन्नेव दृश्यते, तथाऽभिमानिनः साधकस्य साधनमार्गात् पतनं सुनिश्चितमेव। एतत्पतनात् परिरक्षणार्थं पादोदकपानमत्रोपदिष्टम्। अभिमान-वशीभूतो हि मनुष्यो न कमपि प्रणमति। प्रणाम एवाभिमाननिवर्तकममोघं साधनम्। स च—"प्रणामश्चतुर्विधः—अष्टाङ्गः, पञ्चाङ्गः, त्र्यङ्गः, एकाङ्गश्च"[2] इत्युक्त्यनुसारं चतुर्विधो भवति। तत्र केवलं शिरसा क्रिय-माणः प्रणाम एकाङ्गः। शिरसि हस्ताभ्यामञ्जलिं बद्ध्वा क्रियमाणस्त्र्यङ्ग-प्रणामः। शिरसा हस्ताभ्यां जानुभ्यां च भुवं स्पृष्ट्वा क्रियमाणः पञ्चाङ्गप्रणामः। अष्टाङ्गप्रणामो द्विविधः—दण्डप्रणामः,[3] केवलप्रणामश्चेति। तत्र पादद्वयेन बाहुद्वयेन उरसा शिरसा वाचा दृष्ट्या च क्रियमाणो दण्डप्रणामः, शिरसा हस्ताभ्यां कर्णाभ्यां चुबुकेन बाहुभ्यां च भुवं संस्पृश्य क्रियमाणः केवलप्रणामः[4]। अत्रोक्तेष्वेकाङ्गाद्यष्टाङ्गदण्डप्रणामपर्यन्तेषु चतुर्वि-

---

१. पाकारः परमं ज्ञानं दोकारो दोषनाशनः।
दकारो जन्म दहति ककारः कर्मनाशनः॥ (वी. आ. च., पृ. ११५)

२. क्रि. सा, भा. २, पृ ३०१; शि. च., पृ १००

३. श्रीमन्तो नीलकण्ठशिवाचार्या दण्डप्रणामस्य पञ्च पक्षानुपस्थापयन्ति। तथाहि—"पद्भ्यां कराभ्यां उरसा शिरसा वाचा दृष्ट्या च क्रियमाणो दण्डप्रणामः। पादद्वयेन कवचद्वयेनोरसा शिरसा वाचा मनसा धिया दृष्ट्या च क्रियमाणो दण्डप्रणाम इति पक्षान्तरम्। अत्र मनसेत्यनन्यमनस्कत्वमुच्यते। धियेति शिवमहिमानुसन्धानरूप-स्तोत्रं विविच्यत इति भेदः। जानुद्वयेन करद्वयेनोरसा शिरसा मनसा वाचा दृष्ट्या च क्रियमाण इत्यपि पक्षान्तरम्। पादद्वयेन जानुद्वयेन करद्वयेनोरसा शिरसा मनसा दृष्ट्या च क्रियमाण इत्यपि पक्षान्तरम्। पादद्वयेन बाहुद्वयेन उरसा शिरसा वाचा दृष्ट्या च क्रियमाण इत्यपि कश्चन पक्षः। (क्रि. सा., भा. २, पृ. ३०१-३०२)

४. क्रि. सा., भा. २, पृ. ३०२

धेषु प्रणामेषु उत्तरोत्तरेण प्रणामेनाधिकाहङ्कारस्य निवृत्तिर्जायते। किञ्चिदवशिष्टोऽप्यहङ्कारः पादोदकपानेन निःशेषो भवति। एवमहङ्कारनिवारणेन कैङ्कर्यभावप्रदानेन च पादोदकं साधकमभिरक्षतीति तदावरणपदेनोच्यते।

इदं बहिरङ्गं पादोदकम्। अन्तरङ्गं पादोदकं तु स्वात्मनः परमात्मनो वाऽऽनन्दस्वरूपज्ञानमेव[1]। एतादृशस्य पादोदकस्य पानेन, अर्थात् स्वात्मपरमात्मनोः स्वरूपानुचिन्तनेन मनसि सदा सन्तृप्तिर्जायते। एवमात्मानन्दरूपान्तरङ्गपादोदकपानेन सन्तृप्तो हि साधकः क्षणिकेन विषयसुखेन न भ्रान्तो भवति। एवं बहिरङ्गं पादोदकमहङ्कारनिवारणद्वारा, अन्तरङ्गं पादोदकं चात्मानन्दप्रदानेन साधकं रक्षतीत्युभे अप्यावरणशब्दवाच्ये भवतः।

प्रसादो हि पञ्चममावरणम्। स्वेष्टदेवाय, अतिथये, सद्गुरवे च समर्पितं भोग्यं धार्यं च वस्तुजातं प्रसादो भवति। अयं प्रसादो गुरुभुक्तावशिष्टो गुरुप्रसाद इति, स्वेष्टलिङ्गनिवेदितो लिङ्गप्रसाद इति, जङ्गमभुक्तावशिष्टश्च जङ्गमप्रसाद इत्येवं प्रकारेण त्रिविधो भवति। पावनानां त्रिविधानामपि प्रसादानां भक्त्या सेवनेनाधिव्याधीनां निवृत्तिर्मनसः शुद्धिश्च जायते। मनसि परिशुद्धे परमात्मापि प्रसीदति। एवं मानसिकदुर्विचाराणां दूरीकरणद्वारा तत्र प्रसादगुणमुत्पाद्य साधकं परिरक्षमाणोऽयं प्रसादः साधकस्य स्वार्थबुद्धिं विनाश्यान्ते शिवसायुज्यं प्रापयति।

प्राणिवर्गेषु सर्वाधिकः स्वार्थी मनुष्य एव। स्वार्थेन खलु मनुष्यस्य हृदयं सङ्कुचितं भवति। सङ्कुचिते मनसि परमात्मनः परिपूर्णं ज्ञानं भवितुं नार्हति। सङ्कुचितहृदयोऽयं मनुष्यः स्वीयमन्यदीयं च भोग्यं स्वयमेव भोक्तुमभिलषति। तेनैव कारणेन समाजे परस्परं कलहः संजायते। स्वार्थवशीभूता जनाः परस्परं जुगुप्सन्ते विद्विषन्ति च। एवं जुगुप्सादिदुर्भावनायुक्तायोपदिश्यमानं तत्त्वज्ञानमूषरभूमिपतितबीजवन्निष्फलमेव भवति। अतस्तत्त्वज्ञानजिज्ञासुभिरौदार्यादिगुणोपेतैर्भाव्यम्। तत्त्वजिज्ञासया स्वान्तिकमागतेभ्यो देवमनुष्यासुरेभ्यः प्रजापतिः 'द' इत्येकमेव वर्णं त्रिवारं समुपदिदेश। तदीयस्त्रिविधोऽर्थः—"दाम्यत दत्त दयध्वमिति तदेतत् त्रयं शिक्षेद् दमं दानं दयामिति"[2] इत्येवमुक्तः। देवा भोगासक्ता इति तान् प्रति 'द' इति दमस्य, मनुष्याः स्वार्थिन इति तान् प्रति दानस्य, असुरा निर्दयिन इति तान् प्रति दयाया उपदेशं कृतवान् प्रजापतिः।

---

१. परमानन्द एवोक्तः पादशब्देन निर्मलः।
ज्ञानं चोदकशब्देन पादोदकमिति स्मृतम्॥ (सि. शि. १९।७)

२. बृ. उ. ५।२।३

मनुष्येभ्य उपदिष्टमिदमौपनिषदं ज्ञानं वीरशैवाचार्या नित्याचारेषु प्रतिष्ठापयामासुः। आचार्योपदेशानुसारं[1] स्वभोग्यं धार्यं च वस्तुजातं स्वेष्टलिङ्गाय, जङ्गमाय, सद्गुरवे च समर्पणेन दानस्याभ्यासो भवति, शनैः शनैः स्वार्थभावनाऽपसरति, तद्भुक्तावशिष्टान्नरूपप्रसादसेवनेन मनो निर्मलं सत् प्रसादगुणयुक्तं भवति। अत एव भगवता कृष्णेन केवलमात्मभोगाय क्रियमाणः पाकोऽघरूप इत्युपदिष्टम्[2]। स्वार्थेन न व्यक्तेर्विकासो न वा समाजस्य। उभयविधविकासार्थं दानरूपमौदार्यमावश्यकम्। दानेन विश्वकौटुम्बिकी भावना जागरिता भवति। अनया भावनया स्वार्थं समूलं विनश्यति, साधक आत्मज्ञानाधिकारी च भवति।

एवं वीरशैवैः प्रत्यहं भुज्यमानः प्रसादो दानगुणविवर्धनेन स्वार्थापसारणेन मनोनैर्मल्यसम्पादनेन च साधकं दुर्मार्गतः संरक्षतीत्यावरणमित्युच्यते। इदं च बहिरङ्गमावरणम्। मनोनैर्मल्यस्यान्तरङ्गप्रसादत्वम्। तेन च मनो दुर्विचारतोऽभिरक्षितं भवति। अप्रसन्नेऽतृप्ते च मनसि दुर्विचाराः प्रादुर्भवन्ति, न खलु प्रसन्ने चित्ते। एवमुभयविधेन प्रसादरूपावरणेन साधकस्य बहिरङ्गान्तरङ्गे रक्षिते भवतः।

आगमशास्त्रोक्तविधिना गोमयेन निर्मितं भस्म वीरशैवाचार्यैः साधकस्य षष्ठमावरणमिति स्वीकृतम्। इदमणिमाद्यष्टैश्वर्यप्रदानेन, शिवतत्त्वप्रकाशनेन, मनोवाक्कायजन्यानां पापानां भर्त्सनेन, तापत्रयोत्पन्नविपदां क्षयीकरणेन, ग्रहयक्षादिसर्वभूतेभ्यः परिरक्षणेन च साधकमभितः संरक्ष्य परशिवप्रकाशरूपनिरुपाधिकभस्मधारणयोग्यतामुत्पादयतीतीदमपि रक्षाकवचरूपावरणशब्दवाच्यं भवति।

गोमयनिर्मिते भस्मनि रोगाणुनाशकसामर्थ्यस्य विद्यमानत्वात् शरीरे तल्लेपनेन विद्यमानश्चर्मरोगो विनश्यति, पुनरन्यो नैवाविर्भविष्यति च। आधुनिके समाजे सौन्दर्यवर्धनाय 'स्नो-पाउडर' इत्याख्यं शुभ्रद्रव्यमङ्गलेपनायोपयुज्यते।

---

१. अन्नशुद्धया हि सर्वेषां सत्त्वशुद्धिरुदाहृता।
विशुद्धमन्नजातं हि यच्छिवाय समर्पितम्॥
आत्मभोगाय नियतं यद्यद् द्रव्यं समीहितम्।
तत्तत्समर्प्य देवाय भुञ्जीतात्मविशुद्धये॥ (सि. शि. ११।९,११)

२. यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥ (भ. गी. ३।१३)

तस्मिन् द्रव्ये सुगन्धमपहाय पोषकं संरक्षकं वा न किञ्चित् तत्त्वं निहितम् । प्रत्युताधिककालं तस्योपयोगेन 'स्किन् क्यान्सर' इत्याख्योऽसाध्यश्चर्मरोगो जायत इति पौर्वात्यपाश्चात्यवैद्यविदुषामाशयस्तत्र तत्र पत्रिकासु प्रकाशितोऽवलोक्यते । अत आरोग्याकाङ्क्षिभिः 'स्नो-पाउडर'द्रव्यं परित्यज्य गोमयभस्मनैवाङ्गलेपः कर्तव्यः । यदि सुगन्धमपेक्ष्यते चेत्, तर्हि तद्भस्मनि श्रीगन्धकाश्मीरोशीर-सुगन्धजलादीनां मिश्रणं कर्तव्यम्[1] । एतादृशेन भस्मस्नानेन शारीरकमारोग्यं सौगन्ध्यं मानसिकी शान्तिश्च लभ्यते । यथा चुल्ल्यां प्रज्वलमानोऽग्निश्चुल्ल्युपरि संस्थापितस्य पाकपात्रस्य बहिरङ्गेन संयुक्तोऽपि पात्रस्थान्नपाके कारणं भवति, तथा शरीरस्य बहिर्भागे धारितमपि भस्म बाह्यदोषनिवारणपुरःसरं हृदयमपि परिशुद्धं करोति । परिशुद्धे च हृदये शिवभावः परिपूर्यते ।

आकण्ठं जलपूर्णे घटे पुनः सेचितं जलं यथा बहिरेवायाति, न त्वन्तर्जातुचित् प्रविशति, तथा प्रतिदिनं भस्मधारणेन शिवभावनया परिपूर्णे हृदये सांसारिकविषयवासनानां प्रवेशो न कथञ्चिदपि संभवति । "स एष भस्मज्योतिः"[2], "भस्म ज्योतिः समाम्नातम्"[3], "भस्मेदं शाम्भवं ज्योतिः"[4] इत्यादिनिगमागमवचनेषु परशिवप्रकाशो भस्मशब्देनोपदिष्टः । स्वहृदये परशिवप्रकाशानुचिन्तनमेवान्तरङ्गभस्मधारणम् । तदेवं गोमयं भस्म रोगाणुभिः स्थूलशरीरम्, परशिवप्रकाशचिन्तनरूपं निरुपाधिकं भस्म सांसारिकवासनाभिः साधकस्य सूक्ष्मशरीरं च रक्षतीतीत्युभयविधं भस्मात्र सिद्धान्ते आवरणशब्देनाभिहितम् ।

सप्तममावरणं भवति रुद्राक्षः । रुद्रनेत्रजलबिन्दुभिरुत्पन्नो बीजविशेष एवायम् । रुद्रनेत्रसमुत्पन्नत्वाद् रुद्रवत्पावनस्वरूपो हि रुद्राक्षः । अस्य धारणेन दैहिकानां मानसिकानां च दोषाणां निवृत्तिरुभयविधं स्वास्थ्यं च लभ्यते,

---

१. संयोज्य गन्धसलिलैः कपिलामूत्रकेण वा ।
चन्द्रकुङ्कुमकाश्मीरमुशीरं चन्दनं तथा ।।
अगुरुत्रितयं चैव चूर्णयित्वा तु सूक्ष्मतः ।
क्षिपेद्भस्मनि तच्चूर्णमोमिति ब्रह्ममन्त्रतः ।।
(बृ. जा. उ. ३।२७-२८)

२. बृ. जा. उ. ७।२

३. च. ज्ञा., क्रि. ६।६४

४. च. ज्ञा., क्रि. ६।६६

रुद्रभावनया निरन्तरमस्य धारणेन रुद्रदृष्टिश्च प्राप्यते । अयमेवान्तरङ्गरुद्राक्षः । अनेन मनुष्ये समतादृष्टिः समुदेति, तेनैव च समाजे शान्तिस्थापना भवति । एवमन्तरङ्गबहिरङ्गाख्योऽयं रुद्राक्षो व्यक्तेः समाजस्य चोभयविधस्वास्थ्यसंरक्षकत्वादावरणशब्दवाच्यो भवति ।

अत्रेदं विज्ञेयम्—रुद्राक्ष उत्कृष्टो वनस्पतिः । शरीरेऽस्य धारणेन तत्प्रक्षालितजलपानेन च रक्तस्य न्यूनाधिकप्रसारो हृदयदौर्बल्यमित्यादयो बहवो रोगा उपशमिता भवन्तीत्याधुनिकवैज्ञानिकपरीक्षणोपलब्धिः । आयुर्वेदविज्ञाने रुद्राक्षोपचारेण बहुविधरोगोपशमः प्रतिपादित[1] एव । तस्माद् रुद्राक्षो न केवलं धार्मिकं चिह्नम्, किन्तूत्कृष्टो वनस्पतिः । अतो वर्णाश्रमविभेदं[2] विनैव सर्वैरपि धार्यो भवति ।

दुष्टनिवारणसङ्कल्पपूर्णै रुद्रनेत्राश्रुभिरेषामुत्पत्तिरिति तेषां धारणेन धारकस्य दुर्भावनानामपि निवृत्तिर्जायते खलु । लोके दुःखाश्रु-आनन्दाश्रु-योगाश्रुभेदेनाश्रु तावत्त्रिविधम् । सांसारिकसन्तापेन केनचित्कृतया पीडया वा सन्तप्तानां जीविनां नेत्रेभ्यो निर्गतान्यश्रूणि दुःखाश्रूणि । अभिलषितार्थप्राप्तावानन्दातिरेकेण निःश्रितान्यश्रूण्यानन्दाश्रूणि । त्राटकादिमुद्राभ्यासवेलायां निपतितान्यश्रूणि योगाश्रूणि । तत्तदश्रूत्पत्तौ निमित्तभूतैः सर्वैरपि तत्तच्छुभाऽशुभानि फलान्यवश्यमनुभवितव्यानि भवन्ति । अधिकारेण, बलेन, धनेनाढ्यः कश्चन कमप्यसमर्थं पीडयति चेत्, तत्पीडायाः प्रत्युत्तरं प्रतिपीडया कर्तुमसमर्थः स यदि सन्तापेन रोदिति, तदा तद्दुःखाश्रुप्रभावेण स पीडकोऽपि कदाचिदवश्यं दुःखी भवतीति लोकानुभवः । एवमेवानन्दाश्रुनिमित्तीभूतोऽप्यानन्दभाग् भवत्येव ।

एवं सामान्यजनानामेवाश्रुष्वेतादृशसामर्थ्यं चेद् जगद्रक्षकस्य रुद्रस्य योगाश्रुषु किमु वक्तव्यम् । दुष्टसंहारशिष्टसंरक्षणावसरे समुत्पन्नेभ्यो रुद्रस्य योगाश्रुभ्यो रुद्राक्षाणामुत्पत्तिर्जाता । अतस्तेष्वपि दुर्भावनायाः संहारकत्वं सद्भावनायाः संरक्षकत्वं च वर्तत एव । अतस्तेषां धारणेन न केवलं स्थूलशरीरस्य स्वास्थ्यप्राप्तिः, किन्तु दुर्गुणनिवारणद्वारा सूक्ष्मशरीरस्यापि स्वास्थ्यप्राप्तिः संजायते ।

---

१. शि. त. द., पृ. ८५

२. ब्राह्मणो वान्त्यजो वापि मूर्खो वा पण्डितोऽपि वा ।
रुद्राक्षधारणादेव मुच्यते सर्वपातकैः ।। (सि. शि. ७।६१)

किञ्च, "सर्वो ह्येष रुद्रः"[1] इति श्रुत्यनुसारं सर्वस्य विश्वस्य रुद्ररूपेणावलोकनमन्तरङ्गरुद्राक्षधारणमित्युच्यते। समतादृष्टिः समाजे शान्तिस्थापनाया मूलम्। एतदर्थमेवानादिकालाद् दार्शनिकानां प्रयासः परिदृश्यते। सर्वत्र समदर्शनमेव मानवजीवनस्य चरमं लक्ष्यम्। एवं समदर्शिन एव पण्डिता इत्युच्यन्ते। तदुक्तं भगवता कृष्णेन—

विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥[2] इति।

अतो गुरुशास्त्रोपदेशश्रवणेन स्वकीयपरिश्रमेण च तादृशसमताभावनायाः सम्पादनमेव रुद्रदृष्टिः। सैवान्तरङ्गरुद्राक्षधारणम्। एतादृशभावनाया अभावादेव मृगायमाणा मनुष्याः परस्परं कलहायन्तो मनुकुलविनाशरता अवलोक्यन्ते। अत एव—"मनुष्यरूपेण मृगाश्चरन्ति" इत्युक्तं सुभाषितकारेण। आकारमात्रेण मनुष्यो न मनुष्यः, किन्तु मनुष्यत्वविशिष्टः। मनोरपत्यैः सर्वैः प्रथमं मनुष्यैर्भाव्यम्। "मनसा सीव्यतीति मनुष्यः" इति निरुक्त्या सङ्कुचितेन मानसिकसम्बन्धेन बद्धः पशुरिति व्यवह्रियमाणोऽयं जीवस्तस्यैव सम्बन्धस्य निवृत्त्या शिवो भवति।

शिवात्मकमिदं सर्वं शिवादन्यन्न विद्यते।
शिवोऽहमिति या बुद्धिस्तदेव ज्ञानमुत्तमम्॥[3]

इत्याचार्योक्त्या एतादृशशिवज्ञानप्राप्तावेव पूर्वोक्तपशुभावनिवृत्तिर्जायते। पशुभावनिवारकमिदं ज्ञानमेव रुद्रदृष्टिः। तस्मात् "यत्र यत्र मनो याति तत्र तत्र ब्रह्मदर्शनम्" इत्युक्त्या निरन्तरं प्रवहमानायां मनोवृत्तौ रुद्रस्वरूपानुचिन्तनमेवान्तरङ्गाऽक्षमालेत्युच्यते।

एवं भौतिकरुद्राक्षः शारीरिकमानसिकस्वास्थ्यप्रदानेन साधकं रक्षति। रुद्रदृष्टिरूपान्तरङ्गरुद्राक्षस्तु समताभावविवर्धनमुखेन सामाजिकभेदभावनिवारणद्वारा सामाजिकस्वास्थ्यरक्षणे कारणं भवति। तदेवं बहिरङ्गान्तरङ्गरुद्राक्षाभ्यां व्यक्तेः समाजस्य च दुष्प्रवृत्तितो रक्षणं भवतीत्युभावपि रुद्राक्षावावरणत्वेन प्रतिपादितौ।

---

१. महाना. १०।११
२. भ. गी. ५।१८
३. सि. शि. १६।३१

वीरशैवीयाष्टावरणेषु मन्त्रोऽष्टममावरणम्। प्रणवसहितः पञ्चाक्षरो मन्त्रः "जपतो नास्ति पातकम्" इत्युक्त्यनुसारेण पातकनिवर्तनेन परमुक्तिप्रदानेन च साधकं सांसारिकदुःखैः परिरक्षतीति मन्त्रोऽपि रक्षाकवचरूपावरणशब्दभाग् भवति। "मननात् त्रायत इति मन्त्रः" इति व्युत्पत्त्या मन्त्रस्य रक्षाकवचरूपत्वं स्पष्टमेव। यथा जलप्रपातादिस्थलेषु निरन्तरं परिभ्रममाणेन चक्रेण विद्युदुत्पद्यते, तथैकस्यैव परमात्मनामभूतस्य मन्त्रस्यासकृदावृत्त्याऽपूर्वमुत्पद्यते, परमात्मा च जीवात्माभिमुखो भवति। लोके सर्वैरनुभूतोऽयं विषयो यत् कस्यापि किञ्चिद् दूरस्थस्य पुरुषस्यासकृन्नामोच्चारणेन स तन्निकटेऽवश्यमेव समायाति, दूरस्थस्य पुरुषस्य प्रबलेन मानसिकसङ्कल्पेन ध्याने क्रियमाणे तन्मनसि ध्यातुः स्मृतिः पुनः पुनः संजायते, तथैव भगवतो नामभूतस्य मन्त्रस्य वाचिकजपेन, मननरूपेण मानसिकजपेन वा स जापकाभिमुखो भवतीत्यत्र किमु वक्तव्यम्। स्वेष्टदेवतानामभूतस्य मन्त्रस्य श्रद्धातिशयेन जापको मन्त्रमहिम्ना तदधिष्ठातृ-भगवतः कृपया चाग्निमध्यगतोऽप्यदह्यमानः, पीतविषोऽप्यमर एवावतिष्ठत इति विषयो भगवद्भक्तयोः प्रह्लाद-मीराबाई-इत्याख्ययोश्चारित्र्यादवगम्यते। मन्त्रशास्त्रे शिवकवच-दुर्गाकवचेत्यादिरूपाणि विभिन्नदेवानां मन्त्ररूपाणि कवचान्यपि निरूपितानि सन्ति। जपादिना सिद्धीकृतैः सामान्यमन्त्रैरपि भूतबाधायाः, सर्पवृश्चिकादिदंशजनितविषबाधायाश्च निवारणं क्रियमाणं प्रत्यक्षमवलोक्यते खलु लोके। तर्हि किमु वक्तव्यं मन्त्रराजस्य पञ्चाक्षर-महामन्त्रस्य माहात्म्यम्। श्रद्धातिशयेनामुं जपमानः साधकस्त्रितापैरवश्य-मभिरक्षितो भवति। तस्मादिदं बहिरङ्गमावरणम्।

नमःपदं तत्खलु जीववाचि शिवःपदं तत्परमात्मवाचि।
अयेति तादात्म्यपदं तदेतन्नमः शिवायेति जगाद मन्त्रः॥[1]

इति मायिदेवोक्त्या जीवशिवयोरभेदरूपार्थानुसन्धानपुरःसरमस्य मन्त्रस्य जपेन साधकस्यैक्यबोधो जायते। तदास्य संकुचिताः शक्तयो विकसिता भवन्ति, जीवश्च शिवेन सह समरसो भवति। एवमयं मन्त्रो जीवत्वा-पादकाऽविद्याया निवारणमुखेन पुनः पुनर्जन्ममरणरूपसंसारतापात् शाश्वतरूपेण परिरक्षति। तदेवं मन्त्रानुसन्धानजनित ऐक्यबोधोऽन्तरङ्गमन्त्रः, तदेवान्त-रङ्गमावरणमपीति बोध्यम्।

तदेवं स्थूलाष्टावरणानि बहिरङ्गस्य, सूक्ष्माष्टावरणान्यन्तरङ्गस्य च परिरक्षकाणि भवन्ति। मुक्तेः सहकारिकारणत्वेनाङ्गीकृतानीमानि साध-

१. अ. सू. ६।४६

कस्याध्यात्मिकान्यङ्गानीत्यप्युच्यन्ते। विनैव करचरणाद्यङ्गं यथा लौकिको व्यवहारो न सुचारुरूपेण प्रचलति, तथा विनैवाष्टावरणं साधकस्याध्यात्मिकोऽपि व्यवहारो न सम्यक् सम्पद्यत इतीमान्यावरणानि साधकस्याध्यात्मिकान्यङ्गानीत्युच्यन्ते।

पञ्चाचाराणां प्राणत्वमिति पूर्वं प्रतिपादितमित्यधुनाऽङ्गभूतानामष्टावरणानां प्रतिपादनानन्तरं कथं नाम पञ्चाचाराणां प्राणत्वमिति प्रतिपाद्यते। शास्त्रविहितमार्गानुवर्तनमेवाचारः। आचारो हि मनुष्यस्योत्कृष्टमलौकिकमलङ्करणम्। वस्त्राऽऽभूषणाद्यपेक्षया आचारभूषणमेव वरम्। वस्त्रादिभिरलङ्कृतोऽप्याचारहीनो लोके निन्दितो भवति। वस्त्रादिविहीनोऽप्याचारवान् लोके पूज्यः संजायते। शिवानुग्रहप्राप्तये ज्ञानेन साकमाचारमप्यावश्यकमिति बोधयन्ति वीरशैवाचार्याः[1]। आचारशीलानामन्तरात्मा सदा प्रसन्नो भवति, देहस्वास्थ्यं वर्धते, पुमान् पूर्णायुश्च संजायते। दुराचाररतो लोके गर्हणीयः, आधिव्याधिभिरभिभूतः, अल्पायुर्दुःखभाग् च भवति। नैको मन्त्रो, न शास्त्रम्, न श्रौतं कर्म, नापि गुरुर्दुराचारिणं पुनाति[2]। तस्माल्लोके सर्वैरपि सदाचारिभिर्भाव्यम्। अत एव वीरशैवसिद्धान्ते न केवलं ज्ञानं मुक्तिहेतुः, किन्त्वाचारसहितं तदित्यङ्गीक्रियते। तस्मादत्र ज्ञानोत्पत्तेः पूर्वं तत्पश्चाच्च सर्वैराचरणीयत्वेन [3]पञ्चविधा आचाराः प्रतिपादिताः।

वीरशैवसिद्धान्ते पञ्चाचाराः साधकस्य पञ्च प्राणा इत्युच्यन्ते। अत्रेदं रहस्यम्—करचरणाद्यवयवैर्युक्तमपि शरीरं प्राणैर्विहीनं चेत् प्रेतमिति कथ्यते। प्रेतस्य स्थानं श्मशानमेव, न गृहादिकम्। श्मशानेऽपि तस्य भूसमाधिर्दहनं वा क्रियते। प्रेतस्पर्शेन प्रेतयात्रिणां वा स्पर्शेन सूतकप्राप्तिर्भवति। तन्निवारणार्थं स्नानादिकमाचरन्ति जनाः। एवमेवाचाराख्यप्राणरहिता जनाः प्रेतसदृशा एव। तेऽपि श्मशाननिवासयोग्या दहनार्हाश्च। अत एव सीतान्वेषणाय लङ्कां गतो

---

१. ज्ञानेनाचारयुक्तेन प्रसीदति महेश्वरः।
तस्मादाचारवान् ज्ञानी भवेदादेहपातनम्॥ (सि. शि. १६।१४)

२. आचारहीनं न पुनन्ति वेदा ह्याचारहीनं न पुनाति शास्त्रम्।
आचारहीनं नहि श्रौतकर्म ह्याचारहीनं न गुरुः पुनाति॥
(ब्र. सू. श्री. ३।१।१०)

३. लिङ्गाचारः सदाचारः शिवाचारस्तथैव च।
भृत्याचारो गणाचारः पञ्चाचाराः प्रकीर्तिताः॥ (च. ज्ञा., क्रि. ९।४)

हनूमान् तत्रत्यान् जनानाचारशून्यान् दृष्ट्वा एते सर्वे प्रेता दहनार्हाश्चेति मत्वा लङ्कामेव ददाह। अद्यतनसमयेऽपि नवरात्रमहोत्सवे बृहदाकारा रावणादीनां विग्रहा निर्मीयन्ते दह्यन्ते च। दुराचारिणः प्रेतसमानाः, अत एव ते दहनार्हा इत्येवास्य दाहस्य संकेतः। तस्मादत्रेदमेव विज्ञेयं यद् आचारहीनो यः कोऽपि वा स्यात्, स प्रेततुल्य एव। अत एव वीरशैवाचार्या मानवसमाजमुद्दिश्य सर्व आचारप्राणा भवेयुरिति तानुपदिष्टवन्तः।

अत्रोपदिष्टेषु पञ्चाचारेषु प्रथम आचारो लिङ्गाचारः। वीरशैवसिद्धान्ते जीवोऽङ्गमिति शिवश्च लिङ्गमित्युच्यते। लिङ्गस्वरूपप्राप्तयेऽङ्गेनानुष्ठीयमान आचार एव लिङ्गाचारः। आचारेऽस्मिन्नेकदेवोपासनाया रहस्यमन्तर्गर्भितं वर्तते। जलप्राप्तये कूपखननाय प्रवृत्तो हि कृषीबल एकस्मिन्नेव स्थाने निरन्तरं खनन् शीघ्रमेव यथा जलरूपं फलं प्राप्नोति, तथैकदेवनिष्ठया क्रियमाणेन पूजाजपध्यानादिना साधकोऽपि स्वोपास्यप्राप्तिरूपं सायुज्यफलं प्राप्नोति।

किञ्च, वीरशैवीयोऽयं लिङ्गाचारः सती-पतिभावप्रयुक्तः। अत्र जीव एव सती, तदुपास्यं स्वेष्टलिङ्गमेव पतिः। यथा पतिव्रता स्त्री परपुरुषप्रेम्णा व्यभिचारदोषभागिनी भवति, तथा स्वेष्टलिङ्गोपासकः साधकः स्वेष्टलिङ्गपूजामपहायान्यदेवोपासनायामासक्तश्चेत्, सोऽपि तादृग्दोषभाग् भवत्येव। तस्मादत्र "नहि निन्दा निन्दितुमीष्टेऽपि तु स्तुत्यमेव स्तौति" इति मीमांसान्यायमनुसृत्याऽन्यदेवोपासनानिषेधमुखेन स्वेष्टलिङ्गे साधकस्य भावनां दृढीकृतवन्तो वीरशैवाचार्याः। एतादृशीं दृढां भावनां सर्वेऽपि मानवाः स्वेष्टदेवेषु भावयित्वा स्वस्वलक्ष्यं प्राप्नुयुरिति मानवमात्रायाऽयं सन्देशः।

द्वितीय आचारः सदाचारः। आचारेऽस्मिन् धर्मार्जितेन द्रव्येणान्वहं गुरु-लिङ्ग-जङ्गमानां सन्तर्पणमुपदिष्टम्। अयमाचारोऽतिथिसेवारहस्यगर्भितः। स्वगृहे निर्मितमन्नं स्वयं भुक्त्वा सन्तोषसम्पादनं न भारतीया संस्कृतिः, किन्त्वन्यान् भोजयित्वा सन्तोषसम्पादनमेव। अत एव भगवान्[1] यज्ञशिष्टान्नभोजिनः सर्वकिल्बिषैर्मुच्यन्त इति निरूप्य तद्विपरीताः पापभागिनो भवन्तीति सन्दिश्य स्वार्थपरान् मानवानतिथिसेवायां प्रेरितवान्। पाकानन्तरं भूतबलिं दत्वाऽतिथिं प्रतीक्ष्यैव भोक्तव्यमित्यस्ति धर्मशास्त्रस्याप्यादेशः।

---

१. यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥ (भ. गी. ३।१३)

अतिथिसत्काररूपोऽयं सदाचारः "सदाचारप्रियः शम्भुः सदाचारेण पूज्यते"[१] इत्याचार्योक्त्या शिवानुग्रहप्रापको भवति। निष्ठयाऽस्य परिपालनेन साक्षात् शिवाराधनफलमेव प्राप्यते। शिवस्तु नित्यतृप्तः। तस्य नास्ति कस्यापि भोगस्यावश्यकता। शक्तिशिवौ हि जगतः पितरौ[२] वर्तेते। सर्वेऽपि प्राणिनस्तयोरेव सन्तानरूपाः। लोके यथा स्वसन्तानभोजनेन पितरौ सन्तुष्टौ भवतः, तथा कस्याप्यतिथिरूपेणागतस्य प्राणिनो भोजनदानेन पितृकल्पः शिवः स्वयं सन्तुष्टो भवति। अतो ये शिवं भोजयितुमिच्छन्ति, ते सर्वेऽतिथिमेव भोजयन्त्विति शिवसन्तृप्तेः सुलभोपायमुपदिष्टवन्तो वीरशैवाचार्याः। अनेन सदाचारेण लोकादरः शिवानुग्रहश्चेत्यैहिकमामुष्मिकं फलद्वयं प्राप्नोति साधकः।

तृतीय आचारः शिवाचारः। अनन्यभावेन शिवस्य शरणागतिरेव शिवाचारः। आचारोऽयं हृदयवैशाल्यतत्त्वगर्भितः। व्यक्तेः समाजस्य च समुन्नत्यै हृदयवैशाल्यं दृष्टिवैशाल्यं चावश्यकम्। शिवोपासनया एतदुभयमनायासेन लभ्यते। यतो हि शिवः सर्वव्यापकः सर्वमङ्गलप्रदश्च। तस्योपासनया तादृग्गुणप्राप्तिर्भवत्येव। शनैः शनैः शिवभावनाया दृढीकरणेन सर्वत्र शिवदृष्टिः संजायते। अनया साधकस्य सङ्कुचिता बुद्धिर्निवर्तते, "सर्वं शिवमयं जगत्" इति विशाला च भावना समुदेति। तदाऽयं न कमपि द्वेष्टि, न कस्मादपि जुगुप्सते। परस्परद्वेषेण जुगुप्सया च समाजे विषमता समुदेति। विषमता हि विषम्, समता च संजीवनी। एवं हृदयवैशाल्यं सम्पाद्य समाजे समताप्रतिष्ठापनार्थमेवाऽयं शिवाचारः प्रचारितः समाचरितश्च वीरशैवाचार्यैः।

गणाचारश्चतुर्थ आचारः। अस्मिन्नाचारे दुर्गुणदूरीकरणरहस्यं गर्भितं वर्तते। निन्दा हि निकृष्टतमो दुर्गुण इति शास्त्रेषु प्रतिपाद्यते। निन्दया मनोमालिन्यं वर्धते। एतत्परिज्ञानराहित्यादेव समाजे प्रायो जना निन्दातुरा एव दृश्यन्ते। परकृतोऽपि पाप्मा निन्दया निन्दकं समायाति। निन्दको यादृग् दोषभाग् भवति तच्छ्रोतापि तत्समश्नुते। अतः शिवभक्तेन कदापि न कस्यापि निन्दा कर्तव्या, न च शिवस्य शिवभक्तस्य शिवधर्मादिकस्य च निन्दा श्रोतव्या। गणाचारस्वरूपनिरूपणावसरे—"शिवनिन्दाकरं दृष्ट्वा घातयेत्"[३] इत्युपदिष्टमाचार्यैः। अत्र घातनशब्दस्य शरीरघातनमित्यर्थो गौणः, बुद्धि-

---

१. सि. शि. १६।६६

२. वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥ (रघु. १।१)

३. सि. शि. ९।३८

घातनमेव मुख्योऽर्थ इति वेदितव्यम्। मनोबुद्धीनां दोषैरेव मनुष्यो दुर्मार्गगामी भवति। नहि शरीरघातमात्रेण तन्मनोबुद्धीनां शुद्धिः संजायते। तस्मात् सदुपदेशेन तदीयदुर्बुद्धिघातनमेव कर्तव्यम्। शास्त्रोपदेशेन यथा समाजशुद्धि-र्जायते, न तथा शस्त्रेण कदापि भवितुमर्हति। दुर्बुद्धिः पुरुषः शास्त्रोपदेशेन सन्मार्गे न प्रवर्त्यते। प्रत्युत शस्त्रप्रहारेणैव मार्यते चेत्, तर्हि तदानीं मृतोऽपि सः पुनर्जन्मान्तरे तयैव दुर्बुद्ध्या संयुज्यते, पुनस्तस्मिन्नेव दुर्व्यवहारे प्रवर्तते च। अतः सामाजिकदुष्प्रवृत्तीनां निवृत्तिः शास्त्रोपदेशेनैव कर्तव्या। अत्यन्तशठो न कथमपि शास्त्रोपदेशं शृणोति चेत्, तदाऽन्योपायाभावात् सामाजिकहितदृष्ट्या च तदीयशरीरघातनेऽपि न दोषः। दक्षस्य शिरच्छेदन-मुखेन तादृश आचारोऽनुष्ठित एव शिवगणेन वीरभद्रेण। शिवगणेन वीरभद्रेण समनुष्ठितत्वादेवास्य गणाचार इति नाम संजातम्। अस्मिन्नाचारे व्यक्तेः समाजस्य च परिशुद्धिभावो निहितोऽस्ति।

पञ्चम आचारो भृत्याचारः। अयं विनयगुणप्रबोधकः। अहङ्कारेण पतनं विनयेन चौन्नत्यप्राप्तिरिति तु शास्त्रप्रमाणेन लोकानुभवेन च सिद्धम्। उपर्युक्ताचारपरिपालके साधके "मादृश आचारशीलः कोऽस्ति" इत्याकारक-स्याभिमानस्य वर्तते समुदयप्रसङ्गः। प्राप्ते च तादृशाभिमाने साधकस्य पतनं निश्चितम्। अत उत्कृष्टस्य साधकस्य पतनं मा भूदिति शैवागमे भृत्याचारोऽ-न्तत उपदिष्टः। अनया भृत्यभावनयैव समाजे समतावादस्य शान्तेश्च प्रतिष्ठापनं कर्तुं शक्यते। अन्यथा सर्वेष्वहङ्कारिषु सत्सु सुन्दोपसुन्दन्यायेन सर्वेषां विनाशो निश्चित एव। तस्मादयं भृत्यभावो न केवलं निम्नकोटिकानां साधकानामेव, किन्तूच्चतमानां साधकानां सिद्धानामपि च कृते आवश्यक इति विज्ञेयम्। एतदाचारप्रचारो नोपदेशेन कर्तव्यः, किन्त्वाचरणमुखेनैव। अत एव भगवता कृष्णेनापि—"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः"[1] इत्यत्रा-चरणेनैवाचारोपदेशः कर्तव्य इति संकेतितम्। तस्मादद्यतनसमये सामाजिक-क्षेत्रे धार्मिकक्षेत्रे च ये नेतारः सन्ति, तैः सर्वैरप्यदाम्भिकरूपेण भृत्याचारिभि-र्भाव्यम्। तथा सत्येव सर्वे जनास्ताननुकुर्वन्ति, समाजे सर्वतोमुखेन शान्तिश्च प्रतिष्ठिता भवति।

उपर्युक्तेषु वीरशैवीयपञ्चाचारेष्वेकदेवोपासनाया महत्त्वम्, अतिथि-सेवाया रहस्यम्, हृदयवैशाल्यस्य प्रक्रिया, दुर्गुणदूरीकरणोपायः, निरहङ्कारित्व-सम्पादनरीतिश्चेत्यादीनि महत्त्वपूर्णानि तत्त्वानि सन्निहितानि सन्ति।

---

१. भ. गी. ३।२१

एतानि पञ्च तत्त्वानि व्यक्तेः समाजस्य च प्राणभूतानि। अत एव वीरशैवाचार्याः पञ्चाचारान् प्राणरूपानमन्यन्त। वीरशैवीयाः प्रायः सर्वेऽपि साधका उपर्युक्तानां पञ्चाचाराणां निष्ठया परिपालने उत्सुका वर्तन्ते। एत आचारा न केवलं वीरशैवानामेव, किन्तु मानवसमाजस्यैव सुधारका वर्तन्ते। अतः सर्वैरपि यथाशक्ति एतेषामाचाराणां परिपालनं कर्तव्यम्।

अष्टावरणानामङ्गत्ववत् पञ्चाचाराणां प्राणत्ववद् वर्तते षट्स्थलस्यात्मरूपत्वम्। कथमेतदित्यधुना निरूप्यते। वीरशैवसाधकः पूर्वोक्ताष्टावरणाङ्गकः पञ्चाचारप्राणकश्च सन् षट्स्थलसोपानमार्गेण क्रमशः स्वशक्तीनां विकासं कुर्वन्नन्ते शिवसायुज्यमाप्नोतीति हि वीरशैवसिद्धान्तः। अत्रोक्तानि षट्स्थलानि[1] साधकस्यात्मरूपाणीत्युच्यन्ते। सर्वाङ्गपरिपूर्णे प्राणयुक्ते च शरीरे यद्यात्मा न स्यात्, तर्हि यथा प्राणयुक्तमपि शरीरं संविच्छून्यं भवति, तथाऽऽवरणाचारसम्पन्नोऽपि साधको यदि षट्स्थलसोपानक्रमेण शिवभावं न प्राप्नोति चेत्, तदीयावरणाचारा निरर्थका एव भवेयुः। अतो जीवस्य शिवीभावाय वर्तते वीरशैवसिद्धान्ते षट्स्थलोपासनायाः किमपि वैशिष्ट्यम्।

अस्यां षट्स्थलोपासनापद्धतौ ज्ञानकर्मयुक्ताया भक्तेः प्राशस्त्यं वर्तते। आणवादिमलत्रयावरणेन संकुचितशक्तिको हि जीवो गुरुदीक्षयाऽपहृतमलः सन् षड्विधभक्तीनां साहाय्येनैव स्वेष्ट-प्राण-भावलिङ्गानामुपासनां कृत्वा शक्तीनां विकासं प्राप्य लिङ्गस्वरूपो भवति। अयं विकासक्रमोऽत्र [2]कीटभ्रमरन्यायेन निरूपितोऽस्ति। यथा भ्रमराद् भिन्नोऽपि कीटो निरन्तरभ्रमरध्यानेन कालान्तरे भ्रमर एव भवति, तथा शक्तीनां संकोचेन परशिवाद् भिन्नो बद्धश्च जीवः शिवोपासनया विकसितशक्तिकः सन् जले जलमिव परशिवेन समरसो भवति।

अत्रोच्यमानाः षड्विधा भक्तयो नान्यदर्शनसाधारणाः, किन्तु किञ्चिद्विलक्षणस्वरूपाः। एताश्च भक्तयः परशिवशक्तेरवस्थान्तररूपा इत्यभ्युपगम्यते। अत्रेदं विज्ञेयम्—सृष्ट्युत्पत्तौ शिवसमवेता शक्तिरेव जीवात्मनि भक्ति-

१. आदौ भक्तस्थलं प्रोक्तं ततो माहेश्वरस्थलम्।
प्रसादिस्थलमन्यत्तु प्राणलिङ्गिस्थलं ततः॥
शरणस्थलमाख्यातं षष्ठमैक्यस्थलं मतम्॥ (सि. शि. ५।२३)

२. कीटो भ्रमरयोगेन भ्रमरो भवति ध्रुवम्।
मानवः शिवयोगेन शिवो भवति निश्चयम्॥ (लि. पु. २।२१।९५)

रूपेण प्रविश्य तन्मुक्तेः कारणं भवति। लोके यथा माता पत्युः संसर्गेण पुत्रोत्पत्तौ कारणीभूता उत्पन्नानां पुत्राणां स्वपितुः परिज्ञाने च सहायिका भवति, तथेयं शक्तिः परशिवसम्बन्धेन जीवात्मन उत्पत्तौ कारणीभूताऽपि पुनर्भक्तिरूपेण जीवात्मनो मुक्तौ, अर्थाज्जीवस्य परशिवज्ञानप्राप्तये सहायिका भवति। तस्मादत्र षट्स्थलोपासनायाः षड्विधानां भक्तीनामेव माहात्म्यं वर्तते।

अत्रोच्यमानासु षड्विधासु भक्तिषु श्रद्धाख्या हि प्रथमा भक्तिः। लौकिकव्यवहारे यथा विश्वास आवश्यकस्तथा षट्स्थलमार्गे श्रद्धा परमावश्यकी। अनया साधके स्वेष्टलिङ्गादिषु निरतिशया प्रीतिः समुदेति। अनया च भगवत्प्रीत्या साधकस्य मनः शनैः शनैः सांसारिकविषयेभ्यो निवर्तते। द्वितीया भक्तिर्निष्ठा नाम। अनया साधकस्य स्वेष्टलिङ्गप्रेमा दृढतामेति। इयं दृढता प्राणात्ययप्रसङ्गेऽपि नैव विचलिता भवति। तृतीया भक्तिरवधानात्मिका। अनया युक्तो हि साधकः सदा सावधानं व्यवहरति। अनवधानावस्थायां बहवोऽनर्थाः सम्भवन्ति। यथा निस्तरङ्गेषु जलाशयेषु सूर्याचन्द्रमसोः प्रतिबिम्बं स्पष्टं प्रतीयते, तथा सावधाने मनसि परशिवस्यानुभवः संजायते। अयं परशिवानुभव एवात्रानुभवभक्तिरित्यभिधीयते। यथा विषयाऽनुभवानन्तरमेवानन्दप्राप्तिरिति लोकानुभवः, तथैवात्रापि शिवानुभवानन्तरमेव शिवानन्दावाप्तिः। अतोऽत्रानुभूयमानः शिवानन्द एवाऽऽनन्दभक्तिः। आनन्दमनुभवन्नेव साधकस्तत्र समरसो भवति। इयं समरसावस्थैव समरसभक्तिः।

अत्र श्रद्धाभक्त्या युक्तो भक्त इति, निष्ठाभक्त्या माहेश्वर इति, अवधानभक्त्या प्रसादीति, अनुभवभक्त्या प्राणलिङ्गीति, आनन्दभक्त्या शरण इति, समरसभक्त्या युक्तश्च ऐक्य इति नाम्नाऽयमङ्गः (जीवः) षड्विधानां भक्तीनामेव साहाय्येन षट्स्थलसोपानमारुह्य स्वोपास्यभूते लिङ्गे समरसो भवति। अयमेव लिङ्गाङ्गसामरस्याख्यं वीरशैवीयषट्स्थलप्रासादस्यान्तिमं सोपानम्। पूज्यपादाः श्रीरेणुकाचार्याः—

जले जलमिव न्यस्तं वह्नौ वह्निरिवार्पितम्।
परब्रह्मणि लीनात्मा विभागेन न दृश्यते॥[1]

इति तत्सामरस्यस्वरूपमुपवर्णितवन्तः। एवमैक्यभावमापन्नस्य प्राक्तनः पशुभावो निवर्तते। तदुक्तम्—

---

१. सि. शि. २०।६१

पशुत्वं च पतित्वं च मायामोहविकल्पितम् ।
तस्मिन् प्रलयमापन्ने कः पशुः को नु वा पतिः ॥[1] इति ।

तदेवं वीरशैवसिद्धान्ते बद्धावस्थायां परमात्मनः सर्वथा भिन्नो जीवः षट्स्थलोपासनाक्रमेण क्रमशः शक्तीनां विकासं प्राप्यैक्यावस्थायां परशिवेन सह समरसो भवतीति स्वीक्रियते ।

अत्रायं भावः—यथा भृङ्गाद् भिन्नरूपोऽपि कीटो नैरन्तर्येण भृङ्गचिन्तनसामर्थ्येन कीटाकारं कीटस्वभावं च परित्यज्य भ्रमराकारं भ्रमरत्वं च प्राप्नोति, न पुनः कदापि कीटत्वमापद्यते; रससम्पर्कसामर्थ्येन ताम्रस्य ताम्रत्वं सहजमपि निवर्तते सुवर्णत्वं च प्राप्यते, न पुनस्तत् ताम्रत्वमापद्यते; स्वातिनक्षत्रसमये समुद्रीयशुक्तौ पतितं वर्षाजलं सहजमपि जलभावं परित्यज्यानर्घमुक्ताकारतां धत्ते, न पुनर्जलरूपतामाधत्ते; तथा परशिवाद् भिन्नोऽपि जीव उपासनासामर्थ्येन परशिवस्वरूपं प्राप्य न कदापि पुनर्जीवत्वमापद्यते । अत एव भाष्यकाराः श्रीपतिपण्डिताराध्याः—"स्वाभाविकजीवत्वनिवृत्तिपूर्वकशिवत्वप्राप्तिरेव मोक्षः"[2] इति तदेव समर्थितवन्तः । अत्रेदमपि बेद्यम्—शैवागमे परशिवस्य—सर्वज्ञता, तृप्तिः, अनादिबोधः, स्वतन्त्रता, अलुप्तशक्तिः, अनन्तशक्तिश्चेति षट् शक्तयो निरूपिताः । भक्तादिषट्स्थलमार्गेण तदुपासको जीवो यदैताः शक्तीः क्रमशः प्राप्नोति[3], तदा स निवृत्तद्वैतभावोऽद्वैतस्थितिमापद्यते ।

काश्मीरशैवसिद्धान्तानुसारं पशोर्बन्धो मिथ्या । अत एव तैस्तस्य निवृत्तिर्ज्ञानमात्रेण प्रतिपाद्यते । अत्र बन्धस्य सत्यत्वाद् ज्ञानमात्रेण तन्निवृत्त्यसम्भवात् तदर्थं ज्ञानेन साकं कर्म उपासना च निरूपिताः । अत्रोभयोर्दर्शनयोर्मुक्तिसाधनविषये वैमत्येऽपि [4]मुक्तिस्वरूपविषये मतैक्यमेव । भेदवादिनः

१. शि. शि. १४।९

२. ब्र. सू. श्री. ३।२।५, पृ. २०९

३. यद्भक्तस्थलमित्याहुस्तत्सर्वज्ञत्वमुच्यते ।
यन्माहेश्वरकं नाम सा तृप्तिर्मम शाङ्करी ॥
यत्प्रसादाभिधं स्थानं तद्बोधो मे निरङ्कुशः ।
यत्प्राणलिङ्गकं नाम तत्स्वातन्त्र्यमुदाहृतम् ॥
यदस्ति शरणं नाम ह्यलुप्ता शक्तिरुच्यते ।
यदैक्यस्थानमर्धस्था ह्यनन्ता शक्तिरुच्यते ॥ (श्रीकर. भू., पृ. १७७-१७८)

४. "सलिले सलिलं क्षीरे क्षीरमिव ब्रह्मणि लयी स्यात्" (प. सा., श्लो. ५१) ।

सिद्धान्तशैवा मुक्तौ जीवः शिवसमो भवति, न तु शिवेन समरस इति निरूपयन्ति। एषामिदं मतं द्वैतसिद्धान्तानुसारं समीचीनमेव। अन्यशैवदर्शनेष्वप्रतिपादितानामष्टावरण-पञ्चाचार-षट्स्थलाख्यानां तत्त्वत्रयाणामत्र प्रतिपादितत्वाद् वीरशैवदर्शनस्य वैशिष्ट्यं स्पष्टमेव प्रतिभाति।

शक्तिविशिष्टाद्वैतीयः समन्वयसिद्धान्तः

वीरशैवाचार्याः समन्वयवादिनः। ते मतान्तराणां खण्डनं विधाय स्वमतप्रतिष्ठापनपरं मार्गमपहाय समन्वयमुखेन दार्शनिकप्रपञ्चकलहप्रशमनाय प्रयतितवन्त इति विज्ञायते। अत एव नानागमश्रवणेन संशयिनमगस्त्यमुद्दिश्य श्रीजगद्गुरुरेणुकाचार्याः—

अगस्त्य बहुधा ख्याताः सिद्धान्ता रुचिभेदतः।
भिन्नाचारसमायुक्ता भिन्नार्थप्रतिपादकाः॥

सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा।
एतानि मानभूतानि न हन्तव्यानि युक्तिभिः॥

वेदः प्रधानं सर्वेषां सांख्यादीनां महामुने।
वेदानुसरणादेषां प्रामाण्यमिति निश्चितम्॥[1]

इत्यादिरूपेण समन्वयमेव बोधितवन्तः। अत्रायमाशयः—सर्वाणि च मतानि वेदानामागमानां वा शाखासमाश्रितानि सन्ति। वेदेषु द्वैतप्रतिपादनपरा अद्वैतप्रतिपादनपराश्च सन्ति मन्त्राः। तदवलम्ब्यैव द्वैताद्वैतमतानि जातानि। तत्र द्वैतवादिनोऽद्वैतश्रुतीनां गौणार्थत्वम्, अद्वैतवादिनश्च द्वैतश्रुतीनां गौणार्थत्वं निरूपयन्तो लोके द्वैतवादिनः, अद्वैतवादिन इत्येवं ख्याताः। उभयविधश्रुतीनां शिवस्य निःश्वासभूतत्वाद् एकस्य गौणार्थत्वमपरस्य मुख्यार्थत्वमिति कथनं न समञ्जसमिति वीरशैवाचार्या अवस्थाभेदेनोभयविधश्रुतीनामपि मुख्यार्थत्वेनैव समन्वयं प्रतिष्ठापयन्ति। अत एव भाष्यकारः श्रीपतिपण्डिताराध्यः—"वीरशैवैकसिद्धान्ते सर्वश्रुतिसमन्वयः"[2] इत्यवोचत्।

सर्वश्रुतिसमन्वयप्रकारः

शक्तिविशिष्टाद्वैतापरपर्यायं वीरशैवदर्शनं सर्वश्रुतिसमन्वयार्थमेव लब्धजन्मेति सूत्ररूपेणोक्तम्। उपनिषद्वाक्येषु न सर्वत्र दार्शनिकानां वैमत्यम्, किन्तु

---

१. सि. शि. ५।३-५
२. ब्र. सू. श्री., मङ्गलश्लो. १५

केषुचित्स्थलेष्वेव। तावन्मात्रे साधिते समन्वये सर्वश्रुतिसमन्वयः साधितः स्यादेव। अतो विवादग्रस्तानां श्रुतीनां समन्वयप्रकारोऽत्र प्रदर्श्यते।

तत्र तावत्—"सर्वं खल्विदं ब्रह्म"[1], "एकमेवाद्वितीयं ब्रह्म"[2], "सदेव सोम्येदमग्र आसीत्"[3], इत्यादीनि श्रुतिवाक्यानि ब्रह्मातिरिक्तस्य सर्वस्यापि निषेधं बोधयन्ति। किन्तु "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः"[4] इत्यादिश्रुतिषु प्रपञ्चस्योत्पत्तिश्च श्रूयते। तदत्र विवादोऽयं जायते यत् प्रपञ्चो वास्तविकेन रूपेण वर्तते न वेति। अत्राद्वैतवादिनः—प्रपञ्चो मिथ्या, सृष्ट्यादिबोधकानि वाक्यानि कल्पितभेदबोधकानि, अतः स्वगत-सजातीय-विजातीयभेदशून्यं ब्रह्मैव सदिति पक्षमुपस्थापयन्ति। द्वैतवादिनः परिदृश्यमानस्य प्रपञ्चस्यापलापमकुर्वाणाः 'अस्य अग्रे इदमग्रे' इति 'इदमग्रे' इति पदं व्युत्पाद्य अस्य प्रपञ्चस्योत्पत्तितः प्राग् ब्रह्मसदृशमन्यन्नासीदिति सजातीयभेदमात्रस्य निषेधं कुर्वन्ति। एतेन प्रपञ्चस्यापलापो न भवतीति तेषामाशयः। अत्र "एकमेवाद्वितीयम्" इत्यस्य स्वगतादिभेदत्रयरहितरूपस्यार्थस्य सङ्कोचो दृश्यते द्वैतवादिनां व्याख्याने। शक्तिविशिष्टाद्वैतवेदान्ते तु परमात्मनोऽवस्थाद्वयमङ्गीक्रियते। तत्रैका विश्वोत्तीर्णाऽपरा विश्वरूपा चेति। विश्वोत्तीर्णस्य स्वात्मरूपचिच्छक्तियुक्तस्य तस्य स्वगतादिभेदत्रयरहितत्वम्, पुनः स एव यदा मायाशक्तिविशिष्टो भवति तदा विश्वरूपो भवति। अतः प्रपञ्चस्य तस्यैव शक्तेर्विकासरूपत्वात् तस्यापि सत्यत्वमेवाभ्युपगम्यते। एवं निर्गुणश्रुतीनां विश्वोत्तीर्णपरत्वेन, सगुणश्रुतीनां विश्वमयपरत्वेन चार्थसङ्कोचं विना व्यवस्थाप्यमानत्वादत्रोभयविधश्रुतीनां समन्वयः।

एवमेव "द्वा सुपर्णा"[5], "ऋतं पिबन्तौ सुकृतस्य लोके"[6] इत्यादिश्रुतिभिर्जीवब्रह्मणोर्भेदो निरूप्यते। "तत्त्वमसि"[7], "अहं ब्रह्मास्मि"[8] इत्यादिभिश्च तयोरेवाभेदः प्रतिपाद्यते। तदत्र विवाद उपस्थितो भवति—किं भेदः सत्यः? उताभेदः सत्यः? इति। अत्र द्वैतिनो भेदस्य मुख्यत्वमभेदस्य च "सिंहो माणवकः", "ममायमात्मा भद्रसेनः" इत्यादिवद् गौणार्थत्वम्; अद्वैतिनश्चाभेदस्य मुख्यत्वं भेदस्य च कर्णस्य राधापुत्रत्ववद् भ्रमकल्पितत्वं साधयन्ति।

---

१. छा. उ. ३।१४।१
२. छा. उ. ६।२।१
३. छा. उ. ६।२।१
४. तैत्ति. उ. २।१।१
५. मुण्ड. ३।१।१
६. कठो. १।३।१
७. छा. उ. ६।८।७
८. बृ. उ. १।४।१०

शक्तिविशिष्टाद्वैतवेदान्ते तु संसारदशायां जीवपरमात्मनोर्भेदो वास्तविक एवाङ्गीक्रियते। अत एव वीरशैवीयषट्स्थलोपासनायां भक्तस्थलादारभ्य शरणस्थलपर्यन्तं जीवपरमात्मनोर्भेद एव प्रतिपाद्यते। ऐक्यस्थले तु जले जलमिव तयोरभेदः स्वीक्रियते। एवं जीवात्मनोऽवस्थाभेदेन भेदाभेदश्रुत्योर्मुख्यार्थत्वमेव स्वीकृतमित्यत्रोभयोः समन्वयो बोध्यः।

किञ्च, "निरवद्यं निरञ्जनम्"[1], "सत्यं ज्ञानमनन्तं ब्रह्म"[2] इत्यादिना ब्रह्मणो निर्विकारत्वम्, एवमेव "तदात्मानं स्वयमसृजत"[3], "तदैक्षत बहु स्यां प्रजायेय"[4] इत्याद्याः श्रुतयस्तस्य जगद्रूपेण परिणामित्वं बोधयन्ति। तदत्र जिज्ञासा जागर्ति यद् ब्रह्म परिणमते न वेति। अत्र द्वैतवादिनो ब्रह्मण उपादानत्वे तस्य विकारित्वापत्तिरिति निमित्तकारणत्वम्, अद्वैतिनो विवर्तोपादानत्वं च प्रतिपादयन्ति। अत्रोभयत्र प्रपञ्चं प्रति ब्रह्मणः साक्षादुपादानत्वाप्रतिपादनात् साक्षादुपादानत्वप्रतिपादिकानां "बहु स्यां प्रजायेय", "तदात्मानं स्वयमसृजत" इत्यादिश्रुतीनां निरर्थकत्वमेव भवति। अपरं च ब्रह्मणः प्रपञ्चोपादानत्वाभावे "एकविज्ञानेन सर्वविज्ञानम्" इत्यौपनिषदसिद्धान्तोऽपि व्यर्थतामियात्। शक्तिविशिष्टाद्वैतसिद्धान्ते तु कूर्माङ्गभङ्गि-अहिकुण्डल-स्वर्णकुण्डलादिन्यायेनाविकृतपरिणामवादस्वीकारात् तस्य निर्विकारित्वम्, परिणाम्युपादानत्वं च संभवतीत्यत्र ब्रह्मणो निर्विकारित्वपरिणामित्वप्रतिपादिकयोरुभयविधश्रुत्योः समन्वयः, तथैकविज्ञानेन सर्वविज्ञानप्रतिपादकसिद्धान्तस्यापि सार्थकत्वमिति ज्ञेयम्।

अपरं च, "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय"[5] इति श्रुतिर्ज्ञानातिरिक्तस्य मोक्षसाधनत्वं निषेधति। पुनः—"विद्यां चाविद्यां च यस्तद्वेदोभयं सह"[6] इति श्रुतिः कर्मणोऽपि मोक्षसाधनत्वं प्रतिपादितवती। अतोऽत्र जिज्ञासा भवति किं केवलाद् ज्ञानान्मोक्षः? उत कर्मज्ञानाभ्यामिति। अत्र द्वैतवादिनो मीमांसकाः केवलेन नित्यनैमित्तिकेन कर्मणा मोक्ष इति,

---

१. श्वे. उ. ६।१९
२. तैत्ति. उ. २।१।१
३. तैत्ति. उ. २।७
४. छा. उ. ६।२।३
५. श्वे. उ. ३।८
६. ई. उ. ११

अद्वैतवादिनः शाङ्करवेदान्तिनः, काश्मीरशैवाश्च ज्ञानमात्रेण मोक्ष इति प्रतिपादयन्ति। तेषां मते कर्मणा ज्ञानेन वा मोक्षप्रतिपादिकानां श्रुतीनां समन्वये सत्यपि ज्ञानकर्मणोः समसमुच्चयप्रतिपादिकानां श्रुतीनां समन्वयाभावः। शक्तिविशिष्टाद्वैतवेदान्ते तु—

अन्धपङ्गुवदन्योन्यसापेक्षे ज्ञानकर्मणी।
फलोत्पत्तौ विरक्तस्तु तस्मात्तद्द्वयमाचरेत्॥
ज्ञाने सिद्धेऽपि विदुषां कर्मापि विनियुज्यते।
फलाभिसन्धिरहितं तस्मात् कर्म न सन्त्यजेत्॥[१]

इति श्रीरेणुकभगवत्पादोक्त्या स्वेष्टलिङ्गपूजारूपं नित्यं कर्म शिवज्ञानं चेत्युभयोः समसमुच्चयत्वं स्वीक्रियत इति मोक्षसाधनत्वेन प्रतिपादितयोरुभयविधश्रुत्योः समानरूपेण प्रामाण्यमपि सम्भवतीत्युभयविधश्रुतिसमन्वयोऽत्र भवतीति निश्चप्रचम्। एवमेव यत्र यत्र द्वैताद्वैतदर्शनानि परस्परं विरुद्धार्थयोः श्रुत्योर्विषये कलहायन्ते, तत्र तत्र सर्वत्र वीरशैवाचार्याः समन्वयदृष्ट्या कलहं निवारयन्ति। एतादृशानां बहूनां श्रुतीनां समन्वयं श्री टी० जी० सिद्धप्पाराध्याः सम्यक् प्रदर्शितवन्तः[२]। अस्माभिरपि प्रकृते प्रबन्धे प्रसङ्गानुसारं तत्र तत्र प्रदर्शितम्।

इतरभेदाभेदवादिमतेभ्योऽस्य वैलक्षण्यम्

वेदान्तप्रस्थाने भास्कराचार्या यादवप्रकाशाचार्याश्च भेदाभेदवादिन इति प्रसिद्धाः। उपर्युक्तप्रकारेण द्वैताद्वैतश्रुतीनां समन्वयप्रतिपादकं वीरशैवदर्शनमपि भेदाभेदमतमङ्गीकरोति। अथापीदं भास्करयादवप्रकाशमताभ्यां भिन्नम्। भेदाभेदवादिभास्कराचार्यमते न सर्वश्रुतिसमन्वयः सम्भवति। यतो हि अचिद्-ब्रह्मणोर्भेदाभेदं स्वाभाविकं मन्यमानास्ते जीव-ब्रह्मणोर्भेद औपाधिकोऽभेदश्च स्वाभाविक इत्यभ्युपगच्छन्ति। तेषामयं वादो ब्रह्मसूत्रीयभास्करभाष्यस्य ज्ञानाधिकरण-अंशाधिकरण-अविभागदृष्टत्वाधिकरणेषु द्रष्टव्यः। मुक्तौ जीवशिवयोरभेदस्य प्रतिपाद्यमानत्वाद् भेदस्य वास्तविकत्वे तन्निवृत्तिर्न स्यादिति तेषामाशयः। सत्यस्यापि भेदस्य निवृत्तिरङ्गीक्रियते भृङ्गकीटन्यायेन वीरशैवैः। अतो जीवस्य बन्धमुक्तावस्थायां यथा द्वैताद्वैतश्रुत्योर्मुख्यार्थप्रतिपादनेनैव समन्वयः क्रियते वीरशैवैस्तथा भास्कराचार्यैर्न क्रियत इत्ययं विशेषः।

---

१. सि. शि. १६।११-१२

२. श. वि. द, पृ. २२४–२४२

भास्कराचार्याणां श्रुतिसमन्वयसिद्धान्तेऽस्वारस्यमनुभूय यादवप्रकाशाचार्या भिन्नरीत्या भेदाभेदसिद्धान्तं प्रतिपादयामासुः[1]। एते पूर्वाश्रमे रामानुजाचार्याणां गुरव आसन्। यदा रामानुजाचार्यैर्विशिष्टाद्वैतं प्रतिष्ठापितम्, तदा यादवप्रकाशाचार्यास्तेन प्रभाविताः सन्तो विशिष्टाद्वैतिनोऽभूवन्। अत एव एतेषां भाष्यं लुप्तप्रायं जातम्। श्रीरामानुजाचार्याः श्रीभाष्यस्य विलक्षणत्वाधिकरणे, तदनन्यत्वाधिकरणे, वेदार्थसंग्रहे च यावदवप्रकाशमतं सारेण प्रस्तावितवन्त इति श्री टी० जी० सिद्धप्पाराध्यास्तन्मतं वीरशैवमतस्य नितान्तं सदृशमित्यभिप्रयन्ति[2]। अथापि वेदार्थसंग्रहस्य तात्पर्यदीपिकायां व्याख्यायां मुक्तावस्थायां जीवब्रह्मणोर्भेदाभेद एव यादवप्रकाशसम्मत इति प्रतिपादितत्वाद् मुक्तावभेदप्रतिपादकाद् वीरशैवदर्शनादस्य वैलक्षण्यं सुस्पष्टमेव भवति।

तदेवं केवलाद्वैत-द्वैत-विशिष्टाद्वैत-भेदाभेदमतेभ्यो विलक्षणमिदं शक्तिविशिष्टाद्वैतदर्शनं सर्वश्रुतिसमन्वयात्मकभेदाभेदसिद्धान्तप्रतिपादकमिति मन्तव्यम्।

इह खलु मानवमात्रस्य कल्याणाय दार्शनिकक्षेत्रे सामाजिकक्षेत्रे चानादिकालादेव दार्शनिकानां सामाजिकशास्त्रज्ञानां च प्रयासः प्रवर्तते। तत्रास्ति समन्वयवादिनां वीरशैवाचार्याणामग्रस्थानम्। द्वैतमतम्, अद्वैतमतं चावलम्ब प्रवृत्तेष्वितरदर्शनेषु मिथः कलहोऽनादिकालादेव प्रवृत्तः। तत्त्वज्ञेषु परस्परकलहश्चेत् तदुपदिष्टतत्त्वेषु कथं जना विश्वसेयुरिति विचार्य वीरशैवाचार्या द्वैताद्वैतयोः समन्वयार्थं वीरशैवसिद्धान्तं प्रतिष्ठापयामासुः। तेषां समन्वयसिद्धान्तस्य यावानादरो लोके तत्प्रतिष्ठापनवेलायामासीत्, तावानेवाऽधुनाऽपि विद्यते। समन्वयवादिनः समाजे सदा समादरणीया भवन्त्येव।

वीरशैवसिद्धान्ते प्रतिपादितानामष्टावरणानां पञ्चाचाराणां चाद्यतनसमये नितान्तमावश्यकता वर्तते। कलिकालमहिम्ना लोकेषु गुरुदेवतादिषु श्रद्धा ह्रासोन्मुखी दृश्यते। जराजीर्णशरीरस्थाः प्राणा इवाऽऽचाराः क्षीणतमाः सञ्जाताः। एतत्समये मनुष्या यद्यावरणयुक्ता आचारशीला न भवेयुस्तर्हि मनुष्यत्वस्य रक्षा कथमपि भवितुं नार्हति। पूज्यानां गुरुदेवतादीनामाशीर्वादोऽस्माकं भद्रं कवचम्। एतत्कवचावृतो मनुष्यः सर्वत्र विजयमाप्नोति। शरीरे धार्यमाणानि बाह्यानि धार्मिकचिह्नानि भस्मरुद्राक्षादीन्यपि रक्षाकवचान्येव।

---

१. श. वि. द., पृ. ६२

२. श. वि. द., पृ. ६३

यद्यप्यद्यतनसमये बाह्यधार्मिकचिह्नान्यवलम्ब्यैव कलहः प्रवर्तते, तथाप्ययं न धर्मज्ञानाम्, किन्तु धर्मान्धानां प्रदुष्टराजनीतिप्रेरितानां कुत्सितो व्यवहार इति बोध्यम् । एतन्निवृत्तये सर्वैरपि धर्माचार्यैः सम्भूय प्रयतितव्यम् । अद्यतनसमये वीरशैवाचार्यास्तत्र सर्वधर्मसम्मेलनादिकं कृत्वा तदर्थं प्रयतमानाः सन्ति । समन्वयवादिभिर्वीरशैवाचार्यैः प्रतिपादिताया आचारसंहिताया निष्ठया सर्वैर्यदि परिपालनं क्रियेत, तर्हि सर्वासां सामाजिकसमस्यानां सरलतया परिहारो जायेत । अतोऽत्र प्रतिपादितानामावरणानामाचाराणां चाद्यतनसमयेऽपि नितान्तमावश्यकता प्रतीयते खलु । तदाचरणप्रचारणसङ्कल्पवद्भिरस्माभिरन्ते—

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः ।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखमाप्नुयात् ॥

इति प्राणिमात्रस्य कल्याणभावनामुद्भाव्य विरम्यतेऽस्माद् वाग्व्यापारादिति शिवम् ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

सहायकग्रन्थसूची

संस्कृत

१. अर्थसंग्रहः, चौखम्बा संस्कृत सीरोज, वाराणसी १९७६ ई० ।

२. अद्वैतसिद्धिः, निर्णयसागर प्रेस, बम्बई १९३७ ई० ।

३. अनुभवसूत्रम्, (तन्त्रसंग्रहः, भाग १) सं. सं. वि वि., वाराणसी १९७० ई० ।

४. अभिज्ञानशाकुन्तलम्, चौखम्बा ओरियण्टालिया, वाराणसी १९८७ ई० ।

५. अमरकोशः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९८४ ई० ।

६. अष्टप्रकरणम्, सं. सं. वि. वि., वाराणसी १९८८ ई० ।

७. आगममीमांसा, ला. बा. के. संस्कृतविद्यापीठम्, नई दिल्ली १९८२ ई० ।

८. ईशाद्यष्टोत्तरशतोपनिषदः, नि. सा. प्रेस, बम्बई १९२५ ई० ।

९ ईशावास्योपनिषत्, (शाङ्करीव्याख्यासहिता) शङ्करविलास संस्कृत पाठशाला, मैसूर १९७६ ई० ।

१०. ईश्वरप्रत्यभिज्ञाविमर्शिनी, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९१८-२१ ई० ।

११ ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी ,, ,, १९३८-४१ ई० ।

१२. उपनिषद्वाक्यमहाकोशः, भाग १-२, गुजरात प्रिन्टिग प्रेस, बम्बई १९४० ई० ।

१३. ऋग्वेदसंहिता, वैदिक संशोधन मण्डल, पूना १९४१ ई० ।

१४. एकाक्षरनामकोषसंग्रहः, राजस्थान प्राच्यविद्या प्रतिष्ठान, जोधपुर १९६४ ई० ।

१५. कारणागमः, पञ्चाचार्य इ० प्रेस, मैसूर १९५६ ई० ।

१६. क्रियासारः, भाग १-३, ओ. आर. आय्. मैसूर, १९५४,५७,५८ ई० ।

१७. चन्द्रज्ञानागमः, पञ्चाचार्य इ. प्रेस, मैसूर १९५६ ई० ।

१८. तत्त्वप्रकाशः, (अष्टप्रकरणम्) सं. सं. वि. वि., वाराणसी १९८८ ई० ।

१९. तत्त्वसंग्रहः, ,, ,, ,, ,, ,,

२०. तन्त्रयात्रा, रत्ना पब्लिकेशन्स, वाराणसी १९८२ ई० ।

२१. तन्त्रवार्त्तिकम्, (शाबरभाष्यव्याख्या) भाग २-४, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूना १९८१-१९८४ ई० ।

२२. तन्त्रसारः, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९१८ ई० ।

२३. तन्त्रालोकः, भाग. १-१२ ,, ,, १९१८-१९२२ ई० ।

२४. नारदभक्तिसूत्रम्, गीताप्रेस, गोरखपुर २०३९ वि. सं. ।

२५. नित्याषोडशिकार्णवः, (द्वितीयसंस्करणम्) सं. सं. वि. वि., वाराणसी, १९८४ ई० ।

२६. नेत्रतन्त्रम्, परिमल पब्लिकेशन्स, दिल्ली १९८५ ई० ।
२७. न्यायकोशः, भण्डारकर प्राच्यविद्या संशोधनालय, पूना १९२८ ई० ।
२८. न्यायसारः, निर्णयसागर प्रेस, बम्बई १९१० ई० ।
२९. न्यायसूत्रभाष्यम् (न्यायदर्शनम्) चौ. सं. सं. वाराणसी १९७० ई० ।
३०. पञ्चदशी, भार्गव पुस्तकालय, वाराणसी १९५६ ई० ।
३१. पद्मपुराणम्, मनसुखराय मोर, कलकत्ता १९५७ ई० ।
३२. परमार्थसारः, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९१६ ई० ।
३३. परमोक्षनिरासकारिका (अष्टप्रकरणम्), सं. सं. वि. वि., वाराणसी १९८८ ई० ।
३४. पारमेश्वरतन्त्रम्, वीरशैवलिङ्गिब्राह्मण ग्रन्थमाला, सोलापुर १९०४ ई० ।
३५. पराशरस्मृतिः, श्रीवेङ्कटेश्वर स्टीम प्रेस, बम्बई १९८१ वि. सं. ।
३६. प्रत्यभिज्ञाहृदयम्, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९११ ई० ।
३७. प्रबोधसुधाकरः, ओरिएन्टल बुक एजेन्सी, पूना, १९५२ ई० ।
३८. प्रशस्तपादभाष्यम्, (न्यायकन्दल्या सहितम्) सं. सं. वि. वि, वाराणसी १९७७ ई० ।
३९. बृहन्नारदीयपुराणम्, नाग पब्लिकेशन्स, दिल्ली १९८४ ई० ।
४०. ब्रह्मसूत्रशाङ्करभाष्यम् (भामतीसहितम्) नि. सा. प्रे., बम्बई १९०९ ई० ।
४१. ब्रह्मसूत्रश्रीकरभाष्यम्, भा. १-२, ओ. आर्. आय्, मैसूर १९७७ ई० ।
४२. ब्रह्मसूत्रश्रीकण्ठभाष्यम्, शिवार्कमणिदीपिकासहितम्, (चतुःसूत्रीभागः) जंगमवाडी मठ, वाराणसी १९८६ ई० ।
४३. भक्तिरसविमर्शः, डा. कपिलदेव ब्रह्मचारी, आचार्य गद्दी, फतुहा, पटना १९८० ई० ।
४४. भगवद्गीता, अच्युत ग्रन्थमाला, वाराणसी २०२३ वि. सं. ।
४५. भास्करी, सरस्वती भवन टेक्स्ट न. ८३, इलाहाबाद १९५० ई० ।
४६. भोगकारिका, (अष्टप्रकरणम्) सं. सं. वि. वि., वाराणसी १९८८ ई० ।
४७. मतङ्गपारमेश्वरागमः, फ्रेंच इंस्टीटयूट, पाण्डिचेरी १९७७ ई० ।
४८. मनुस्मृतिः, खेमराज श्रीकृष्णदास, बम्बई १९४५ वि. सं. ।
४९. महार्थमञ्जरी, सं. सं. वि. वि., वाराणसी १९७२ ई० ।
५०. महानारायणोपनिषत्, शैवभाष्योपेता, जंगमवाडी मठ, वाराणसी १९२९ ई० ।
५१. महाभारतम्, (षष्ठ खण्ड) गीता प्रेस, गोरखपुर २०४४ वि. सं. ।
५२. महिम्नःस्तोत्रम्, चौखम्बा संस्कृत संस्थान, वाराणसी १९८३ ई० ।
५३. मालिनीविजयोत्तरतन्त्रम्, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९२२ ई० ।
५४. मीमांसान्यायप्रकाशः, भाण्डारकर प्राच्यविद्या संशोधनालय, पूना १९७२ ई० ।

५५. मृगेन्द्रागमः, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९३० ई० ।
५६. मोक्षकारिका, (अष्टप्रकरणम्) सं. सं. वि. वि., वाराणसी १९८८ ई० ।
५७. योगिनीहृदयम्, मातीलाल बनारसीदास, वाराणसी १९८८ ई० ।
५८. योगसूत्रभाष्यम्, जीवानन्द विद्यासागर, कलकत्ता १९४० ई० ।
५९. रघुवंशमहाकाव्यम्, छुन्नूलाल ज्ञानचन्द पाठक, वाराणसी १९५९ ई० ।
६०. रत्नत्रयम्, (अष्टप्रकरणम्) सं. सं. वि. वि., वाराणसी १९८८ ई० ।
६१. रौरवागमः, फ्रेंच इन्स्ट्रीट्यूट, पाण्डिचेरी १९६१ ई० ।
६२. लिङ्गधारणचन्द्रिका (द्वितीय संस्करणम्), शैवभारती-भवनम्, जंगमवाड़ी मठ, वाराणसी १९८८ ई० ।
६३. लिङ्गपुराणम्, पुव्वाड वेङ्कटराय, काञ्ची, १८७९ ई०
६४. लुप्तागमसंग्रहः, भा. २, सं. सं. वि. वि., वाराणसी १९८३ ई० ।
६५. वाचस्पत्यम्, (प्रथमखण्डम्) तारानाथ तर्कवाचस्पति भट्टाचार्य, कलकत्ता १८७३ ई० ।
६६. वातुलशुद्धाख्यतन्त्रम् (तन्त्रसंग्रहः, भा. १), सं. सं. वि. वि., वाराणसी १९७० ई० ।
६७, वायुपुराणन्, खेमराज श्रीकृष्णदास, बम्बई १९३३ ई० ।
६८. विज्ञानभैरवः (द्वितीयसंस्करणम्), मोतीलाल बनारसी दास, वाराणसी १९८४ ई० ।
६९. विवेकचूडामणिः, ओरियण्टल् बुक एजेन्सी, पूना १९५२ ई० ।
७०. वीरशैवसदाचारसंग्रहः, वी. लि. ग्रा. ग्रन्थमाला, सोलापुर १९०५ ई० ।
७१. वीरशैवानन्दचन्द्रिका, मूरुसविर मठ, हुबली १९३६ ई० ।
७२. वीरशैवाष्टावरणप्रमाणाष्टकाभरणम्, हस्तप्रतिः ।
७३. वेदान्तसारः, निर्णयसागर प्रेस, बम्बई १९३४ ई० ।
७४. वेदान्तसारवीरशैवचिन्तामणिः, वी. लि. ग्रा. ग्रन्थमाला, सोलापुर १९०५ ई० ।
७५. वैदिकशिवपूजाविधिः, पञ्चाचार्य. ई. प्रे. मैसूर १९८२ ई० ।
७६. वैराग्यशतकम्, चौखम्बा विद्याभवन, वाराणसी १९६७ ई० ।
७७. वैशेषिकसूत्रम्, (उपस्कारसहितम्), चौ. स. सं. वाराणसी १९६९ ई० ।
७८. शक्तिविशिष्टाद्वैतदर्शनम्, रंभापुरी संस्थान मठ, बालेहोन्नूर १९६१ ई० ।
७९. शतरत्नसंग्रहः, संस्कृत पुस्तक भंडार, कलकत्ता १९४४ ई० ।
८०. शब्दकल्पद्रुमः, राजा राधाकान्तदेव बहादुर, कलकत्ता १८८६ ई० ।
८१. शाण्डिल्यभक्तिसूत्रम्, गीता प्रेस, गोरखपुर २००९ वि. सं. ।
८२. शारदातिलकम्, आगमानुसन्धान समिति, कलकत्ता १९३३ ई०
८३. शिवगीता, पीताम्बरा पीठ, दतिया १९६० ई० ।

८४. शिवतत्त्वरत्नाकरः, भा. १-२, ओ. आर. आय्. मैसूर १९६४, ६९ ई० ।
८५. शिवदृष्टिः, काश्मीरसंस्कृतग्रन्थावलिः, श्रीनगर १९३४ ई० ।
८६. शिवमहापुराणम्, पण्डित पुस्तकालय, काशी २०२० वि. सं. ।
८७. शिवसूत्रम् (विमर्शिनीसहितम्), काश्मीर संस्कृत ग्रन्थावलिः, श्रीनगर १९६८ ई० ।
८८. शिवार्चनचन्द्रिका, शिवागमसंघ, देवसालनगर, १९२२ ई० ।
८९. शिवाद्वैतदर्पणः, पूवल्ली बृहन्मठ ग्रन्थमाला, हुली १९२८ ई० ।
९०. शिवाद्वैतपरिभाषा, जंगमवाडी मठ, वाराणसी १९८३ ई० ।
९१. शैवदर्शनबिन्दुः, सं. सं. वि. वि., वाराणसी १९६८ ई० ।
९२. श्रीमद्भागवतम्, भागवत विद्यापीठ, अहमदाबाद २०२९ वि. सं. ।
९३. सर्वदर्शनसंग्रहः चौ. वि. भवन, वाराणसी १९६४ ई० ।
९४. सर्वदर्शनसंग्रहः, भाण्डारकर प्राच्यविद्या संशोधन मन्दिर, पूना १९२४ ई० ।
९५. सारस्वती सुषमा (त्रैमासिकी अनुसन्धान पत्रिका), सं. सं. वि. वि., वाराणसी ।
९६. सिद्धान्तशिखामणिः, जंगमवाडी मठ, वाराणसी १९८६ ई० ।
९७. सिद्धान्तशिखामणिः, तत्त्वप्रदीपिकाव्याख्यासहितः, भाग १-२, वी० लिं० ब्रा० ग्रन्थमाला, सोलापुर १९०५ ई० ।
९८. सिद्धान्तशिखामणिः, तात्पर्यदीपिकाख्यकन्नडव्याख्यासहितः, एन्० आर० करिबसव शास्त्री, मैसूर १९२१ ई० ।
९९. सिद्धान्तशिखोपनिषद्वीरशैवभाष्यम्, शङ्करविलास संस्कृत पाठशाला, मैसूर १९८५ ई० ।
१००. सूक्ष्मागमः, पञ्चाचार्य इलेक्ट्रिक् प्रेस्, मैसूर १९५६ ई० ।
१०१. स्कन्दपुराणम्, खेमराज श्रीकृष्णदास, बम्बई १९६५ वि० सं० ।

हिन्दी

१०२. आगम और तन्त्रशास्त्र, पं० व्रजवल्लभ द्विवेदी, परिमल पब्लिकेशन्स, दिल्ली १९८४ ई० ।
१०३. गो-अंक, (कल्याण विशेषांक) गीता प्रेस, गोरखपुर १९४५ ई०
१०४. भारतीय दर्शन, पं० बलदेव उपाध्याय, शारदा मन्दिर, वाराणसी १९६० ई० ।
१०५. भारतीय संस्कृति और साधना, म० म० गोपीनाथ कविराज, बिहार राष्ट्रभाषा परिषत्, पटना १९६३ ई० ।
१०६. शक्तिविशिष्टाद्वैतसिद्धान्त, पं. काशीनाथ शास्त्री, काशी वीरशैव विद्वत्संघ, जंगमवाडी मठ, वाराणसी १९३७ ई० ।
१०७. शंकरदिग्विजय, पं बलदेव उपाध्याय, श्री श्रवणनाथ ज्ञानमन्दिर, हरद्वार २०४२ वि. सं. ।

१०८. शिवांक, (कल्याण विशेषांक) गीता प्रेस, गोरखपुर १९३३ ई० ।

१०९. हिन्दी विश्वकोश, नागेन्द्रनाथ वसु एण्ड विश्वनाथ वसु, कलकत्ता १९३० ई० ।

११०. हिन्दुत्व, रामदास गौड, शिवप्रसाद गुप्त सेवा उपवन, वाराणसी १९९५ वि. सं. ।

कन्नड

१११. अष्टावरणविवेक, श्री शम्भुलिंग शिवाचार्य, बीजापुर १९२३ ई. ।

११२. इष्टलिंगविज्ञान, श्री अक्कुलय्य दीक्षित, प्रबोध पुस्तकमाला, बेंगलोर १९४६ ई० ।

११३. वीरशैवचिन्तामणि, कर्नाटक विश्वविद्यालय, धारवाड़ १९७१ ई० ।

११४. शिवतत्त्वदर्शन, श्रीगुरुदेव शिवाचार्य, शंकर आर्ट्‌स कालेज, नवलगुन्द १९७२ ई० ।

मराठी

११५. परम रहस्य, श्री मन्मथ स्वामी, वीरमठ, अहमदपुर १९७४ ई० ।

११६. वीरशैवरत्न, पं. काशीनाथ शास्त्री, शैवभारती भवन, जंगमवाडी मठ, वाराणसी १९५२ ई० ।

अंग्रेजी

११७. अभिनव गुप्त : एन हिस्टोरिकल एण्ड फिलासफिकल स्टडी (द्वि. सं.) डॉ० कान्तिचन्द्र पाण्डेय, चौ. सं. सिरीज, वाराणसी १९६३ ई० ।

११८. ए हैण्डबुक आफ वीरशैविज्म, एस् सी. नन्दीमठ, मोतीलाल बनारसीदास, दिल्ली १९७९ ई० ।

११९. ए हिस्ट्री आफ साउथ इण्डिया, के. ए. नीलकण्ठ शास्त्री, आक्सफोर्ड युनिवर्सिटी प्रेस, १९६६ ई० ।

१२०. क्रम तान्त्रिसिज्म आफ काश्मीर, मोतीलाल बनारसीदास, दिल्ली १९७९ ई० ।

१२१. दी इण्डियन रिव्यू, (जर्नल), वाल्यूम १६, मई १९१५, मद्रास ।

सङ्केतसूची

अ. को.	अमरकोशः
अथ. उ.	अथर्वशिखोपनिषत्
अनु.	अनुशासनपर्व
अ. प्र.	अष्टप्रकरणम्
अ. भि.	अभिज्ञानशाकुन्तलम्
अभि.	अभिनवगुप्त–एन हिस्टारिकल एण्ड फिलासफिकल स्टडी
अभि. शा.	अभिज्ञानशाकुन्तलम्
अ. मा. उ.	अक्षमालोपनिषत्
अ. वि.	अष्टावरणविवेकः
अ. शिखो.	अथर्वशिखोपनिषत्
अ. सू.	अनुभवसूत्रम्
अ. सि.	अद्वैतसिद्धिः
अ. सं.	अर्थसंग्रह
आ.	आह्निकम्
आगम.	आगमप्रकरणम्
आ. त.	आगम और तन्त्रशास्त्र
आदि.	आदिपर्व
आ. मी.	आगममीमांसा
आश्व.	आश्वमेधिकपर्व
इ. वि.	इष्टलिङ्ग विज्ञान
ई. उ. शा.व्या.	ईशावास्योपनिषत् शाङ्करीव्याख्या
ई. प्र. वि.	ईश्वरप्रत्यभिज्ञाविमर्शिनी
ई.प्र.वि.वि.	ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी
उ. भा.	उत्तरभागः
उपो.	उपोद्घातः
ऋ.	ऋग्वेदः
ऋग्वे.	”
एका. को.	एकाक्षरकोशः
कठो.	कठोपनिषत्
का. आ.	कारणागमः
काला. उ.	कालाग्निरुद्रोपनिषत्
क्रम.	क्रम तान्त्रिसिज्म आफ काश्मीर
क्रि.	क्रियापादः
क्रि. सा.	क्रियासारः
के.	केदारखण्डः
कै. उ.	कैवल्योपनिषत्
कौषी.	कौषीतकिब्राह्मणोपनिषत्
च. ज्ञा.	चन्द्रज्ञानागमः
छा. उ.	छान्दोग्योपनिषत्
टी.	टीका
तत्त्व.	तत्वप्रकाशिकाव्याख्या (सिद्धान्तशिखामणेः)
तन्त्रा.	तन्त्रालोकः
त. प्र.	तत्त्वप्रकाशः
त. या.	तन्त्रयात्रा
त. वा.	तन्त्रवार्त्तिकम्
त. सा.	तन्त्रसारः
त. सं.	तत्त्वसंग्रहः
ता.	तात्पर्यदीपिका (तत्त्वप्रकाशिकाया व्याख्या)
तै. आ.	तैत्तिरीयारण्यकम्

तै. उ.	तैत्तिरीयोपनिषत्
तै. सं.	तैत्तिरीयसंहिता
दी.	दीपिका (योगिनीहृदयव्याख्या)
ना. भ. सू.	नारदभक्तिसूत्रम्
नि. षो.	नित्याषोडशिकार्णवः
ने. त.	नेत्रतन्त्रम्
न्या. क.	न्यायकन्दली
न्या. को.	न्यायकोशः
न्या. सा.	न्यायसारः
न्या. सू.	न्यायसूत्रम्
प.	परिमलः (महार्थमञ्जरीव्याख्या)
प. मो. नि.	परमोक्षनिरासकारिका
प. र.	परम रहस्य
प. सा.	परमार्थसारः
पञ्च.	पञ्चदशी
पद्मपु.	पद्मपुराणम्
पा. त.	पारमेश्वरतन्त्रम्
पारा. स्मृ.	पाराशरस्मृतिः
प्र. पा. भा.	प्रशस्तपादभाष्यम्
प्रश्नो.	प्रश्नोपनिषत्
प्र. सु.	प्रबोधसुधाकरः
प्र. हृ.	प्रत्यभिज्ञाहृदयम्
प्रत्यभि. वि.	प्रत्यभिज्ञाविमर्शिनी
प्रा.	प्रास्ताविकम्
बृ. उ.	बृहदारण्यकोपनिषत्
बृ. जा. उ.	बृहज्जाबालोपनिषत्
बृ. ना. पु.	बृहन्नारदीयपुराणम्
ब्र. बि.	ब्रह्मबिन्दूपनिषत्
ब्र. सू.	ब्रह्मसूत्रम्
ब्र. सू. भा.	ब्रह्मसूत्रभामतीटीका
ब्र. सू. श्री.	ब्रह्मसूत्रश्रीकरभाष्यम्
ब्र.सू. श्रीकण्ठ.	ब्रह्मसूत्रश्रीकण्ठभाष्यम्
बो. प.	बोधपञ्चदशिका
भ. गी.	भगवद्गीता
भ. र. वि.	भक्तिरसविमर्शः
भ. सं. उ.	भवसन्तरणोपनिषत्
भा.	भागः
भा. द.	भारतीय दर्शन
भा. सं. सा.	भारतीय संस्कृति और साहित्य
भागव.	श्रीमद्भागवतम्
भास्क.	भास्करी
भू.	भूमिका
भो. का.	भोगकारिका
मतङ्ग.	मतङ्गपारमेश्वरागमः
म. ना. उ.	महानारायणोपनिषत्
म. भा.	महाभारतम्
म. म.	महार्थमञ्जरी
म. स्तो.	महिम्नस्तोत्रम्
म. स्मृ.	मनुस्मृतिः
महाना.	महानारायणोपनिषद्
मा. उ. का.	माण्डूक्योपनिषत्कारिका
मा. वि.	मालिनीविजयोत्तरम्
मी. प्र.	मीमांसान्यायप्रकाशः
मुण्ड.	मुण्डकोपनिषत्
मृ. वि.	मृगेन्द्रागमविद्यापादः
मो. का.	मोक्षकारिका
यो. शि. उ.	योगशिखोपनिषत्
यो. सू.	योगसूत्रम्
यो. सू. भा.	योगसूत्रभाष्यम्
यो. हृ.	योगिनीहृदयम्

र. त्र.	रत्नत्रयपरीक्षा
रघु.	रघुवंशमहाकाव्यम्
रु. जा. उ.	रुद्रजाबालोपनिषत्
रौ. वि.	रौरवागमविद्यापादः
ल.	लघुचन्द्रिका (अद्वैतसिद्धि-व्याख्या)
लिङ्गा.	लिङ्गाष्टकस्तोत्रम्
लि. च.	लिङ्गधारणचन्द्रिका
लि. पु.	लिङ्गपुराणम्
लु. सं.	लुप्तागमसंग्रहः
व. सू उ.	वज्रसूचिकोपनिषत्
वा.	वायुसंहिता
वा. त.	वातुलशुद्धाख्यतन्त्रम्
वा. पु.	वायुपुराणम्
वा. शु. आ.	वातुलशुद्धागमः
वाच.	वाचस्पत्यम्
वि.	विवृतिः (विज्ञानभैरवस्य व्याख्या)
वि. चू.	विवेकचूडामणिः
विद्ये.	विद्येश्वरसंहिता (शिवपुराणीया)
वि. भै.	विज्ञानभैरवम्
वी. अ. प्र म.	वीरशैवाष्टावरणप्रमाणाष्टकाभरणम्
वी. आ. च.	वीरशैवानन्दचन्द्रिका
वी. आ. प्र.	वीरशैवानन्दप्रदीपिका
वी. च.	वीरशैवानन्दचन्द्रिका
वी. चि.	वीरशैवचिन्तामणिः
वी. भा.	वीरशैवभाष्यम्
वी. र.	वीरशैवरत्नम्
वी. स. सं.	वीरशैवसदाचारसंग्रहः
वृ.	वृत्तिः
वे. सा.	वेदान्तसारः
वे. सा. वी. चि.	वेदान्तसारवीरशैवचिन्तामणिः
वै. भा.	वैष्णवमताब्जभास्करः
वै. श.	वैराग्यशतकम्
वै. शि. वि.	वैदिकशिवपूजाविधिः
वै. सू.	वैशेषिकसूत्रम्
श.	शङ्करसंहिता
श. क.	शब्दकल्पद्रुमः
श. दि.	शङ्करदिग्विजयः
श. र. सं.	शतरत्नसंग्रहः
श. वि. द.	शक्तिविशिष्टाद्वैतदर्शनम्
श. वि. सि.	शक्तिविशिष्टाद्वैतसिद्धान्तः
शाट्या.	शाट्यायनोपनिषत्
शाण्डि. / शाण्डि. उ.	शाण्डिल्योपनिषत्
शा. ति.	शारदातिलकम्
शा. भ. सू.	शाण्डिल्यभक्तिसूत्रम्
शि. गी.	शिवगीता
शि. च.	शिवार्चनचन्द्रिका
शि. त. द.	शिवतत्त्वदर्शनम्
शि. द.	शिवाद्वैतदर्पणः
शि. दृ.	शिवदृष्टिः
शि. प.	शिवाद्वैतपरिभाषा
शि. पु.	शिवमहापुराणम्
शि. म. दी.	शिवार्कमणिदीपिका (श्रीकण्ठभाष्यव्याख्या)
शि. र.	शिवतत्त्वरत्नाकरः
शि. ल.	शिवानन्दलहरी
शि. सू.	शिवसूत्रम्

शै. द. बि.	शैवदर्शनबिन्दुः	सि. शिखो.	सिद्धान्तशिखोपनिषत्
श्रीरुद्र.	श्रीरुद्राध्यायः	सुबालो.	सुबालोपनिषत्
श्वे. उ.	श्वेताश्वतरोपनिषत्	सु. भा.	सुभाषितरत्नभाण्डागारम्
स. द सं.	सर्वदर्शनसंग्रहः	सू क्षा.	सूक्ष्मागमः
सा. सु.	सारस्वती सुषमा	स्क. पु	स्कन्दपुराणम्
सि. उ.	सिद्धान्तशिखोपनिषत्	हि. वि. को.	हिन्दी विश्वकोश
सि. शि.	सिद्धान्तशिखामणिः	हिन्दु.	हिन्दुत्व

इतः प्रकाशिता अन्ये ग्रन्थाः

१. लिङ्गधारणचन्द्रिका (हिन्दी-भाषानुवादसहिता)। रु० १५०.००

२. सिद्धान्तशिखामणिः, तत्त्वप्रदीपिकाख्यसंस्कृतव्याख्यासहितः (मराठीभाषानुवाद-सहितश्च) संपा० ज० डॉ० चन्द्रशेखर-शिवाचार्यमहास्वामी। रु० २५०.००

३. श्रीकण्ठभाष्यम् (चतुःसूत्री) अप्पयदीक्षितकृतशिवार्कमणिदीपिकाख्य-संस्कृत-टीकासहितम्। रु० १५०.००

४. वीरशैव अष्टावरण विज्ञान (हिन्दी और मराठी) डॉ० चन्द्रशेखर शिवाचार्य महास्वामी। रु० ५०.००

५. सिद्धान्तशिखामणिसमीक्षा, डॉ० चन्द्रशेखर शिवाचार्य महास्वामी रु० २००.००

६. निगमागम संस्कृति (हिन्दी), पं० व्रजवल्लभ द्विवेदी। रु० २००.००

७. सूक्ष्मागमः (हिन्दीभाषानुवादसहितः) संपा० पं० व्रजवल्लभ द्विवेदी। रु० १५०.००

८. चन्द्रज्ञानागमः (हिन्दीभाषानुवादसहितः) संपा० पं० व्रजवल्लभ द्विवेदी। रु० २००.००

९. मकुटागमः (हिन्दीभाषानुवादसहितः) संपा० पं० व्रजवल्लभ द्विवेदी रु० १२५.००

१०. कारणागमः (हिन्दीभाषानुवादसहितः) संपा० प्रो० रामचन्द्र पाण्डेय रु० १७५.००

११. निगमागमीयं संस्कृतिदर्शनम् (संस्कृत) पं० व्रजवल्लभद्विवेदः। रु० ३००.००

१२. पारमेश्वरागमः (हिन्दीभाषानुवादसहितः) संपा० पं० व्रजवल्लभ द्विवेदी। रु० ३५०.००

१३. चन्द्रज्ञानागमः (अंग्रेजी) अनु० डॉ० रमा घोष। रु० ३००.००

१४. शक्तिविशिष्टाद्वैततत्त्वत्रयविमर्शः (संस्कृत) रु० ३००.००

१५. सिद्धान्तप्रकाशिका (हिन्दीभाषानुवादसहिता) रु० १००.००

१६. मकुटागमः (अंग्रेजी अनुवाद) अनु० डॉ० रमा घोष रु० १७५.००

शीघ्रं प्रकाश्याः

१७. ईशावास्योपनिषत्, वीरशैवभाष्यभाषानुवादसहिता।

१८. केनोपनिषत्, वीरशैवभाष्यभाषानुवादसहिता।

१९. सूक्ष्मागमः (अंग्रेजी अनुवाद)।